आशय. आशयः स्यादभिप्राये पनसाधारयोरपि, मे. आशयः स्यादभिप्राये मानसाधारयोरपि, वि. आशय आश्रये। अभिप्रायपनसयोः, हे. आधारेऽप्याशयः प्रोक्तः, ह.

आशर. आशरस्तु पुमान् वैश्वानरे च रजनीचरे, मे.

आशा. आशा तृष्णादिशोः स्त्रियां, मे, त्रि. आशा तृष्णादिशोः प्रोक्ता, वि. आशा ककुभि तृष्णायाम्, हे. आशा तृष्णाऽपि चायता, अ.

आशाबन्ध. आशाबन्धः समाश्वासे पुंसि मर्कटजालके, मे. आशाबन्धः समाश्वासे तथा मर्कटवासके, वि. आशाबन्धः समाश्वासे मर्कटस्य च वाससि, हे.

आशितम्भव. आशितम्भवमन्नाद्ये तृप्तावप्याशितम्भवा, मे. आशितम्भवमन्नाद्ये तृप्तावप्याशितम्भवः, वि. आशितम्भवः। अन्नादौ तृप्तौ च, हे.

आशिस्. आशी र्दन्ते भुजङ्गानां। हिताशंसने स्त्री स्यात्, मे. आशीरुक्ता हिताशंसापवनाशनदंष्ट्रयोः, वि. आशी हिंतैषणा। उरगस्य च दंष्ट्रायां, हे. आशी र्हिताशंसाहिदंष्ट्रयोः, अ.

आशु. आशु र्धान्यान्तरे शीघ्रेऽपि, मे. आशु र्व्रीहौ च सत्वरे, वि. आशुस्तु व्रीहिशीघ्रयोः, हे.

आशुग. आशुगो मारुते बाणेऽपि, मे, वि. आशुगोऽर्के शरे वायौ, हे. आशुगो वायुविशिखौ, अ.

आश्रम. आश्रमो ब्रह्मचर्यादौ वानप्रस्थे वने मठे। अस्त्रियां, मे. आश्रमो ब्रह्मचर्यादिचतुष्केऽपि मठेऽपि च, वि. आश्रमो व्रतिनां मठे। ब्रह्मचर्यादिचतुष्के, हे. मठादौ ब्रह्मचर्यादिचतुष्के चाश्रमोऽस्त्रियां, त्रि.

आश्वयाश. आश्वयाशः पुमान् यज्ञे त्रिषु चाश्वयनाशके, मे. आश्वयाशो ऋतावह्ने भवेदाश्वयनाशके, वि आश्वयाशस्तु यज्ञाश्वयनाशके, हे.

आस्रव. आस्रवोऽक्लीबयोः क्लेशे मान्यवदनस्थिते, मे आस्रवः

स्यात् प्रतिज्ञाने क्लेशे च वचनस्थिते, वि. आश्रवो वचनस्थिते। प्रतिज्ञायां च क्लेशे च, हे. आश्रवोऽङ्गीकृतौ वश्ये, त्रि.

आश्वास. आश्वासः पुंसि निर्वृतौ। आख्यायिकापरिच्छेदे, मे. आश्वासो निर्वृतौ मतः। आख्यायिकापरिच्छेदे, वि. आश्वासः सप्रात् निर्वृतौ। आख्यायिकापरिच्छेदे, हे. आख्यायिकापरिच्छेदे चाश्वासो निर्वृतावपि, त्रि.

आषाढ़. आषाढ़ो व्रतिनां दण्डे मासे मलयपर्वते। स्त्री पूर्णिमायां, मे. आषाढ़ो व्रतिनां दण्डे मासे मलयपर्वते, वि,त्रि. आषाढ़ो मलयगिरौ व्रतिदण्डे च मासि च, हे.

आस्. आस् स्मरणेऽपाकरणे कोपसन्तापयोरपि, मे. आः सप्रात् सन्तापकोपयोः, वि. आः सन्तापप्रकर्षयोः, हे. आस्तु सप्रात् कोपपीड़योः, अ.

आसक्ति. आसक्तिः सङ्गमे लाभे स्त्रियां, मे. आसक्तिः सङ्गमे लाभे, हे. आसक्तिः सङ्गलाभयोः, वि.

आसन. आसनं विष्टरे हस्तिस्कन्धे यात्रानिवर्तने। आसनो जीवकतरावासनी पण्यवीथिका, हे आसनं द्विरदस्कन्धे पीठे यात्रानिवर्तने। आसनो विपणौ स्त्रियामासनो ना तु जीवके, मे. आसनं द्विरदस्कन्धे पीठे यात्रानिवर्तने। आसनी पण्यवीथ्यां सप्राद् आसनो जीवकद्रुमे, वि.

आसन्द. आसन्दो वासुदेवे सप्रात् खट्वाभेदे च योषिति, मे.

आसार. आसारः सप्रात् प्रसरणे वेगवृष्टौ सुहृद्बले, मे, त्रि. आसारः सप्रात् प्रसरणे वेगवर्षे सुहृद्बले, वि. आसारो वेगवर्षे सुहृद्बलप्रसारयोः, हे.

आसुतीवल. आसुतीवल आख्यातः कन्यापालकयज्वनोः, मे. आसुतीवलः। शौण्डिके यज्वनि, हे. दन्त्या शौण्डिकश्चासुतीवलः, त्रि. आसुतीवल इतराख्या कन्यापालकयज्वनोः, वि.

आस्कन्दन. आस्कन्दनं तिरस्कारे रणे संशोषणेऽपि च, मे, वि.

आस्कन्दनं तिरस्कारे संशोषणसमीकयोः, हे

आस्था आस्था त्वालम्बनस्थानयत्नापेक्षासु योषिति, मे आस्था चालम्बनस्थानयत्नापेक्षासु वर्त्तते, वि आस्था यत्नालम्बनयोरास्थानापेक्षयोरपि, हे आस्थानीयत्नयोरास्था, अ अपेक्षाऽलम्बनं चास्था, त्रि

आस्पद आस्पदं पदकृत्ययोः, मे आस्पदं तु पदे कृत्ये, वि आस्पदं कृत्यपदयोः, हे प्रतिष्ठा कृत्यमास्पदं, अ

आस्फोत. आस्फोतन्तु पुमानर्कपर्णे सत्रात् कोविदारके। आस्फोता गिरिकर्ण्यां च वनमल्लयां च योषिति, मे आस्फोतः कोविदारार्कपर्णयोः। आस्फोता गिरिकर्ण्यां च वनमल्लयां, हे आस्फोतस्त्वार्कपर्णे सत्रादास्फोत. कोविदारके। आस्फोता गिरिकर्ण्या सत्राद्वनमल्लयां च विश्रुता, वि

आस्य आस्यं मुखे च तन्मध्ये तद्भवे च स्त्रिया स्थितौ, मे आस्यं वक्त्रे वक्त्रमध्ये स्थितावास्या च विश्रुता, वि आस्यं मुखभवे मुखे। मुखान्तरास्या तु स्थित्यां, हे

आह आह क्षेपनियोगयोः, मे आह क्षेपे नियोगे च, हे आहशब्दो नियोगार्थे क्षेपार्थेऽपि निगद्यते, वि

आहत आहतं गुणिते चापि ताडिते च मृषार्थके। सत्रात् पुरातनवस्त्रेऽपि, मे आहतन्तु मृषार्थके। आहत गुणितेऽपि सत्रात् ताडिते नाभितेऽपि च। सत्रात् पुरातनवस्त्रे च, त्रि आहतं तु मृषार्थके। गुणिते ताडिते चापि, हे आहतं गुणिते हते। मृषोक्ते च, त्रि

आहव आहवो युद्धयज्ञयोः, मे आहवः सङ्गरे यागे, वि आहव समरे यज्ञे, हे आहवौ यागसङ्गरौ, त्रि

आहार आहारः सत्रादाहरणे भोजने च पुमानयं, मे आहारो भोजने हारे भवेदाहरणेऽपि च, वि आहारो हार आहरणेऽशने, हे

आहो आहो प्रश्ने विचारे च, मे आहो प्रश्नविचारयोः, हे आहो उताहो हाहो परिप्रश्नविचारणे, वि

आह्निक. आह्निकं दिननिर्वर्त्ये त्रिलिङ्गमथ न द्वयोः। नित्यक्रिया-भोजनयो र्द्वन्द्वे प्रकरणस्य च, मे. आह्निकं दिननिर्वर्त्ये भोजने नित्य-कर्म्मणि, वि. आह्निकं सत्रात् पुनरहर्निर्वर्त्ये नित्यकर्मणि। भोजने ग्रन्थभागे च, हे. आह्निकं दिननिर्वर्त्यं सत् क्लीवं नित्यकर्मणि, त्रि. भोज-नेऽपि तथाह्निकं, हा.

इ. इ भेदे च रुषोक्तौ चापाकरणानुकम्पयोः, मे. इ खेदे च रुषोक्तौ च कामदेवे त्वनव्ययं, वि. इः सत्रात् क्रोधे प्रकोपोक्तौ, हे. माधवः सूक्ष्म-संज्ञस्य विद्या दक्षिणलोचनम्। गन्धर्वः पाञ्चजन्यस्य इकारस्य मखाङ्कुरः, मा.

इक्षुगन्धा. इक्षुगन्धा कोकिलाक्षे क्रोष्ट्र्यां काशे च गोक्षुरे, मे, वि. इक्षुगन्धा काशक्रोष्ट्रीकोकिलाक्षेषु गोक्षुरे, हे.

इक्ष्वाकु. इक्ष्वाकुः कटुतुम्बयां स्त्री सूर्यवंश्यनृपे पुमान्. मे इक्ष्वाकुः कटुतुम्बयां च सूर्यवंश्यनृपेऽपि च, वि. इक्ष्वाकुः कटुतुम्बयां नृपान्तरे, हे

इङ्ग. इङ्गः सत्रादङ्गते ज्ञाने जङ्गमेङ्गितयोरपि, मे, वि. इङ्गः सत्रादिङ्गितेऽद्भुते। ज्ञानजङ्गमयोश्चापि, हे. जङ्गमेङ्गितयोरिङ्गः, त्रि.

इङ्गित. इङ्गितन्तु चेष्टायां गमनेऽपि च, हे.

इज्या. इज्या दानेऽध्वरेऽर्चायां सङ्गमे स्त्री गुरौ त्रिषु, मे. इज्या दानेऽध्वरेऽर्चायां सङ्गे चेज्यो गुरौ मतः, वि. इज्या दाने सङ्गेऽध्वरेऽर्चने, हे. इज्या सत्रात् सङ्गमे दाने यागेऽर्चायां गुरौ पुमान्, त्रि.

इडा. इडा तु बुधयोषिति। सौरभेयप्राज्ञ वचने वसुमत्यामपि स्त्रियां, मे. इडा वाचि गवि क्षौणाविडा च बुधयोषिति, वि. इडेलावत् स्वर्गनाडीभूवाग्गोषु बुधस्त्रियां, हे. गोभूवाचस्त्विडा इलाः, अ. इडा वर्षं च पानीये भूमौ वाक्प्रसरे मता, अन्ने नाडीस्वर्गचितिष्विडा, ह.

इत. इतं ज्ञाते गते त्रिषु, मे इतं गते स्याद्विज्ञाते, वि.

इतर. इतरोऽन्यत्र पामरे, मे. इतरः पामरेऽन्यस्मिन्, वि, हे. इतरस्त्वन्यनीचयोः, अ.

इतस्. इतो यतश्च नियमे पञ्चम्यर्थविभागयोः, वि. इतो यतश्च

भागवत् पञ्चस्यर्थे नियमे च, हे.

इति. इति प्रकरणे हेतौ प्रकाशादिसमाप्तिषु। निदर्शने प्रकारे स्यादनुकर्षे च सम्मतम्, वि. इति स्वरूपे सान्निध्ये विवक्षानियमे मते। हेतौ प्रकारप्रत्यक्षप्रकारोऽप्यवधारणे। एवमर्थे समाप्तौ स्यात्, हे. इतिशब्दः स्मृतो हेतुप्रकारादिसमाप्तिषु, ह. इति हेतौ प्रकाशने। निदर्शने प्रकारे स्यात् परस्तत्यनुकर्षयो'। समाप्तौ च प्रकरणे, मे. इति हेतुप्रकरणप्रकाशादिसमाप्तिषु, अ.

इतिकथा. भवेदितिकथाऽपार्थवाक्यश्रद्धेयनष्टयोः, मे. भवेदितिकथा नष्टधर्मेऽपार्थे वचस्यपि। अश्रद्धेये,वि. इतिकथा व्यर्थभाषणे। अश्रद्धेये नष्टधर्मे, हे.

इतिह. इतिहः स्यात् सम्प्रदाये, ह

इत्वर. इत्वर्यसत्यां पथिके क्रूरकर्मणि च त्रिषु, मे. इत्वरो दुर्विधे नीचे पथिकक्रूरकर्मणोः, वि. इत्वरः क्रूरकर्मणि। पथिके दुर्विधे नीचे स्यादित्यर्थभिसारिका, हे.

इदानीम्. इदानीम् वाक्यभूषायां सम्प्रत्यर्थे च दृश्यते, मे. इदानीं साम्प्रतं वाक्यालङ्कारे, हे इदानीं वाक्यभूषायां सम्प्रतर्थे च वर्त्तते, वि

इद्ध. इद्धमातपदीप्तयोः, वि. इद्धमातपदीप्तयोः, मे.

इध्म. इध्म ? समिद्धिदि। कामे वसन्ते काष्ठे स्यात्, हे.

इन. इनः पत्यौ नृपार्कयोः, मे. इनः सूर्ये नृपे पत्यौ, वि. इनः ईशेऽर्के, हे. इनः सूर्ये प्रभौ, अ.

इन्दीवर इन्दीवरं कुवलये शतावर्यामयोषिति, मे. इन्दीवरं कुवलये वर्यामिन्दीवरी मता, वि. इन्दीवरं नीलोत्पलमिन्दीवरी शतावरी, हे.

इन्दुलेखा. इन्दुलेखाऽमृतासोमलताशशिकलासु च, मे, वि. इन्दुलेखेन्दुखण्डके। गडूचीसोमलतयोः, हे इन्दुलेखा गुडूच्यास्त्र पुंसि, वि.

इन्द्र. इन्द्रः श्रकादितत्रभेदयोगभेदान्तरात्मसु। इन्द्रा फणिज्झके स्त्री स्यात्, मे इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः। इन्द्रा फणि-

ञ्जके, वि. इन्द्रः शक्रोऽन्तरात्मनि। आदित्यैश्च योगभेदे च स्यादिन्द्रा तु फणिज्जके, हे. इन्द्र आत्मनि वासवे, त्रि. शब्दादिविषयाः पञ्च प्रसिद्धा इन्द्रसंज्ञया। श्रेष्ठ इन्द्र. समाख्यातो देवराड् इन्द्र उच्यते, अने. इन्द्राणी करणे स्त्रीणां पौलमीसिन्धुवारयोः, वि, मे. इन्द्राणी शचत्र्यां निर्गुण्ड्यां स्त्रीकरणेऽपि, हे. स्यादिन्द्राणीन्द्रयोषिति स्त्रीबन्धे सिन्धुवारे च, त्रि.

इन्द्रिय. इन्द्रियन्तु हृषीके रेतसि स्मृतं, मे. इन्द्रियं च हृषीके स्याद् इन्द्रियं रेतसि स्मृतं, वि. इन्द्रियन्तु चक्षुरादिषु रेतसि, हे. हृषीके रेतसीन्द्रियं, त्रि.

इभ्य. इभ्या करेणुसल्लक्योः स्त्रियामाढ्ये च वाच्यवत्, मे. इभ्य आढ्ये करेण्वां तु भवेदिभ्या तु सल्लकौ, वि. इभ्यो धनवतीभ्या तु करेण्वां सल्लकीतरौ, हे.

इरा. इरा भूवाक्सुराब्धुषु, मे. इरा वारिसुराभूमिभारतीषु प्रयुज्यते, त्रि इराऽम्भोवाक्सुराभूमिषु, हे. इरा भूवाक्सुरासु स्यात्, अ इराशब्दो बुधैर्ज्ञेयो भुवि वाच्यशनेऽम्भसि, ह.

इरिण इरिणं शून्यमूषरम्, अ. V. ईरिण.

इला. इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च, मे, वि. इलोर्वी वाक् बुधस्त्री गौः, हे. इला भूवाग्बुधाङ्गनाः, त्रि. इला भूमिर्मता गौश्च, अने. इला वाग्धरयोरपि, ह.

इल्वल. इल्वला तारकाभेदे ना भेदे दैत्यमत्स्ययोः, मे. इल्वला-स्तारकाभेदे इल्वलो दैत्यमत्स्ययोः, वि. इल्वलो मत्स्यदैत्ययोः। इल्वला-स्तारकाभेदे, हे

इष्ट. इष्टमाशंसितेऽपि स्यात् पूजिते प्रेयसि त्रिषु। सस्तन्तौ पुमान् क्लीवं संस्कारे क्रतुकर्मणि, मे. इष्टमीप्सिते क्रतुकर्मणि। पूज्ये प्रेयसि संस्कारे योगे, हे. इष्टमाशंसिते पूज्यतमे प्रियतमेऽन्यवत्। इष्टं संस्कारयोगे च यागे च क्रतुकर्मणि, वि. क्रताविष्टं प्रिये त्रिषु, त्रि.

इष्टगन्ध. इष्टगन्धः सुगन्धौ स्यात् त्रिषु क्लीवन्तु वालुके, मे. इष्ट-

गन्ध सुगन्धिः स्मृतात् इष्टगन्धं तु वालुके, हे

इष्टि इष्टि मताऽभिलाषेऽपि संग्रहश्लोकयागयोः, मे. इष्टिः स्यादभिलाषेऽपि संग्रहश्लोकयागयोः, वि अथेष्टि मखेच्छयोः। संग्रहश्लोके, हे इष्टि यागेच्छयोः, अ

इष्म इष्मः कामवसन्तयोः, वि

इष्वास. इष्वास कार्मुके पुमान्। त्रिषु स्मृतात् धन्विके चेयोः, मे. इष्वासो धन्विधनुषो, वि इष्वासो धन्वधन्विनोः, हे

इस् इ स्मृतात् खेदे प्रकोपोक्तौ, हे

ई ई विषादेऽनुकम्पायां लक्ष्म्यां पुनरनव्ययम्, मे ई क्रोधे दुःखभावने। प्रत्यक्षे सन्निधौ चापि, हे ई दुःखभावने कोपे लक्ष्म्यामीः स्यादनव्ययम्, वि ई दुःखभावने क्रोधे प्रत्यक्षे सन्निधावपि, ह गोविन्दस्य त्रिमूर्त्तौश भान्ति स्मृताद् वामलोचनम्। रसिंहाख्यं तथा माया ईकारोऽपि सुरेश्वरः, मा

ईक्षण ईक्षणं दर्शने दृशि, मे ईक्षण दर्शने दृशौ, वि. चक्षुर्दर्शनमीक्षणं, त्रि

ईति ईति डिम्बे प्रवासेऽतिवृष्ट्यादिषट्सु च स्त्रियां, मे. ईतिः प्रवासे डिम्बे स्यादतिवृष्ट्यादिषट्सु च, वि ईतिरजन्ये प्रवासे, हे. ईतिर्डिम्बप्रवासयो, अ

ईरिण ईरिणं ऊषरे शून्ये, मे ईरिणं शून्य ऊषरे, वि, हे.

ईश ईषा लाङ्गलदण्डके। ईश. प्रभौ महादेवे, मे ईशः प्रभौ शङ्करे स्याद् ईषा लाङ्गलदण्डके, वि ईश. स्वामिनि रुद्रे च स्यादीषा हलदण्डके, हे प्रभुशङ्करयोरीशः स्त्रियां लाङ्गलदण्डके, त्रि

ईशान ईशानं ज्योतिषि क्लीबं पुंलिङ्गः स्मृतात् त्रिलोचने, मे.

ईश्वर ईश्वरो मन्मथे शम्भौ नाट्ये स्वामिनि चान्यवत्। ईश्वरी चेश्वरोमायां, मे ईश्वरो विभवैराढ्ये शम्भौ स्वामिनि मन्मथे। पार्वत्यामीश्वरामाङ्गः, वि ईश्वरः स्वामिनि शिवे मन्मथेऽपीश्वराऽद्रिजा, हे.

गौरीश्वरा शिवा स्वामिकन्दर्पेऽपीश्वरः पुमान्, त्रि

ईस् ईस् दुःखभावने कोपे, मे

ईहा ईहोद्यमवाञ्छयो, मे स्त्रादीहोद्यमवाञ्छयो, हे ईहा व्युद्यमवाञ्छयो, त्रि, वि

ईहामृग ईहामृगस्तु पुंसि स्त्रात् कोकरूपकभेदयो, मे ईहामृग स्त्राद्रूपकान्तरे। वृके जन्तौ च, हे ईहामृगो वृके जन्तौ प्रभेदे रूपकस्य च, वि नाट्ये ईहामृगो वृके, त्रि

उ उ सम्बोधनरुपोक्त्योरनुकम्पानियोगयो। पदपूरणे च पादपूरणेऽपि च दृश्यते, मे उ सम्बुद्धौ रुपोक्तौ च शम्भुवाचीत्यनव्ययम्, वि उ रोपोक्त्यामन्त्रणार्थके, हे नागरेशस्तथा विष्णुरिन्धिका च गजाङ्कुश। दृढकर्णश्च विजय उकारा मन्मथाधिप, मा उकार शङ्कर. प्रोक्त उकारस्यापि लक्षणे, ए

उक्त उक्तमेकाक्षरे छन्दस्युक्तं स्त्राद्भाषितेऽपि च, वि उक्तमेकाक्षरच्छन्दस्युक्तं स्त्राद् भाषिते त्रिषु, मे

उग्र उग्र शूद्रासुते क्षत्राद् रुद्रे पुंसि त्रिपूत्कटे। स्त्री वचाछुद्रयो, मे उग्रः शूद्रासुते क्षत्रात् श्रीकण्ठे चोत्कटेऽन्यवत्। उग्रा वचाच्छिक्किकयो, वि उग्र क्षत्रियतः शूद्रायां सूनावुत्कटरुद्रयो। उग्रा वचाच्छिक्किकयो, हे उग्रोऽन्त्यजे शिवेऽतुग्रच्चे, त्रि

उग्रगन्धा उग्रगन्धाजमोदायां वचायां छिक्किकौषधौ, मे, वि उग्रगन्धा वचाचैत्रयवान्योश्छिक्किकौषधे, हे उग्रगन्धे वचाचैत्रयमानिके, त्रि

उचित उचितन्तु भवेन् न्यस्ते मिते ज्ञाते समञ्जसे, मे उचितं प्रोक्तमभ्यस्ते मिते ज्ञाते समञ्जसे, वि उचितं विदितेऽभ्यस्ते मिते युक्तेऽपि, हे

उच्चटा रसोनस्य प्रभेदे स्त्राद्, उच्चटा दम्भचर्ययोः, वि उच्चटा दम्भचर्यायां प्रभेदे लशुनस्य च, हे

उच्छिष्ट उच्छिष्टम्भुक्तशेषे कोपनप्रुन्ये, मे . उच्छिष्टो

मीनभेदे तथा कोपनपूरुषे, वि उच्चिङ्गटः कोपने मीनभिद्यपि, हे.

उच्छ्रित. उच्छ्रितं त्रिषु सञ्जाते समुन्नद्धप्रवृद्धयोः, मे. सप्ताहुच्छ्रितन्तु सञ्जाते समुन्नद्धप्रवृद्धयोः, वि. उच्छ्रितं वृद्धजातयोः। प्रवृद्धे सप्तात्, हे. जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिताः, अ.

उच्छ्वास. उच्छ्वासः प्राणनेऽपि च। आख्यायिकापरिच्छेदेऽप्याश्वासेऽपि पुमानयं, मे. उच्छ्वास प्राणनाश्वासगद्यबन्धगुणान्तरे, वि. उच्छ्वासः प्राणने श्वासे गद्यबन्धान्तरेऽपि च, हे.

उज्जृम्भित. उज्जृम्भितं त्रिषूत्फुल्ले चेष्टायां तु नपुंसकम्, मे. उज्जृम्भितं तु चेष्टायामुत्फुल्ले चाभिधेयवत्, वि. उज्जृम्भितमुत्फुल्ले चेष्टितेऽपि च, हे

उज्ज्वल. उज्ज्वलो दीप्तश्शृङ्गारविशदेषु विकाशिनि, मे, वि.उज्ज्वलस्तु विकाशिनि। शृङ्गारे विशदे दीप्ते, हे.

उडुप. उडुपं तु प्लवेऽस्त्रियां। चन्द्रे पुंसि, मे. उडुपस्तु प्लवे चन्द्रे, वि. उडुपः प्लवशशिनोः, हे. चन्द्रे नाऽस्त्रयुडुपः प्लवे, त्रि.

उड्डीश. उड्डीशो ग्रन्थभेदे सप्तादुड्डीशश्चण्डिकापतौ, मे, वि. उड्डीशः चण्डीशे शास्त्रभिद्यपि, हे.

उत्. उत् सप्तात् प्रश्ने वितर्के च, मे.

उत उतात्यर्थविकल्पयोः। समुच्चये वितर्के च प्रश्ने च पदपूरणे, मे. उत प्रश्ने वितर्के सप्तात् उतात्यर्थविकल्पयोः, वि. उत प्रश्नवितर्कयोः। समुच्चये विकल्पे च, हे.

उताहो. उताहो परिप्रश्नविचारयोः, मे. v. आहो.

उत्कट. उत्कटस्तीव्रमत्तयोः, मे, वि, हे.

उत्कलिका. कथितोत्कलिकोत्कण्ठाहेलासलिलवीचिषु, मे. उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि, हे. भवेदुत्कलिकोत्कण्ठाहेलासलिलवीचिषु, वि. स्त्रियामुत्कलिका हेलोत्कण्ठासलिलवीचिषु, त्रि. विद्यादुत्कलिकाशब्दमुत्कण्ठावीचिवाचकम्, श.

उत्क्षेपण. उत्क्षेपणन्तु व्यजने धान्यमर्दनवस्तुनि, मे, वि. उत्क्षेपणमुद्वहनम्। व्यजनं धान्यमलनवस्तु, हे.

उत्तंस. उत्तंसः कर्णपूरेऽपि शिखरेऽपि च न स्त्रियां, मे. उत्तंसः कर्णपूरे सप्रात् शेखरे च वतंसवत्, वि. उत्तंस. शेखरे कर्णपूरे चापि वतंसवत्, हे. v. अवतंस.

उत्तप्त. उत्तप्तं शुष्कमांसेऽथ त्रिषु तप्ते परिप्लुते, मे. उत्तप्तं शुष्कमांसेऽपि सन्तप्ते च परिश्रमे, वि. उत्तप्तं चञ्चले शुष्कमांससन्तप्तयोरपि, हे. उत्तप्तं शुष्कमांसेऽपि, त्रि.

उत्तम. उत्तमा दुग्धिकायां त्रिषु च भद्रके, मे. उत्तमा दुग्धिकायां सप्राद् उत्कृष्टे चोत्तमोऽन्यवत्, वि. उत्तमा दुग्धिकौषधी। उत्तमं तु प्रधाने सप्रात्, हे.

उत्तर. उत्तरा दिग्विशेषे च स्नुषायामर्जुनस्य च। विराटस्य सुते ना सप्रादूर्द्धोदीच्योत्तमे त्रिषु। नपुंसकं प्रतिवाक्ये, मे. उत्तरं प्रतिवाक्ये सप्राद् ऊर्द्धोदीच्योत्तमेऽन्यवत्। उत्तरस्तु विराटस्य तनये दिशि चोत्तरा, वि. उत्तरं प्रवणोर्ध्वयोः। उदीच्यप्रतिवचसोरुत्तरस्तु विराटजे, हे. उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः, अ.

उत्तान. उत्तानमगभीरे सप्राद् ऊर्द्धास्यशयिते त्रिषु, मे. उत्तानं सप्रादगम्भीरे तथा सुप्तोन्मुखेऽन्यवत्, वि. उत्तानः सुप्तोन्मुखागभीरयोः, हे. अगम्भीरेऽपि चोत्तानः, त्रि.

उत्ताल. उत्ताल उत्कटे श्रेष्ठे विकराले प्लवङ्गमे, मे. उत्ताल उत्कटे। श्रेष्ठेऽपि विकरालेऽपि सप्राडुत्तालः प्लवङ्गमे, वि. उत्तालत्वरिते कपौ। श्रेष्ठोत्कटकरालेषु, हे. उत्तालमुन्नतेऽपि, श.

उत्थान. उत्थानमुद्यमे तन्त्रे पौरुषे पुस्तके रणे। प्राङ्गणोल्लसहर्षेषु मलवेगेऽपि न द्वयोः, मे. उत्थानमुद्यमे तन्त्रे पौरुषे पुस्तके रणे। प्राङ्गणोल्लसहर्षेषु मलवेगेऽपि कीर्त्तितं, वि. उत्थानं सैन्ये पौरुषे युधि पुस्तके। उद्यमोल्लसहर्षेषु वास्तन्तोऽङ्गनचैत्ययोः। मलोत्सर्गे, हे. उत्थानं पौरुषे

तल्पे सन्निविष्टोद्गमेऽपि च, अ.

उत्थित. उत्थितं सत्रात् विपुलन्ने प्रोद्गते वृद्धिमत्यपि, मे. उत्थितं वृद्धियुक्ते च प्रोद्यतोत्पन्नयोरपि, वि. उत्थितं । वृद्धिमत्प्रोद्यतोत्पन्नेषु, हे. उत्थिताङ्गमी । वृद्धिमत्प्रोद्यतोत्पन्नाः, अ.

उत्पतन. सत्रादुत्पतनमुत्पत्तौ तथोर्ध्वगमनेऽपि च, मे. उत्पतनं समुत्पत्तौ तथोर्ध्वगमने स्मृतं, वि. सत्रादुत्पतनमुत्प्लुतौ । उत्पत्तौ, हे.

उत्पल. उत्पला तुपचर्यायां क्लीवं कुष्ठप्रसूनयोः, मे.. उत्पलं मांसशून्ये सत्रात् कुष्ठेन्दीवरयोरपि, वि. उत्पलं कुष्ठकुसुमे । इन्दीवरे मांसशून्ये, हे. उत्पलं नलिनं प्रोक्तमुत्पलं कुष्ठमुत्तमम्, धाने.

उत्पलपत्र. भवेदुत्पलपत्रं तु तद्दले स्त्रीनखक्षते, वि. उत्पलपत्रं ह्युत्पलदले स्त्रीणां नखक्षते, हे.

उत्प्रेक्षा. उत्प्रेक्षाऽनवधानेऽपि काव्यालङ्करणान्तरे, मे. उत्प्रेक्षाऽनवधाने सत्रात् काव्यालङ्करणेऽपि च, वि.

उत्फुल्ल. उत्फुल्लं करणे स्त्रीणामुत्तानेऽपि विकस्वरे, मे. उत्फुल्लः करणे स्त्रीणाम् उत्ताने च विकस्वरे, वि. उत्फुल्लः स्त्रीकरणान्तरे । विकस्वरोत्तानयोः, हे.

उत्सर्गः. उत्सर्गः पुंसि सामान्ये न्याये च त्यागदानयोः, मे. उत्सर्गो वर्जने त्यागे सामान्यन्यायदानयोः, वि. उत्सर्गस्त्यागदानयोः । वर्जने सामान्यविधौ, हे. उत्सर्गो न्यायदानयोः । सामान्येऽपि, त्रि.

उत्सव. उत्सवो मह उत्सेके इच्छाप्रसरकोपयोः, मे, वि. उत्सवोऽमर्षे महेऽपि च । इच्छाप्रसर उत्सेके, हे. उत्सेकामर्षयोरिच्छाप्रसरे मह उत्सवः, अ.

उत्सादन. उत्सादनं समुल्लेखोद्वाहनोद्वर्तनेषु च, मे, वि. उत्सादनं समुल्लेखोद्वर्त्तनोद्वाहनेषु च, हे.

उत्साह उत्साहस्तूद्यमे सूत्रे, मे, वि.

उत्सेध. उत्सेधस्तूच्छ्रये न स्त्री क्लीवं संहननेऽपि च, मे. उत्सेधः

श्योच्छ्ये काये, वि. उत्सेध उच्छ्ये। संहननेऽपि, हे. उत्सेधः काय उन्नतिः, भ. कायेऽप्युत्सेध इष्यते सद्भिः, ह.

उद्. उत् प्रकाशे विभागे च प्राबल्याऽस्वास्थ्यशक्तिषु। प्राधान्ये बन्धने भावे मोचे लाभोर्ध्वकर्मणोः, मे. उत्प्रकाशे वियोगे च प्राबल्यास्वास्थ्यशक्तिषु। प्राधान्ये बन्धने भावे मोचे लाभोर्ध्वकर्मणोः, वि. उत्प्रधाने प्रकाशे च प्राबल्यास्वास्थ्यशक्तिषु। विभागे बन्धने मोचे भावे लाभोर्ध्वकर्मणोः, हे.

उदच्(ञ्). उदग् दिग्देशकालेषु वाच्यवत् त्रितयेऽव्ययम्, मे. प्राग्दक्प्रतगितिवते दिग्देशे कालतोऽव्ययम्। प्राच्योदीच्यप्रतीच्यानां वाचकं स्यादनव्ययम्, वि.

उदण्डपाल. उदण्डपालः पुंसि स्यात् सर्पमत्स्यप्रभेदयोः मे, वि. उदण्डपालो मत्स्याहिभेदयोः हे.

उदन्त उदन्तः साधुवार्तयोः, मे, वि उदन्तः साधौ वार्तायां, हे.

उदय. उदयस्तु पुमान् पूर्वपर्वते च समुन्नतौ, मे. उदयः पूर्वपर्वते चोन्नतावपि, वि. उदयः पर्वतोन्नत्योः, हे. उदयोऽद्रावुन्नतौ च, त्रि.

उदयन. उदयनमुद्ये क्लीबं वत्सेशागस्त्ययोः पुंसि, मे. भवेदुदयनो वत्सराजेऽगस्त्यमुनावपि, वि. उदयनस्तु वत्सराजे घटोद्भवे, हे.

उदर. उदरं जठरे युधि, मे, वि. उदरं तुन्दरणयोः, हे.

उदरथि. भवेदुदरथिः पुंसि समुद्रे च विवस्वति, मे. उदरथिः समुद्रे च विवस्वति, वि. उदरथि विवस्वति। अब्धौ, हे.

उदर्क उदर्कः एष्यत्कालीनफले मदनकण्टके, मे. उदर्क एष्यत्कालीयफले मदनकण्टके, वि, त्रि उदर्कः दूरकालफले मदनकण्टके, हे.

उदर्चिस्. उदर्चिरुत्प्रभे वाच्यलिङ्गः पुंसि हुताशने, मे. उदर्चिरुत्प्रभे वह्नौ, वि, त्रि. उदर्चिरुत्प्रभेऽग्नौ च हे.

उदात्त. उदात्तस्तु स्वरान्तरे। दयात्यागादिसम्पन्ने काव्या-

त्तो दाक्ष्मह्तो:, वि. उदात्तो दाक्ष्मह्तो ह्रद्ये च स्वरभिदपि, हे.

उदान. उदान उदरावर्त्ते वायुभेदे भुजङ्गमे, मे. उदानोऽप्युदरावर्त्ते मरुत्सर्पविशेषयो:, वि. उदान: पवनान्तरे। सर्पभिदुदरावर्त्ते, हे.

उदार. उदारो दाक्ष्मह्तो दक्षिणेऽप्यभिधेयवत्, मे, वि. उदारो दक्षिणो महान् दाता, हे. उदारो दाक्ष्मह्तो:, अ. उदारौ दक्षिणस्थूलौ, त्रि. उदाराख्यौ महद्दचौ, अने.

उदास्थित. उदास्थित: प्रतीहारे भ्रमणप्रावसिते चरे, मे. उदास्थित: प्रतीहारेऽध्यक्षे च प्रणिधौ चरे, वि. उदास्थितश्चरे हा:स्थेऽध्यक्षे, हे. उदास्थितश्चरे हा:स्थे, त्रि.

उदित. उदितं सूक्त उद्गते, मे. उदितं प्रोक्त उद्गते, वि, त्रि उदितं वद्गतोक्तयो:, हे.

उदुम्बर. उदुम्बरस्तु देहल्यां वृक्षभेदे च षण्डके। कुष्ठभेदेऽपि च पुमान् ताम्रे तु स्यान् नपुंसकं, मे. उदुम्बरस्तु देहल्यां वृक्षजातौ च षण्डके। उदुम्बरं स्मृतं ताम्रे कुष्ठभेदेऽप्युदुम्बर:, वि. उदुम्बर: कुष्ठभेदे देहल्यां षण्डके तरौ। उदुम्बरं ताम्रे, हे. द्रुमे मक्केऽप्युदुम्बर:, त्रि

उदूखल. उदूखलं गुग्गुलौ स्यादुलूखलेऽपि न द्वयो., मे. v. उलूखल.

उदूढ. उदूढमूढे स्थूले स्यात्, मे. उदूढ ऊढे स्थूले स्यात्, वि. उदूढ: पीवरोढयो:, हे.

उद्ग्राहित. उद्ग्राहितमुदीर्णे स्यात् बद्धग्राहितयोस्त्रिषु, मे. उद्ग्राहितमुपन्यस्ते बद्धग्राहितयोरपि, वि, हे.

उद्घ. उद्घ स्याद् देहजानिले। अग्नौ हस्तपुटे प्रशस्तेऽपि, मे. उद्घ: स्यात् पावके हस्तपुटके देहजानिले, वि. उद्घो हस्तपुटे वह्नौ श्लाघायां देहजानिले, हे.

उद्घात. उद्घातस्तु पुमान् पादस्खलने समुपक्रमे। पवनाभ्यासयोगस्य कालभेदे च कीर्तित:। उत्तुङ्गे मुद्गरेऽपि स्यात्, मे. उद्घात: कथ्यते·

पादस्खलने समुपक्रमे। पवनाभ्यासयोगाय कुम्भकादित्रयेऽपि च। उद्रङ्के मुद्गरेऽपि स्यात्, वि. उद्घातः समुपक्रमे। मुद्गरेऽभ्यासयोगाय कुम्भकादित्रयेऽपि च। पादस्खलन उद्रङ्के, हे.

उद्दन्तुर. उद्दन्तुरस्त्रिषून्तुङ्गे करालोत्कटदन्तयोः, मे. उद्दन्तुरः स्यात्तुङ्गे करालोत्कटदन्तयोः, वि. उद्दन्तुरः कराले स्यात्तुङ्गोत्कटदन्तयोः, हे.

उद्दाम. उद्दामो बन्धरहिते स्वतन्त्रे च प्रचेतसि, मे.

उद्धरण. स्यादुद्धरणमुद्गारवान्तान्नोन्मूलनेष्वपि, मे. उद्धरणं समुद्गारवान्तान्नोन्मूलनेष्वपि, वि. स्यादुद्धरणमुन्नये। भुक्तोज्झितोन्मूलनयोः, हे. उन्मूलनेऽप्युद्धरणं, त्रि.

उद्धव. उद्धवो यादवभिदि मखे च क्रतुपावके, मे. उद्धवो मातुले विष्णोरुत्सवे क्रतुपावके, वि. उद्धवः कैशवमातुले। उत्सवे क्रतुवह्नौ च, हे.

उद्धान. उद्धानमुद्गते वाच्यलिङ्गं चुल्ल्यां नपुंसकं, मे. उद्धानमुद्गते चुल्ल्यां, वि. उद्धानमुद्गमे चुल्ल्यां, हे. चुल्ल्यामुद्धानमुद्गमे, त्रि.

उद्धार. उद्धारस्त्वोद्धृतावृणे, मे, वि. उद्धारः स्यादृणोद्धृत्योः, हे.

उद्धृत. उद्धृतं स्यात् त्रिषूत्क्षिप्ते परिभुक्तोज्झितेऽपि च, मे. क्षिप्ते मुष्टेऽपि चोद्धृतं, त्रि. उद्धृतं स्यादुत्तुलिते परिभुक्तोज्झितेऽपि च, हे स्यादुद्धृतं तु तुलिते परिभुक्तोज्झितेऽपि च, वि.

उद्धट उद्धटः कच्छपे सूर्ये, मे. V. उत्पुट.

उद्यान उद्यानं स्यान्निःसरणे वनभेदे प्रयोजने, मे, हे. उद्यानं वनभेदे स्यात् निःसृतेऽपि प्रयोजने, वि. स्यादुद्यानं निःसरणे वनभेदे प्रयोजने, च मोक्षं विपिनमुद्यानमुद्यानं गमनं स्मृतं, धने.

उद्रथ उद्रथो रथकीले स्यात्ताम्रचूडाख्यपक्षिणि, मे.

उद्वर्तन उद्वर्तनमुत्पतने विलेपने धर्षणे क्लीबं, मे. उद्वर्तनं चोत्पतनेऽप्यपाहत्तौ विलपने, वि. उद्वर्तनं विलेपने। अपावृत्त्युत्पतने, हे.

उद्भ्रान्त. उद्भ्रान्तो निर्मदगजे पुमानुद्भमिते त्रिषु, मे. उद्भ्रान्त

उद्गीर्णे निर्भेदे द्विपे, हे. उद्भ्रान्तो निर्मदगजे समुद्गीर्णे च वाचयवत्, वि.

उद्घाटन. उद्घाटनं प्रणीते सत्रात् रज्ज्वामुद्घाटनी मता, मे. उद्घाटनं द्विधीतेत्र सत्रात् रज्ज्वामुद्घाटनी मता, वि. उद्घाटनं द्विधीतेत्र सत्रादुद्घाटनी वराटके, हे.

उद्वेग. उद्वेगं क्रमुकीफले। उद्वेगोऽपुत्रद्वाङ्गलकोद्वेजनोद्भ्रमनेषु च, मे,वि. उद्वेगं पूगिकाफले। उद्वेगस्तूद्वेजने सत्रात् स्तिमिते शीघ्रगामिनि। चद्वाही च भयेऽपि सत्रात्, हे. फलं पूगस्त्र चोद्वेगं, लि.

उन्न. उन्नं क्लिन्ने च सुव्रते, मे. उन्नं क्लिन्ने दयापरे, हे. उन्नं क्लिन्ने च स्तूरणे, वि.

उन्नति. उन्नतिस्तार्क्ष्यदारेषु समृद्धावुदयेऽपि च, वि. उन्नतिस्तार्क्ष्ययोषिति। उदये च समृद्धौ, हे.

उन्मत्त. उन्मत्त उन्मादवति धूस्तूरमुचुकुन्दयोः, मे, वि. उन्मत्तो मुचुकुन्दे सत्रात् धत्तूरोन्मादयुक्तयोः, हे. सत्राद् धूस्तूरेऽपि चोन्मत्तः, लि.

उन्माथ. उन्माथः कूटयन्त्रे सत्रान् मारणे घातके पुमान्, मे. उन्माथः कूटयन्त्रे सत्रान् मारणे घातकेऽपि च, वि. उन्माथो मारणे कूटयन्त्रघातकयोरपि, हे. उन्माथः कूटयन्त्रेऽपि, लि.

उप. उप सत्रादधिकार्थे च हीनार्थासन्नयोरपि, मे. उपसामर्थ्यदाक्षिण्यदोषाख्यानातत्रयेषु च। आचार्यकरणे दाने व्याप्तावारम्भपूजयोः। उद्योगेऽपि च लिप्सायां मरणार्थोपमार्थयोः। उप हीनेऽधिके प्रोक्तोऽप्यासन्नेऽप्युप कीर्तितः, वि. उपासन्ने हीनेऽधिके सादृश्यप्रतियत्नयोः। तद्योगव्याप्तिपूजासु प्रक्रावारम्भदानयोः। दक्षिणाचार्यकरणदोषाख्यानात्ययेषु च, हे.

उपकार. उपकारस्त्रोपकृतौ विकीर्णकुसुमादिषु, मे. उपकारस्तूपकृतौ विकीर्णकुसुमादिषु, हे.

उपकारिका. उपकारिकोपकर्त्र्या पिटभेदे नृपालये, मे. उपकारिका। पिटभेदे गृहे राज्ञामुपकर्त्र्यामपीष्यते, वि.

उपकार्य. उपकार्या राजसद्मन्युपकारोचितेऽन्यवत्, मे, वि. उपकार्या राजगेहमुपकारोचिताऽपि, च, हे.

उपक्रम. उपक्रमस्तूपधायां ज्ञात्वारम्भे च विक्रमे। चिकित्सायां, मे. उपक्रमः स्त्राद्युपधाचिकित्सारम्भविक्रमे, वि. उपक्रमस्तु विक्रमे। उपधायां सद्याद्यचिख्यासाचिकित्सयोरपि। आरम्भे, हे. उपायपूर्व आरम्भ उपधा चाप्युपक्रमः, श.

उपगम. उपगमः स्वीकारेऽन्तिकसर्पणे, मे. उपगमः पुनः। अङ्गीकारेऽन्तिकगतौ, हे. अङ्गीकृतावुपगमः समीपगमनेऽपि च, त्रि.

उपग्रह. उपग्रहः पुमान् बन्द्यामुपयोगेऽनुकूलने, मे. उपग्रहो बन्द्यामुपयोगेऽनुकूलने, वि. उपग्रहोऽनुकूलने। बन्द्युपयोगयोश्च, हे.

उपचार. उपचारस्तु सेवायां व्यवहारोपचर्ययोः, हे.

उपचित भवेदुपचितं दग्धे समृद्धे वाच्यलिङ्गकं, मे. भवेदुपचितं दिग्धे समृद्धे च समाहिते, वि. उपचितः समाहिते। समृद्धे दग्धे, हे.

उपताप. उपतापस्त्वरायां स्याद्युत्तापगदयोरपि, मे, वि. उपतापो गदे तापे, हे.

उपदंश. उपदंशो विदंशे च मेढ्ररोगान्तरेऽपि च, मे. उपदंशोऽवदंशे स्यात् मेढ्ररोगेऽपि वर्तते, वि. उपदंशोऽवदंशे स्यात् मेहनस्त्रामयेऽपि च, हे.

उपधान. उपधानं विषे गेण्डौ प्रणयेऽपि नपुंसकम्, मे. उपधानं विशेषे च गेण्डुके प्रणयेऽपि च, वि उपधानं तु गेण्डुके। व्रते विषे च प्रणये, हे. अथ गेण्डुके। विशेषे चोपधानं, त्रि.

उपधि. उपधिः पुंसि व्याजरथाङ्गयोः, मे. उपधि र्व्याजचक्रयोः, वि, हे.

उपधूपित. उपधूपित आसन्नमरणे परिधूपिते, मे, वि. उपधूपित आसन्नमरणे धूपितेऽपि च, हे.

उपनाह. उपनाहो व्रणालेपपिण्डे वीणानिबन्धने, मे, वि. उपनाहो वीणानिबन्धने। व्रणलेपनपिण्डे च, हे.

उपनिषद्. भवेदुपनिषद् धर्मे वेदान्तविजने स्त्रियां, मे. भवेदुपनिष-द्धर्मे वेदान्तेऽपि रहस्यपि, हे. उपनिषत्तु वेदान्ते रहस्यधर्मयोरपि, हे. धर्मे रहस्युपनिषत् स्यात्, अ. रहस्येव स्यादुपनिषत् समीपे सदने-ऽपि च, लि.

उपप्लव. उपप्लवः सैंहिकेये विप्लवोत्पातयोरपि, मे, वि. उपप्लवौ राहूत्पातौ, हे, लि.

उपरक्त. उपरक्तो व्यसनार्ते राहुग्रस्तेन्दुसूर्ययोः, मे. उपरक्तः सैंहिकेये सन्नृहे व्यसनातुरे, वि. उपरक्तस्तु स्वर्भानौ व्यसनातुरे। राहु-ग्रस्तार्कशशिनोः, हे. व्यसनार्त्ते चोपरक्तः, लि.

उपराग. उपरागस्तु पुंसि स्यात् राहुग्रस्तार्कचन्द्रयोः। दुर्णये ग्रह-कल्लोले व्यसनेऽपि निगद्यते, मे. उपरागः परीवादे राहुग्रस्तार्कचन्द्रयोः। दुर्नये ग्रहकल्लोले, वि. उपरागो राहुग्रस्तार्कचन्द्रयोः। विगाने दुर्णये राहौ, हे. उपरागस्तु ग्रस्तार्केन्द्वोश्च दुर्नये, लि.

उपल. उपलः प्रस्तरे रत्ने शर्करायान्तु योषिति, मे. उपलः प्रस्तरे रत्ने शर्करायां स्मृतोपला, वि. उपलो ग्रावरत्नयोः। उपला तु शर्करायां, हे. उपला शर्कराऽपि च, अ.

उपलब्धि. उपलब्धि र्मतौ प्राप्तावपि ज्ञाने च योषिति, मे. उपलब्धि-र्मतौ प्राप्तौ ज्ञाने चापि प्रयुज्यते, वि. उपलब्धि र्मतौ प्राप्तौ, हे. उप-लब्धि र्मतिप्राप्त्योः, लि.

उपसत्ति. उपसत्तिः सङ्गमार्थे सेवायामपि योषिति, मे. उपसत्तिः सङ्गमे च सेवायां प्रतिपादने, वि. उपसत्तिः सङ्गमार्थे प्रतिपादन-सेवयोः, हे.

उपसम्पन्न. उपसम्पन्नमुद्दिष्टं निहते च सुसंस्कृते, मे. जानीया-दुपसम्पन्नं निहते च सुसंस्कृते, वि. उपसम्पन्नं पर्य्याप्ते संस्कृतप्राप्तयो-र्म्मृते, हे.

उपसर्ग. उपसर्गः पुमान् रोगभेदोपसर्गयोरपि, मे. उपसर्गः स्मृतो.

रोगभेदोपसवयोरपि, वि. उपसर्ग उपद्रवे। मादौ च रोगभेदे च, हे.

उपस्थ. उपस्थः श्रेफसि क्रोडे तथा मदनमन्दिरे, मे. उपस्थो मेढ् उत्सङ्गे भगे पायौ च कथ्यते, वि. उपस्थः पायुमेढ्राङ्कयोनिषु, हे.

उपस्पर्श. उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि, के, वि. उपस्पर्शे-स्त्वाचमनस्नानयोः स्पर्शमात्रके, हे.

उपस्पर्शन. स्त्राडुपस्पर्शनं स्पर्शे स्नानाचमनयोरपि, मे, वि. स्त्राडुपस्पर्शनं स्नाने स्पर्शाचमनयोरपि, हे.

उपह्वर. उपह्वरं समीपे स्त्रादेकान्तेऽपि नपुंसकम्, मे. उपह्वरं समीपे स्त्रादेकान्ते चापुत्रपह्वरम्, वि. उपह्वरं रहसि सन्निधौ, हे. रहोऽन्तिकमुपह्वरे, प्र. उपह्वरं रहःस्थानं समीपं स्त्राडुपह्वरं, अने. उपह्वरं सन्निधाने, ह.

उपांशु. उपांशु र्जपभेदे स्त्राडुपांशु विजनेऽव्ययं, मे, वि, हे.

उपाकृत. उपाकृतोऽध्वरहतपशूपद्रुतयो र्मतः, वि. उपाकृत उपद्रवे। मन्त्रेण प्रोक्षितपशौ, हे. उपाकृतोऽध्वरहतपशौ नोपद्रुते त्रिषु, मे.

उपाधि. उपाधि धर्मचिन्तायां कुटुम्बव्यापृते च्छले। विशेषणे पुंसि,मे. उपाधि धर्मचिन्तायां केतवेऽपि विशेषणे। कुटुम्बव्यापृतेऽपि स्त्रात्, वि. कुटुम्बव्यापृते धर्मचिन्तायाञ्च विशेषणे। उपाधिः, त्रि. उपाधिस्तु-धर्मध्याने विशेषणे। कुटुम्बव्यापृते च्छद्मनि, हे.

उपाय. उपायः सामभेदादौ स्त्रियोपगतौ पुमान्, मे. उपायः साम-भेदादावुपायः स्त्राडुपागतौ, वि.

उपासन. उपासनं शराभ्यासेऽपुत्रपास्त्यावासनेऽपि च. मे. उपासनं शराभ्यासे शुश्रूषायां च चिंसने, वि. स्त्राडुपासनमासने। शुश्रूषायां शराभ्यासे, हे. शराभ्यासेऽपुत्रपासनं, त्रि.

उपाहित. उपाहितोऽनलोत्पाते पुमानारोपिते त्रिषु, मे. उपाहितोऽनलोत्पाते आहिते चापुत्रपाहितः, वि. उपाहितः पुनः। आरोपितेऽन-

लोत्पाते, हे. वक्र,त्पातेऽप्युत्पाटितः, त्रि.

उपोढ. उपोढो निकटोढयोः, मे, वि. उपोढ ऊढे निकटेऽपि, हे.

उम्. उं रोषेऽङ्गीकृतावपि। प्रश्नेऽपि स्यात्, मे. उं प्रश्नेऽङ्गीकृतौ रोषे, हे. उं प्रश्नेऽङ्गीकृते रोषे, वि.

उम. उमाऽतसी हैमवती हरिद्राकीर्तिकान्तिषु, मे, वि. उमो नगरषण्डयोः। उमा गौर्यां हरिद्रायां कीर्तिकान्त्यतसीषु च, हे. उमा दुर्गाऽतसी चाथ, त्रि.

उररि (री) उररुररयूररी च विस्तारेऽङ्गीकृतौ त्रयम्, मे. ऊरयूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम्, श्र. उररी चोररी चोरी विस्तारेऽङ्गीकृतौ त्रयम्, वि. ऊर्यूररी चोररी च विस्तारेऽङ्गीकृतावपि, हे.

उरस्. उरो वक्षसि च श्रेष्ठेऽपि, मे. उरः श्रेष्ठे च वक्षसि, वि. उरो वक्षसि मुख्ये स्यात्, हे.

उरी. उर्यूरी चापुरभौ शब्दौ विस्तारेऽङ्गीकृतावपि, मे. V. उररी.

उर्वरा. उर्वरा सर्वसस्याढ्यभूमौ स्याद्भूमिमात्रके, मे, वि. उर्वरा तु भूमात्रे सर्वसस्याढ्यभुव्यपि, हे.

उल (लु) प. उलपो न स्त्री गुल्मिन्यां ना तृणान्तरे, मे. उलपस्तृणभेदे स्यात् गुल्मिन्यामुलपं मतम्, वि. उलुपस्तु गुल्मिनीतृणभेदयोः, हे. तृणभिद् गुल्मितुलुपम्, त्रि.

उलूक. उलूकः पुंसि काकारातिवन्द्रे भारतयोधिनि, मे. उलूकः कुरुयोधे स्यात् पेचके जम्भभेदिनि, वि. उलूकः स्यात्तु काकारातिवन्द्रे भारतयोधिनि, हे.

उलूखल. उलूखलं गुग्गुले स्यात् कण्डन्यर्थेऽप्युलूखलं, वि. उलूखले गुग्गुलोदूखले, हे. V उदूखल.

उल्लाघ. उल्लाघोऽपि शुचौ दक्षे दक्षनीरोगयोस्त्रिषु, मे. उल्लाघस्तु शुचौ दक्षे दक्षनीरोगयोरपि, वि. उल्लाघो निपुणे हृष्टे शुचि-

उल्लिखित. सत्रादुल्लिखितमुत्कीर्णे तनूकृते च वाचत्रवत्, मे. उल्लिखितं समुत्कीर्णं वाचत्रवच्च तनूकृते, वि. उल्लिखितं तनूकृते। उत्कीर्णे, हे.

उष. उषा वाणसुतारात्रोरुषः कामिनि गुग्गुलौ। रात्रिशेषे उषायान्तु केचिदाहुस्तदव्ययं, मे. उषा वाणसुतारात्र्योरुषः कामिनि गुग्गुलौ, वि. उषा वाणात्मजा निशा, वि. उषा निशि। वाणपुत्र्यां च, हे. उषा रात्रौ तदन्ते च, मे, हे. उषा रात्रौ तदन्ते स्यात् भवानव्ययमप्युषा, वि.

उषस्. उषः प्रत्यूषसि क्लीवं पितृप्रस्वाञ्च योषिति, मे. उषः प्रभाते सन्ध्यायां, वि. उषः सन्ध्याप्रभातयोः, हे.

उषित. उषितं युत्रषिते दग्धे, मे, वि. उषितं व्युषिते सुष्टे, हे. अथ दग्धे सत्रादुषितं स्थितवत्यपि, वि.

उष्ट्र. उष्ट्री कर्कर्यां करभे पुमान्, मे. उष्ट्री गोलकिकायां स्यात् करभस्य च योषिति, वि. उष्ट्री भृङ्गाण्डे करभस्त्रियां, हे.

उष्ट्रिका. उष्ट्रिका भक्तिकाभाण्डभेदेऽपि करभस्त्रियाम्, मे, वि. उष्ट्रिका भृङ्गाण्डभेदे करभस्य च योषिति, हे. भृङ्गाण्डेऽप्युष्ट्रिका भवेत्, शा. मृद्भाण्डेऽप्युष्ट्रिका, वि.

उष्ण. उष्णो ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गकः, मे. उष्णः स्यादातपे ग्रीष्मे दक्षे, वि. उष्णा ग्रीष्मदवातपाहिमाः, हे. उष्णं दक्षेऽपि नाऽतपे, वि.

उष्णीष. उष्णीषन्तु शिरोवेष्टे किरीटे लक्षणान्तरे, मे, वि. उष्णीषं लक्षणान्तरे। शिरोवेष्टे किरीटे च, हे. उष्णीषः शिरोवेष्टकिरीटयोः, ध. उष्णीषो मूर्द्धवेष्टनेऽप्युक्तः, र.

उष्मक उष्मकस्तु निदाघे स्याद् आतुरे चिप्रकारिणि, मे, वि. उष्मको घर्म उद्युक्तातुरयोः, हे.

उस्र. उस्रो रूपे च किरणेऽप्युस्राऽर्जुनुप्रपचितयोः, मे. उस्रा गवुप्रपचितायामुस्रस्तु किरणे. मृतः, वि उस्रा गव्युपचित्रयोः। उस्रो मयूखे स्यात्, हे. उस्रो दीप्तौ गवि स्त्रियाम्, वि.

ऊ. ऊ वाक्यारम्भरक्षानुकम्पास्वपि च दृश्यते, मे. ऊ वाक्यारम्भ ऊ रक्षारवयोःप्रतिध्वनव्ययम्, वि. अर्थोऽपि दीपिका वामस्वयं मधुसूदनः। इन्द्रश्चापः षण्मुखश्च ऊकारो रक्षणाधिपः, मा. रक्षणे चापि ऊकार ऊकारो ब्रह्मणि, ए.

ऊति. ऊतिः स्त्री रक्षणे स्यूतौ, मे. ऊतिः स्यूतौ च रक्षणे, वि. स्यादूतिः स्यूतिरक्षयोः, हे.

ऊन. ऊनं हीने रणोद्योगे, वि.

ऊम्. ऊं प्रश्ने रोषवाचि च, हे. ऊं रुषोक्तौ पृच्छायां, मे. उं प्रश्ने च रुषोक्तौ च, वि.

ऊररी, ऊरी. v. उररी, उरी.

ऊर्ज ऊर्जस्तु कार्त्तिकोत्साहबलेषु प्राणनेऽपि च, मे. ऊर्जः कार्त्तिके बले, हे. उत्साहकार्त्तिकावूर्जौ, त्रि. ऊर्जो बले महोत्साहे, वि.

ऊर्णा. ऊर्णा मेषादिलोम्नि स्याद् भ्रूमन्त रावर्त्तके भ्रुवोः, मे, वि. ऊर्णा भ्रूमध्यगावर्त्ते मेषादीनाञ्च लोमनि, हे. ऊर्णा मेषादिलोम्नि स्यादावर्त्ते चान्तरा भ्रुवोः, अ.

ऊर्णायु ऊर्णायुः घणभङ्गे स्यात् मेषकम्बलमेषयोः, वि ऊर्णायुरविकम्बले। ऊर्णनाभे च मेषे च, हे. ऊर्णायु र्ना घणभङ्गे मेषकम्बलमेषयोः, मे.

ऊर्द्ध. ऊर्द्धं स्यादुच्छ्रिते तुङ्गे चोपरिष्टादपि स्मृतम्, मे, वि. स्यादूर्द्धन्तु समुच्छ्रिते। उपर्युन्नतयोः, हे.

ऊर्मि. ऊर्मि स्त्रर्ङ्ग पीडायां वेगभङ्गप्रकाशयोः। उत्कण्ठादस्त्रसङ्कोचलेखयोरपि कीर्त्तिता, वि. ऊर्मिः पीड़ाजवोत्कण्ठाभङ्गप्रकाशवीचिषु। वस्त्रसङ्कोचलेखायां, हे. ऊर्मिः स्त्रीपुंसयो र्वीचित्रां प्रकाशे वेगभङ्गयोः। वस्त्रसङ्कोचरेखायां वेदनापीड़योरपि, मे. पीड़ायां वीचिवेगयोः। वस्त्रसूक्ष्मे च रेखायाञ्चोर्मिः स्त्रीपुंसयो र्मतः, त्रि.

ऊर्मिका. ऊर्मिका चाङ्गुलीये स्याद् वस्त्रभङ्गतरङ्गयोः मे. ऊर्मिका पुनः। उत्कण्ठायां भृङ्गनादे वस्त्रभङ्गेऽङ्गुलीयके। वीचयां च, हे

ऊर्मिका चाङ्गुलीये स्याद् दस्त्रभङ्गतरङ्गयोः। तथोद्वाल्कलवेऽपि स्यादूर्मिका मधुपध्वनौ, वि.

ऊर्वरा. V. उर्वरा.

(ऊष. ऊषः चारमृदि प्रोक्तं प्रभातेऽपि पुमानयम्। तत्सन्ध्यायां च रन्ध्रे च चन्द्रनक्रौ स्त्रवोविले, मे.)

ऊषण. ऊषणं मरिचे क्लीवं कणायामूषणा स्त्रियाम्, मे. ऊषणं मरिचे ख्यातं कणायामूषणा भवेत्, वि. अथोषणा। कणोषणं तु मरिचे, हे.

ऊष्मन्. ऊष्माणस्तु निदाघोष्णा ग्रीष्माः शषसहा अपि, हे,

ऋ. ऋशब्दो गर्हणे वाकेत्र देवमातायां त्वनव्ययम्, मे. ऋ कुत्सावाक्ययोः, हे. ऋ वाक्ये चापि कुत्सायामदितावाश्च त्वनव्ययम्, वि. दैविका दचनासा च भारभूतिस्त्रिविक्रमः। देवमाता रिपुघ्नश्च ऋकार तपनस्तथा, मा.

ऋक्ष. ऋक्षः पर्वतभेदे स्यादच्छभल्लूके शोणके पुमान्। क्षतवेधनेऽन्यलिङ्गं नक्षत्रे पुंनपुंसकं, मे. ऋक्षोऽद्रिभेदे भल्लूके शोणके क्षतवेधने। ऋक्षमुक्तं च नक्षत्रे, वि. ऋक्षस्तु स्यात् नक्षत्राच्छभल्लयोः। महीधरविशेषे च शोणके क्षतवेधने, हे. भल्लूके शोणके चर्चा नक्षत्रे पुंनपुंसकम्, त्रि.

ऋक्षर. ऋक्षरं वारिधारायामृक्षरस्त्वर्त्विजि स्मृत, मे, वि. ऋक्षरं वारिधारायामृक्षरः पुन ऋत्विजि, हे.

ऋण ऋणं देये जले दुर्गे, हे.

ऋत. ऋतमुञ्छशिले जले। सत्येत्र दीप्ते पूजिते स्यात्, मे. ऋतं शिलोञ्छे पानीये पूजिते दीप्तसत्ययोः, हे. ऋतमुञ्छशिले तोये दीप्ते सत्येऽभिपूजिते, वि. ऋतमुञ्छशिले सत्येत्र, त्रि.

ऋति. ऋतिः कल्याणवर्त्मनोः। जुगुप्सास्पर्धयोः स्त्री स्यात्, मे. ऋतिः कल्याणवर्त्मना, त्रि ऋति गतौ जुगुप्सायां स्पर्धामङ्गलयोरपि, वि. ऋति जुगुप्साकल्याणगतिस्पर्धासु, हे.

ऋतु. ऋतुः वर्षादिषट्सु च । आर्तवे भासि च पुमान्, मे. ऋतुः । स्त्रीणां पुष्पे वसन्तादौ, हे. ऋतुः स्त्रीकुसुमे भासि वसन्तादिषुधीरयोः, वि. ऋतुरङ्गनारजस्यपि, श. ऋतु, स्त्रीकुसुमेऽपि च, श.

ऋद्ध. ऋद्धं सम्पन्नधान्ये च सुसमृद्धे च वाच्यवत्, मे. ऋद्धं त्वतिसमृद्धे स्यात् सम्पन्नार्थे तु वाच्यवत्, वि. ऋद्धं सवृद्धे सिद्धान्ते, हे.

ऋद्धि. ऋद्धिस्तु स्त्र्यौषधीभेदे समृद्धावपि योषिति, मे ऋद्धिः सम्पदि चौषधे, त्रि.

ऋषभ. ऋषभस्त्वौषधान्तरे । स्वरभिद्वृषयोः कर्णरन्ध्रकुम्भीरपुच्छयोः । उत्तरस्थः स्मृतः श्रेष्ठे स्त्री नराकारयोषिति । शूकशिम्ब्यां शिरालायां विधवायां च कीर्तिता, मे. ऋषभः स्वरभेदे स्यात् अष्टवर्गौषधे वृषे । श्रेष्ठार्थे च वराहस्य पुच्छे रन्ध्रे च कर्णयोः । ऋषभी शूकशिम्ब्यां स्यात् नराकारस्त्रियामपि । विधवायां शिरालायां, वि. ऋषभः स्यादादिजिने वृषभे भेषजे स्वरे । कर्णरन्ध्रे कोलपुच्छे श्रेष्ठे चापुत्तरे स्थितः । ऋषभी तु शूकशिम्ब्यां पुरुषाकारयोषिति । विधवायां शिरालायां, हे. ऋषभो श्रेष्ठवृषभे, त्रि.

ऋषभध्वज. ऋषभध्वज एषोऽपि शङ्करे चार्हदन्तरे, मे ऋषभध्वजशब्दोऽसौ शङ्करे चार्हदन्तरे, वि ऋषभध्वजः प्रथमजिनेन्द्रे शशिशेखरे, हे.

ऋषि. ऋषि वेदे वसिष्ठादौ दीधितौ च पुमानयम्, मे. ऋषि वेदे वसिष्ठादौ दीधितावपि पठ्यते, वि. ऋषि वेदे मुनौ, हे. ऋषि वेदेऽपि, त्रि.

ऋषभप्रोक्ता. ऋषभप्रोक्ता शतावर्यांबलाशूकशिम्बिषु, मे. ऋषभप्रोक्ता शतावर्यां शूकशिम्ब्यां बलाभिदि, वि. ऋषभप्रोक्ता शूकशिम्ब्यां शतावर्यां बलाभिदि, हे.

ऋ. ऋ वाक्यारम्भरचायां वध-मृत्योरनव्ययम् । देवमातरि दनौ चापि भैरवे दनुजे गतौ, मे. शशिपोभो-वामनश्च गोधिका यशनासिका ।

दैत्यमाता च देवश्च ऋकारस्त्रिपुरान्तकः, मा. ऋकारो दनुजप्रसूः, ए.

लृ. लृकारो देवतायां भुवि क्षुधे च कीर्त्तित, मे. श्रीधरश्च परः स्थाणुर्दक्षगण्डस्त्रिवेदकः। एकाङ्घ्रि वज्रदण्डश्च व्योमधर्षि लृस्वरः स्मृतः, मा

लॄ. लॄकारो देवनार्यां स्यात् नार्य्यामन्यपि मातरि, मे. लॄपीकेशो हरः सूक्ष्मो वामगण्डः कुबेरदृक्। अर्द्धचन्द्रो नीलचरणो लॄकारस्य त्रिकूटकः, मा.

ए. ए स्मृतावप्यसूयानुकम्पामन्त्रणकृतिषु, मे. ए आमन्त्रणाह्वानयो', हे. एऐग्रन्दौ तु हेहैवत् स्मृत्यामन्त्रणकृतिषु, वि. भिण्टीशः पद्मनाभश्च शक्तिः सूक्ष्मोऽमृतो भग। ऊर्द्धोऽष्टग कामरूप एकारस्य त्रिकोणकः, मा.

एक. एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु, मे. एकन्तु केवले श्रेष्ठ इतरस्मिंश्च वाच्यवत्, वि. एकोऽन्य केवलः श्रेष्ठः संख्या, हे. एके मुख्यान्यकेवलाः, अ.

एककुण्डल. एककुण्डल आख्यातो बलभद्रे धनाधिपे, मे. एककुण्डल इत्येष सौनन्दिनि धनाधिपे, वि. एककुण्डलो बलभद्रे किम्पुरुषेश्वरे, हे. वैश्रवणेऽपि एककुण्डलः, ह.

एकपद.- एकपदं तत्काले नपुंसकं वर्त्मनि स्त्री स्यात्, मे. एकपदं स्यात्तत्काले पद्व्यामेकपद्यपि, वि. एकपदं तदात्वे स्यादेकपदी तु वर्त्मनि, हे.

एकाग्र. एकाग्रान्यलिङ्गं स्यादेकतानेऽप्यनाकुले, मे. एकाग्रमेकताने स्यादेकाग्रं चाप्यनाकुले, वि. अनाकुलेऽपि चैकाग्रः, अ. एकाग्रौ तद्गतव्यग्रौ, हे

एकाष्ठीला. एकाष्ठीला पनतिक्तौषधौ पुंसि वकपुष्पे, मे. एकाष्ठीलामपि प्राहुः शिवमल्लीमोषधीभिदो', वि.

एडमूक एडमूकोऽन्यलिङ्गः स्यात् शठे वाक्श्रुतिवर्जिते, मे. एडमूकः स्मृतो धीरैः शठे वाक्श्रुतिवर्जिते, वि एडमूकोऽनेडमूकस्तु निर्वाणीश्रुतिके शठे, हे

एत. एतः कर्बुर आगते, मे, त्रि, हे एतावागतकर्बुरौ, त्रि.

एधतु एधतुः पुरुषेऽग्नौ ना, मे. एधतुः पुरुषे वह्नौ, वि. एधतु र्नरि पावके, हे.

एनस्. एनः पापापराधयोः, मे, त्रि. एनोऽपराधे कलुषे, वि. V. आगस्.

एव. अथैव चौपम्ये नियोगे वाक्यपूरणे। अवधारणे च चार्थनि-योगे च विनिग्रहे, मे. ईषदर्थे परिभवेऽप्येवौपम्येऽवधारणे, वि. एवौपम्ये परिभवे ईषदर्थेऽवधारणे, हे.

एवम्. एवं प्रकारे स्यादङ्गीकारेऽवधारणे। अर्थप्रश्ने परत्रता-वुपमाश्वच्छयोरपि, मे एवं प्रकारोपमयोरङ्गीकारेऽवधारणे, वि एवं प्रकारेऽङ्गीकृतेऽवधारणे समन्वये, हे. इवेत्यमर्थयोरेवम्, अ.

एषणी. एषणी व्रणमार्गानुसारिण्यां च तुलाभिदि, मे.

ऐ. ऐशब्दो दृश्यते ह्वाने स्मृत्यामन्त्रणयोरपि, मे. भाना-ख्यो भौतिकश्चाधरो दामोदरस्तथा। वागीशो वर्मभयदृ ऐकारस्त्रिपुर-स्तथा, मा. V. ए.

ऐणेय. ऐणेयमेणीचर्माद्यौ रतबन्धभिदि स्त्रियाः, वि ऐणेय-मेणीत्वगादिके। रतबन्धभिदि स्त्रीणां, हे

ऐन्द्रि ऐन्द्रिः काके जयन्ते ना, मे. ऐन्द्रिः काकजयन्तयोः। ऐन्द्रिः काकजयन्तयोः, वि. ऐन्द्रिरिन्द्रसुते काके, हे.

ऐरावत. ऐरावतोऽभ्रमातङ्गे नारङ्गे लकुचद्रुमे। नागभेदे च पुंसि स्यात् विद्युद्भेदेऽभिदोः स्त्रियाम्। नपुंसकं महेन्द्रस्य स्वजुर्दीर्घ-शरासने, मे. ऐरावतोऽभ्रमातङ्गनारङ्गलकुचादिषु। ऐरावतं महे-न्द्रस्य ऋजुर्दीर्घशरासने। ऐरावती स्यात्तडिति सरिद्भेदेऽपि लक्ष्यते, वि. ऐरावतो नागरेऽपि, त्रि. ऐरावतोऽङ्गे नागरङ्गे लकुचे त्रिदशद्विपे। ऐरावतन्तु शक्रस्य ऋजुर्दीर्घशरासने। ऐरावती विद्युद्दिद्युद्भिदोः शत-द्रुदायता, हे.

ओ. ओ सम्बोधन आह्वाने स्मरणे चानुकम्पने, मे. सद्यो-जातो वासुदेव ऊर्द्धदन्तस्त्रिमात्रकः। आप्यायनीमन्त्रनाथ ओकारो नगसंज्ञकः, मा.

ओकस्. ओक आश्रयमात्रे च मन्दिरे च नपुंसकम्, मे. ओकः सद्मनि चाश्रये, वि. ओकस्तु सद्मनि। ओकाश्चाश्रयमात्रे स्यात्, हे. ओकः सद्माश्रयश्चौकाः, अ.

ओघ. ओघो वेगे जलस्य च। वृन्दे परम्परायाञ्च द्रुतवृत्त्योप-देशयोः, मे. ओघो वृन्दे पयोवेगे द्रुतवृत्त्रोपदेशयोः। ओघः परम्परायां च, वि. ओघः प्रवाहः सङ्घातो द्रुतवृत्तं परम्परा। उपदेशश्च, हे. ओघो वृन्देऽम्भसां रये, अ. ओघः स्याद् द्रुतवृत्ते च, त्रि. ओघः पूरोऽप्य वेगश्च, अने.

ओजस्. ओजो दीप्तावष्टम्भे प्रकाशबलयोरपि, मे. ओजो दीप्तिप्रकाशयोः। अवष्टम्भे बले धातुतेजसि, हे. ओजो दीप्तौ बले, अ. ओजस्तेजसि धातूनामवष्टम्भप्रकाशयोः। ओजो बले च दीप्तौ च, वि. बलदीप्तौ तथौजसी, अने.

ओड्र. ओड्राः पुंभूम्नि नीवृति। ओड्रः स्यात्तो जवापुष्पे, मे. ओड्रा जनपदान्तरे। ओड्रो जने जवापुष्पे, हे. ओड्रो जने जपापुष्पे ओड्रा जनपदान्तरे, वि.

ओदन. ओदनं न स्त्रियां भक्ते बलायामोदनी स्त्रियाम्, मे.

ओम्. ओमुपक्रमे। प्रणवे चाप्युपगमे चापाकृतौ च मङ्गले, मे. ओमेवं प्रणवार्थयोः, त्रि. ओं प्रणवेऽङ्गीकृतावपि, हे. ओमित्यनुमता मोक्तं प्रणवे चाप्युपक्रमे, वि

ओल्ल. ओल्लस्तु सूरणे पुंसि स्यादार्द्रं वाच्यलिङ्गकः, मे. ओल्ल आर्द्रे च सूरणे, वि. आर्द्रसूरणयोरोल्लः, त्रि.

औ. औशब्दः कथितो भूतौ तथा सम्बोधनेऽपि च। स्त्री तु विश्व-म्भरायां स्यात् पुमांस्तु निस्वने स्मृतः, मे. सङ्कर्षणोऽनुग्रहेशो सुरारि-

व्यापिनी तथा। अथो दन्तगतो मायी हृसिंहाङ्गमथेश्वरः, मा.

औचित्य. औचित्यमुचितत्वे स्यात् सत्येऽपि च नपुंसकम्, मे. औचित्यं सत्ययोगयोः, वि.

औदुम्बर. औदुम्बरः स्याद्देशे रोगभेदे नपुंसकम्, मे. औदुम्बरः स्याद्देशे रोगभेदे च कथ्यते, वि. औदुम्बरो यमे रोगभेदे, हे.

औशीर. औशीरं शयनासने चामरदण्डेऽप्युशीरजे प्रोक्तम्, मे. औशीरमाहुश्चमरदण्डे च शयनासने, वि. औशीरं शयनासने। उशीरजे चामरे च, हे. औशीरश्चामरे दण्डेऽप्यौशीरं शयनासने, अ.

अं, अः. V. अ.

क. को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे। कामग्रन्थौ चक्रिणि च पतत्रिपार्थिवे तथा। मयूरे ऽग्नौ न पुंसि स्यात् सुखशीर्षजलेषु कम्, मे. को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च। पावके च मयूरे च सुखशीर्षजलेषु कम्, वि. कोधीशो धातृसंज्ञश्च चक्री स्फटिकराड्गिरः। वर्णादिमो याद्वेश. ककारः कामगः स्मृतः, मा. को ब्रह्मण्यात्मनि रवौ मयूरेऽग्नौ यमेऽनिले। कं शीर्षेऽम्बु सुखे, हे. मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनोः, अ. क आत्मा च सुखञ्च कम्, लि. कशब्दः सुखवाद्म्बु-ब्रह्ममस्तकवाचकः, ह मूर्ध्नि चित्ते जले काये सुखे ब्रह्मणि मारुते। कामे काले सुवर्णे च कशब्दो द्रविणे ध्वनौ, अने.

कंस. कंसोऽस्त्री तैजसद्रव्ये कांस्ये मानेऽसुरे तु ना, मे. कंसो दैत्यान्तरे स्मृतः। कांस्ये च कांस्यपात्रे च मानभेदेऽपि कीर्त्तितः, वि. कंसस्तैजसमानयोः। पानपात्रे दैत्यभेदे, हे. कंसो मानेऽसुरान्तरे। तैजसे तत्र पात्रे च, लि.

ककुद(द्). ककुत् स्त्री ककुदोऽप्यस्त्री श्रेष्ठे राजध्वजे वरे, मे. ककुद्वत् ककुदं श्रेष्ठे वृषाङ्गे राजलक्ष्मणि, वि. ककुदवत् ककुत् श्रेष्ठे वृषाङ्गे राजचिह्ने, हे. प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्, अ. राजलिङ्गविषाणयोः। स्त्री ककुत्, लि. प्रधाने राजलिङ्गे च ककुदाप्या

प्रकीर्तिता, अने. ककुदं स्तम्भे विदुः प्रधानेऽपि। ह.

ककुभ्. ककुप् स्त्रियां प्रवेणीदिक्शोभासु चम्पकस्रजि, मे. ककुप् शोभादिशो शास्त्रे प्रवेण्यां चम्पकस्रजि, वि. आशार्थे ककुप् प्रोक्ता, अने.

ककुभ. ककुभो रागभेदेऽपि वीणाङ्गेऽर्जुनपादपे, मे, वि. ककुभो वीणाप्रसेवे रागभेदेऽर्जुनद्रुमे, हे. वीणाप्रसेवे ककुभो रागभेदेऽर्जुनद्रुमे, त्रि.

कक्ष. कक्षा सत्रादन्तरीयस्य पश्चादञ्चलपल्लवे। स्पर्द्धापदे ना दोर्मूले कच्छवीरुत्तृणेषु च, मे. कक्षो दोर्मूलकच्छयोः। सैरिभे च तृणे कक्षः शुष्ककाननवीरुधोः। कक्षा ग्राहणिकाकाञ्चीप्रकोष्ठगजरज्जुषु। स्पर्धापदपरीधानपश्चाटञ्चलपल्लवे। रथभागेऽपि कक्षा सत्रात्, वि. कक्षो वीरुधि दोर्मूले कच्छे शुष्कवने तृणे। पापे कक्षा त्विभरज्ज्वां काञ्च्यां गेहप्रकोष्ठयोः। भित्तौ साम्ये रथभागेऽन्तरीयपश्चिमाञ्चले। उद्ग्राहिण्यां च, हे. कक्षा तु तृणवीरुधौ, श्र. कक्षस्तु दोर्मूले शुष्ककानने। कक्षा वरत्राप्रकोष्ठस्पर्द्धोद्ग्राहणिकासु च, त्रि. कक्षा तु भवनान्तर्भूमेखलागजरज्जुषु, अने. कक्षः सत्रास् कच्छवीरुधोः। कक्षा गुह्यपिधाने कावत्राङ्गे गेहप्रकोष्ठे च, ह.

कक्षा. कक्षा हट्टतिकायां सत्रात् काञ्च्यां मध्यभवन्धने। हर्म्यादीनां प्रकोष्ठे च, मे. कक्षा हट्टतिकायां सत्रास् कक्षा मध्यभवन्धने। हर्म्यादीनां प्रकोष्ठे च, वि. कक्षा गृहप्रकोष्ठे सत्रात् साहश्योद्योगकाञ्चिषु। हट्टतिकेभनाड्योश्च, हे. कक्षा प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्यभवन्धने, च.

कक्षावेक्षक. कक्षावेक्षक स्तन्ये च शुद्धान्तोद्यानपालयोः। रङ्गाजीवे कवौ पिङ्गे द्वाःस्थे, मे कक्षावेक्षकः शुद्धान्तपालकोद्यानपालयोः। द्वाःस्थे पिङ्गे कवौ रङ्गाजीवे, हे कक्षावेक्षकमिच्छन्ति शुद्धान्तोद्यानपालयोः। द्वारपाले कवौ पिङ्गे रङ्गाजीविन्यपि क्वचित्, वि.

कङ्क. कङ्कस्त्वद्मद्विजे ख्यातो लोहपृष्ठकृतान्तयोः, मे, वि. खगे यमे च्छद्मविप्रे कङ्क., त्रि. कङ्को ब्राह्मणलिङ्गिनि। लोहपृष्ठे यमे, हे.

कङ्कण. कङ्कणं करभूषायां सूत्रमण्डनयोरपि, मे. कङ्कणं शेखरे

हस्तसूत्रमण्डनयोरपि, वि. कङ्कणं करभूषणे। मण्डने हस्तसूत्रे च, हे. हस्तसूत्रेऽपि कङ्कणम्, त्रि.

कह्लर. कह्लरं कुत्सिते तक्रे, हे, वि. V. कच्चर.

कच. कचः केशे गुरोः सुते। बन्धे शुष्कव्रणे पुंसि करिण्यां तु कचा स्त्रियाम्, मे. कचः केशे गुरोः पुत्रे बन्धे शुष्कव्रणे कचः। कचा करिण्यां, वि. कचः शुष्कव्रणे केशे बन्धे पुत्रे च गीष्पतेः। कचा करेण्वां, हे. इभ्यां स्त्री गुरुपुत्रे ना केशे शुष्के व्रणे कचः, त्रि. कचो गीष्पतिसुतेऽपि, हा.

कचाकु. कचाकुस्तु दुराधर्षे दुःशीले च विलेशये, वि.

कच्चर. कच्चरं कुत्सिते वाच्यलिङ्गं तक्रे नपुंसकं, मे. V. कह्लर.

कच्चित्. कच्चित् स्यात् प्रश्नकामयोः, ह. कच्चित् कामप्रवेदने। प्रश्ने हर्षे मङ्गले च, मे.

कच्छ. अथ कच्छः स्याद् अनूपे तुन्नकद्रुमे। नौकाङ्गे पुंसि वाराह्यां चीरिकायान्तु योषिति, मे. अथ कच्छः स्याद् अनूपे तुन्नकद्रुमे। नौकान्ते परिधानस्य पश्चाद्वस्त्रलपल्लवे। कच्छा तु चीरिकायां च वाराह्यां च निगद्यते, वि. कच्छो द्रुभेदे नौकाङ्गेऽनूपप्राये तटेऽपि च। कच्छास्तु देशे कच्छा स्यात् परिधानापराञ्चले। चीर्यां वाराह्यां, हे. परिधानाञ्चले कच्छो जलप्रान्ते त्रिलिङ्गकः, श. वाराही चीरिका कच्छा कच्छोऽनूपे द्रुमान्तरे, त्रि.

कच्छप. कच्छपो वल्लकीभेदे कुलौ क्षुद्रगदान्तरे। पुंसि निधन्तरे कूर्मे मल्लबन्धान्तरेऽपि च, मे. कच्छपी वल्लकीभेदे कुलौ क्षुद्रगदान्तरे। मल्लबन्धविशेषेऽपि कच्छपः, वि. कच्छपो मल्लबन्धके। कमठे कच्छपी वीणा, हे. कूर्मी वीणाभेदश्च कच्छपी, श.

कच्छुर. कच्छुरा शूकशिम्ब्यां च शठीदुःस्पर्शयोरपि। कच्छुरः पुंश्चले वाच्यलिङ्गः स्यात् पामरेऽपि च, मे. कच्छुरः पुंश्चले पामासहिते कच्छुरा शठी। दुःस्पर्शा शूकशिम्बी तु, हे. कच्छुरा शूकशिम्ब्यां स्यात् शठीदुःस्पर्शयोरपि। कच्छुरं वाच्यवत् प्रोक्तः पामरे पुंश्चलेऽपि च, वि.

কুশরীরে চ শঠঞ্চ কচ্ছুরা পামরে বিদ, ত্রি.

কঞ্চুক. কঞ্চুকো বারবাণে স্যাৎ নির্মোকে কবচেঽপি চ। বর্ধাপক-গৃহীতাঙ্গস্থিতবস্ত্রে চ চোলকে। কঞ্চুক্যৌষধিভেদে, মে. কঞ্চুকো বার-বাণে স্যান্নির্মোকে কবচেঽপি চ। বর্দ্ধাপকগৃহীতাঙ্গস্থিতবস্ত্রে চ চোলকে। ঔষধৌ কঞ্চুকী চ, বি. কঞ্চুকশ্চোলবস্ত্রয়োঃ। বর্ধাপকগৃহীতাঙ্গবসনে বারবাণকে। নির্মোকে, হে. অথ কঞ্চুকঃ। নির্মোকে চোলকে বারবাণে, ত্রি.

কঞ্চুকিন্. কঞ্চুক্যন্তঃপুরাধ্যক্ষে পিঙ্গেঽহৌ জোঙ্গকদ্রুমে, মে. কঞ্চুকী ভুজগে পিঙ্গে মহল্লে জোঙ্গকদ্রুমে, বি. কঞ্চুকী জোঙ্গকতরৌ মহল্লে পন্নগে বিটে, হে. অথ কঞ্চুকী। স্থাপত্যে বর্মিতে সর্পে, ত্রি.

কঞ্জ. কঞ্জঃ কেশে বিরিঞ্চৌ চ কঞ্জং পীযূষপদ্মযোঃ, মে. কঞ্জঃ কেশে বিরিঞ্চে চ কঞ্জঃ পীযূষপদ্মযোঃ, বি. কঞ্জো বেধসি কেশে চ কঞ্জং পীযূষপদ্মযোঃ, হে. কঞ্জ. কেশে বিধৌ কঞ্জঃ কঞ্জং পীযূষপদ্মযোঃ, অনে.

ক(ঞ্জ)ঞ্জার. কঞ্জারো জঠরে সূর্যে বিরিঞ্চৌ বারণে মুনৌ, মে, বি. কঞ্জারঃ কুঞ্জরে সূর্যে জঠরে দ্রুহিণে মুনৌ, হে.

কট. কটঃ শ্রোণৌ হযো. পুংসি কিলিঞ্জেঽতিশযে শবে। সমযে গজ-গণ্ডে চ পিপ্পল্যাং তু কটী মতা, মে. কটঃ শ্রোণৌ ক্রিযাকারে কলিঞ্জেঽ-তিশযে শবে। সমযে গজগণ্ডে চ পিপ্পল্যাং চ কটী মতা, বি. অথ কটো গজগণ্ডে কটৌ ভগস্। শবে শবরৌষধ্যোঃ ক্রিযাকারশ্মশানযোঃ। কি-লিঞ্জে সমযে চাপি, হে. শপথে চ ক্রিযাকারে কিলিঞ্জশবযোঃ কটঃ, ত্রি. সমযেঽপি কটঃ স্মৃতঃ, হ.

কটক. কটকোঽস্ত্রী নিতম্বেঽদ্রে দন্তিনাং দন্তমণ্ডলে। সামুদ্র-লবণে রাজধানীবলযযোরপি, মে. কটকস্ত্বদ্রিনিতম্বে বাহুভূষণে। সেনাযাং রাজধান্যাঞ্চ, হে. কটকং বলযে সানৌ রাজধানীনিতম্বযোঃ। সামুদ্রলবণে দন্তমণ্ডলে দন্তিনামপি, বি. রাজধান্যাং নিতম্বেঽদ্রে বলযে কটকোঽস্ত্রিযাম্, ত্রি. সেনাযামপি কটকম্, হ. স্কন্ধাবারেঽপি কটকঃ, শা

कटखादक. अथ कटखादकः। खादके काचकलसे वलिपुष्टे च जम्बुके, मे, वि. अथ कटखादकः। खादके काचकलसे शृगाले वलिपुच्छयोः, हे.

कटभङ्ग. कटभङ्गस्तु सस्यानां हस्तच्छेदे नृपात्यये, मे, वि कटभङ्गो नृपात्यये। हस्तच्छेदे च सस्यानां, हे. हस्तच्छेदे तु सस्यानां कटभङ्गो नृपात्यये, लि.

कटप्रू. कटप्रूः पुंसि राचसे। विद्याधरे महादेवे तथा स्यादत्तदेवने, मे. कटप्रूः स्यान्महाजानटे। विद्याधरे रक्षसि च कटप्रूरचदेवने, वि. कटप्रूरचदेवने। विद्याधरेऽन्नपे रुद्रे, हे.

कटभी. कटभी वृक्षभेदेऽपि ज्योतिष्मतप्रामपि स्त्रियाम्, मे.

कटम्भर. कटम्भरा प्रसारण्यां रोहिण्यां गजयोषिति। कलम्बिकायां गोलायां वर्षाभूमूर्वयोरपि, मे, वि. कटम्भरा प्रसारिण्यां गोलायां गजयोषिति। कलम्बिकायां रोहिण्यां वर्षाभूमूर्वयोरपि, हे. गोधाकलम्बिकादन्तिबधूषु च कटम्भरा, हा.

कटाह. कटाहः कूर्मकर्परे। द्वीपस्य च प्रभेदे स्यात्तैलादेः पाकभाजने। जायमानविषाणाग्रमहिषीशावकेऽपि च, मे. कटाहो घृततैलादिपाकपात्रे च खर्परे। कटाहः कूर्मपृष्ठे च स्तूपे च महिषीशिशौ, वि. कटाहः स्यात् कूर्मपृष्ठे कर्परे महिषीशिशौ। तैलादिपाकपात्रे तु, हे. स्तूपे च पाकपात्रे च कटाहो महिषीशिशौ, वि. कटाहो निरयेऽपि च, हा.

कटित्र. कटित्रं रसनायाञ्च चर्माङ्गे कटिवाससि, मे. कटित्रं रसनायां स्यात् चर्माङ्गे कटिवाससि, वि. कटित्रं तु कटिवस्त्रे रसनाचर्मभेदयोः, हे.

कटु. कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि। नपुंसकमकार्ये स्यात् पुंलिङ्गे रसभावके। त्रिषु तद्वत्सुगन्धयोश्च मत्सरेऽपि खरेऽपि च, मे. कटुः सुगन्धे तीक्ष्णे स्यादकार्ये मत्सरे रसे। कटुः

प्रियङ्गुकटुकाराजिकास्वथ दूषणे। कटु प्रोक्तम्, वि. कटुकार्ये रसे च दूषणे च कटु रसे। तिक्ते प्रियङ्गुसुरभिकटुकाराजिकास्वपि, हे. रसे कटुः कटुकार्ये त्रिषु मत्सरतीक्ष्णयोः, अ. अप्रियेऽपि कटुः, त्रि.

कटुक. कटुका कटुरोहिण्यां स्त्रियां व्योषे नपुंसकम्, मे. कटुकं कटुरोहिण्यां व्योषेऽपि कटुकं स्मृतम्, वि. कटुकं कटु। कटुरोहिणीव्योषयोः, हे.

कटुकन्द. कटुकन्दः पुमान् शिग्रौ शृङ्गवेररसोनयोः, मे. कटुकन्दं विदुः शिग्रौ शृङ्गवेररसोनयोः, वि. कटुकन्दः शृङ्गवेरे शोभाञ्जनरसोनयोः, हे. कटुकन्दस्तु शृङ्गवेररसोनयोः, त्रि.

कठ. कठो मुनौ तदाख्यातवेदाध्येतृकयोः स्वरे, मे. कठः स्वर ऋचां भेदे स्यात्तदध्येतृवेदिनोः, वि. कठो मुनौ स्वरे ऋचां भेदे तत्पाठिवेदिनोः, हे.

कठिन. कठिनमपि निष्ठुरे स्यात् स्थाल्यपि त्रिषु नपुंसकं स्थाल्याम्। कठिनी खटिकायामपि कठिना गुड़शर्करायां च, मे. कठिनं निष्ठुरे स्थालयां शर्करायां गुड़स्य च। कठिना खटिकायां तु कठिनीति प्रयुज्यते, वि. कठिनं निष्ठुरोखयोः। कठिनी तु खटिका स्यात् कठिना गुड़शर्करा, हे.

कठिल्लक. कठिल्लकस्तु पर्णासे वर्षाभूकारवेल्लयोः, मे, वि. कठिल्लकस्तु वर्षाभ्वां पर्णासे कारवेल्लके, हे. पुनर्नवाकारवेल्लपर्णासेषु कठिल्लकः, त्रि.

कडार. कडारः पिङ्गले दासे, मे, वि. कडारो दासपिङ्गयोः, हे.

कण. कणा जीरककुम्भीरमक्षिकापिप्पलीषु च। कणोऽतिसूक्ष्मे धान्यांशे, मे. कणोऽतिसूक्ष्मे धान्यांशे कृष्णजीरकणादिषु, वि. कणो धान्यांशलेशयोः। कणा जीरकपिप्पल्योः, हे. कणोऽतिसूक्ष्मे धान्यांशे, अ. पिप्पल्यां जीरके कणा, त्रि.

कणिका. कणिका कथ्यतेऽत्यन्तसूक्ष्मवस्त्वग्निमन्थयोः, मे, वि. कणिका सूक्ष्मवस्तुनि। अग्निमन्थे, हे.

कर्णोचि. कर्णोचिः पुष्पितलतागुञ्जयोः शकटे स्त्रियाम्, मे.

कणीचिः पुष्पितलतागुञ्जयोः शकटेऽपि च, वि, हे

कणेरु कणेरुस्तु गणेरुवत्। वेश्याभीकर्णिकारेषु, हे. कणेरुः सप्रादृशावेश्याकर्णिकारे गणेरुवत्, वि. कणेरु. कर्णिकारे च करिणी-वेश्ययो. स्त्रियाम्, मे.

कण्टक कण्टको न स्त्रियां क्षुद्रशत्रौ मत्स्याद्यादिकोकसे। नैयोगिकादिदोषोक्तौ सप्राद्, रोमाञ्चद्रुमाङ्गयो, मे कण्टक. क्षुद्रवैरिणि। वेणौ द्रुमाङ्गे रोमाञ्चे, हे. कण्टक. क्षुद्रशत्रौ च कर्मस्थानकदोषयो.। रामाञ्चे च द्रुमाङ्गे च कण्टको मकरेऽपि च, वि रोमाञ्चे क्षुद्रशत्रौ च द्रुमाङ्गे कण्टकोऽस्त्रियाम्, त्रि

कण्ठ. कण्ठो गले सन्निधाने ध्वनौ मदनपादपे, मे, वि कण्ठो ध्वनौ सन्निधाने ग्रीवायां मदनद्रुमे, हे. अथ सुध्वनौ। ग्रीवादेशेऽपि कण्ठः सप्रात्, त्रि. कण्ठो ध्वनि गेल' कण्ठः, अन्ये स्वरेऽपि कण्ठ आख्यात., श

कण्ठाल. कण्ठाला तु द्वयो द्रौणीप्रभेदे ना क्रमेलके, मे.

कण्व. कण्वं पापे मुनौ पुंसि, मे कण्वं पापे मुनौ विदु, वि कण्वो मुनौ कण्वं तु कल्मषे, हे.

कत्तृण. कत्तृणं तृणभित्पृश्न्योः, मे. कत्तृणं तृणभेदेऽपि वारिपर्ण्यां च कत्तृणम्, वि. कत्तृणं रौहिषं कुम्भी, हे.

कथम्. कथं हर्षे च गर्हायां प्रकारार्थे च सम्भ्रमे। प्रश्ने सम्भावनायाञ्च, मे. कथं प्रश्ने सम्भ्रमे च प्रकारार्थे च सम्भवे, वि. कथं प्रश्ने प्रकारार्थे सम्भ्रमे सम्भवेऽपि च, हे.

कथाप्रसङ्ग. कथाप्रसङ्गो वातूले विषवैद्ये च वाचत्रवत्, मे, वि. कथाप्रसङ्गो वार्तायां विषसत्र च विकित्सके, हे. कथाप्रसङ्गो वातूले विषवैद्येऽपि वाचत्रवत्, त्रि.

कदन. कदनं मर्दपापयोः, मे. कदनं मर्दने पापे, वि.

कदम्ब कदम्बं निकुरम्बे सप्रान् नीपसिद्धार्थयोः पुमान्, मे. कदम्ब-

माड्: सिद्धार्थे नीपेऽपि निकुरम्बके, वि. कदम्बः सर्षपे नीपे कदम्बं निकुरम्बके, हे. इन्दे कदम्बो नीपे ना, त्रि. कुमालकः कदम्बः सत्रात् कदम्बः सर्षपः स्मृतः। कदम्बो वृक्षभेदश्च कदम्बो निगणः पुमान्, अने.

कदर. कदरः श्वेतखदिरे क्रकचव्याधिभेदयोः, मे. कदरः श्वेतखदिरे चुद्ररोगेऽपि भावितः, वि. कदरः श्वेतखदिरे क्रकचक्षुद्ररोगयोः हे.

कदल. कदलाकदली दृश्न्नी कदलीकदली पुनः। रम्भावृत्तेऽथ कदली पताकामृगभेदयोः। कदला डिम्बिकायाञ्च शाल्मलीभूरुहेऽपि च, मे. कदली हरिणान्तरे। रम्भायां वैजयन्त्यां च, हे. कदली ध्वजरम्भयोः, त्रि. कदली वैजयन्त्यां च रम्भायां हरिणान्तरे। कदली शाल्मलीशाल्मीडिम्बिकासु च कथ्यते, वि. कदली करिवैजयन्त्यां च, हृ.

कद्रु. कद्रुस्त्रिषु स्वर्णपिङ्गे नागानां मातरि स्त्रियाम्, मे. कद्रूर्मातरि नागानां कद्रुः कनकपिङ्गले, वि. कद्रुः कनकपिङ्गे सत्रात् कद्रूः सत्रान्नागमातरि, हे. कद्रुस्त्रिषु वाडारे सत्रात् कद्रूः स्त्री नागमातरि, त्रि.

कनक. कनकं हेम्नि पुंसि सत्रात् किंशुके नागकेशरे। धत्तूरे काञ्चनारे च कालीये चम्पकेऽपि च, मे. कनकं हेम्नि कनको नागकेसरे। धत्तूरे चम्पके काञ्चनारकिंशुकयोरपि, हे. कनकं चम्पके स्वर्णे किंशुके नागकेसरे। धुस्तूरे काञ्चनारे च कालेयेऽपि क्वचिन्मतम्, वि. कनकं धुस्तूरे नागकेसरे। चम्पके किंशुके हेम्नि, त्रि.

कनिष्ठ कनिष्ठोऽतियुवात्यल्पाऽनुजे स्त्री दुर्बलाङ्गुली, मे. कनिष्ठोऽल्पेऽनुजे यूनि कनिष्ठा दुर्बलाङ्गुली, वि. कनिष्ठोऽल्पेऽनुजे यूनि कनिष्ठा त्वन्तिमाङ्गुली, हे. कनिष्ठोऽतियुवाल्पयोः, अ.

कनीनिका. कनीनिका तारकाक्ष्णः सत्रात् कनिष्ठाङ्गुलावपि, मे. वि. कनीनिकाक्षितारका। सत्रात् कनिष्ठाङ्गुलिरपि, हे.

कनीयस्. कनीयानतियूनि सत्राद्, अत्यल्पानुजयोस्त्रिषु, मे. कनी-

यानतुजेऽत्यन्ये कनीयानतियूनि च, वि कनीयाननुजेऽल्पके । अतियूनि, ह (अतिशये) कनीयांस्तु युवाल्पयो, अ कनीयाननुजेऽल्पे च, त्रि

कन्तु. कन्तुः कामकुसूलयो, हे

कन्था कन्था मृण्मयभित्तौ च तथा प्रावरणान्तरे,मे कन्था मृण्मयभित्तौ स्त्रत् कन्था प्रावरणान्तरे, वि कन्था पुरे प्रावरणे, हे

कन्द कन्दोऽस्त्री सूरणे ससत्रमूले जलधरे पुमान्, मे कन्दस्तु सूरणे ससत्रमूले जलधरेऽपि च, वि कन्दोऽब्दे सूरणे ससत्रमूले, हे कन्दोऽस्त्री सूरणे मूले, त्रि मूले कन्दलिके कन्द कन्दो वारिद उच्यते, अने

कुहर. कुहरं गह्वरे छिद्रे क्लीवं नागान्तरे पुमान्, मे. कुहरः कोटरे छिद्रनागराजविशेषयोः, वि. कुहरं गह्वरे छिद्रे, हे.

कुहरित. भवेत् कुहरितं क्लीवं पिकालापे रतध्वनौ, मे. कुहरितं पिकालापे रटिते रतनिस्वने, वि कुहरितन्तु रटिते पिकालापे रतस्वने, हे.

कुहू. कुहूः स्त्री कोकिलालापनष्टेन्दुकलदर्शयोः, मे. कुहूः स्यात् कोकिलारावनष्टेन्दुकलदर्शयोः, वि कुहूर्नष्टेन्दुदर्शे स्यात् क्वणिते कोकिलस्य च, हे

कूट. कूटोऽस्त्री निश्चले राशौ लोहमुद्गरदम्भयोः। मायाद्रिशृङ्गयोस्तुच्छे सीरावयवयन्त्रयोः। अनृते च, मे. कूटं पूर्द्वारयन्त्रयोः। मायादम्भाद्रिशृङ्गेषु सीराङ्गेऽनृततुच्छयोः। निश्चलेऽयोघने राशौ, हे. कूटं यन्त्रेऽनृते राशौ निश्चले लोहमुद्गरे। मायाद्रिशृङ्गयोस्तुच्छे सीरावयवदम्भयोः। पुरद्वारे च शंसन्ति, वि मायानिश्चलयन्त्रेषु कैतवानृतराशिषु। अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्, अ

कूटपाकल पित्तज्वरे कुलालस्य पवने कूटपाकलः, श.

कूप.· कूप. कूपकमस्तूलाने गर्तान्तरे तरौ, मे. कूपः कूपक-

र्त्तोन्भृत्सन्मानगुणटघके, वि कूपो गर्त्तोऽन्धौ गुणटचयेः। सन्माने कूपके, हे गुणटचेऽपि कूप, त्रि

कूपक कूपको गुणटचे सञात् तैलपात्रे कुकुन्दरे। उद्पाने- ऽवुञतायां च कूपिकाऽम्भोगतोपले, मे, वि कूपको गुणटचे सञात् तैलपात्रे कुकुन्दरे, हे गुणटचेऽपि कूपकः, त्रि

कूर्च कूर्चमस्त्री भ्रुवो मध्ये कठिनश्मश्रुकैतवे, मे कूर्चो विकत्थने। श्मश्रुणि दम्भे भ्रूमध्ये, हे कूर्चो विकत्थने मध्ये भ्रुवोः श्मश्रुणि कैतवे, वि कूर्चमस्त्री भ्रुवो मध्ये श्मश्रुकैतवयोरपि, त्रि

कूर्चिका कूर्चिका सूचिकायां च तूलिकायाञ्च कुड्मले। कपाटो- द्घाटके चौरविज्ञतात्रपि योषिति, मे कूर्चिका चौरविज्ञतौ कुञ्चि- कायाञ्च कुड्मले। आलेख्यकूर्चिकासूचयोः, हे कूर्चिका सूचि- कायाञ्च तूलिकायाञ्च कुड्मले। कपाटांकुशके चौरविज्ञतावपि कूर्चिका, वि स्वयञ्च कूर्चिका, त्रि

कूर्पर कूर्पर सञात् कफोणौ च जानुदेशे च पुंसञयम्, मे, कू- र्परो जानुनि प्रोक्त कफोणावपि कूर्परः वि कूर्परौ जानुकफोणी, हे

कूल अथ कूल तटे स्तूपे सैन्यपृष्ठतडागयोः, मे कूलं स्तूपे त- डागे च सैन्यपृष्ठपतीरयोः, वि कूलं तटे सैन्यपृष्ठे तडागस्तूपयोरपि, हे

कूलक कूलकं न स्त्रियां स्तूपे पुंसि सञात् समिपर्वते, मे कूलक समिगैले च प्रतीरस्तूपयोरपि, वि

कूव(व)र कूवरस्त्रिषु चारौ ना कुजकेऽस्त्री युगन्धरे, मे कूवरः कुजके चारौ कूवरश्च युगन्धरे, वि कूवरः पुनः। कुब्जे युगन्धरे रम्ये, हे

कूष्माण्ड १ कु ाण्ड

कृक कृक कण्ठे तयोदरे, माने

• कृकवाकु कृकवाकु र्मयूरेऽपि सरटे चरणायुधे, मे, वि कृकवा- कु ...ावयो ...कुक्कुटमयूरयोः हे कृकवाकु ...

कृच्छ्र. कृच्छ्रमाख्यातमभीले पापसान्तपनादिनोः, मे, वि. कृच्छ्रं संज्ञसि। कष्टे सान्तपने, हे.

कृत. कृतं युगेऽन्यर्थे सत्राद् विहिते हिंसिते त्रिषु, मे. पर्य्याप्तेऽपि कृतं सत्रात्, ह. कृतं पर्य्याप्तयुगयो र्विहिते हिंसिते फले, हे. युगपर्य्याप्तयोः कृतम्, ध. कृतं युगेऽपि पर्य्याप्ते विहिते हिंसिते फले, वि.

कृतघ्न. कृतघ्नः कुक्कुरे पुंसि मर्य्यादिन्यभिधेयवत्, मे. कृतघ्नः कुक्कुरेऽपि च, वि, त्रि.

कृतान्त. कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु, मे, ध, वि. कृतान्तोऽस्त्रे सकर्मणि। सिद्धान्तयमदैवेषु, हे.

कृति. कृति. करणहिंसयो, वि, मे.

कृतिन्. कृती स्यात् पण्डिते योग्ये, मे, वि. कृती योग्ये बुधे, हे. कृतिनौ योग्यपण्डितौ, त्रि

कृत्त. कृत्तन्तु वेष्टिते छिन्ने, मे, वि. कृत्तं छिन्ने वेष्टिते च, हे.

कृत्ति. कृत्तिश्चर्मत्वचो भूर्जे कृत्तिकायां द्वयं स्त्रियाम्, मे. कृत्ति-श्चर्मत्वचो भूर्जे कृत्तिकायाञ्च कीर्त्तिता, वि.

कृत्य. कृत्या क्रियादेवतयोस्त्रिषु विहितकार्ययोः, मे. कृत्यं विहितकार्ययोः। कृत्या तु देवताभेदे कृत्या साध्यादिषु स्मृता, वि कृत्यो विहितेपि कार्ये च कृत्या सत्राद्देवता क्रिया, हे कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः, ध.

कृत्रिम. कृत्रिमं लवणभेदे ना सिह्लके रचिते त्रिषु, मे कृत्रिमं रचिते प्रोक्तं सिह्लके लवणान्तरे, वि कृत्रिमं लवणभेदे कृत्रिमः कृत-सिह्लयोः, हे.

कृत्स्न. कृत्स्नं सर्वाम्बुकुक्षिषु, मे. कृत्स्नं कष्टे समस्ते च, वि.

कृप. कृपो द्रोणश्यालके सत्राद् द्रोणपत्नी कृपी मता। कृपा दयायां, मे. कृपा दयायां व्यासपत्नी कृपी भारतपूरुषे, वि

कृपण. कृपणस्तु क्रिमौ पुंसि मन्दकुत्सितयोस्त्रिषु, मे. कृपणः कुत्सिते कृमौ, वि.

कृपाण. कृपाणः खड्गे च्छुरिकाकर्त्तर्योरपि योषिति, मे. कृपाणोऽसौ कृपाणी तु च्छुरिकायां च कर्त्तरौ, वि. कृपाणी कर्त्तरी च्छुरी। कृपाणोऽसौ, हे.

कृपीट. कृपीटमुदरे तोये, मे. कृपीटमुदरे जले, हे, त्रि. कृपीटमुदरे नीरे, वि. उदरे जले कृपीटं, रु.

कृपीटपाल. कृपीटपाल उद्दिष्टः केनिपातसमुद्रयोः, मे. कृपीटपालमिच्छन्ति केनिपातसमुद्रयोः, वि. कृपीटपालस्तु केनिपाते जलनिधावपि, हे. कृपीटपालमिच्छन्ति केनिपाते च वारिधौ, शा.

कृमि. कृमिर्ना क्रिमिवत् कीटे लाक्षायां कृमिले खरे, मे. कृमिः स्यात् क्रिमिवत् कीटे लाक्षायां कृमिले खरे, वि. क्रिमिः कृमिर्वल्लाक्षायां कीटे, हे. लाक्षायां च तथा कृमिः, रु.

कृमिकण्टक. कृमिकण्टकन्तु चित्राविडङ्गोदुम्बरेषु च, मे. सप्रात् कृमिकण्टकं चित्राविडङ्गोदुम्बरेषु च, वि. कृमिकण्टकश्चित्रायामुदुम्बरविडङ्गयोः, हे.

कृषक. कृषकः पुंसि फाले स्यात् कर्षके त्वभिधेयवत्, मे. कृषकौ फालकर्षकौ, हे, त्रि. कृषकः कर्षके फाले, वि.

कृषि. कृषि र्गोत्रविशेषः स्यात् कृषिः कालः कृषिः कपिः। कृषिराट्क इत्युक्तः कृषि र्वैखानसो मुनिः, अने.

कृष्टि. अथ कृष्टिः स्याद् आकर्षे स्त्री बुधे पुमान्, मे. कृष्टिः सप्रात् कर्षणे बुधे, वि. कृष्टिः कर्षणधीमतोः, हे. कृष्टिः कर्षे बुधे पुमान्, त्रि.

कृष्ण. कृष्णः सत्यवतीपुत्रे वायसे केशवेऽर्जुने। कृष्णा सप्राद् द्रौपदीनीलीकणाद्राक्षासु योषिति। मेचके वाच्यलिङ्गः सप्रात् क्लीबे मरिचलोहयोः, मे. कृष्णम् केशवे। व्यासेऽर्जुने कोकिले च कृष्णं मरिचलोहयोः। कृष्णा तु द्रौपदीनीलीद्राक्षागासु कणाहने। वाच्य-

वन् मेचके कृष्णे, वि. कृष्णः काके पिके वर्णे विष्णौ व्यासेऽर्जुने कलौ। कृष्णा तु नील्यां द्रौपद्यां पिप्पलीद्राक्षयोरपि। कृष्णन्तु मरिचे लोहे, है. कृष्णो वर्णे हरौ व्यासे कृष्णं मरिचलोहयोः। पिप्पली द्रौपदी कृष्णा, त्रि. मरिचेऽपि भवेत् कृष्णम्, हा.

कृष्णवर्त्मन्. कृष्णवर्त्मा पुमानग्नौ दुराचारे विधुन्तुदे, मे. कृष्णवर्त्मा हुताशे स्याद् दुराचारे विधुन्तुदे, वि. कृष्णवर्त्मा विधुन्तुदे। दुराचारे हुताशे च, हे.

कृष्णवृन्त. कृष्णवृन्ता पाटलायां माषपर्ण्यां च योषिति, मे. कृष्णवृन्ता पाटलायां माषपर्ण्यां च भाषिता, वि. कृष्णवृन्ता माषपर्ण्यां पाटलाख्यद्रुमेऽपि च, हे.

कृष्णसार. कृष्णसारा शिंशपायां पुंसि स्नुह्यां मृगान्तरे, मे. कृष्णसारः स्नुहीवृक्षे शिंशपामृगभेदयोः, वि. कृष्णसारः शिंशपायां मृगभेदे स्नुहीतरौ, हे. शिंशपायां कृष्णसारा स्नुह्यांच, त्रि.

केतन. केतनन्तु निमन्त्रणे। गृहे केतौ च कृत्ये, मे. केतनं लाञ्छने कार्ये गेहे चोपनिमन्त्रणे, वि. केतनं सदने चिह्ने कृत्ये चोपनिमन्त्रणे, हे. अथ केतनं कृत्ये केतावुपनिमन्त्रणे, अ.

केतु. केतुर्ना रुक्पताकाविग्रहोत्पातेषु लक्ष्मणि, मे. केतुर्द्युतिपताकयोः। ग्रहोत्पातादिचिह्नेषु, हे. ग्रहभेदे ध्वजे केतुः, अ. केतुर्द्युतौ पताकायां विग्रहोत्पातलक्ष्मसु, वि. केतुर्ग्रहोत्पातचिह्ने, त्रि. केतुर्ग्रहविशेषश्च ध्वजे चैव उदाहृतः, अने.

केदार. केदारोऽद्रौ शिवे क्षेत्रे भूमिभेदालवालयोः, मे. केदारः पर्वते शम्भौ क्षेत्रभेदालवालयोः, वि. केदारः क्षेत्रभिद्यालवाले शङ्करशैलयोः, हे.

केनार. केनार पुंसि नरके शिरःकपालसन्धिषु, मे. केनारः कुम्भिनरके शिरःकपालसन्धिषु, वि, हे.

केवल. केवलः कुहने पुमान्। नपुंसकन्तु निर्णीते याचत्रयश्चैक-

कृतुस्नयोः। केवलो ज्ञानभेदे, मे. केवलो ज्ञानभेदे सत्रात् केवलश्चैककृत्स्नयोः। निर्णीते केवलं चोक्तं केवलः कुहने क्वचित्, वि. केवलं त्वेककृत्स्नयोः। निर्णीते कुहने ज्ञाने केवलो ग्रन्थभिद्यपि, हे. निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः, अ.

केश. केशः सत्रात् पुंसि वरुणे क्ष्णौवेरे कुन्तलेऽपि च, मे. केशो दैत्यान्तरे वाले क्षौवेरे च प्रचेतसि, वि. केशः शिरसिजे पाशपाणौ क्षौवेरदैत्ययोः, हे. केशो बालप्रचेतसोः, त्रि.

केशट. केशटो ह्यर्यत्रजौकणे, मे. केशटः शोषके विष्णौ, वि. त्रि.

केशव. केशवोऽजे च पुन्नागे पुंसि केशवति त्रिषु, मे. केशवो वासुदेवे सत्रात् पुन्नागे केशवत्यपि, त्रि. केशवः केशसंयुते। पुन्नागे वासुदेवे च, हे. केशवः केशवान् विष्णुः, त्रि.

केशिन्. अथ केशी केशवति त्रिषु। दैत्ये ना चौरपुष्प्यां स्त्री, मे.

केसर. केसरं हिङ्गुनि क्लीबं किञ्जल्के न स्त्रियां पुमान्। सिंहसटायां पुन्नागे वकुले नागकेसरे, मे. केसरं हिङ्गुनि प्रोक्तं केसरो नागकेसरे। सिंहसटायां पुन्नागकिञ्जल्कवकुलेष्वपि, वि. केसरो नागकेसरे। तुरङ्गसिंहयोः स्कन्धकेशेषु वकुलद्रुमे। पुन्नागवृक्षे किञ्जल्के सत्रात् केसरन्तु हिङ्गुनि, हे. सिंहसटासु पुन्नागे वकुले नागकेसरे। केसरः पुंसि किञ्जल्के न स्त्री हिङ्गुनि न द्वयोः, त्रि.

केसरिन्. केसरी तुरगे सिंहे पुन्नागे नागकेशरे, मे, वि. केसर्यर्वणि पुन्नागे नागकेसरसिंहयोः, हे. अश्वे पुन्नागेऽपि च केसरी, त्रि.

कैतव. कैतवं तु च्छले द्यूतते, मे, त्रि, वि. कैतवं द्यूतदम्भयोः, हे.

कैरव. कैरवः कितवे रिपौ। नपुंसकन्तु कुमुदे चन्द्रिकायां तु कैरवी, मे. कैरवः कितवे रिपौ। कैरवं कुमुदे प्रोक्तं चन्द्रिकायां च कैरवी, वि. कैरवः कितवे शत्रौ कैरवं सितपङ्कजे। कैरवी तु चन्द्रिकायां, हे.

कैवर्त. कैवर्तोऽपि च कैवर्तः कैवर्तः सलिलेचरः, श्रने.

कोक कोकश्चक्रे वृके जेत्रठ्यां खर्जूरीद्रुमदर्दुरे, मे कोको वृके चक्रवाके खर्जूरीद्रुमभेकयो, हे कोकश्चक्रे वृके जेत्रठ्यां खर्जूरीद्रुमभेकयोः, वि कोकश्चक्रे वृकेऽपि च, त्रि.

कोकनद अथ कोकनदं रक्तं कुमुदे रक्तपङ्कजे, मे भवेत् कोकनदं रक्तकैरवे रक्तपङ्कजे, वि कोकनदन्तु रक्तयो। अम्भोजन्मकुमुदयोः, हे

कोङ्कण कोङ्कणा. स्त्राञ्जनपदे कोङ्कणं त्वायुधान्तरे, हे कोङ्कणो देशभेदे स्त्राञ्चस्त्रभेदे तु कोङ्कणगृ, वि

कोटि कोटिः स्त्री धनुषोऽग्रेऽस्त्री सख्याभेदप्रकर्षयोः, मे कोट्टरत्कर्षाटनीसंख्याः, हे स्यात् कोटिरस्त्री चापाग्रे संख्याभेदप्रकर्षयोः, वि श्चातुरत्कर्षाश्रयः कोटरः, श कोटि संख्यापि, त्रि कोटिरुत्कर्षसख्यया., ह

कोटिर कोटिर पुंसि नकुले शक्रगोपकशक्रयोः, मे कोटिरं शक्रगोपे च शक्रे च नकुलेऽपि च, वि कोटिरः शक्रगोपे स्यात् नकुले पाकशासने, हे

कोट्टार कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके, मे, वि, हे, श कोट्टारौ कूपनागरौ, त्रि

कोण कोणो वाद्यप्रभेदे स्त्रात् वीणादीनाञ्च वादने। एकदेशे गृहादीनामस्त्री च लगुडेऽपि च, मे कोणो वाद्यप्रभेद स्त्रात् कोणोऽस्त्री लगुडेऽर्कजे। वीणादिवादनोपायेऽप्येकदेशे गृहस्य च, वि कोणो वीणादिवादने। लगुडेऽस्त्री लोहिताङ्गे, हे कोणोऽस्त्री वाद्ये लगुडे, त्रि

कोथ कोथो ना नेत्ररोगस्य भेदे च शटिते त्रिषु, मे कोथस्तु शटिते नेत्ररुग्भेदे मथनेऽपि च, वि कोथस्तु मथने नेत्ररुग्भेदे शटितेऽपि च, हे

कोदण्ड अथ कोदण्डं चापे ना नौटदन्तरे। भ्रुवि, मे कोदण्डो भ्रूलतायां स्त्रात् देशभेदे च कार्मुके, वि कोदण्ड कार्मुके भ्रूलतयोरपि, हे

कोमल. कोमलं मृदुले जले, मे, वि. कोमलं मृदुले तोये, हे,

कोरक. कोरकोऽस्त्री कुड्मले स्यात् कक्कोलकमृणालयोः, मे. कोरकं कुड्मले विद्यात् कक्कोलकमृणालयोः, वि. कोरकन्तु कुड्मले स्यात् कक्कोलकमृणालयोः, हे.

कोल. कोलं कोलिफले क्लीबं पिप्पलीचव्ययोः स्त्रियाम्। नाऽङ्कपाली शनौ चित्रे वराहोत्सङ्गभेलके, मे. कोलोऽङ्कपालाऽवुत्सङ्गे भेलके पोत्रिचित्रयोः। कोली कणायां चव्ये च कोलं तु बदरीफले, वि. कोलो भेलक उत्सङ्गेऽङ्कपालत्रां चित्रके किरे। कोलन्तु बदरे. कोला पिप्पल्यां चव्यभेषजे, हे. कोलोऽङ्कपालावुत्सङ्गे वराहे भेलकेऽपि च। पिप्पल्यपि च कोला स्यात् कोलञ्च बदरीफले, वि. बदरे शूकरे कोल', अने

कोश. कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके। जातिकोशेऽर्थसङ्घाते पेश्यां शब्दादिसङ्ग्रहे, मे. कोशः कोष इवाण्डके। कुड्मले चषके दिव्येऽर्थचये योनिशिम्बयोः। जातीकोशेऽसिपिधाने, हे. कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः, श्व. कोषस्तु कुड्मले पात्रे दिव्ये खड्गपिधानके। जातिकोशेऽर्थसङ्घाते पेश्यां शब्दादिसङ्ग्रहे, वि. द्रुघ्णेऽपि परिवारेऽपि कृपणेऽपि च कोशवान्, अने.

कोशातक. कोशातकः कचे पुंसि पटोल्यां घोषके स्त्रियाम्, मे. कोशातकः कचे ज्योत्स्नीपटोलीघोषकेषु च। कोशातकी वाणिजके वाडवाग्नौ वणिज्यपि, वि. कोशातकः कचे कोशातकी ज्योत्स्ना पटोलिका। घोषके, रे. ज्योत्स्निकायां च घोषे च कोशातकी, धा.

कोष. कोषोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके। जातिकोषेऽर्थसङ्घाते पेश्यां शब्दादिसङ्ग्रहे, मे ४ कोश,

कोपाङ्ग. कुचौ कवेरे कोपाङ्गः, हा.

कोष्ठ. कोष्ठः कुसूले पार्श्वाये मध्ये कुचौ गृहस्य च, मे. कोष्ठः कुसूले पार्श्वादि कुच्यावन्यगृहस्य च, वि. कोष्ठो निजे कुसूले च कुक्षावन्त-

गृहसत्र च, हे. पुंसि कोष्ठोऽन्तर्जठरं कुशूलोऽन्तर्गृहं तथा, श्र. कोष्ठस्तु स्वकीयेऽपि, त्रि. अन्तर्गृहेऽपि कोष्ठः स्मृतात्, रु.

कोहल. कोहलो मद्यभेदे स्यात् नाट्यशास्त्रप्रवक्तरि, मे. कोहलो मद्यभेदे स्यात् कोहलः स्यान्मुनावपि, वि. कोहलो मुनिमद्ययोः, हे.

कौशल्य. कौशल्यमनुतापे स्याद् प्रयुक्तकरणेऽपि च, मे, वि, त्रि.

कौक्कुटिक. अथ कौक्कुटिकोऽदूरप्रेरितचक्षुषि दाम्भिके, मे. कौक्कुटिको दाम्भिके स्याददूरप्रेरितेक्षणे, वि. कौक्कुटिको दाम्भिके स्याद्दूरेरितलोचने, हे. स्याद्दाम्भिकः कौक्कुटिको यश्चादूरेरितेक्षणः, श्र.

कौतुक. कौतुकं त्वभिलाषे स्यादुत्सवे नर्महासयोः। तथा परम्परायातमङ्गले च कुतूहले। विवाहसूत्रगीतादिभोगयोरपि न द्वयोः, मे. कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः। परम्परासमायातमङ्गले च कुतूहले। विवाहसूत्रगीतादिभोगकालेषु च स्मृतम्, वि. कौतुकं नर्मणीच्छायामुत्सवे कुतुके मुदि। पारम्पर्यागतख्याते मङ्गलोद्वाहसूत्रयोः। गीतादौ भोगकाले च, हे. कौतुकं मङ्गलेच्छयोः। भोग्येऽपि, त्रि.

कौतूहल. कौतूहलं प्रशस्तेऽपि, त्रि V. कुतूहल.

कौपीन. कौपीनं स्यादकार्ये च गुह्यचीरप्रदेशयोः, वि. कौपीनं गुह्यदेशे स्यादकार्ये चीवरान्तरे, हे. अकार्यं गुह्यं कौपीनम्, रु. कौपीनं स्यादकार्ये च चीरगुह्यप्रदेशयोः, मे. अकार्यं गुह्यं कौपीनम्, श्र. चीरेऽपि कौपीनम्, त्रि. गुह्येऽकार्ये च कौपीनम्, शाने.

कौमुद. कौमुदः स्यात् कार्त्तिके चन्द्रिकायां च कौमुदी, मे, वि. कौमुदस्तु कार्त्तिके कौमुदीन्दुभा, हे.

कौलीन. कौलीनं गुह्यजन्ययोः। कुकर्मणि कुलीनत्वे युद्धे पशुपक्षिणाम्, मे. कौलीनं स्यात् कुलीनत्वे गुह्ये जन्ये कुकर्मणि। कौलेयके विहङ्गादिपशूनां सङ्गरेऽपि च, वि कौलीनं जनवादेऽहिपशुपक्षिणां युधि। अकार्यगुह्ये कौलीन्ये, हे. स्यात् कौलीनं लोकवादे युद्धे पशुपक्षिणाम्, श्र. कुलीनत्वे च गुह्ये च कौलीनम्, त्रि.

कौलेयक. कौलेयकः सारमेये कुलीने, मे. कौलेयकः कुलश्रेष्ठ स्यादिन्द्रमहकामुके, वि. अथ कौलेयकः सारमेयकुलीनयोः, हे. कौलेयकः शुनि। कुलीने च, त्रि.

कौशिक. कौशिको नकुले व्यालग्राहे गुग्गुलुशक्रयोः। कोषज्ञोलूकयोश्च सम्राट् विश्वामित्रमुनावपि। कौशिकी चण्डिकायाञ्च नदीभेदे च योषिति, मे. कौशिको नकुले व्यालग्राहे गुग्गुलुशक्रयोः। विश्वामित्रे च कोषज्ञोलूकयोरपि कौशिकः। कौशिकी चण्डिकायाञ्च नदीभेदे च कौशिकी, वि. कौशिकौ वासवोलूकौ, अने. कौशिकः शक्रघूकयोः। कोषज्ञे गुग्गुलावाहितुण्डिके नकुले मुनौ। कौशिकी चण्डिकानद्योः, हे. महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः, अ. कोषाङ्के कौशिको विश्वामित्रे गर्यंग्राञ्च कौशिकी, त्रि.

क्रकच. क्रकचः करपत्रेऽस्त्री ग्रन्थिलाख्यतरौ पुमान्, मे. क्रकचः करपत्रे सम्राट् ग्रन्थिलाख्यद्रुमेऽपि च, वि. क्रकचः करपत्रे सम्राट् ग्रन्थिलाख्यतरावपि, हे.

क्रकर. क्रकरः करीरवृक्षे दीने क्रकचे पक्षिभेदे च, मे. क्रकरः क्रकचे दीने करीरे च खगान्तरे, वि. क्रकरः खगे। करीरे क्रकचे दीने, हे.

क्रतु क्रतुर्यज्ञे मुनौ पुंसि, मे. क्रतुर्यज्ञे मुने र्भिदि, वि.

क्रन्दन क्रन्दनं रोदनेऽपि सम्राडाह्वानेऽपि, मे. क्रन्दनं रोदने ह्वाने, वि. हे क्रन्दने रोदनाह्वाने, अ.

क्रन्दित. अथ क्रन्दितमाह्वाने रुदितेऽपि नपुंसकम्, मे. क्रन्दितं ख्यातमाह्वाने क्रन्दितं रुदितेऽपि च, वि. क्रन्दितं रुदिते ह्रुतौ, हे.

क्रम. क्रमस्त्वानुक्रमे शक्तौ कम्पे चाक्रमणेऽपि च, मे. क्रमः शक्तौ परिपाट्यां क्रमश्चलनकम्पयोः, वि. क्रमः कल्पाङ्घ्रिशक्तिषु। परिपाट्याम्, हे

क्रमुक. क्रमुकस्तु पुमान् भद्रमुस्तके भ्रंशदारुणि। फले कार्पा-

सिकायाञ्च पट्टिकालोध्रपूगयो:, मे. क्रमुको भद्रमुस्तके। गुवाके पट्टिकालोध्रे, हे. क्रमुकः पट्टिकारोध्रे भद्रमुस्तकपूगयो:। फले कार्पासिकायाञ्च क्रमुको ब्रह्मदारुणि, वि. क्रमुको भद्रमुस्तेऽपि, त्रि

क्रव्याद्. क्रव्यादृक्षसि पुंसि स्यात् मांसाशिन्यन्यलिङ्गकः, मे. क्रव्यान्मांसाशिरक्षसोः, वि, हे.

क्रिमि. v. कृमि.

क्रिया. क्रिया तूपायचेष्टयो:। आरम्भे निष्कृतौ पूजासम्प्रधारणकर्मसु। शिक्षाचिकित्साकरणे, मे. क्रिया कर्मणि चेष्टायां करणे संप्रधारणे। आरम्भोपायशिक्षार्थचिकित्सानिष्कृतिष्वपि, वि. क्रिया कारणचेष्टयो:। कर्मोपायचिकित्सासु निष्कृतौ सम्प्रधारणे। मर्चारम्भशिक्षासु, हे. आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम्। उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः, अ.

क्रीड़ा. क्रीडा केलिप्रकारे स्यात् खेलावज्ञानयोरपि, मे, वि. क्रीड़ा केल्यामनादरे, हे.

क्रुश. क्रुष्टं रोदनरावयो:, मे. क्रुष्टम्च रोदने रावे, त्रि.

क्रूर. क्रूरस्तु कठिने घोरे नृशंसेऽप्यभिधेयवत्, मे. क्रूरस्तु कठिने घोरे नृशंसे त्वभिधेयवत्, वि. क्रूरा नृशंसघोरोष्णकठिनाः, हे. क्रूरौ कठिननिर्दयौ, अ. क्रूरौ कठिनभीषणौ, त्रि.

क्रूरदृश्. क्रूरदृक् पिशुने वाच्यवल्लिङ्गः पुंसि शनैश्चरे, मे. क्रूरदृक् स्मृतात् खले शनौ, वि.

क्रोड़. क्रोडः शनौ शूकरे ना न पुमान् अङ्करक्षसो:, मे. क्रोडः शूकरपालमात्रो. क्रोडं क्रोड़ा च वक्षसि, वि. क्रोडः कोले शनौ। क्रोड-मङ्के, हे. पर्ष्णी क्रोडो न नोरसि, वि. उत्सङ्गशूकरो क्रोड़ौ, अने.

क्रोष्ट्री. क्रोष्ट्री शृगालिकाक्षीरविदारीलाङ्गलीषु च, मे, वि. क्रोष्ट्री क्षीरविदारिका। शृगालिका लाङ्गली च, हे

क्रौञ्च. क्रौञ्चो द्वीपविशेषे स्यात् पक्षिपर्वतभेदयो:, मे. क्रौञ्चः खग-

नगद्दीपप्रभेदेषु प्रयुज्यते, वि. क्रौञ्चो द्वीपे खगे गिरौ, हे. क्रौञ्चः पक्षि-द्रिभेदयोः, त्रि.

क्रौश्चादन. क्रौश्चादनं तु घेश्चुल्यां चिञ्चोटकमृणालयोः, मे. क्रौश्चादनस्तु घेश्चुल्यां चिञ्चोटकमृणालयोः, वि, द्वा.

क्लीव. क्लीवं स्यात् षण्ढके न स्त्री वाच्यलिङ्गस्त्वविक्रमे, मे.

क्लीव. क्लीवं षण्डेऽप्यपौरुषे, वि. क्लीवोऽपौरुषषण्ढयोः, हे. क्लीवो विक्रमहीनेऽपि, रु. क्लीवं नपुंसके षण्डेऽन्यवद्विक्रमे, मे. क्लीवं नपुंसकं षण्डे वाच्यलिङ्गमविक्रमे, श.

क्लेश. क्लेशो दुःखे विपाकेऽपि व्यवसायेऽपि दृश्यते, मे. क्लेशो दुःखेऽपि रोगादौ व्यवसायेऽपि च क्वचित्, वि. क्लेशो रोगादौ दुःखे च, हे.

क्वाथ. क्वाथः स्याद्‌तिदुःखेऽपि निष्पाकेऽपि द्रवस्य च, मे. क्वाथः स्याद्‌द्रवनिष्पाके दुःखव्यसनयोरपि, वि. क्वाथो व्यसनदुःखयोः। द्रव्यनिष्पाके, हे.

क्ष. क्षः संवर्त्ते राक्षसे च नरसिंहे च विद्यते। क्षेत्रे नाशे क्षेत्रपाले, मे. संवर्तको नृसिंहश्च हृदयाम्बुजसंस्थितः। अनन्तः परमात्मा च वज्रकायाऽन्तिमः क्षकः, मा.

क्षण. क्षणः पर्वोत्सवव्यापारेषु मानेऽप्यनेहसः, मे. क्षणः कालविशेषे स्यात् पर्वण्यवसरे महे। व्यापारविकलत्वे च परतन्त्रत्वमध्ययोः, हे. निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः, अ. कालविशेषेऽवसरे व्यापारे पारतन्त्र्ये च। मध्ये तयोत्सवे च क्षणशब्दः कथ्यते सुमतिभिः, रु.

क्षणद. क्षणदो गणके रात्रौ क्षणदा क्षणदं जले, मे, वि. क्षणदं तोये क्षणदो गणके क्षणदा निशि, हे

क्षत्तृ. क्षत्ता शूद्राक्षत्रियजे प्रतीहारे च सारथौ। भुजिष्यातनयेऽपि स्यान्नियुक्तवेधसोः पुमान्, मे. क्षत्ता शूद्रात् क्षत्रियायां जाते सारथिवेधसोः। नियुक्ते दासजे द्वाःस्थे, हे. क्षत्ता शूद्रात् क्षत्रियजे प्रतीहारे च सारथौ। भुजिष्यातनये क्षत्ता नियुक्ते च प्रजापतौ, वि. क्षत्ता स्यात्

सारथौ द्वाःस्थे क्षत्रियायाश्च शूद्रजे, श.

क्षम. क्षमा भूमौ तितिक्षायां स्त्रियां युक्ते नपुंसकम्। वाच्य-वच्छक्तहितयोः, मे. क्षमः स्यात् क्षमान्विते। क्षितिक्षान्त्योः क्षमा ख्याता हिते शक्ते च वाच्यवत्, वि. क्षमः शक्ते हिते युक्ते क्षमावति। क्षमा क्षान्तौ क्षितौ, हे. क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु, अ.

क्षय. क्षयो रोगान्तरे वेश्मकल्पान्तापचयेषु च, मे, वि. क्षयो गेहे कल्पान्तेऽपचये रुजि, हे. निलयापचयौ क्षयौ, अ. क्षयं गेहं क्षयो ह्रासः, धने.

क्षर. क्षरं नीरे क्षरोऽम्बुदे, मे. क्षरं नीरे क्षरो मेघे, वि. क्षरो मेघे क्षरं जले, हे.

क्षव. क्षवः क्षुते राजिकायाम्, मे, वि, हे. राजिकायां क्षुति क्षवः, त्रि.

क्षवथु. क्षवथुर्ना क्षुते कासे, मे. क्षवथुः कथितः कासे हिक्कायामपि दृश्यते, वि. क्षवथुः कासे हिक्कायाम्, हे. कासे क्षुते च क्षवथुः, त्रि.

क्षार. क्षारो रसान्तरे धूर्त्ते लवणे काचभस्मनोः, मे, वि. क्षारः काचे रसे गुडे। भस्मनि धूर्त्तलवणे, हे. भस्मकाचरसाः क्षाराः, त्रि.

क्षारक. क्षारकः पक्षिमत्स्यादिपिटके जालकेऽपि च, मे, वि. क्षारको रसे। कोरके पक्ष्यादिपाशे, हे.

क्षारित. क्षारितः स्राविते क्षारैरभिशस्तेऽपि च त्रिषु, मे. क्षारितः स्राविते क्षारैरभिशस्ते च शंसितः, वि.

क्षि. क्षिः क्षेत्रे क्षत्रचे च नृसिंहे च प्रकीर्त्तितः, ए. क्षि र्निवासे गतौ क्षये, मे.

क्षिति. क्षिति र्निवासे मेदिन्यां कालभेदे क्षये स्त्रियाम्, मे. क्षिति-र्निवासे मेदिन्यां स्थानमात्रेऽपि च क्षितिः, वि. क्षिति र्गेहे भुवि क्षये, हे. क्षयवासावपि क्षितौ, अ. क्षितिः पृथ्वी क्षितिः क्षयः, धने.

चिपणुत्र. चिपणुत्रस्तु पुमान् देहे सुरभै वाचत्रलिङ्गकः, मे. चिपणुत्रः सुरभौ तनौ, वि

चीर. चीरं दुग्धे जले, मे. चीरं नीरे च दुग्धे च, वि. चीरं पानीयदुग्धयोः, हे. चीरमप्तु, च, अ.

चीरदार. चीरदारो गुडचोदे गुडे मधुनि चेष्यते, हा.

चीराब्धिज. चीराब्धिजन्तु सामुद्रलवणे मौक्तिकेऽपि च। पुमांस्तुषारकिरणे कमलायां तु योषिति, मे. चीराब्धिजन्तु सामुद्रलवणे मौक्तिके क्वचित्। चीराब्धिजा श्रियां प्रोक्ता चन्द्रे चीराब्धिजो भवेत्, वि. चीराब्धिजन्तु मौक्तिके। वच्चिरे चीराब्धिजस्तु चन्द्रे चीराब्धिजा श्रियाम्, हे.

चुद्र. चुद्रः स्यादधमे क्रूरक्षपणाल्पेषु वाचत्रवत्। चुद्रा व्यङ्गानटीकण्टकारिकासरघासु च। चाङ्गेरीवेश्ययो र्हिंस्रामचिकामात्रकेषु च, मे. चुद्रः स्याद् अधमे क्रूरे क्षपणेऽल्पे च वाचत्रवत्। चुद्रा वेश्यानटीकण्टकारिकासरघासु च। चाङ्गेरीहस्तीहिंस्रामचिकामात्रकेषु च, वि. चुद्रो दरिद्रे क्षपणे निकृष्टेऽल्पहस्वयोः। चुद्रा व्याघ्रीनटीव्यङ्गाहस्तीसरघासु च। चाङ्गेरिकायां हिंस्रायां मचिकामात्रवेश्ययोः, हे. चुद्रः क्रूरे, ह. चुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका। त्रिषु क्रूरेऽधमेऽल्पेऽपि चुद्रम्, अ. मचिकायामपि चुद्रा चुद्रः स्यात् क्षपणे त्रिषु, त्रि चुद्रा वेश्या नटी चुद्रा चुद्रा स्यान् मधुमचिका। चमहिषा, नरः चुद्रः चुद्रा स्यात् कण्टकारिका, धने.

चुमा चुमाऽतसीनीलिकयोः, मे, वि. चुमा मताऽतसीनीलिकाऽतसी, हे

चुर चुरः सत्राच्छेदनद्रव्ये कोकिलाक्षे च गोचुरे, मे, वि. नापितस्त्रोपकरणे कोकिलाक्षेऽपि च चुरः, त्रि. चुरो गोचुरके कोकिलाक्षे च्छेदनवस्तुनि, हे

चुरक चुरकः कोकिलाक्षे स्यात् गोचुरे तिलकद्रुमे, मे, वि.

क्षुल्लक क्षुल्लकस्त्रिषु नीचेऽल्पे, मे क्षुल्लक पामरे स्वल्पे कनिष्ठे दुःखिते खले, हे क्षुल्लक स्वल्पनीचयोः, वि स्वल्पेऽपि क्षुल्लकस्त्रिषु, अ क्षुल्लको नीचेऽपि, ह नीचेऽपि क्षुल्लक, त्रि

क्षेत्र क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः मे, वि क्षेत्रं भारतादौ भगाङ्गयोः। केदारे सिद्धभूपत्न्यां, हे क्षेत्रं पत्नीशरीरयोः, अ सिद्धस्थानेऽपि च क्षेत्रम्, त्रि देहे दारेषु केदारे क्षेत्रं इष्टौ च कीर्त्त्यते, अने

क्षेत्रज्ञ क्षेत्रज्ञ आत्मनि च्छेके, मे क्षेत्रज्ञश्छेक आत्मनि, वि क्षेत्रज्ञावात्मनिपुणौ, हे पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्यलिङ्गकः, श

क्षेत्रिय क्षेत्रियं क्षेत्रजतृणे परदेहचिकित्सयो। परदाररतासाध्यरोगयोः क्षेत्रियः पुमान्, मे क्षेत्रियं क्षेत्रजतृणे परदाररतेऽपि च। अन्यदेहचिकित्स्यार्हेऽसाध्यरोगे च जानते, वि क्षेत्रियास्त्रयः। अन्यदेहचिकित्स्यार्हासाध्यरुक्पारदारिकाः। क्षेत्रिय क्षेत्रजतृणे, हे

क्षेप क्षेपस्तु निन्दाविक्षेपलेपने। गर्वप्रेरणयोश्च, मे क्षेपो विलम्बे निन्दायां हेलाप्रेरणलङ्घने। गर्वेऽपि, वि क्षेपा गर्वे लङ्घननिन्दयोः। विलम्बेरणहेलासु, हे

क्षेपण क्षेपणं प्रेरणे नौकादण्डजालभिदोः स्त्रियाम्, मे क्षेपणी जालभेदे स्यान्नौकादण्डे च कथ्यते, वि क्षेपणी तु नोदण्डजालभेदयोः, हे

क्षेम क्षेमाऽस्त्री लब्धरक्षणे। चण्डायां ना शुभे न स्त्री कात्यायन्यां तु यापिति, मे क्षेमं स्यान्मङ्गले लब्धरक्षणे चौरकेऽपि च। क्षेमा धनहरीगौर्योः, वि क्षेमस्तु मङ्गले। लब्धसंरक्षणे मोक्षे क्षेमामा धनहर्य्यपि, हे क्षेम कलत्राणरक्षयोः। क्षेमा दण्डा, त्रि

क्षोद क्षोदः स्यात् पुंसि रजसि पेषणे च प्रकीर्त्तितः, मे क्षोदो रजसि पेषणे, त्रि क्षोदः पेषणचूर्णयोः, वि, हे

क्षौद्र क्षौद्रं मधुनि पानीये, मे, वि क्षौद्रं तु मधुनीरयोः, हे

क्षौम क्षौममट्टे दुकूलेऽस्त्री क्षौमं वल्कलजांशुके। शणजेऽतसिजे

मे. चौमं सप्राट्तसीवस्त्रे दुकूलेऽट्टालकेऽपि च, हे. चौममट्टे दुकूले च, त्रि. चौममट्टे दुकूले स्यादतसीवसनेऽपि च, वि.

घेड. घुडो ध्वनौ कर्णामये विषे। घुडा वंशशलाकायां सिंहनादे च योषिति। लोहितार्कपर्णफले घोषपुष्पे नपुंसकम्। दुरासदे च कुटिले वाच्यलिङ्गः प्रकीर्त्तितः, मे. घुडः कर्णामये ध्वाने गरले कुटिलेऽपि च। लोहितार्कफले घुडं घोषपुष्पे दुरासदे। योधानां सिंहनादे तु घुड़ा स्याद्वंशशल्यके, वि. घुड़ः कर्णामये ध्वनौ। विषे वक्रे घुड़ा सिंहनादवंशशलाकयोः। घुड़ं लोहितार्कफले घोषपुष्पे दुरासदे, हे सिंहोक्तौ स्त्री विषे घुडः, त्रि. घुड़ा वंशशलाकाऽपि, अ.

ख. खमिन्द्रिये पुरे चेत्रे शून्येत्र बिन्दौ विहायसि। संवेदने देवलोके कर्मण्यपि नपुंसकम्, मे. खं खः संविदि व्योमनीन्द्रिये। शून्येत्र विन्दौ सुखे खलु सूर्यं, हे. खमिन्द्रिये सुखे स्वर्गे शून्येत्र विन्दौ विहायसि। पुरे संवेदने चेत्रे कुलाहलफले क्वचित्, वि. इन्द्रियेऽपि खम्, अ. खं स्व नभश्च खम्, त्रि. ऋद्धि गंदौ च चण्डीशः खेटो दक्षिणकूर्परः। कैटभारिश्च मातङ्गः संहारः खार्णकः स्मृतः, मा.

खग. खगः सूर्ये ग्रहे देवे मार्गणे च विहङ्गमे, मे, वि. खगोऽर्कग्रहपक्षिषु। शरे देवेऽपि, हे. शरार्कविहगाः खगाः, अ.

खजा. खजा मन्थे प्रहस्ते, मे. खजा मन्थप्रहस्तयोः, वि. खजा दर्वीमयोः, हे.

खञ्ज खञ्जा छन्दःप्रभेदे स्त्री कुटिलाङ्घ्रौ तु वाच्यवत्, मे.

खञ्जन. खञ्जनं खञ्जरीटे स्त्री सर्षप्यां खञ्जनं गतौ, मे.

खट. खटोऽन्धकूपकफयोः प्रहारान्तरटङ्कयोः मे, वि. खटस्तृणे कफे। टङ्केऽन्धकूपे प्रहारे, हे. खटः स्त्रेष्मण्यन्धकूपे प्रहारान्तरटङ्कयोः, हा

खटिका. खटिका लेखनद्रव्ये कर्णरन्ध्रे च वीरणे, वि.

खड्गारूढ़ खड्गारूढ़ः स्थिते खड्गमविनीते च वाच्यवत्, मे.

खड. खडः पानान्तरे भेदे, मे. V. षड्.

खड्ग. खड्गो गण्डकश्टङ्गासिबुद्धभेदेषु गण्डके, मे, वि. खड्गोऽस्त्री खड्गिश्टङ्गे च गण्डके, हे. खड्गी निस्त्रिंशगण्डकौ, त्रि.

खड्गधेनु. खड्गधेनुः स्त्रियां खड्गपुत्रिकागण्डकस्त्रियोः, मे. ग्रस्त्रामपि खड्गधेनुः, हा.

खड्गरीट. खड्गरीटस्तु फलकेऽसिधाराव्रतचारिणि, हे. खड्गरीटस्तु फलकासिधाराव्रतचारिणोः, मे. सम्राट् खड्गरीटः फलकाऽसिधाराव्रतचारिणोः, वि.

खड्गिक. खड्गिको महिषीचौरफेनशौनिकयोरपि, मे, वि.

खड्गिन्. खड्गी ना गण्डके मञ्जुघोषे खड्गधरे त्रिषु, मे. खड्गी खड्गायुधे गण्डे, वि. खड्गी गण्डके खड्गधारिणि, हे.

खण्ड. खण्डोऽस्त्री शकले नेचुविकारमणिदोषयोः, त्रि, मे. सम्राट् खण्डः शकले चेक्षुविकारमणिदोषयोः, वि. खण्डोऽर्द्धे ऐक्षवे। मणिदोषे च, हे.

खण्डप(रशु)शु. खण्डपशुः पशुरामे शङ्करे चूर्णलेपिनि। खण्डामलकभैषजेत्र सिंहिकातनयेऽपि ना, मे. खण्डपशुः पशुरामे शङ्करे चूर्णलेपिनि। खण्डामलकभैषजेत्र सिंहिकातनयेऽपि च, वि. खण्डपशुः शिवे राहौ भार्गवे चूर्णलेपिनि। खण्डामलकभैषजेत्र, हे धूर्जटौ खण्डपरशुः जामदग्न्ये विधुन्तुदे। खण्डामलकभैषजेत्र घण्डालेऽपि स्मृतो बुधैः, वि. रुद्रेऽपि खण्डपरशु, रु.

खण्डाभ्र खण्डाभ्रमभ्रलेशे सम्राट् तथा दन्तक्षतान्तरे, मे. खण्डाभ्रमभ्रलेशे स्यात् स्त्रीणां दन्तक्षतान्तरे, वि. खण्डाभ्रमभ्रावयवे स्त्रीणां दन्तक्षतान्तरे, हे.

खतमाल. खतमालस्तु पुंलिङ्गो धूमेऽपि च बलाहके, मे खतमालो बलाहके। धूमेऽपि, वि, खतमालो बलाहके धूमे, हे.

खदिर. खदिरो शाकभेदे स्त्री ना चन्द्रे दन्तधावने, मे. खदिरो

शाकभेदे स्यात् खदिरो दन्तधावने, वि. खदिरो शाके खदिरो दन्तधावन-चन्द्रयोः, हे.

खनक. खनको नोन्दुरौ सन्धिचौरे निष्ववदारके, मे. खनकः सन्धितस्करे। मूषके भूमिविकार्ये, हे. खनकः ख्यभ्रतलग्न सन्धिचौरे च मूषिके, वि. चौरोन्दुरू च खनकौ, त्रि.

खपुर. खपुरः कमुके भद्रमुस्तकेऽलसकेऽपि च, मे, वि. खपुरो मुस्तके पूगेऽलसके खपुरं घटे, हे. भद्रमुस्ते गुवाके च खपुरः, त्रि.

खर. खरः स्यात् तीक्ष्णधर्मयोः। गर्दभे स्त्री देवताड़े, मे. खरः सव्याङ्गर्दभे देवताडे तीक्ष्णोग्रकेऽपि च, वि. खरो रक्षोऽन्तरे तीक्ष्णे दुःस्पर्शे रासभेऽपि च, हे. देवताडे खरा स्त्री स्यात् खरो गर्दभतीक्ष्णयोः, त्रि. सत्यसन्धः खरो ज्ञेयः खरोऽपि पुरुषोत्तमः। खरो रासभ इतुक्तो व्यवहारे खरः पटुः, इने.

खरालिक अथ खरालिकः। ग्रामणीभण्डिनाराचेऽप्युग्रप्रधाने च पुंसत्रयम्, मे. अथ खरालिकः। ग्रामणीभण्डिनाराचोपधानेषु मधु-जग्ने, वि.

खरु. खरु र्दर्पे हरे हये। दन्ते पुंसि त्रिषु श्वेते, मे. खरु र्दन्ते हरे दर्पे हये श्वेते तु वाच्यवत्, वि. खरु. स्याद्धरहरयो र्दर्पदन्तसितेषु च, हे. खरुःश्वेहरे दर्पे दन्ते श्वेते तु वाच्यवत्, त्रि.

खर्जू अथ खर्जू कीटान्तरे स्मृता। खर्जूरे पादपे कण्डाम्, मे. खर्जः कण्डां च कीटे च खर्जूरीपादपेऽपि च, वि. खर्जूः खर्जूरिकेटक-ण्ड्वोः, हे

खर्जूर. खर्जूरं रूप्यफलयो र्वृश्चिके ना द्रुमे हयोः, मे. खर्जूरं रजते विन्याद्, रथिमद्रुमभेदयोः। खर्जूरश्च, वि. खर्जूरं रूप्यफलयोः र्जूरः कीटद्रुमयोः, हे. अथ द्रुमे पुमान्। रूप्ये खले च खर्जूरं, त्रि. र्जूरो द्रुमभेदः स्यात् खर्जूरं रजतं मतम्। खर्जूरः क्षुद्रजातिः स्यात्

खर्पर. खर्परस्तस्करे धूर्ते भिक्षाभाण्डकपालयोः, मे. खर्परस्तस्करे धूर्ते भिक्षापात्रकपालयोः, वि. खर्परस्तस्करे भिक्षापात्रे धूर्तकपालयोः, हे. भिक्षापात्रे कपाले च खर्परस्तस्करेऽपि च, त्रि.

खर्म. खर्मं पौरुषे कोषजांशुके, मे. खर्मं क्षौमे च पौरुषे, वि. खर्मं क्षौमे पौरुषे च, हे.

खर्व(र्ब). खर्वं संख्यान्तरे क्लीवं नीचे वामनके त्रिषु, मे. खर्वस्तु ह्रस्वे संख्यान्तरेऽपि च, वि. खर्वह्रस्वौ न्यग्वामनौ, हे.

खल. खलं भूस्थानकल्केषु नीचक्रूराधमे त्रिषु, मे. खलं भूस्थान-कल्केषु क्रूरे नीचेऽधमे खलः, वि. खलः कल्के भुवि स्थाने क्रूरे कर्णजपे-ऽधमे, हे. खलं शस्यस्थाने शठे त्रिषु, त्रि. खलो नीचः खलो राशिः खलः पिण्याक एव च, अने. खलो ह्रस्वः खलः क्रूरः, अने.

खलिनी. खलिनी खलवृन्दे स्यात् तालपर्ण्यामपि स्त्रियाम्, मे.

खलु. खलु स्याद्वाक्यभूषायां जिज्ञासायाञ्च सान्त्वने। वीप्सामान-निषेधेषु पूरणे पदवाक्ययोः, मे. खलु स्याद्वाक्यभूषायां जिज्ञासादौ च सान्त्वने। निषेधनेऽपि वीप्सायां खलु मानेऽपि कीर्तितम्, वि. खलु वीप्सा-निषेधयोः। जिज्ञासायासतुनये वाक्यालङ्करणेऽपि च, हे. निषेधवाक्या-लङ्कारजिज्ञासानुनये खलु, अ.

खल्ल खल्लो वस्त्रप्रभेदे स्याद्, गर्त्ते चर्मणि चातके। खल्ली तु हस्तपादावमर्दनाख्यरुजि स्त्रियाम्, मे. खल्ली तु हस्तपादावमर्दनाख्य-रुजि स्मृता। खल्लो वस्त्रप्रभेदे स्यान् निम्ने चर्मणि चातके, वि. खल्लो निम्ने वस्त्रभेदे चर्मचातकपक्षिणोः। खल्ली तु हस्तपादावमर्दनाख्यरुगपि, हे. खल्लश्चर्मणि चातके। वस्त्रे निम्ने च, त्रि.

खप्प. खप्पः क्रोधे बलात्कृतौ, मे, वि.

खाटि. खाटिस्त्वसद्ग्रहेऽपि स्यात् किणे शवरथे स्त्रियाम्, मे. खाटिः शवरथे किणे। एकग्रहे, हे. खाटिः किणे शवरथे खाटिरेकग्रहे स्मृता, वि.

खिखिरा, खिङ्खिर. खिङ्खिरस्तु भिवाभेदे खट्वाङ्गे वारिवालके, मे. खिङ्खिरस्तु शिवाभेदे खट्वाङ्गे वारिवालके। खिखिरावद् बहुत्वे च, वि, हे.

खिल. खिलमप्रहते क्लीवं सारसंचिप्तवेधसोः, मे. खिलं भवेदप्रहते सारसंचिप्तवेधसोः, वि.

खुर. खुरः कोलदले शफे, मे, वि, त्रि. खुरः शफे कोलदले, हे.

खेट. खेटः कफे ग्रामभेदे चर्मण्यस्त्रत्रवर्तिनि त्रिषु, मे. अथ खेटः सप्राद् ग्रामभेदे कफेऽधमे। स्फारे स्फगवेत्र, हे. खेटः कफे ग्रामभेदे निन्दिते वसुनन्दके, वि. खेटः सिङ्घानके हीने, त्रि. स्त्रीघ्राणत्रपि खेटः स्यात्, ह.

खोलक. स्यात् खोलकस्तु पाके शिरस्त्रवल्मीकपूगकोशेषु, मे. खोलकः पाकवल्मीकपूगकोशशिरस्त्रके, वि. खोलकः पूगकोषे स्याच्छिरस्त्रे नाकुपाकयोः, हे. मूर्धत्राणे नाको च खोलकः, त्रि.

ग. (गो गणेशे च नाके च वियत्यपि पुमानयम्। गः सुमेरौ समाख्यातः गायत्रीगीतयोः पुमान्। गन्धर्वे चापि गः ख्यातो गायके चाभिधेयवत्, मे.) स्मृतिः पञ्चान्तगः शार्ङ्गी गणेशो मणिबन्धनः। गोमुखो गजकुम्भश्च गकारः सिंहसंज्ञकः, मा.

गज. गजो माने मतङ्गजे। वास्तुनः स्थानभेदेऽपि, मे.

गजाह्व. गजाह्वा करिपिप्पल्यां गजाह्वं हस्तिनापुरे, वि, मे.

गञ्ज. गञ्जा खनौ सुरागृहे। गञ्जः स्यात् पुंसि रौढ़ायां भाण्डागारे तु न स्त्रियाम्, मे. गञ्जा खनौ सुरागेहे स्याद् भाण्डागाररौढ़योः। गञ्जः, वि. गञ्जो भाण्डागारे रौढ़ाखन्यो र्गञ्जा सुरालये, हे. खनौ सुरागृहे गञ्जा, त्रि. गञ्जो भाण्डारे, हे.

गड़. गड़ो मीनान्तराययोः, मे, वि, हे.

गड. गडुः पृष्ठगुड़े कुब्जे, मे, वि, हे.

गण. गणः प्रमथसङ्घौघे चण्डासैन्यप्रभेदयोः, मे. गणः समूहे प्रमथे संख्यासैन्यप्रभेदयोः, वि. गणः प्रमथसङ्घयोः। समूहे सैन्यभेदे च, हे सङ्घाते प्रमथे गणः, श.

गणाधिपति. गणाङ्गणाधिपतिः पुंसि शङ्करेऽपि गजानने, मे. गणाधिपतिराख्यातः शङ्करेऽपि गजानने, वि. गणाङ्गणाधिपति विघ्ननायके पार्वतीपतौ, हे.

गणक. गणिका यूथीवेश्याभीतकारीषु ना तु दैवज्ञे, मे, गणिका यूथिकावेश्यातर्कारीकरिणीषु च। गणकोऽपि च दैवज्ञे, वि. वेश्यायूथ्योश्च गणिका, त्रि. गणको ग्रहवेदिनि। गणिकेभार्यां यूथिकायां तर्कार्यां पण्ययोषिति, हे. हस्तिन्यां गणिका, ह.

गणेरु. गणेरुः कर्णिकारस्त्री करिणीवेश्ययोः स्त्रियाम्, मे. V. कणेरु:

गण्ड. गण्डः समात् पुंसि खड्गिनि। ग्रहयोगप्रभेदे च वीयरक्ते पिटकेऽपि च। चिह्नवीरकपोलेषु हयभूषणबुद्बुदे, मे. गण्डः कपोले पिटके योगभेदे च गण्डके। गण्डः प्रवीरे चिह्ने समाद् अश्वभूषणबुद्बुदे, वि. गण्डस्तु वीरे पिटकचिह्नयोः। कपोले गण्डके योगे वाजिभूषणबुद्बुदे, हे. गण्डः कपोले पिटके श्रेष्ठगण्डकयोः पुमान्, त्रि.

गण्डक. गण्डकः पुंसि खड्गे समात् संख्याविद्याप्रभेदयोः। अवच्छेदेऽन्तराये च गण्डकी सरिदन्तरे, मे. गण्डकः खड्गिनि ख्यातः संख्याविद्याप्रभेदयोः। अवच्छेदेऽन्तराये च गण्डकी सरिदन्तरे, वि. गण्डको विघ्ने विद्यायां संख्यावच्छेदखड्गिषु। गण्डकी तु सरिद्भेदे, हे, सङ्ग्रामभेदे च गण्डकः, त्रि.

गण्डशैल. गण्डशैलो ललाटे स्यात्च्युतस्थूलोपले गिरेः, मे, वि. गण्डशैलोऽद्रिच्युतस्थूलाश्मभालयोः, हे.

गण्डूष. गण्डूषो मुखपूर्त्तौभपुष्करप्रसृतोन्मिते, मे. गण्डूषो मुखपूर्त्तौ स्यात् करिहस्ताङ्गुलावपि। प्रसृतोन्मिते, वि. गण्डूषो मुखपूरणे। गजास्ये च कराङ्गुल्यां प्रसृत्यां प्रमितेऽपि च, हे.

गत. गतं विज्ञानयातयोः, मे. गतस्तु याताधिगते, वि.

गति. गतिः स्त्री मार्गदशयो र्ज्ञाने यात्राभ्युपाययोः। नाडीव्रणसरण्यां च, मे. गति ईक्षणे ज्ञाने यात्रोपायदशाध्वसु, हे. गति मार्गे

दशायाञ्च स्थाने यात्राभ्युपाययोः। नाडीव्रणसरणाञ्च, वि. गति र्यात्रा-द्दशोपायाः, त्रि. V. दशा.

गद. गदो भ्रातरि विष्णोः स्यात् आमये नाऽयुधे गदा, मे. गदो भ्रातरि विष्णोः स्यात् आमयेऽप्यायुधे गदा, वि. गदः कृष्णानुजे रोगे गदा प्रहरणान्तरे, हे. अथामये गदः। विष्णो भ्रातरि चास्त्रे स्त्री, त्रि.

गदयित्नु. गदयित्नुः पुमान् कामे जल्पाके कामुकेऽपि च, मे. गदयित्नुः स्मृतः कामे जल्पाके कामुकेऽपि च, वि. गदयित्नुः शरासने। जल्पाके पुष्पचापे च, हे.

गन्ध. गन्धः प्रतिवेश्यामोदलेशसम्बन्धगन्धकेषु, मे. गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः, वि. गन्धः सम्बन्धलेशयोः। गन्धकामोद-गर्वेषु, हे. गन्धो गर्वे बलेऽपि च, त्रि. गन्धो लेशेऽपि, रु.

गन्धन. गन्धनमुत्साहे स्यात् प्रकाशने सूचनेऽपि हिंसायाम्, मे. गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने, वि. गन्धनन्तु प्रकाशने। सूचनो-त्साहहिंसासु, हे. उत्साहने च हिंसायां सूचने चापि गन्धनम्, अ. उत्सा-हनसूचनयोः प्रकाशने गन्धनं प्रोक्तम्. रु.

गन्धफली. गन्धफल्यपि गुन्द्रायां चम्पकस्य च कोरके, मे. गन्ध-फली प्रियङ्गौ स्यात् कोरके चम्पकस्य च, वि. गन्धफली तु प्रियङ्गौ चम्पकस्य च कोरके, हे.

गन्धमादन. स्याद्गन्धमादनो भृङ्गे गन्धके वानरान्तरे। स्त्री सुरायां नगे न स्त्री, मे. गन्धमादनमित्याहु र्गन्धके वानरान्तरे। अद्रिभेदे च भृङ्गे च सुरायां गन्धमादनी, वि. गन्धमादनः कप्यद्रिभिदोरलौ च गन्धके। गन्धमादनी सुरायाम्, हे.

गन्धर्व(र्व). गन्धर्वः पशुभेदे स्यात् पुंस्कोकिलतुरङ्गयोः। अन्तरा-भवसत्त्वे च गायने खेचरेऽपि च, मे. गन्धर्वो मृगभेदे स्यात् पुंस्कोकिल-तुरङ्गयोः। अन्तराभवसत्त्वे च गायने खेचरेऽपि च, वि. गन्धर्वस्तु नभ-

स्वरे। पुंस्कोकिले गायने च मृगभेदे तुरङ्गमे। अन्तराभवदेहे च, हे. अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने, अ. गन्धर्वो देवजातिः स्यात् गन्धर्वो हि तुरङ्गमः। गन्धर्वश्च मृगो गीतो गन्धर्वो मृगपुङ्गव, धने.

गन्धवती. अथ गन्धवती पृथ्वीपुरीभिद्व्याससमातृषु। सुरायाञ्च, मे. गन्धवती सुराभूम्योः पुरीयोजनगन्धयोः, वि. गन्धवती सुराभूम्योः पृथ्वीयोजनगन्धयोः, हे.

गन्धवह. स्याद्गन्धवहा नासायां पुंलिङ्गो मातरिश्वनि, मे. गन्धवहा तु नासायां वायौ गन्धवहो मतः, वि. गन्धवहो मृगेऽनिले। गन्धवहा तु नासायाम्, हे.

गन्धार. गन्धारो रागसिन्दूरस्वरेषु नीवृदन्तरे, हे. v. गान्धार.

गन्धोली. गन्धोली भद्राशट्योश्च योषिति, मे. गन्धोली वरटाभद्राशटीषु कथिता बुधैः, वि. गन्धोली वरटाशट्यो भद्रायाम्, हे.

गभस्ति. गभस्तिः किरणे सूर्ये स्वाहायां च विलोक्यते, वि. गभस्तिः स्यादिनकरे स्वाहाकिरणयोरपि, हे. गभस्तिः किरणे सूर्ये ना स्वाहायान्तु योषिति, मे.

गम. गमो नाऽध्वविवर्त्ते स्यात् अपर्यालोचितेऽध्वनि, मे. गमो द्यूतक्रमभेदे स्यात् अपर्यालोचितेऽध्वनि, वि. गमोऽध्वद्यूतभेदयोः। सकृत्पाठे, हे.

गय गयः स्यात् पम्पुराजपर्ण्योर्भेदे तीर्थे पुनर्गया, मे.

गर. गरो स्वरायां करणे क्लीवं नोपविषे विषे, मे. गरो व्याधावुपविषे विषे च करणे गरम्, वि. गरस्तूपविषे विषे। रोगे गरं स्यात् करणे, हे.

गरल गरलं तृणपूले च विषे माने नपुंसकम्, मे. गरलन्तु विषे माने गरलं तृणपूलके, वि. गरलं पन्नगविषे तृणपूलकमानयोः, हे.

गरुत्मत् गरुत्मांश्च पक्षिमात्रे खगाधिपे, मे. गरुत्मान् विहगे तार्क्ष्ये, वि गरुत्मांस्तु विहगे पन्नगाशने, हे. पक्षिताक्ष्र्यौ गरुत्मन्तौ, अ.

गर्ग. (गर्गो मुनिविशेषे स्याद् वृषे किञ्चुलुकेऽपि च, हे.)

गर्गर. गर्गरो मीनभेदे स्त्री मन्थन्यास्, मे. गर्गरो मीनभेदे स्यात् मन्थन्यामपि गर्गरी, वि. गर्गरो मीने स्याद्गर्गरी तु मन्थनी, हे.

गर्जन. गर्जनं निनदे कोपे, मे. गर्जनं स्तनिते क्रुधि, हे. गर्जनं निस्वने कोपे, वि.

गर्जित. गर्जितं वारिवाहादिध्वनौ ना मत्तकुञ्जरे, मे. गर्जितो मत्तमातङ्गे गर्जितं जलदध्वनौ, वि. गर्जितो मत्तकुञ्जरे। गर्जितं जलदध्वाने, हे. गर्जितं स्तनिते नेभे, त्रि.

गर्त. गर्तस्त्रिगर्तभेदे स्याद् अवटे च कुकुन्दरे, मे, वि. गर्त्तोऽवटे कुकुन्दरे। त्रिगर्तांशे, हे.

गर्दभ. गर्दभं श्वेतकुमुदे गर्दभो गन्धभिद्यपि। रासभे गर्दभी क्षुद्रजन्तुरोगविशेषयोः, मे. गर्दभो गन्धभेदे स्याद् गर्दभं कैरवे खरे। गर्दभो गर्दभी क्षुद्ररोगजन्तुविशेषयोः, वि गर्दभो रासभे गन्धे गर्दभी जन्तुरुग्भिदोः। गर्दभन्तु सितकुमुदे, हे. गर्दभं श्वेतकुमुदे खरे पुंसि, त्रि.

गर्व. गर्वोऽभिमानेऽवलेपे, मे.

गर्भ. गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके, मे, वि. गर्भः कुक्षौ शिशौ सन्धौ भ्रूणे पनसकण्टके। मध्यमे चापवरके, हे. कुक्षिभ्रूणाऽर्भका गर्भाः, अ.

गर्मुत्. गर्मुत् स्त्री स्वर्णलतयोः, मे. गर्मुत् सुवर्णलतयोः, वि. *शैले तृणविशेषेऽर्के विषु गर्मुद्रिति ध्वनिः, शा.*

गल. गलः सर्जरसे कण्ठे, मे, वि. गलः कण्ठे सर्जरसे, हे.

गवाक्ष. गवाक्षो प्लवगाक्षण्यां गवाक्षो जालके कपौ, वि, मे. गवाक्षो जालके कपौ। गवाक्षो त्विन्द्रवारुण्याम्, हे.

गवादनी. गवादनीन्द्रवारुण्यां गवां घासादनाश्रये, मे, वि. गवादनीन्द्रवारुणी। घासस्थानं गवादीनाम्, हे.

गव्य. गव्यं नपुंसके ज्यायां रागद्रव्येऽप्यथ स्त्रियाम्। गोसमूहे,,

त्रिलिङ्गन्तु गोदुग्धादौ च गोहिते, मे. गव्यं च गोहिते तथा क्षीरादिके गवाम्। रागद्रव्ये च गव्या तु गोकुले कथिता बुधैः, वि. गव्यं क्षीरादिके जन्यायां रागवस्तुनि गोहिते। गव्या गोवृन्दगव्यूतौ, हे. गव्यं गोहितदुग्धादौ जन्यायां गव्या तु गोकुले, त्रि.

गहन. गहनं कलिले त्रिषु। नपुंसकं गह्वरे स्यात् दुःखकाननयोरपि, मे. गहनं गह्वरे दुःखे विपिने कलिलेऽपि च, वि. गहनं वनदुःखयोः। गह्वरे कलिले चापि, हे. गहनं गह्वरे दुःखे वने, त्रि.

गह्वर. अथ गह्वरम्। गुहागहनदम्भेषु निकुञ्जे तु पुमानयम्, मे. गह्वरस्तु गुहादम्भनिकुञ्जगहनेष्वपि, वि. गह्वरो विलदम्भयोः। कुञ्जे, हे. गुहादम्भौ गह्वरं, अ. गह्वरं हे गुहाकुञ्जे, त्रि. दम्भोऽपि गह्वरम्, रु.

गाङ्ग. गाङ्गस्तु गङ्गासम्भूते त्रिषु भीष्मे गुहे पुमान्, मे. गाङ्गस्तु गङ्गासम्भूते भीष्मे शक्तिधरेऽपि च, वि. V. गाङ्गेय.

गाङ्गेय. गाङ्गेयः स्यात् पुमान् भीष्मे क्लीबं स्वर्णकसेरुणोः, मे. गाङ्गेयो जाह्नवीसुते। कसेरुस्वर्णमुस्तेषु गाङ्गेयमिति कथ्यते, वि. गाङ्गेयं स्वर्णमुस्तयोः। कसेरुण्यथ गाङ्गेयो गाङ्गवत् स्कन्दभीष्मयोः, हे. कसेरुहेम्नो र्गाङ्गेयम्, अ. भीष्मे ना हेम्नि गाङ्गेयम्, त्रि.

गाढमुष्टि. गाढमुष्टिः कृपाणे ना कृपणे त्वभिधेयवत्, मे. स्याद् गाढमुष्टिः कृपणे कृपाणादिषु चेष्यते, वि. गाढमुष्टिस्तु कृपणे कृपाणप्रस्तावपि, हे.

गाण्डी(ण्डि)व. गाण्डीवो गाण्डिवश्चास्त्री कार्मुकेऽर्जुनकार्मुके, मे गाण्डीवं गाण्डिवं जिष्णोः कोदण्डे कार्मुकेऽपि च, वि. गाण्डीवगाण्डिवौ चापमात्रे पार्थधनुष्यपि, हे.

गातु. गातु र्ना कोकिले भृङ्गे गन्धर्वे त्रिषु रोषणे, मे गातुः पुंस्कोकिले भृङ्गे गन्धर्वे रोषणेऽपि च, वि, हे.

गात्र. गात्रं गजाग्रजङ्घादौ क्लीबमङ्गे कलेवरे, मे. गात्रमङ्गे कले

वरे। स्तम्बेरमाग्रजङ्घाया विभागेऽपि समीरितम्, वि. गात्रमङ्गशरीरयोः। गजाग्रदेशे, हे.

गाथा. गाथा श्लोके संस्कृतान्यभाषायां गेयवृत्तयोः, मे. गाथा वाग्भेदवृत्तयोः, वि, हे.

गाध. गाधः स्थाने च लिप्सायाम्, मे, वि. गाधः सत्रात् स्थानलिप्सयोः, हे.

गान्धार. गान्धारः पुंसि सिन्दूरे रागदेशप्रभेदयोः, मे. गान्धारः सिन्दूरे रागदेशयोः, वि. स्वरे रागे च गान्धारः, त्रि.

गान्धिक. गान्धिको लेखकेऽपि सत्रात् सुगन्धिव्यवहारिणि, मे. गान्धिकं लेखके प्राहुः सुगन्धिव्यवहारिणि, वि. गान्धिको लेखके गन्धचारिणि, हे. गान्धिको लेखकेऽपि सत्रात्, त्रि.

गायत्री. गायत्री त्रिपदादेवीच्छन्दोभित्खदिरेषु च, मे. गायत्री कथिता च्छन्दःप्रभेदे खदिरेऽपि च, वि. गायत्री खदिरे छन्दोविशेषे, हे. गायत्री खदिरे स्त्री सत्रात् छन्दस्यपि षड्वरे, त्रि.

गारुड़. चयो गारुड़ं चूड़कन्ते मरकतेऽपि च, मे. गारुड़ं सत्रात्मरकते विषशास्त्रेऽपि गारुड़म्, वि. गारुड़ं तु मरकते विषशास्त्रे, हे.

गाल. गालः स्कन्धमहोरसोः, वि.

गालव. गालवस्तु मुनौ लोध्रे, मे. गालवो मुनिलोध्रयोः, वि, हे, त्रि.

गिर्. गीः स्त्री भाषासरस्वत्योः, मे. वचो वाक्यञ्च गी र्मता, अने. v. वाच्.

गिरि गिरि र्ना नेत्ररुग्भिदि। अक्षौ गिरियके योषिद् गीर्ण पूज्ये पुनस्त्रिषु, मे. गिरि गीर्णे गिरियके क्रीड़ाकन्दुकशैलयो.। नेत्रामयविशेषेऽपि पूज्ये तु गिरिरन्यवत्, वि. गिरिः पूज्येऽक्षिरुजि कन्दुके। शैले गिरियके गीर्णावपि, हे

ऽपि गिरिजा गौरीमातुलुङ्गयोश्च योषिति, मे. गिरिजं चाभ्रके स्यात् शिलाजतुसुगन्धयोः। लोहेऽपि गिरिजा गौरीमातुलिङ्गयोरुदीरिता, वि. गिरिजमभ्रके। शिलाजतुनि लोहे च गिरिजा मातलुङ्ग्-मा, हे.

गिरिसार. गिरिसारः पुमान् लोहे वङ्गे मलयपर्वते, मे. गिरिसारो भवेल्लोहे लिङ्गे मलयपर्वते, वि. गिरिसार. पुन लोहे लिङ्गे मलयपर्वते, हे.

गिरीश. गिरीशोऽद्रिपतौ वाचस्पतिशङ्करयोः पुमान्, मे. गिरीशो वाक्पतौ रुद्रे गिरीशोऽद्रिपतावपि, वि. गिरीशो वाक्पतौ हरे। अद्रिराजे, हे.

गीत. गीतं शब्दितगानयोः, मे, हे, वि. गीतन्तु शब्दिते गाने, वि.

गीति. गीतिश्छन्दसि गाने स्त्री, मे. गीतिश्छन्दसि गाने च, वि, हे.

गुच्छ(च्छ). सम्राड् गुच्छः स्तवके स्यात् हारभेदकलापयोः, मे, वि. गुच्छो गुच्छो हारकलापयोः, हे. गुच्छः स्तवकहारयोः, अ.

गुञ्जा. गुञ्जा तु काकचिञ्चायां पटहे च कलध्वनौ, मे. गुञ्जा तु कृष्णलायां स्यात् पटहे मधुरध्वनौ, हे. गुञ्जाऽपि पटहे प्रोक्ता काकचिञ्चां कलध्वनौ, वि. गुञ्जे पटहकृष्णले, त्रि.

गुड़. गुडः सम्राड् गोलके हस्तिसन्नाहेक्षुविकारयोः। गुडा स्नुह्याञ्च कथिता गुडिकायाश्च योषिति, मे. गुडः सम्राड् गोलके हस्तिसन्नाहेक्षुविकारयोः। गुडा स्नुहीगुडिकयोः, वि. गुडः कुञ्जरसन्नाहे गोलकेक्षुदिकारयोः। गुडा तु गुडिकास्नुह्योः, हे. गुडो गालेक्षुपाकयोः, अ.

गुण गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये। त्यागे शौर्यादिसत्त्वादिसन्ध्यादावृत्तिरज्जुषु। शुक्लादावपि सध्याश्च, मे. गुणो जरासूदतन्तुषु। रज्जौ सत्त्वादौ सन्ध्यादौ शौर्यादौ भीम इन्द्रिये। रूपादावप्रधाने च दोषान्यस्मिन् विशेषणे, हे मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसन्ध्यादिके गुणः, अ. गुणः सम्राड्रज्जुसूदयोः, त्रि. सत्त्वादौ रूपादौ

सर्वादौ तन्तुषु प्रयोगज्ञाः। गुणशब्दं शिञ्जिन्यां प्रयोजयन्त्यप्रधानेऽपि, ह. गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे। शुक्ले सत्वादिसन्ध्यादिविद्यादिहरितादिषु, वि.

गुणनिका. भवेद्गुणनिका नृत्ये शून्याङ्के पाठनिश्चितौ, मे, वि. गुणनिका तु शून्याङ्के नर्तने पाठनिश्चये, हे. शून्याङ्केऽपि गुणनिका, हा.

गुण्डक. गुण्डको मलिने धूलौ कलोक्तिस्नेहपात्रयोः मे, वि. गुण्डकः पुनः। कलोक्तौ मलिने धूलौ स्नेहपात्रे, हे.

गुत्स. गुत्स. सप्रात् स्तवके स्तम्बे हारभिद्ग्रन्थिपर्णयोः, मे. गुत्सः स्तम्बे हारभेदे स्तवके ग्रन्थिपर्णके, वि. गुत्सः स्तम्बगुलुच्छयोः। हारभेदे ग्रन्थिपर्णे, हे. गुत्सः स्तवकहारयोः, त्रि.

गुन्द्र. गुन्द्रस्तेजनके स्त्री तु प्रियङ्गौ भद्रमुस्तके, मे. गुन्द्रस्तेजनके गुन्द्रा प्रियङ्गौ भद्रमुस्तके। कैवर्तीमुस्तके चापि, वि. गुन्द्रस्तु तेजने। गुन्द्रा प्रियङ्गौ कैवर्तीमुस्तके भद्रमुस्तके, हे. गुन्द्रस्तेजनके गुन्द्रा त्रिलिङ्गां भद्रमुस्तके, त्रि.

गुप्त. गुप्तं सप्राद्, रक्षिते गूढे, मे. गुप्तं गूढे त्राते, हे. गुप्तं रक्षितगूढयोः, वि, त्रि.

गुप्ति. गुप्तिः स्वप्नवकरस्थाने कारागारे च रक्षणे, मे. गुप्तिः कारागृहे प्रोक्ता भूगर्त्ते रक्षणे यमे, वि. गुप्ति र्यमे भूगर्त्तरक्षयोः। कारायाम्, हे. गुप्तिः क्षितिव्युदासेऽपि, श.

गुम्फ. गुम्फः सप्राद्, गुम्फने बाहोरलङ्कारे च कीर्त्तने, वि. गुम्फो दोर्भूषणे दृब्धौ, हे. गुम्फस्तु गुम्फने बाहोरलङ्कारे च कीर्त्तने, मे.

गुरु. गुरुस्त्रिलिङ्गयां महति दुर्जरालघुनोरपि। पुमान् निषेकादिकारे पित्रादौ सुरमन्त्रिणि, मे. गुरु र्निषेकादिकारे पित्रादौ सुरमन्त्रिणि। दुर्जरालघुनोः प्रोक्तो गुरु र्महति वाचप्रवत्, वि. गुरु र्महत्याङ्गिरसे पित्रादौ धर्मदेशके। अलघौ दुर्जरे चापि, हे. गुरू गीष्पतिपित्राद्यौ, अ. गुरुस्त्रिलिङ्गयां महति दुर्जरालघुनोरपि, त्रि. गुरुः पिता

गुरु श्रेष्ठो गुरु सुरपुरोहित.। दुर्गरोऽपि गुरुः प्रोक्तो गुरुः शिष्याभिषेचकः अने.

गुल. गुल सत्रादिविवे पुमान्। गुली तु गुटिकारोगभिदोः स्नुहां गुला स्मृता, मे.

गुल्म. गुल्मः सेनाघट्टभिदोः सैन्यरक्षणरुग्भिदोः। स्तम्बे क्रियामामलक्यं लावनीवस्त्रवेश्मसु, मे. गुल्मः रुक्स्तम्बे प्रोक्तः घट्टसैन्ययोः सैन्यरक्षणे। गुल्मी सत्रादामलक्यं लावनिकावस्त्रवेश्मसु, वि. गुल्मः सैन्योपरक्षणे। रुक्सैन्यघट्टभेदेषु स्तम्बे गुल्मी पटौकसि। आमलक्यं लयो र्वन्याम्, हे. गुल्मा रुक्स्तम्बसेनाश्च, अ. गुल्मः स्तम्बे घट्टभेदे, त्रि.

गुह. गुहः षाण्मातुरे गुहा। सिंहपुच्छ्याश्च गर्त्ते च पर्वतादेश्च गह्वरे, मे. गुहः स्कन्दे गुहा पुनः। गह्वरे सिंहपुच्छ्यां च, हे. गुहा तु गह्वरे सिंहपुच्छ्यां स्कन्दे गुहो मतः, वि.

गुह्य. गुह्यं रहस्युपस्थे च गुह्यः कमठदम्भयोः, मे, वि गुह्यः कमठदम्भयोः। गुह्यमुपस्थे रहसेत्र, हे. रहस्योपस्थयो र्गुह्यम्, अ.

गूढ. गूढं रहसि गुह्ये च न द्वयोः संवृते त्रिषु, मे. गूढं रहःसंवृतयोः, हे. गूढं रहसि गुह्ये च संवृते पुनरन्यवत्, वि.

गृञ्जन. गृञ्जनम्। विषदग्धपशो र्मांसे क्लीवं पुंसि रसोनके, मे. गृञ्जनस्तु रसोनके। विषदिग्धपशो र्मांसे गृञ्जनं च प्रकीर्त्तितम्, वि. गृञ्जनं विषदग्धस्य पशो र्मांसे रसोनके, हे. विषदिग्धपशो र्मांसे गृञ्जनं ना रसोनके, त्रि.

गृध्र. गृध्रः खगान्तरे पुंसि वाचालिङ्गोऽर्थलुब्धके, मे. गृध्रः खगान्तरे प्रोक्तः वाच्यवल्लार्थलुब्धके, वि. गृध्रो गृध्नौ खगान्तरे, हे. गृध्रः स्यात्लोभिपक्षिणोः, त्रि.

गृष्टि. अथ गृष्टिः सकृत्सूतगवीवदरयोः स्त्रियाम्, मे. गृष्टिस्तु सकृत्सूतगवी भवेत्। वराहक्रान्ता च, हे. गृष्टिः धेन्वोपधीभिदोः, त्रि.

गृह. गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि, मे. गृहाः पत्न्यां.-

गृहे स्मृता, वि. गृहा दारेषु सद्मनि, हे. दारेषु च गृहा:, अ.

गृहपति. भवेद् गृहपतिः पुंसि गृहस्थेऽपि च मन्त्रिणि, मे. गृहपतिर्गृहस्थे स्याद् अत्याधाने च मन्त्रिणि, वि. गृहपतिर्गृही मन्त्री, हे. गृही मन्त्री गृहपतिः, त्रि.

गृह्य. गृह्यं गुदे ग्रन्थिभेदे क्लीवं शाखापुरे स्त्रियाम्। गृहासक्तमृगादौ ना त्रिषु चास्वैरिपक्षयोः, मे. गृह्यं पुरीषमार्गेऽपि भवेदस्वैरपक्षयोः। गृह्या च शाखानगरे गृह्योऽस्के केऽपुरद्वीरितः, वि. गृह्यन्तु मलवर्त्मनि। गृह्योऽस्वैरिणि पक्षे च गृहासक्तमृगाण्डजे। गृह्या तु शाखानगरे, हे. गृह्यमस्वैरिपक्षयोः, त्रि.

गृह्यक. गृह्यको निभृके च्छेके, मे. गृह्यकश्छेकनिभृयोः, वि, त्रि.

गेय. गेयः स्याद् गातव्ये गायने त्रिषु, मे. गेयो गातव्येत्र गायनेऽपि च, वि. गेयौ गातव्यगायनौ, हे. गातव्यगायनौ गेयौ, त्रि.

गेष्णु. गेष्णुर्ना गायने नटे, मे. गेष्णुर्नटे गायके च, हे. गेष्णुर्नटे गायने च, वि.

गैरिक. गैरिकं धातुरुक्मयोः, मे. गैरिकं कनके धातौ, त्रि. अथ गैरिकम्। स्वर्णे धातौ, हे. स्वर्णेऽपि गैरिकम्, श.

गो. गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्। स्त्री सौरभेयीदृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च, मे. गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः। अर्जुनीनेत्रदिग्बाणभूवाग्वारिषु गौर्मता, वि. गौरुदके दृशि। स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि, हे. स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः, अ. स्वर्गे वज्रे च रश्मौ च बलीवर्दे च गौः पुमान्। स्त्री बाणरोहिणीदृग्दिग्वाग्भूमिष्वप्सु, भूम्नि च, त्रि. दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु। भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृतः, ह. बाणे वाचि पशौ भूमौ दिशि रश्मौ जलेऽक्षिणि। स्वर्गे मातरि वज्रेऽग्नौ सुखे सत्ये च गोध्वनिः, श्नने

गोकण्टक. गोकण्टको गोक्षुरके स्थपुटे च गवां खुरे, मे, वि. गोकण्टको गोक्षुरके गोखुरे स्थपुटीकृते, हे.

गोकर्ण. गोकर्णोऽश्वतरे सर्पे सारङ्गे च गणान्तरे। अङ्गुष्ठानामिकोन्माने गोकर्णी मूर्विकौषधौ, मे. गोकर्णोऽश्वतरे सर्पे सारङ्गे प्रमथान्तरे। अङ्गुष्ठानामिकोन्माने गोकर्णी मूर्विकौषधौ, वि. गोकर्णः प्रमथान्तरे। अङ्गुष्ठानामिकोन्माने मृगेऽश्वतरसर्पयोः। गोकर्णी तु मूर्विकायाम्, हे. अङ्गुष्ठानामिकोन्माने गोकर्णोऽह्नौ मृगेऽपि च, त्रि.

गोकिल. गोकिलो मुषले हले, श. गोकिलः। मुषले लाङ्गले चापि, हे. गोकिलो मुसले हले, वि, मे.

गोकुणिक. सत्राट्, गोकुणिको बलिरे पङ्कस्थगवुपेक्षके, मे. गोकुणिकः केकरे सत्रात् पङ्कस्थगवुपेक्षके, वि, हे.

गोग्रन्थि. गोग्रन्थि र्ना करीषे सत्राङ्गोष्ठे गोजिह्विकौषधौ, मे, वि.

गोजागरिक. गोजगरिकमित्याद्य मङ्गले कण्टकारके, वि. गोजागरिकं मङ्गले पुंसि सत्रात् कण्टकारके, मे. सत्राट्, गोजागरिकं भक्ष्यकारके मङ्गलेऽपि च, हे.

गोडुम्ब. गोडुम्बः ग्रीष्मदन्ते च गवादन्यान्तु योषिति, मे. गोडुम्बः ग्रीष्मदन्ते सत्राट्, गवादन्याः फलेऽपि च, वि.

गोण्ड. गोण्ड. पामरजातौ च वृद्धनाभौ च महति, मे. गोण्डः पामरजातौ च वृद्धनाभौ च वाच्यवत्, वि. गोण्डः स्याट्, वृद्धनाभिके। पामरजातौ च, हे.

गोत्र. गोत्रा भूगव्ययो गोत्रः शैले गोत्रं कुलाख्ययोः। सम्भावनीयबोधे च काननक्षेत्रवर्त्मसु, मे. गोत्रं नाम्नि कुले क्षेत्रे कानने चित्तवर्त्मनोः। सम्भावनीयबोधेऽपि गोत्रः क्षौणीधरे मतः। गोसमूहभुवोर्गोत्रा, वि. गोत्रं नाम्नि कुले पुंसि शैले भूगव्ययोः स्त्रियाम्, त्रि. गोत्रं नामाख्ययो गोत्रो गोत्रश्च धरणीधरः। गोत्रा वसुन्धरा ज्ञेया गोत्रञ्च प्रवरं स्मृतम्, धने. गोत्रं क्षेत्रेऽन्वये छत्रे सम्भाव्यबोधवर्त्मनोः। वने नाम्नि च

गोत्रोऽद्रौ गोत्रा भुवि गवाङ्गणे, हे. गोत्रन्तु नाम्नि च, धा. गोत्रं नाम्नि तथान्वये, ह.

गोदन्त. गोदन्तो हरिताले स्याद् दंशिते हरितेऽपि च, वि. गोदन्तो हरिताले स्यात् सन्नद्धे दंशितेऽपि च, हे. गोदन्तो हरितालेऽपि, ह.

गोधा. गोधा तलनिहाकयोः, मे. गोधा तले निहाकायाम्, वि. गोधा प्राणिविशेषे स्यात् ज्याघातस्य च वारणे, हे. गोधा तले निहाकायाम्, त्रि.

गोधूम. गोधूमो नागरङ्गे स्यादोषधिव्रीहिभेदयोः, मे. गोधूमो नागरङ्गे स्याद् भेषजव्रीहिभेदयोः, वि. गोधूमो भेषजे नागरङ्गव्रीहिप्रभेदयोः, हे.

गोनर्द. गोनर्दमपि कैवर्तीमुस्तके पुंसि सारसे, मे.

गोप. गोपो गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि। ग्रामस्याधिकृते पुंसि शारिवाख्यौषधौ स्त्रियाम्, मे. गोपो ग्रामौघगोष्ठाधिकृतयोर्बल्लवे नृपे। गोपी गोपालमहिलाशारिवारक्षिकासु च, वि. गोपो भूपालवल्लवौ। ग्रामौघगोष्ठाधिकृतौ गोपी गोपालसुन्दरी। शारिवा रक्षिका, हे. गोधुग्गोष्ठपती गोपौ, धा.

गोपति. गोपतिः शिवषण्डयोः। नृपभास्करयोः पुंसि, मे. गोपतिः शङ्करे षण्डे पार्थिवेऽपि विकर्त्तने, वि. गोपतिः शङ्करे षण्डे नृपतौ त्रिदशाधिपे। सहस्रकिरणे चापि, हे. षण्डः सूर्यश्च गोपतिः, त्रि.

गोपाल. गोपालो नृपगोपेशे, मे. गोपालो गोपभूपयोः वि, हे. गोपो भूपश्च गोपालौ, त्रि

गोपुर. गोपुरं द्वारि पूर्द्वारि कैवर्तीमुस्तकेऽपि च, मे. गोपुरन्तु पुरद्वारि द्वारमात्रे च मुस्तके, वि गोपुरं पुनः। मुस्तके द्वारि पूर्द्वारे, हे. द्वारमात्रेऽपि गोपुरम्, धा. पूर्द्वारि द्वारि गोपुरम्, त्रि.

गोप्य. गोप्यो दासीसुते पुंसि रक्षणीयेऽभिधेयवत्, मे. . गो

दासीसुते गोप्यो रचणीयेऽभिधेयवत्, वि. गोप्यौ दासेरगोप्त्रयौ, हे. गोप्यौ गोप्तव्यचेटकौ, त्रि.

गोमिन्. गोमी शृगाले पुंसि स्यात् त्रिषु गोमतुप्रपासके, मे. गोमी बुपासके फेरौ, वि. गोमी फेरौ गोमतुप्रपासके, हे.

गोमुख. गोमुखं कुटिलागारे वाद्यभाण्डे च लेपने। पुंसि मातलिपुत्रे च महादेवगणान्तरे, मे. गोमुखं वाद्यभेदे स्यात्सलेपने कुटिलौकसि, हे. गोमुखं कुटिलागारे वाद्यभाण्डे च लेपने, वि. गोमुखं लेपने वाद्यभाण्डे, त्रि. गोमुखमुपलेपने, रु.

गोमेदक. गोमेदकं पीतमणौ काकोले पत्रकेऽपि च, मे, वि. गोमेदकः पीतरत्ने काकोले पत्रकेऽपि च, हे. गोमेदकश्च काकोले, श.

गोरच. गोरचो नागरङ्गे स्यात् गवां च परिरचके, वि, मे. गोरचो गोपनारङ्गौ, हे.

गोरचजम्बू. गोरचजम्बू गोधूमे तथा गोरचतण्डुले, वि. गोरचजम्बू गोधूमे धान्ये गोरचतण्डुले, हे.

गोरङ्कु. गोरङ्कु नग्नबन्दिनोः। खगे च, हे. गोरङ्कुः पचिणासौ च भवेन्नग्नकवन्दिनोः, वि. खगे लग्ने च गोरङ्कुः, त्रि. गोरङ्कुः स्यात् पुमान् पचिभेदे नग्नकवन्दिनोः, मे.

गोलक. गोलको विधवापुत्रे जारात् स्यान्मणिके गुडे, मे. गोलको विधवापुत्रे जाराच्च मणिके गुडे, वि. गोलकस्तु जारतो विधवासुते। अलिञ्जरे गुडे पिण्डे, हे. गोलको मणिजारजौ, त्रि.

गोल. गोला गोदावरीसख्योः कुनटीदुर्गयोः स्त्रियाम्। पत्राञ्जने मण्डले चालिञ्जरे बालखेलने, मे. गोला सखीवर्त्तुलयो गोल लद्यानुसारतः। पत्राञ्जने कुनव्यां च गोदावर्यां च मण्डले, वि. गोलः स्यात् सर्ववर्त्तुले। गोला पत्राञ्जने गोदावर्यां कण्ठामलिञ्जरे। मण्डले च कुनव्यां च बालक्रीडनकाष्ठके, हे. मण्डले मणिके गोल गोला गोदावरी सखी, त्रि.

गोलोमी. गोलोमी श्वेतदूर्वायां स्त्राद् वचाभूतकेशयोः, मे. गोलोमी श्वेतदूर्वायां षड्ग्रन्थावारयायितोः, वि. गोलोमी वच्योषायां षड्ग्रन्थासितदूर्वयोः, हे.

गोविन्द. गोविन्दो वासुदेवे स्त्राद् गवाध्यक्षे बृहस्पतौ, मे, वि. गोविन्दस्तु गवाध्यक्षे वासुदेवे बृहस्पतौ, हे, गोष्ठाध्यक्षेऽपि गोविन्दः, श. गोविन्दो हरिगोरुङ्करौ, अने.

गोष्ठ. गोष्ठं गोस्थानके गोष्ठी सभासंलापयोः स्त्रियां, मे. गोष्ठं गोस्थानकेऽपि च। गोष्ठी सभायां संलापे,वि. गोष्ठं गोस्थानके गोष्ठी संलापे परिषद्यपि, हे.

गोष्पद. गोष्पदं गोपदश्वभ्रे गवाञ्च गतिगोचरे, मे. गोष्पदं गोखुरश्वभ्रे गवां च गतिगचरे, हे. गोष्पदं सेविते माने, श.

गोस. गोसो गन्धरसोपसोः, वि. गोसो बोलोपसोः, मे. गोसो बोलविभातयोः, रे.

गोस्तन. गोस्तनो हारभेदे ना द्राक्षायां गोस्तनी स्त्रियाम्, मे. गोस्तनो हारभेदे स्यात् द्राक्षायां गोस्तनीति च, वि. गोस्तनो हारभेदे स्यात् गोस्तनी हारङ्करिका, हे.

गौतम. गौतमो ना मुनौ बुद्धे रोचनीदुर्गयोः स्त्रियाम्, मे. गौतमः शाक्यसिंहे च मुनिभेदेऽथ गौतमी। रोचन्यामम्बिकायां च, वि. गौतमो गणभृद्भेदे शाक्यसिंहर्षिभेदयोः। गौतमुरमायां रोचन्याम्, हे.

गौर. गौरः पीतेऽरुणे श्वेते विशुद्धे चाभिधेयवत्। ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे। गौरो त्वसञ्जातरजःकन्याशङ्करभार्ययोः। रोचनीरजनीपिङ्गाप्रियङ्गुवसुधासु च। आपगाया विशेषेऽपि यादसां पतियोषिति, मे. गौर. श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपि। विशदे गौरस्तु श्वेतसर्षपे पद्मकेसरे। गौर्युमानग्निकोर्वीषु प्रियङ्गौ वरुणस्त्रियाम्। रजन्यां रोचनीनद्योः, हे गौरोऽरुणे सिते पीते, श. नग्नकन्योमयो गौरी गौरः स्याद्‌ज्वलेऽपि च, त्रि. गौरः पीतेऽरुणे श्वेते विशुद्धे त्वाभिधेयवत्।

गौरी तु विशदे पद्मकेसरे सितसर्षपे। गोरः शशिनि गौरी तु नग्नकन्यो-मयोः स्मृता। रोचनीरजनीपिङ्गाप्रियङ्गुवसुधासु च। नदीभेदेऽपि गौरी स्यात् वरुणस्य च योषिति, वि. ग.री शिवप्रिया प्रोक्ता गौरी गोरोचना मता। गौरी स्यादप्रसूता स्त्री गौरी शुद्धोभयान्यया, शने.

गौरिल. गौरिलस्तु पुमान् लौहचूर्णे स्याद् गौरसर्षपे, मे. गौरिलो लोहचूर्णे स्याद् गौरिलो गौरसर्षपे, वि. स्याद् गौरिलस्तु सिद्धार्थे लौह-चूर्णे, हे.

ग्रथित. ग्रथितो हतहृस्वयो.। आक्रान्ते च, हे. ग्रथितं गुम्फि-ताक्रान्तहिंसितेषु समीरितम्, वि. ग्रथितं गुम्फिते क्रान्ते हिंसिते च त्रिलिङ्गकम्, मे.

ग्रन्थ. ग्रन्थो ग्रन्थनाधनयोः स्याच्छास्त्राचरसङ्ख्ययोः, मे. ग्रन्थो धने स्यात् सन्दर्भे द्वात्रिंशद्वर्णनिर्मितौ, वि. ग्रन्थो गुम्फे धने शास्त्रे द्वात्रिं-शद्वर्णनिर्मितौ, हे. शास्त्रद्रविणयो ग्रन्थः, अ. ग्रन्थो द्वात्रिंशदक्षरी। धनञ्च ग्रन्थना चापि, त्रि. लिपिसङ्ख्यायां शास्त्रे द्रव्ये च ग्रन्थशब्द-मिच्छन्ति, रु.

ग्रन्थि. ग्रन्थिस्तु ग्रन्थिपर्णे ना वन्धे रुग्भेदपर्वणोः, मे. ग्रन्थिः पर्वणि कौटिल्ये ग्रन्थिपर्णे गदान्तरे, वि. ग्रन्थिस्तु ग्रन्थिपर्णे स्याद् गाधा-रुग्भेदयोरपि, हे.

ग्रन्थिक. ग्रन्थिकं पिप्पलीमूले गुग्गुलुग्रन्थिपर्णयोः। करीरे पुंसि दैवज्ञे सहदेवाख्यपाण्डवे, मे. ग्रन्थिकं पिप्पलीमूले ग्रन्थिको गुग्गुलद्रुमे। माद्रेये च करीरे च दैवज्ञे च प्रकीर्तितम्, वि. ग्रन्थिकं पिप्पलीमूले ग्रन्थिपर्णकभेषजे। ग्रन्थिको गुग्गुलौ दैवज्ञे माद्रेयकरीरयोः, हे. ग्रन्थिकौ पार्थदैवज्ञौ ग्रन्थिपर्णं च न द्वयोः, त्रि.

ग्रन्थिल. ग्रन्थिलस्तु करीरद्रौ विकङ्कततरौ पुमान्। सग्रन्थौ त्रिषु, मे. ग्रन्थिलो ग्रन्थिसहिते करीरद्रौ विकङ्कते, वि. ग्रन्थिलो ग्रन्थि-सहिते विकङ्कतकरीरयोः, हे.

ग्रस्त. ग्रस्तं जग्धे लुप्तपदोदिते, हे. ग्रस्तं ग्रासीकृतेऽपि सत्रात् लुप्तवर्णपदोदिते, वि, मे. ग्रस्तं वाग्भेदभुक्तयोः, ति.

ग्रह. ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे। सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः, मे, वि. ग्रहो ग्रहणनिर्बन्धानुग्रहेषु रणोद्यमे। उपरागे पूतनादौ आदित्यादौ विधुन्तुदे, हे. निर्बन्धोपरागार्कादयो ग्रहाः, अ. ग्रहशब्दः सूर्यादिषु भूतादिष्वभिनिवेशे च, ह.

ग्रहण. ग्रहणं स्वीकारादरकरोपरागोपलब्धिवन्दिषु, मे. ग्रहणं तूपलब्धौ सत्रादादरे ग्रहणं करे। ग्रहोपरागस्वीकारवन्दिषु ग्रहणं मतम्, वि. ग्रहणं स्वीकृते वन्द्यां धीगुणे हस्त आदरे। ग्रहोपरागे प्रत्यये, हे. ग्रहणं स्वीकृतौ हस्ते, ति.

ग्रहराज. ग्रहराजो रवौ चन्द्रे, मे. ग्रहराजो रवौ चन्द्रेऽपि, वि. ग्रहराजः शशिन्यर्के, हे.

ग्राम. ग्रामः स्वरे संवसथे, मे. ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वकः, वि. ग्रामो वृन्दे शब्दादिपूर्वकः। षड्जादौ संवसथे च, हे. शब्दादिपूर्वो वृन्देऽपि ग्रामः, अ. ग्रामः संवसथे स्वरे, ति. सङ्घातेऽपि ग्रामो भूतेन्द्रियशब्दकरणानाम्, ह.

ग्रामणी. सत्राद् ग्रामणी. प्रधानेऽधिपतौ त्रिषु नापिते पुंसि, मे. ग्रामणी भोगिके पत्यौ प्रधाने नापितेऽपि च। ग्रामणी नीलिकायाञ्च ग्रामेयीपण्यप्रयोषितोः, वि. ग्रामणीः क्षुरमर्दिनि। प्रधाने भोगिके पत्यौ ग्रामणीः पण्ययोषिति। ग्रामेयत्रां नीलिकायाञ्च, हे. ग्रामणी नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु, अ.

ग्राममद्दरिका. ग्राममद्दरिका ग्रामयुद्धे स्फूर्त्तीभये स्त्रियाम्, मे. ग्राममद्दरिका स्फूर्त्तां ग्रामयुद्धे च कीर्त्तिते, वि. ग्राममद्दरिका युद्धस्फूर्त्तोः, हे. स्फूर्त्तां च ग्रामयुद्धे च ग्राममद्दरिका स्त्रियाम्, ति.

ग्रामीण. ग्रामीणा नीलिकायां स्त्री ग्रामोद्भूतेऽभिधेयवत्, मे.

ग्रामीन. ग्रामीनः शुनि काके पुंसि त्रिषु सम्भूते ग्रामे, मे. ग्रामीनो

ग्रामसम्भूते ग्रामीनः शुनि वायसे, वि.

ग्राम्य. ग्राम्यं स्त्रीकरणे क्लीबेऽश्लीलप्राकृतयोस्त्रिषु, मे. ग्राम्यो जनेऽन्यवद् ग्राम्यमश्लीलरतबन्धयोः, वि. ग्राम्यो ग्रामभवे जने । ग्राम्यं रतबन्धेऽश्लीले, हे.

ग्रावन्. ग्रावा तु प्रस्तरे पृथ्वीधरे पुंसि, मे. ग्रावा प्रस्तरे जलदे गिरौ, वि. ग्रावाऽश्मनि गिरौ, हे. ग्रावाणौ शैलपाषाणौ, अ. ग्रावा शैले, ह.

ग्राह. ग्राहो ग्रहेऽवहारे च, मे, वि. ग्राहो ग्रहे जलचरे, हे.

ग्राहक. ग्राहकौ घातिविहगे व्याधानाञ्च ग्रहीतरि, वि, मे. ग्राहको ग्रहीतरि स्याद् व्याधानां घातिपक्षिणि, हे.

ग्रीवा. स्यात् तु ग्रीवा कन्धरायां तच्छिरायाञ्च योषिति, मे. ग्रीवाऽपि कन्धरायां स्यात् तच्छिरायामपीष्यते, वि. ग्रीवे शिरोधितच्छिरे, हे.

ग्रीष्म. ग्रीष्म उष्मर्तुभेदयोः, मे.

ग्लौ. ग्लौ र्धरणत्रां निशापतौ, मे.

घ. घो घण्टायां घर्घरे ना स्त्रियान्तु काञ्चिघातयोः, मे. खड्गी शिवोत्तमो मेधा दक्षिणाङ्गुलिमूलगः । घनो घनस्वरश्चैव घकारो ह्लादिमः स्मृत, मा.

घट. घटः समाधिभेदेभशिरःकूटकुटेषु च । घटा घटनगोष्ठीभघटनासु च योषिति, मे. घटा घटने गजसंहतौ । गोष्ठ्यां घटस्त्रिभशिरःकूटे समाधिकुम्भयोः, हे. घटः समाधिभेदेभशिरःकूटकुटेषु च । घटा घटनगोष्ठीभघटनासु च दृश्यते, वि. घटा गोष्ठ्याम्, ह.

घट्ट(ट)ना. घट्टना चलनावृत्त्योः, हे. घटना चलनावृत्त्योः, मे.

घन. घनं स्यात् कांस्यतालादिवाद्यमध्यमनृत्ययोः । ना मुस्ताब्दे घदार्ढ्येषु विस्तारे लोहमुद्गरे । त्रिषु सान्द्रे दृढे च, मे. घनं स्यात् कांस्यतालादिवाद्यमध्यमनृत्ययोः । घनः सान्द्रे दृढे दार्ढ्ये विस्तारे लोह-

मुद्गरे। मेघमुस्तकयोश्चापि, वि. घनः सान्द्रे दृढ़े दार्ढ्य विस्तारे मुद्गरेऽम्बुदे। सङ्घे मुस्ते घनं मध्यनृत्यवाद्यप्रकारयोः, ह. घनो मेघे मूर्तिगुणे त्रिषु मूर्त्ते निरन्तरे, अ. अथाम्बुदमुस्तयोः। घनः पुंसि घनं वाद्यम्, लि. घनो मेघो घनं सान्द्रं कांस्यतालादिकं घनम्। घनं सङ्घो घनं नित्यं घनः स्याल्लोहमुद्गरः, अने.

घनरस. भवेद्घनरसः सान्द्रे निर्यासे मोरटेऽम्बुनि। कर्पूरे पीलुपर्ण्याञ्च सम्यक् सिद्धरसेऽपि च, मे. भवेद्घनरसः सान्द्रे निर्यासे मोरटेऽम्बु च। कर्पूरे पीलुपर्ण्यां च समग्रक्सिद्धरसेऽपि च, वि. घनरसोऽम्बु कर्पूरे सान्द्रे सिद्धरसे द्रवे। मोरटे पीलुपर्ण्यां च, हे.

घनसार. घनसारस्तु कर्पूरे दक्षिणावर्त्तपारदे, मे, वि, हे.

घनाघन. घनाघनो वर्षुकाब्दे मत्तघातुककुञ्जरे। शक्रे च, मे. घनाघनो घातुकमत्तदन्तिनो निरन्तरे वासववर्षुकाब्दयोः, वि. घनाघनो निरन्तरे। वासवे घातुके मत्तगजे वर्षुकवारिदे, हे. घनाघनः शक्रवर्षुकाब्दयोः, ह. शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघनः, अ. शक्रोऽपि वर्षुके मेघे मत्तनागे घनाघनः, अने.

घर्घर. घर्घरो ना चलद्वारिध्वानोलूकनदान्तरे। स्त्री क्षुद्रघण्टा वीणाया भेदे स्वरान्तरेऽपि च, मे. घर्घरस्तु चलद्वारिध्वाने घूके नदान्तरे, वि. घर्घरस्तु नदान्तरे। चलद्वारिध्वनौ घूके, हे.

घर्घरिका. अथ घर्घरिका क्षुद्रघण्टावादित्रदण्डयोः मे. स्मृता घर्घरिका क्षुद्रघण्टिकाभ्रष्टधान्ययोः। वाद्यभेदवादित्रदण्डयोरापगान्तरे, वि. घर्घरिका भ्रष्टधान्ये किङ्किण्यां सरिदन्तरे। वादित्रस्य च दण्डेऽपि, हे.

घर्म. घर्मः स्यादातपे ग्रीष्मे उष्णस्वेदाम्बुनोरपि, वि. अथ घर्मो निदाघवत्। स्वेदाम्भस्यातपे ग्रीष्मोष्मणो, ह. उष्णेऽपि घर्मः, अ. घर्मः स्वेदातपोष्मसु, त्रि. घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्बुनोरपि, मे.

घस्र. घस्रस्तु दिवसे हिंस्रे, मे. घस्रो दिवसहिंस्रयोः, वि.

घस्रो वासरहिंस्रयोः, हे.

घात. घातः काण्डप्रहारयोः, मे, वि.

घृणा. घृणा जुगुप्साकृपयोः, मे, वि. घृणा तु स्त्रीजुगुप्सायां करुणायाम्, हे. जुगुप्साकरुणे घृणे, अ. दौर्मनस्यं घृणा प्रोक्ता घृणा च करुणा मता, अने. घृणा जुगुप्सायामपि, ह.

घृणि. घृणिः पुनः । अंशुज्वालातरङ्गेषु, हे.

घृत. घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत्, मे. घृतमाज्याम्बुदीप्तेषु, हे. अम्भ च घृताच्ते, अ. घृतमाज्ये प्रदीप्ते च सलिले च घृतं मतम्, वि.

घृष्टि. घृष्टिः स्त्री घर्षणस्पर्द्धाविष्णुक्रान्तासु ना किरौ, मे. घृष्टिः स्पर्द्धाघर्षणयो विष्णुक्रान्तावराहयोः, हे. घृष्टिः स्त्रयाद घर्षणे विष्णुक्रान्तास्पर्द्धाकिरिष्वपि, वि. शूकरे पुंसि घृष्टिः स्त्रयात् स्पर्धाघर्षणयोः स्त्रियाम्, त्रि.

घोर. घोरः स्याद्भिसारक, अने. घोरं भीमे हरे घोरः, वि. घोरो भीमे हरेऽपि च, मे. घोरो हरे दारुणे च, हे.

घोण्टा. घोण्टा तु बदरीपूगवृक्षयोरपि योषिति, मे घोण्टा पूगबदरयोः, हे. घोण्टा तु बदरे पूगे, वि, त्रि.

घोष. घोष आभीरपल्लयां स्याद्गोपालाध्वनि घोषके। कांस्ये चाम्बुदनादे ना घोषा मधुरिकौषधौ, मे. घोषस्तु घोषके ध्वाने गोपालाभीरपल्लिषु । घोषा तु शतपुष्पायां घोषः कांस्येऽम्बुदध्वनौ, वि. घोषः कांस्ये स्वने गोपघोषकाभीरपल्लिषु । घोषा तु शतपुष्पायाम्, हे. घोषः शब्दाभीरनिवासयोः, त्रि.

घोषयित्नु. घोषयित्नुस्तु विप्रकोकिलयोः पुमान्, मे. घोषयित्नुर्द्विजे पिके, वि. घोषयित्नुः पिके विप्रे, हे.

घ्राण. घ्राणं क्लीबं नासिकायां घ्राते स्याद्वाच्यलिङ्गकम्, मे. घ्राणं घ्राते च नासायाम्, वि घ्राणन्तु गन्धघोणयो., हे नासिका-

म्रातयो म्रीणस्, त्रि.

ङ. ङः पुमान् विषये ख्यातः स्पृहायां विषयस्त्र च, मे. संज्ञा को रुद्र-कान्तिश्च दचाङ्गुल्यग्रसंस्थितः। क्लीववक्तृश्च भद्रेणो ङकारश्चानुनासिकः, मा.

च. चान्वाचयसमाहारेतरेतरसमुच्चये, अ. चान्वाचये समाहारे-ऽप्यन्योन्यार्थे समुच्चये। पक्षान्तरे तथा पादपूरणेऽप्यवधारणे, मे, वि. चान्योन्यार्थसमाहारान्वाचयेषु समुच्चये, हे. च पादपूरणे पक्षान्तरे हेतौ विनिश्चये, त्रि. चश्चण्डेशे पुमानुक्तः कच्छपे चन्द्रचौरयोः, मे. कलौ कूर्मेश्वरो लक्ष्मी वामबाह्वादिगस्तथा। चित्तधारा चञ्चलश्च चकारः संस्मृतो बुधैः, मा.

चक्र. चक्रः कोके पुमान् क्लीवं व्रजे सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः। जलावर्त्तेऽपि, मे. चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः। ग्रामजाले कुलालस्त्र भाण्डे राष्ट्रास्त्रयोरपि। अम्भसामपि चावर्त्ते, वि. चक्रं प्रहरणे गणे। कुलालाद्युपकरणे राष्ट्रे सैन्यरथाङ्गयोः। जलावर्त्ते दम्भे चक्रः कोके, हे. चक्रं राष्ट्रेऽपि, अ. चक्रः कोके मजे पुंसि क्लीवं सैन्यरथाङ्गयोः। ग्रामजाले कुम्भकारभाण्डे राष्ट्रे च दृश्यते, त्रि. चक्रः पक्षिविशेषश्च रथाङ्गं चक्रमायुधम्। चक्रं राजत्रश्च सङ्घश्च चक्रं व्यावर्तनं मतम्, नाने.

चक्रधर. अथ चक्रधरोऽजेऽहौ ना त्रिषु ग्रामजालिनि, मे. चक्रधरो हरौ सर्पे वाचत्रवहुग्रामजालिनि, वि. चक्रधरो विष्णुसर्पचक्रिषु ग्रामजालिनि, हे. सर्पे विष्णौ चक्रधरः, त्रि.

चक्रवाट. चक्रवाटः क्रियारोहे पर्यन्ते च शिखातरौ, मे, वि. चक्रवाटस्तु पर्यन्ते क्रियारोहे शिखातरौ, हे.

चक्रवाड. चक्रवाडोऽद्रिभेदे स्यात् चक्रवाडस्तु मण्डले, वि, मे. चक्रवाडं गणे चक्रवाडोऽद्रौ चक्रवालवत् हे.

चक्रवाल. चक्रवालोऽद्रिभेदे स्यात् चक्रवालन्तु मण्डले, वि, मे.. .

V. चक्रवाड.

चक्राङ्ग. चक्राङ्गी कटुरोहिण्यां चक्राङ्गो मानसौकसि, मे, वि. चक्राङ्गः श्वेतगरुति चक्राङ्गी कटुरोहिणी, हे.

चक्राट. चक्राटो विषवैद्येऽपि धूर्तदीनारयोरपि, मे, वि. चक्राटो धूर्तदीनारविषवैद्येत्र, हे.

चक्रिन्. चक्री जालिकभित्कोककुलालाजाहिसूचके, मे. चक्री कुलालवैकुण्ठकोकाहिग्रामजालिषु, वि. चक्री कोके कुलालेऽहौ वैकुण्ठे चक्रवर्तिनि, हे. चक्रिणो विष्णुभुजगकुलालग्रामयाजिनः, त्रि.

चक्षुष्य चक्षुष्यः केतके पुण्डरीकसंज्ञकपादपे। कुलत्थिकासुभगयोः स्त्रियामचिह्निते ऽन्यवत्, मे. चक्षुष्यः केतके पुण्डरीकद्रुमे रसाञ्जने। कुलत्थिकासुभगयोश्चक्षुष्याऽचिह्निते ऽन्यवत्, वि. चक्षुष्यः सुभगे पुण्डरीकद्रुमे रसाञ्जने। कनकेऽचिह्निते चापि चक्षुष्या तु कुलत्थिका, हे. चक्षुष्यं सुभगे चक्षुर्हिते स्त्री केतकेऽपि च, त्रि.

चङ्कुर. चङ्कुरः स्यन्दने वृक्षे, मे, हे. चङ्कुरो रथवृक्षयोः, वि.

चङ्ग. चङ्गस्तु शोभने दक्षे, मे चङ्गः शोभनदक्षयो, वि.

चञ्चल. चञ्चलोऽनिलकामिनोः। चञ्चला तु तडिल्लक्ष्म्योः, हे. चञ्चला तु तडिल्लक्ष्म्योश्चञ्चलः कामुकेऽनिले, वि, मे.

चञ्चा चञ्चा तु नलनिर्माणे तृणनिर्मितपूरुषे, मे. चञ्चो नलादिनिर्माणे चञ्चा तु तृणपूरुषे, त्रि.

चञ्चु चञ्चुस्त्रोट्यां स्त्रियां पुंसि गोनाडीके व्यड्डके, मे. चञ्चुः पञ्चाङ्गुले त्रोट्यां गोनाडीकेऽपि पठ्यते, वि. चञ्चुः पञ्चाङ्गुले त्रोट्याम्, हे.

चटक चटकः कलविङ्के स्याच्चटका तत्स्त्र्यपत्ययोः, वि

चटु. चटुश्चाटौ पिचण्डे च व्रतिनामासने पुमान्, मे. चटु चाटुपिचण्डयो.। व्रत्यासने, हे देशांशे वर्णने चटुः, वि चटुश्चाटौ पिचण्डे व्रतिनामासनान्तरे, वि

चण्ड चण्डो ना. तिन्तिडीवृक्षे यमकिङ्करदैत्ययोः। चण्डी —

त्यायनीदेव्यां हिंस्राकोपनयोषितोः। चण्डा धनहरीशङ्खपुष्प्योस्त्रिष्वति-कोपने, मे. चण्डो दैत्यान्तरे तीव्रे चण्डो दासे यमस्य च। चण्डा धनहरीशङ्खपुष्प्योश्चण्डोऽतिकोपने। चण्डी कात्यायनीहिंस्राकोपनस्त्रीषु सम्मता, वि. चण्डस्तु यमदासेऽतिकोपने। तीव्रे दैत्यविशेषे च चण्डी तु शिवयोषिति। चण्डा धनहरीशङ्खपुष्प्योः, हे. चण्डौषधिः खर-खण्डः, त्रि.

चण्डालिका. चण्डालिका किन्नरायामुमायामौषधीभिदि, मे, वि. चण्डालिकौषधीभिदि। कन्दरायासुमायाश्च, हे.

चण्डि(न्द्रि)ल. चन्द्रिलः पुंसि वास्तूकशाके भर्गे च नापिते, मे. चण्डिलो नापिते ख्याते रुद्रवास्तुकशाकयोः, वि. चण्डिलो नापिते वास्तुके रुद्रे, हे.

चतुःषष्टि. चतुषष्टिः कलासंख्याभेदयो र्बह्वृचि स्त्रियाम्, मे. चतुःषष्टि र्बह्वृचेऽपि चतुःषष्टिः कलास्वपि, वि.

चतुर. चतुरश्चातुरकवत् चक्रगण्डौ नियन्तरि। एतौ सप्राता-भौ नेत्रगोचरे चाटुकारिणि, वि. चतुरो नेत्रगोचरे। चटुकारे चक्र-गण्डो अपि चातुरको यथा, हे. v. चातुर-क.

चतुष्क. चतुष्को मशकहर्यां पुष्करिण्यन्तरेऽपि च, हे, मे.

चतुष्पथ. चतुष्पथं चतुर्मार्गे सङ्गमे ब्राह्मणेऽपि ना, मे. चतुष्पथ-श्चतुर्मार्गे सङ्गमेऽपि द्विजेऽपि च, वि. चतुष्पथश्चतुमार्गसङ्गमे ब्राह्मणे-ऽपि च, हे.

चतुष्पद. चतुष्पदी तु पद्येत्र ना पशौ च करणान्तरे, मे. चतुष्पदः स्त्रीकरणे गवाश्वादिपशुष्वपि, वि. चतुष्पदो गवादिषु। स्त्रीणां करण-भेदे च, हे.

चत्वर. चत्वरं स्थण्डिलेऽङ्गने, मे, वि. चत्वरं सप्रात् पथाश्लेषे स्थण्डिलाङ्गनयोरपि, हे चत्वरं प्राङ्गणेऽपि च, श.

चत्वाल. चत्वालो होमकुण्डे सप्रात् पुंसि दर्भेऽपि दृश्यते, मे. च-

त्वालो होमकुण्डे सप्राट् गर्भे च, वि. चत्वालो यज्ञकुण्डकगर्भयोः, हे.

चन. चन विस्मये शाकलेत्र, मे.

चन्दन. चन्दनी तु नदीभिदि। चन्दनोऽस्त्री मलयजे कुङ्कुमे च नपुंसकम्, मे. चन्दनं मलयोद्भवे। चन्दनः कपिभेदे स्यान् नदीभेदे तु चन्दनी, वि. चन्दनो वानरभिदि श्रीखण्डे चन्दनी नदी, हे.

चन्दिर. चन्दिरोऽनेकपे चन्द्रे, मे, वि. चन्दिरश्चन्द्रहस्तिनोः, हे.

चन्द्र. चन्द्रः कर्पूरकाम्पिल्लसुधांशुस्वर्णवारिषु, मे. चन्द्रः सुधांशुकर्पूरकाम्पिल्लस्वर्णवारिषु, वि. चन्द्रोऽम्बुकाम्ययोः। स्वर्णे सुधांशौ कर्पूरे काम्पिल्ले मेचकेऽपि च, हे. स्वर्णेऽपि भूरिचन्द्रौ द्वौ, अ. चन्द्रः शशिनि कर्पूरे, त्रि. शशाङ्कस्वर्णयोश्चन्द्रः, धने.

चन्द्रकान्त चन्द्रकान्तस्तु पुंसि स्यान् मणिभेदे च कैरवे, मे. चन्द्रकान्तोऽश्मभेदे स्यात् चन्द्रकान्तं च कैरवे, वि. चन्द्रकान्तो रत्नभेदे चन्द्रकान्तन्तु कैरवे, हे.

चन्द्रहास. चन्द्रहासो दशग्रीवकरवालेऽसिमात्रके, मे, वि. चन्द्रहासोऽसिमात्रके। दशग्रीवकृपाणे च, हे.

चन्द्रिल. v. चण्डिल.

चन्द्रोदय. चन्द्रोदयो विताने स्यान् तथा चन्द्रोदयौषधौ, वि, चन्द्रोदयौ शश्युदयोल्लोचौ चन्द्रोदयौषधे, हे.

चपल. चपलः पारदे मीने चोरके प्रस्तरान्तरे। चपला कमलाविद्युत्पुंश्चलीपिप्पलीषु च। नपुंसकन्तु शीघ्रे स्याद् वाच्यवत् तरले खले, मे. चपलश्चोरके खले। क्षणिके चिकुरे शीघ्रे पारदे प्रस्तरान्तरे। मीने च चपला तु स्यात् पिप्पल्यां विद्युति श्रियाम्। पुंश्चल्याम्, हे. चपलः पारदे मीने चोरके प्रस्तरान्तरे। चपला कमलाविद्युत्पुंश्चलीपिप्पलीषु च। चपलं चणिके शीघ्रे चपलश्चिकुरे खले, वि चपल. पारदेऽपि च। चपलाः पिप्पलीलक्ष्मीपुंश्चलीविद्युतः स्मृताः, त्रि.

चमर. चमरं चामरे स्त्री तु मञ्जरीमृगभेदयोः, मे. चमरं

चामरे प्राज्ञ मञ्जर्य्योम्मृगभेदयोः। चमरी, वि. चमरश्चामरे दैत्रे चमरी तु मृगान्तरे, हे.

चमस. चमसो यज्ञपात्रस्य भेदेऽस्त्री पिष्टके स्त्रियाम्, मे.

चमू. चमूः सेनाविशेषे च सेनामात्रे च योषिति, मे. V. पृतना.

चय. चयः समूहे प्राकारमूलबन्धे समाहृतौ, मे, वि. चयः प्राकारपीठभूः। समूहोऽपि, हे.

चर. चरोऽचद्यूतभेदे च भौमे चारे त्रसे चले, मे. चरो द्यूतप्रभेदे स्यात् चारजङ्गमयोश्चले, वि. चरः स्याज्जङ्गमे स्पशे। चले द्यूतप्रभेदे च, हे.

चरण. चरणोऽस्त्री बह्वृचादौ मूले गोत्रे पदेऽपि च। भ्रमणे भचणे चापि नपुंसक उदाहृतः, मे. चरणं बह्वृचादौ स्यात् मूले गोत्रे पदेऽपि च। चरणं भ्रमणेऽस्त्री च चरणं रासभध्वनौ, वि. चरणो मूलगोत्रयोः। बह्वृचादौ च पादे च चरणं भ्रमणेऽदने, हे. वेदांशे बह्वृचादौ च प्रश्ने पादेऽपि चास्त्रियाम्। चरणम्, त्रि.

चराचर. चराचरं वाच्यलिङ्गमिङ्गे जगति न द्वयोः, मे. चराचरं स्याज्जगति वाच्यवत् जङ्गमेङ्गयोः, वि. चराचरं जङ्गमे स्याद् इङ्गविष्टपयोरपि, हे.

चरु. अथ चरु. पुमान् हव्यान्नभाण्डयोः, मे. चरु भाण्डे च हव्यान्ने, वि. चरु र्हव्यान्ने भाण्डे च, हे.

चर्चरीक. चर्चरीको महाकाले केशविन्यासशाकयोः, मे, वि.

चर्चा. चर्चा चिन्तास्थासकयोश्चर्चिकायान्तु योषिति, मे. चर्चा स्थासकचिन्तयोः। चर्चिकायाञ्च, वि. चर्चा स्याद्धर्ममुण्डायां चिन्तास्थासकयोरपि, हे. अथ स्थासकतर्कयोः। चर्चिकायाञ्च चर्चा स्यात्, त्रि. चिन्तायामपि च स्त्री, ह.

चर्पट. चर्पटः स्फारविपुले चपेटे पर्पटेऽपि च, मे, वि. अथ चर्पटश्चपेटे स्फारविपुले पर्पटे, हे.

चर्मन् चर्म कृत्तौ च फलके, मे. चर्म त्वचि स्फुरे, हे. चर्म सन्नाहत्वक्फलत्वचोः, वि.

चर्मकार. चर्मकारः पादुकृति स्त्रियां चर्मकषौषधौ, मे. चर्मकारः स्मृतः पादूकृति चर्मकषौषधे। चर्मकारी च कथिता, वि चर्मकारः पादूकृति चर्मकार्यौषधीभिदि, हे.

चर्मण्वती. चर्मण्वती नदीभेदे कदलीपादपे स्त्रियाम्, मे. चर्मण्वती नदीभेदे कदलीपादपेऽपि च, वि. चर्मण्वती नदीभिदि। कदल्याम्, हे. चर्मण्वत्यौ नदीरम्भे, त्रि.

चर्मिन् चर्मी फलकपाणौ सन्नाद् भूर्जे भृङ्गरिटावपि, मे, वि चर्मी भूर्जे फलकिभृङ्गिणो, हे. भूर्जे फलकपाणौ च चर्मी, त्रि

चल चला लक्ष्म्यां पुमान् कम्पे कम्पने त्वभिधेयवत्, मे. चलः कम्प्रे चला श्रियि, वि

चलुक. चलुकः प्रसृतौ भाण्डभेदे चुलुकवत् पुमान्, मे. चलुकः प्रसृतौ भाण्डप्रभेदे चुलुको यथा, हे v. चुलुक

चलन चलनं भ्रमणे कम्पे कम्प्रे तु वाचलिङ्गकम्। चलनी वस्त्रघर्घर्यां वारिभेदेऽपि च क्वचित्, मे. चलनं कम्पनं कम्पे कम्प्रे चलनकम्पनौ। चलनी वस्त्रघर्घर्यां वारिभेदेऽपि च क्वचित्, वि. चलनः पादकम्पयोः। चलनं कम्पे चलनी वारिभिद्वस्त्रघर्घरी, हे. कम्प्रे ना चलनं कम्पे चलनी वस्त्रघर्घरी, त्रि

चव्य चव्यन्तु चविके क्लीवं चचायामपि योषिति, मे. चव्यं तु चविके चव्या ग्रस्तपर्णोग्रगन्धयोः, वि. चव्या सन्नात् चविकाग्रस्तपर्णयोः, हे.

चषक. चषकोऽस्त्री सुरापात्रे मधुमद्यप्रभेदयोः, मे. चषको मद्येत्र सरके मद्यभाजने, हे चषकन्तु सुरापात्रे मद्यमद्यप्रभेदयोः, वि. चषकं सरकेऽपि च, त्रि

चातुर चातुरो नेत्रगोचरे। चाटुकारिणियन्योच त्रिषु दाच्ये न चातुरो। चक्रगण्डे च पुंसि सन्नात् मे.

चातुरक. अथ चातुरकश्चक्रगण्डौ पुंस्यभिधेयवत् । गोचरे लोचनस्यापि चाटुकारे नियन्तरि, मे. v. चतुर.

चामर. चामरं चामरापि च । दण्डे च बालव्यजने, मे.

चामरपुष्प. भवेच्चामरपुष्पन्तु पूगे काशाम्रकेतके, मे. भवेत् चामरपुष्पस्तु चूते केतककाशयोः, वि.

चाम्पेय. चाम्पेयश्चम्पके स्वर्णे किञ्जल्के नागकेसरे, मे, त्रि. चाम्पेयो हेम्नि किञ्जल्के चम्पके नागकेसरे, हे.

चार. चारः पियालवृक्षे स्याद् गतौ बन्धापसर्पयोः, मे, वि. चारो बन्धापसर्पयोः । गतौ पियालवृक्षे च, हे. चारो बन्धापसर्पयो', त्रि.

चारक. चारकः पालकेऽश्वादेः स्यात् सञ्चालकबन्धयोः, मे. चारकः पालकेऽश्वादेः स्यात् सञ्चारकबन्धयोः, वि. चारकोऽश्वादिपाले स्याद् बन्धे सञ्चारकेऽपि च, हे. चारको भोजके बन्धे, त्रि.

चारु. चारु र्हस्तौ पुंसि शोभनेऽप्यभिधेयवत्, मे.

चार्वी(र्वि). चार्वी तु शोभनाबुद्ध्योर्ज्योत्स्नाधनदभार्ययोः, मे. चार्वी तु शोभनाबुद्ध्योः, वि.

चाष. चाष इक्षुपक्षिभिदोः पुमान्, मे. चाष इक्षुपक्षिभिदोः, हे.

चिकुर. चिकुरस्तरलागयोः । पक्षिवृक्षभिदोः केशे गृहबभ्रौ सरीसृपे, मे. चिकुरश्चपले केशे गृहबभ्रुभुजङ्गयोः । पक्षिद्रुभेदयोः शैले, वि. चिकुरोऽद्रौ गृहबभ्रौ केशे चञ्चलशैलयोः । पक्षिवृक्षभिदोश्चापि, हे. चिकुरो वृक्षभित्कचौ, त्रि चिकुरौ केशचञ्चलौ, अने.

चित. चितं छन्ने त्रिषु चिता चित्यायां संहतौ स्त्रियाम्, मे. चिताचित्यौ । मृतार्थदारुषु चये, हे. चितञ्छन्ने चुल्लिकायां चित्यासंहतिचित्ययोः, वि.

चिति. चितिश्चित्यावृन्दयोः स्त्री, मे, हे. चितिः समूहे चित्यायाम्, वि. v. चिता.

चित्य चित्यं मृतकचैतेत्र स्यात् चित्या मृतचितौ स्त्रियाम्, मे. चित्यं मृतकचैत्ये स्यात् चित्या मृतचितावपि, वि. चित्यं मृतकचैत्ये स्यात् चित्या मृतचितावपि, हे.

चित्र. चित्रं स्यादङ्गुतालेख्यतिलकेषु विहायसि। चित्राऽखु-पर्णीगोडुम्बासुभद्रादन्तिकासु च। चत्वाम्परोऽहिभेदेषु कर्बुरे चाभिधे-यवत्, वि. चित्रं खे तिलकेऽद्भुते। आलेखेऽ कर्बुरे चित्रा त्वाखुपर्णीसुभद्रयोः। गोडुम्बाभरसो दन्त्यां नक्षत्रोरगभेदयोः, हे. चित्राऽखुपर्णीगोडुम्बासुभद्रा-दन्तिकासु च। मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम्। तिलका-लेख्ययोः क्लीवं कर्बुराङ्गुतयोरपि। तद्युक्तयोस्त्वन्यलिङ्गम्, मे. आलेख्या-श्चर्ययोश्चित्रम्, अ कर्बुरे तिलके चित्रं सुभद्रातारयोः स्त्रियाम्, त्रि.

चित्रक. चित्रकं तिलके ना तु व्याघ्रभिन्नस्य पाठिषु, मे. चित्रकः स्यात् तरक्ष्याघ्रभेदयो र्भजनान्तरे, वि. चित्रकस्तु चित्रकारे द्रुमौषधिविशे-षयोः, हे. चित्रकं चित्रके क्लीवं व्याघ्रे रण्डौ च चित्रकौ, त्रि. चित्रकं तिलकं प्रोक्तं चित्रकः श्वापदो मतः। चित्रको मूलजातिश्च चित्रकोऽप्य-न्तको मतः, अने.

चित्रगुप्त. चित्रगुप्तस्तु पुंसि स्याद् यमे तस्य च लेखके, मे. चित्र-गुप्तः कृतान्ते स्यात् लेखके चास्य सम्मतः, वि. चित्रगुप्तस्तु कृतान्ते तस्य लेखके, हे.

चित्रभानु. चित्रभानुः पुमान् वैश्वानरे चाहस्करेऽपि च, मे. चित्र-भानुः खगेऽनले, वि. चित्रभानुस्तु कृतान्तदिनेशयोः, हे. सूर्यवह्नी चित्रभानू, अ

चित्ररथ अथ चित्ररथः सूर्यगन्धर्वान्तरयोः पुमान्, मे. चित्ररथः स्याद् गन्धर्वे रवौ विद्याधरान्तरे, वि. चित्ररथो विद्याधरे गन्धर्व-सूर्ययोः, हे.

चित्राटीर चित्राटीरो विधौ भालमङ्कितं येन तत्र च। घण्टा-कर्णोपहाराय चतच्छागाखविन्दुषु, मे चित्राटीरो विधौ भालमङ्कितं

येन तत्र च। घण्टाकर्णोपहाराय हृतच्छागास्रबिन्दुभिः, वि. चित्राटीरो घण्टाकर्णबलिच्छागास्रबिन्दुभिः। अङ्कितभाले चन्द्रे च, हे.

चिपिट. चिपिटः खाद्यभेदे ना त्रिषु पिट्टितविस्तृते, मे. चिपिटः पुनः। पृथुकेऽपि च तते, हे. चिपिटः खाद्यभेदेऽपि चिपिटो विस्तृतेऽन्यवत्, त्रि.

चिरजीविन्. चिरजीवी द्विकाजयोः, मे, वि. चिरजीवी तु वायसे। अजे च, हे.

चिर(रि)ण्टी. चिरिण्टी तु सुवासिन्यां स्याद् द्वितीयवयःस्त्रियाम्, मे. चिरण्टी तु सुवासिन्यां स्याद् द्वितीयवयःस्त्रियाम्, वि. चिरण्टी तु सुवासिनी। तरुणी च, हे.

चिलिमीलिका. चिलिमीलिका तु कण्ठीभेदे खद्योतविद्युतोः, मे. चिलिमीलिका खद्योते कण्ठीभेदे तडित्यपि, हे. कण्ठालङ्कारखद्योतविद्युत्सु चिलिमीलिका, त्रि. स्याच्चिलिमीलिका कण्ठीभेदे खद्योतविद्युतोः, वि.

चिल्ल. चिल्लः पुमान् क्लिन्ननेत्रे क्लिन्नाक्षेऽप्यभिधेयवत्। आततायिनि संप्रोक्तः चिल्लो स्यात् क्षुद्रवास्तुके, मे. चिल्लः खगे स चुल्लश्च पिल्लवत् क्लिन्नलोचने। क्लिन्नाक्षिए, हे. चुल्लचिल्लौ मतौ क्लिन्ने नेत्रे क्लिन्नाक्षिए पिल्लवत्। आततायिनि भवेच्चिल्लश्चिल्लो स्याद् गौड़वास्तुके, वि.

चिह्न. चिह्नं लक्ष्मपताकयोः, मे, त्रि. चिह्नं ध्वजे पताकायां, वि. चिह्नमङ्के पताकायाम्, हे.

चीन. चीनो देशांशुकव्रीहिभेदे तन्तौ मृगान्तरे, मे. चीनो मृगान्तरे तन्तुव्रीहिदेशांशुकान्तरे, वि. चीनो देशेषतन्तुषु। व्रीहौ वस्त्रे, हे. चीनो वस्त्रव्रीहिभेदे, त्रि.

चीर. चीरं तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च। चीरी कच्छाटिकाझिल्ल्योः, वि. चीरो भिल्लर्यां नपुंसकम्। गोस्तने वस्त्रभेदे च रेखालेखनभेदयोः, मे चीरं वाससि चूडायां गोस्तने सीसपत्रके। चीरी कच्छाटिकाझिल्ल्योः, हे.

चीरक. चीरकोऽधिक्रियालेखे पतङ्गत्रां चीरिका मता, वि.

चीर्णपर्ण. चीर्णपर्णस्तु निम्बेऽपि खर्जूरीभूरुहे पुमान्, मे. चीर्णपर्णस्तु निम्बे स्यात् खर्जूरीभूरुहेऽपि च, वि. चीर्णपर्णः खर्जूरनिम्बयोः, हे. चीर्णपर्णस्तु खर्जूरपिचुमर्दयोः, त्रि.

चीवर. चीवरं वल्कले वस्त्रे, धने.

चुक्र चुक्रं वृक्षाम्ले चाङ्गेर्यां स्त्रीपुंस्यम्लेऽम्लवेतसे, मे. चुक्रस्त्वम्लेऽम्लवेतसे। चुक्री चाङ्गेरिकायां स्यात् वृक्षाम्ले चुक्रमिष्यते, वि. चुक्रमाम्लेऽम्लवेतसे। वृक्षाम्ले चुक्री चाङ्गेर्याम्, हे.

चुम्बक चुम्बकश्चुम्बनपरे धूर्तायस्कान्तयोरपि। बहुग्रन्थैकदेशज्ञे घटसत्रोर्ध्वावलम्बने, मे. चुम्बकं स्याद् बहुगुरुधूर्तायस्कान्तकामुके, वि चुम्बकं कामुके धूर्ते बहुगुर्वश्मभेदयोः, हे.

चुलुक चुलुकः प्रसृतौ भाण्डे भेदे चलुकवन्मतः, वि. V. चलुक.

चुल्ली. चुल्ली चितायामुद्धाने, मे. चुल्ली चितायामुद्धाने क्वचिद् वाद्येऽपुनर्दीरिता, वि. चुल्ली त्वद्धाने च, हे V चिल्ल.

चुलुकी. चुलुकी शिशुमारेऽपि कुण्डीभेदे कुलान्तरे, मे, वि. चुलुकी कुण्डिकाभेदे शिशुमारे कुलान्तरे, हे.

चूडा. चूडा वडभौ शिखायां बाहुभूषणे, मे. चूडा शिखायां वलभौ चूडा बाहुविभूषणे, वि चूडा शिखाग्रयोः। बाहुभूषावलभ्योश्च, हे चूडा शिखिशिरस्यपि, ह

चूडामणि. चूडामणि. शिरोरत्ने काकचिञ्चाफले पुमान्, मे. चूडामणिः शिरोरत्ने काकचिञ्चाफलेऽपि च, वि. चूडामणिः काकचिञ्चाफले मूर्धमणावपि, हे

चूडाल चूडाला त्वक्षटायां स्त्री चूडावति च वाच्यवत्, मे चूडाला त्वक्षटायां स्यात् चूडावति तु वाच्यवत्, वि. चूडालश्चूडया युक्ते चूडालाऽपि च चक्रला, हे

चूतक चूतकः कूपकेऽप्याम्रे, मे, वि. चूतकः कूप आम्रे च, मे.

चूर्ण अथ चूर्णौ कपर्दके। चूर्णौ धूलौ क्षारभेदे चूर्णानि वासयुक्तिषु, मे चूर्णानि वासयुक्तिषु। चूर्णः क्षोदे क्षारभेदे, हे चूर्णं गन्धयुतावपि, त्रि चूर्णः क्षोदे क्षारभेदे चूर्णानि वासयुक्तिषु, वि

चूलिका चूलिका नाटकस्याङ्गे कर्णमूले च दन्तिनाम्, मे चूलिका नाटकाङ्गके। करिणः कर्णमूले च, हे चूलिका नाटकस्याङ्गे कर्णमूले च दन्तिनाम्, वि नाटकाङ्गेषु चूलिका, त्रि

चेत् चेत् कुत्सितप्रशंसयोः। पक्षान्तरेऽप्यसाकल्ये, मे

चेतन चेतना संविदि स्त्रियाम्। वाच्यवत् प्राणयुक्ते, मे चेतना संविदि प्रोक्ता वाच्यवत् प्राणिनि स्मृता, वि चेतनः स्यात् सहृदयप्राणिनोश्चेतना तु धीः, हे

चेल चेलो नोचेऽन्यवस्त्रे लम्पुके गर्हितेऽन्यवत्, वि चेलं गर्हितवस्त्रयोः, हे चेलोऽधमे त्रिषु। नपुंसकन्तु वसने, मे चेल वस्त्रेऽधमे त्रिषु, अ

चेष्टित चेष्टितं गतिचेष्टयोः, मे

चैत्य चैत्यमायतने बुद्धविम्बे चोद्देश्यपादपे, मे चैत्यमायतने बुद्धविम्बे चोद्देशपादपे, वि चैत्यं जिनौकस्तद्बिम्बं चैत्यो जिनसभातरुः। उद्देशवृक्षः, हे चैत्यमायतने बुद्धविम्बोद्देशकवृक्षयोः, त्रि चैत्यं बुद्धान्तकेऽपुत्रक्षे देवतायतनेऽपि च, रु

चैत्र चैत्रं स्मृते देवकुले ना भूभृन्मासभेदयो, मे चैत्रं मृतकचैत्रं स्यात् चैत्रो मासाद्रिभेदयोः, वि चैत्रो मासाद्रिभेदयोः। चैत्रं मृतकचैत्रे च, हे मृते देवकुले चैत्रं ना भूभृन्मासभेदयो, त्रि

चोक्ष चोक्षो गीते शुचौ दक्षे तथाभीक्ष्णमनोज्ञयोः, मे, वि चोक्षः सुन्दरगीतयो। शुचौ, हे शुचौ दक्षे च चोक्षः स्यात्, त्रि

चोड चोडः प्रावरणे भूम्नि देशभेदे, मे चोडो देशविशेषे स्यात् चोडः प्रावरणान्तरे, वि चोड कञ्चुकद्वयो, हे,

चोद्य चोद्य स्यादद्भुते प्रश्ने चोदनार्हे तु वाच्यवत्, मे, वि.

चोद्यन्तु प्रश्ने प्रेर्येऽङ्ग, तेऽपि च, हे.

चोर. चोरश्चौरसुगन्धयोः, वि. V. चौर.

चोल. चोलः कूर्पासके पुमान्। नपुंसकं तु वसने, मे. चोला कूर्पासके देश्ये, हे.

चोलकिन्. चोलकी तु करीरे स्यात् नागरङ्गे किष्कुपर्वणि, वि, मे. चोलकी नागरङ्गे च करीरे किष्कुपर्वणि, श. चोलकी तु नागरङ्गे किष्कु-पर्वकरीरयोः, हे.

चौर. चौरः पाटच्चरेऽपि स्यात् चौरपुष्पौषधावपि, मे. चौरो दस्युसुगन्धयोः, हे.

चौल. चौलं कर्मणि मुण्डने, हे.

च्युप. च्युपः पवनयुद्धयोः, वि.

छ. छाच्छादने स्त्रियां छाता निर्मलेऽन्यवदिष्यते, मे. एक-नेत्रश्च मुषली वामकूर्परगो द्युतिः। विबिन्दुकलया चारी छकारः सुघ्नकाभिधः, मा.

छगल. छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके, मे. छगल-श्छागे छगली छागमातरि। वृद्धदारकभैषज्ये छगलं नीलवाससि, वि. छगलश्छागे छगली वृद्धदारकभेषजे। छगलं तु नीलवस्त्रे, हे.

छत्र. छत्रा मिसावतिच्छत्रे कुस्तुम्बुरुशिलीन्ध्रयोः। नपुंसकञ्चातपत्रे, मे. छत्रमातपवारणे। छत्रा मधुरिकायां स्यात् कुस्तुम्बुरुशिलीन्ध्रयोः, वि. छत्रं स्यादातपत्राणे छत्रा मधुरिकौषधौ। धान्याके च शिलीन्ध्रे च, हे.

छत्रभङ्ग. छत्रभङ्गोऽपि वैधव्ये स्वातन्त्र्यनृपनाशयोः, मे, वि. छत्र-भङ्गो नृपक्षये। स्वातन्त्र्ये विधवात्वे च, हे. वैधव्ये नृपनाशे च छत्र-भङ्गः प्रकीर्तितः, त्रि.

छद. छदः पलाशे गरुति ग्रन्थिपर्णतमालयोः, मे, वि. छदः पत्रे पतत्रे च ग्रन्थिपर्णतमालयोः, हे. पलाशे गरुति च्छदः, त्रि.

छदन. छदनं च दले पत्रे पिधाने, मे. छदनं पत्रपत्रयोः, वि. छदनं पर्णे गरुति, हे.

छद्मन्. छद्म व्याजापदेशयोः, मे. छद्म शाठ्यापदेशयोः, वि. छद्म शाठ्येऽपदेशेऽप्यतिकर्मणि, हे.

छन्द. छन्दो वशेऽप्यभिप्राये, मे, वि. छन्दो वशेऽभिप्राये च, हे. अभिप्रायवशौ छन्दौ, अ.

छन्दस्. छन्दः पद्ये च वेदे च स्वैराचाराभिलापयोः, मे, वि. छन्दः पद्येच्छयोः श्रुतौ, हे. छन्दः पद्येऽभिलाषे च, अ. छन्दः पद्यश्रुतीच्छासु, त्रि.

छन्न. छन्नन्तु रहसि क्लीबं छादिते वाच्यलिङ्गवत्, मे. छन्नं रहस्छादितयोः, वि, हे.

छर्दन. छर्दनं वमने क्लीबं निम्बालम्बुषयोः पुमान्, मे. छर्दनोऽलम्बुषे निम्बे छर्दनं वमनान्तरे, वि छर्दनोऽलम्बुषे निम्बे छर्दनं वमनेऽपि च, हे. अथालम्बुषे पुमान्। निम्बेऽपि छर्दनं वान्ते, त्रि. छर्दनोऽलम्बुषे निम्बे, हा.

छल. छलं स्खलितशाठ्ययोः, मे. छलं तु स्खलिते व्याजे, वि. छलं छद्मस्खलितयोः, हे, त्रि.

छल्ली छल्ली वीरुधि सन्ताने वल्कले कुसुमान्तरे, मे, वि. छल्ली सन्तानवीरुधोः। वल्कजे पुष्पभेदे च, हे.

*छवि छविः शोभारुचो र्योषित्, मे. छविः शोभारुचोर्मता, वि.* छविस्तु रुचि शोभायाम्, हे

छाया. छाया सत्रादातपाभावे प्रतिबिम्बार्कयोषितोः। पालनोत्कोचयोः कान्तिसच्छोभापंक्तिषु स्त्रियाम्, मे. छाया सत्रादातपाभावे प्रतिबिम्बार्कयोषितोः। पालनोत्कोचयोः कान्तिसच्छोभापंक्तिषु स्मृता, वि. छाया पंक्तौ प्रतिमायां अर्कयोषित्यनातपे। उत्कोचे पालने कान्तौ शोभायां च तमस्यपि, हे. छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः,

स्म कान्त्यनातपयोश्छाया, मने.

छित्वर. छित्वरं छेदनद्रव्येत्र छित्वरो धूर्तवैरिणोः, वि. छित्वरो वैरिधूर्तयोः। छित्वरं छेदनद्रव्येत्र, हे.

छिदिर. छिदिरः पावके रज्जौ करवाले परश्वधे, मे, वि. छिदिरोऽग्नौ परश्वधे। करवाले च रज्जौ च, हे.

छिदुर. छिदुरश्छेदनद्रव्ये धूर्ते वैरिणि च त्रिग, मे.

छिद्र. छिद्रं दूषणरन्ध्रयोः, मे. छिद्रं विवररन्ध्रवत्। गर्त्ते दोषे, हे. v. विवर.

छिन्न. छिन्नं क्षत्ते त्रिलिङ्गं स्यादू गुडूच्यामपि योषिति, मे. छिन्नं भिन्ने तु वाच्यवत्। छिन्नाऽश्लतायां पुंश्चल्याम्, वि. छिन्ना स्यादश्लतेत्वरी। छिन्नं भिन्ने, हे.

छुप. छुपः चुपस्पर्शनयोः, मे, वि.

छेक. छेको गृहाश्रितश्वगपक्षिणो नागरे त्रिषु, मे. छेको विदग्धे विश्वस्तश्वगनीडजयोरपि, हे. छेको विदग्धे च्छेकश्च विश्वस्तश्वगपक्षिणोः, वि. छेकः पङ्क्तिवकयोः, घा. गृहासक्ते पक्षिमृगे च्छेको नागरिके त्रिषु, त्रि.

छेदन. छेदनं भिदि। कर्तने, मे. छेदनं कर्तने भेदे, वि. छेदनं कर्तने भिदि, हे.

ज. जो ना स्तुतञ्जये जन्यां तातमात्रे जनार्दने, मे. स्त्रियो जयन्तो जयजः शूली च चतुराननः। मणिबन्धगतो वामे जकारो जनकोत्तमः, मा.

जकुट. जकुटं वार्ताकुपुष्पे जकुटो मलये शुनि, मे जकुटस्तु वार्ताकुकुसुमे शुनि। मलये, हे जकुटो मलये ख्यातो वार्ताकुकुसुमे शुनि, वि.

जगत् जगत् स्यात् पिष्टपे क्लीवं वायौ ना जङ्गमे त्रिषु। जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च, मे जगदाख्या पुमान् वाते विष्टपे जङ्गमेऽपि

च। जगती भुवने च्मायां छन्दोभेदे जनेऽपि च, वि. ना वाते पिष्टपे जगत्, त्रि. जगल्लोकेङ्गवायुषु, हे. जगती च्छन्दसि चितौ। जम्बूवप्रे जने लोके, हे. जगतो जगति च्छन्दोविशेषेऽपि चितावपि। जगदिङ्गेऽपि, ध्र. जगती राजप्रधानलोकेऽपि, ह.

जगल. जगलो मदनद्रुमे। मेदके पिष्टमद्ये च पुंसि धूर्तेऽभिधेयवत्, मे. जगलः पिष्टमद्ये च मेदके मदनद्रुमे। कितवे, वि. जगलो मदनद्रुमे। मेदके कितवे पिष्टमद्ये, हे.

जघन. जघनं च स्त्रियाः श्रोणिपुरोभागे कटावपि, मे. जघनं च स्त्रियाः श्रोणिपुरोभागे कटीरके, वि. जघनं कटौ। स्त्रियाः श्रोणिपुरोभागे, हे.

जघन्य. जघन्यं मेहने क्लीवं चरमे गर्हितेऽन्यवत्, मे. जघन्यं चरमे शिश्ने जघन्यं गर्हितेऽन्यवत्, वि. जघन्यं शिश्ने गर्ह्यऽन्त्ये, हे. जघन्योऽन्त्योऽधमेऽपि च, ध्र.

जघन्यज. जघन्यजः कनीयसि। वृषले, मे. जघन्यजोऽनुजे शूद्रे, वि, त्रि. जघन्यजोऽनुजन्मनि। शूद्रे च, हे.

जङ्गल. जङ्गलं निर्जनस्थाने त्रिलिङ्गत्वं पिशितेऽस्त्रियाम्, मे. जङ्गलो जलनिर्मुक्तदेशे मांसे च जङ्गलम्, वि. जङ्गलो निर्जने देशे पिशितेऽपि, हे. जङ्गलो निर्जने देशे त्रिलिङ्गः पिशितेऽस्त्रियाम्, त्रि.

जटा जटा लग्नकचे मूले मांस्यां भ्रचे पुन र्जटी, मे. जटा केशविकारे मांसिमूलयोः, हे. जटा लग्नकचे मूले सचमांसिकयो र्जटी, वि. मूले लग्नकचे जटा, ध्र.

जटाटङ्क. जटाटङ्को हरेऽपि च, हा.

जटायु. जटायुः पुंसि सम्पातेः कनीयसि च गुग्गुलौ, मे. जटायुर्गुग्गुलतरौ जटायु र्विहगान्तरे, वि. जटायु र्गुग्गुलौ खगे, हे.

जटायुस्. जटायु पुंसि सम्पातेः कनीयसि च गुग्गुलौ, मे.

जटिल जटिला पिप्पलीमांस्यो र्जटायुक्ते तु वाच्यवत्, मे. जटि-

जस्तु जटायुक्ते जटिला मांसिकौषधौ, वि जटिलो जटी। जटिला तु मांसिकायाम्, हे

जठर जठरो न स्त्रिया कुक्षौ वृद्धकर्कटयोस्त्रिषु, मे कुक्षौ वृद्धे च जठरम्, वि जठरः कुक्षिवृद्धयोः। कठिने च, हे जठरः कठिनेऽपि स्यात्, श्र

जड जडा स्त्रियाम्। शूकशिम्ब्या हिमग्रस्तमूकाप्रज्ञेषु तु त्रिषु, मे जडो मूर्खो हिमग्रस्ते शूकशिम्ब्यां जडा मता, वि जडो मर्दे हिमाघाते जडा स्यात्शूकशिम्बिका, हे

जतुक जतुकाऽजिनपत्राया जतुकं हिङ्गुलाक्षयोः, मे, वि जतुकं हिङ्गुलाक्षयोः। जतुका चर्मचटका, हे लाक्षाऽपि जतुका प्रोक्ता, श्र

जन जनो लोके महर्लोकात् परलोके च पामरे। जनी सीमन्तिनीवध्वारुत्पत्तावौषधीभिदि, मे जनो लोके जगद्भेदे पृथग्जने। जनी स्नुषावनितयोः, हे जनो लोके महर्लोकात् परलोके च पामरे। जनी सीमन्तिनीवध्वोरुत्पत्तौ च जनि र्मता, वि

जनक जनक पितृनृपयोः, हे जनकः पितृराजर्ष्योः, वि जनक पितृभुजोः, मे

जनन जननी तु दयामात्रो र्जननं वंशजन्मनोः, मे

जनपद भवेज्जनपदो जानपदोऽपि जनदेशयोः, मे भवेज्जनपदो देशे जने जानपदोऽपि च, वि जनपदः स्यात् पुनर्जनदेशयोः, हे देशे जने जनपद, त्रि

जनि १ जन

जन्य जन्यं हट्टे परीवादे संग्रामे च नपुंसकम्। जन्या मातृवयस्यायां जन्यः स्याज्जनके पुमान्। त्रिषूत्पाद्यजनित्रोश्च नवोढाज्ञातिभृत्ययोः। वरस्निग्धे, मे जन्यं हट्टे परीवादे रणे जनके पुमान्। जन्या स्यात् जननीये च जन्या मातृसखीमुदोः। जन्यो वरवधूज्ञातिप्रियकृत्हितेऽपि च, वि जन्यं स्याज्जनवादेऽपि च युद्धे हट्टे च जन्यं स्यात्।

जन्यो जामातृवत्सले। जनके जननीये च नवोढ़ानुचरादिषु। जन्यं कौलीने युद्धे जन्यो मातृसखीसुहृदोः, हे.

जन्यु. अथ जन्युः स्यात् पुंसि प्राणाग्निधातृषु, मे. जन्युः प्राणाग्निधातृषु, वि. जनुञ्चः सत्राज्जन्तुमात्रे च पावके परमेष्ठिनि, हे.

जम्बाल. जम्बालः शैवले पङ्के, मे. जम्बालं शैवले पङ्के, वि. जम्बालं कर्दमे शैवलेऽपि च, हे. जम्बालौ पङ्कशैवलौ, त्रि.

जम्बीर. जम्बीरः प्रस्थपुष्पे सत्रात् पुंसि दन्तशठद्रुमे, मे. जम्बीरं प्रस्थपुष्पाख्यशाके दन्तशठेऽपि च, वि. जम्बीरः प्रस्थपुष्पाख्यशाके दन्तशठद्रुमे, हे.

जम्बुक. जम्बुकः फेरवे नीचे पश्चिमाशापतावपि, मे. जम्बुकः श्वापदे नीचे प्रतीचीदिक्पतावपि, वि. जम्बुको वरुणे फेरौ, हे. जम्बुको क्रोष्टुवरुणौ, त्रि.

जम्बू. जम्बूः सत्रात् पादपान्तरे। तथा सुमेरुसरिति द्वीपभेदेऽपि च स्त्रियाम्, मे. जम्बूः सुमेरुसरिति द्वीपद्रुमविशेषयोः, वि. जम्बू मेरुतरङ्गिण्यां द्वीपवृक्षविशेषयोः, हे.

जम्बूल. जम्बूलस्तु पुमान् जम्बूविटपे क्रकचच्छदे, मे. जम्बूलो जम्बूविटपे जम्बूलः क्रकचच्छदे, वि. जम्बूलः क्रकचच्छदे। जम्बूद्रुमे, हे.

जम्भ. जम्भो दैत्यान्तरे दन्ते जम्बीरे भक्षणेऽपि च, वि, मे. जम्भ साह्दानवान्तरे। दन्तभोजनयोरंशे हनौ जम्बीरतूणयोः, हे. अथ दानवे। जम्बीरे व्यवहारे च जम्भो दन्तेऽपि चेष्यते, त्रि.

जम्भल. जम्भलः पुंसि जम्बीरे बुद्धदेवान्तरेऽपि च, मे. जम्भलो देवताभेदे जम्बीरेऽपि च जम्भलः, वि, जम्भलः। जम्बीरे देवताभेदे, हे. जम्बीरे देवभेदेऽपि जम्भलः, त्रि

जय जयो जयन्ते विजये जया दुर्गाग्निमन्थयोः। जयन्तीतिथिभेदोमासखीपथ्यासु च स्मृता, वि जयो जयन्ते विजये जयोमातृसखी तिथिः। पथ्या जयन्त्यग्निमन्थः, हे. जया जयन्तीतिथिभित्पथ्योमातृसखीषु च। अग्निमन्थे ना जयन्ते विजये च युधिष्ठिरे, मे.

जयन. जयनं स्यात् तुरङ्गादिसन्नाहे विजयेऽपि च, मे, वि. जयनं विजयेऽश्वादिसन्नाहे, हे.

जयन्त. जयन्ती हस्तिशिश्नौर्योरिन्द्रपुत्रीपताकयोः। पुमान् ऐन्द्री हरे भीमे, मे. जयन्तावैन्द्रिगिरिशौ जयन्त्यु आपताकयोः। जीवन्त्या-मिन्द्रपुत्र्यां च, हे. जयन्तः शङ्करेऽपि स्यात् जयन्तः पाकशासनौ। जयन्ती पादपे गौर्यामिन्द्रपुत्रीपताकयोः, वि. जयन्ती नगरी प्रोक्ता जयन्ती चटकानुजा। जयन्त्योपधिभेदः स्यात् जयन्ती शकसम्भवा, अने.

जरठ. जरठः कर्कशे पाण्डौ जरठः कठिनेऽन्यवत्, वि. जरठः कर्कशे जीर्णे, हे. जरठः कर्कशे पाण्डौ कठिनेऽप्यभिधेयवत्, मे. जरठः कठिने प्रोक्तः प्राज्ञैः परिणतेऽपि च, श.

जरण. जरणं जीरकेऽजाजिहिङ्गु सौवर्चलेऽपि च, मे. [जरणं जीर-काजाजिहिङ्गु सौवर्चलेष्वपि, वि. जरणो रुचके हिङ्गौ जीरके कृष्ण-जीरके, हे.

जरायु. जरायुरपि तस्यचिरात्रे (=जटायौ) गर्भाशये पुमान्, मे.

जर्जर. जर्जरं शैवले शक्रध्वजे त्रिषु जरातुरे, मे. जर्जरं स्यात् वासवध्वजजीर्णयोः, हे. जर्ज्जरो वाच्यवत् जीर्णे जर्जरं वासव-ध्वजे, वि.

जर्जरीक. जर्जरीकं बहुच्छिद्रे जरातुरेऽपि वाच्यवत्, मे. जर्जरीकं बहुच्छिद्रे जर्जरीकं जरातुरे, वि. जर्जरीकं जरातुरे। बहुच्छिद्रेऽपि, हे.

जर्ण. जर्णचन्द्रे च वृक्षे च, मे, वि. जर्णो जीर्णद्रुमेन्दु, पु, हे.

जल. जलं गोकलने नीरे ह्रीवेरेऽप्यन्यवत् जड़े, मे. जलं गोक-लने नीरे ह्रीवेरे च जड़ेऽन्यवत्, वि. जलं गोकलने जड़े। ह्रीवेरेऽ-म्बु, नि, हे.

जलकरङ्क. अथो जलकरङ्कः स्यात् नालिकेरफलेऽम्बुदे। शङ्खे जललतायाञ्च वारिवाहे च कीर्त्तितः, मे. जलकरङ्कः स्यान्मेघे नारि-केरतरोः फले। शङ्खे, हे अथो जलकरङ्कः स्यात् नारिकेलफलेऽम्बुदे।

शङ्के जलशतायां च वि. कच्वी, जलकरङ्कः सत्रान् नारिकेलफलेऽपि च, लि.

जलकूपी. जलकूपी कूपगर्त्ते पुष्करिण्याञ्च योषिति, मे. जलकूपी कूपगर्त्ते पुष्करिण्याञ्च कथ्यते, वि, जलकूप्यन्धुगर्भके। सरस्याम्, हे.

जलगुल्म. जलगुल्मो जलावर्त्ते कच्छपे जलचत्वरे, वि, मे, धा. जलगुल्मो जलावर्त्तेऽब्धु,चत्वरे कमठे, हे.

जलज. जलजं कमले शङ्के, मे, हे. जलजं शङ्खपद्मयोः, वि, त्रि.

जलतापक. जलतापक क्षुल्लिशकाकाचीभ्रूपयोश्च पुंसि स्यात्, मे. कथ्यते जलतापकः। काकाचीराजसफरमत्स्यत्रयोः, वि.

जलद. जलदो मुस्तके मेघे, मे, हे. जलदो मुस्तकेऽब्धु,दे, वि.

जलरण्ड. जलरण्डो जलावर्त्ते पयोरेणौ भुजङ्गमे, मे, वि. जलरण्डः पयोरेणौ जलावर्त्ते भुजङ्गमे, हे.

जलविल्व. जलविल्वः कर्कटे सत्रास् पद्माक्षे जलचत्वरे, मे. जलविल्वस्तु पद्माक्षे कर्कटे जलचत्वरे, वि. जलविल्वस्तु कर्कटे। जलचत्वरपद्माक्षे, हे. जलविल्वः कर्कटके पद्माक्षे जलवल्कले, धा.

जलसूचि. जलसूचिः कङ्के लोटिमत्स्यशृङ्गाटयोरपि। शिशुमारे च पुंलिङ्गः जलौकायान्तु योषिति, मे. जलसूचि र्जलौकसि। शृङ्गाटे शिशुमारे च कङ्के लोटिमत्स्येऽपि च, वि. जलसूचिः शिशुमारे लोटिमत्स्ये र्जलौकसि। काकशृङ्गाटयोश्चापि, हे. जलसूचि र्जलौकाऽपि, धा.

जलाञ्चल. जलाञ्चलं स्रतौ वारिनिर्गमे शैवलेऽपि च, मे, वि. जलाञ्चलं तु शैवाले स्रतश्च जलनिर्गमे, हे.

जलाटन. जलाटनो लोहपृष्ठे जलौकायां जलाटनी, मे, वि. जलाटनः कङ्कपक्षे जलाटनी जलौकसि, हे.

जलाशय. जलाशयो जलाधारे सत्राशुशीरे नपुंसकम्, मे. जलाशयमुशीरे च जलाधारे जलाशयः, वि. जलाशयमुशीरे सत्राज्जलाशयो

जलाश्रये, हे.

जलेन्द्र. जलेन्द्रः पुंसि वरुणे जम्भले च महोदधौ, मे. जलेन्द्रो वरुणेऽम्बुधौ। जम्भले च जलेन्द्रः स्यात्, वि. जलेन्द्रो जम्भलेऽम्भोधौ वरुणेऽपि च, हे.

जव. जवो वेगवति त्रिषु। पुंलिङ्गस्तु भवेद्वेगे चोड्रपुष्पे जवा स्मृता, मे. जवः स्याद् वेगवेगिनोः। जवोड्रपुष्पे, हे. जवो वेगिनि वेगे स्याद् चोड्रपुष्पं जवा मता, वि.

जवन. जवनस्तु स्याद्वेगेऽपि हये ना वेगिनि त्रिषु, मे. जवनो देशभेदे स्याद् वेगवेगाधिकाश्वयोः। जवन्योषधिभेदे स्याद् वाच्यवद् वेगिनि स्मृतः, वि. जवनो वेगिवेगयोः। वेग्यश्वे नीवृति जवन्यपस्या-मोषधीभिद्दि, हे. जवनो देशवेगिनोः, त्रि. v. यवन.

जसुरि. जसुरिः पावके पवौ, वि.

जह्नु. जह्नुः स्यात् पुंसि राजर्षिभेदे च मधुसूदने, मे.

जाङ्गल. जाङ्गली शूकशिम्ब्यां स्त्री जाङ्गलो ना कपिञ्जले, मे. जाङ्गली शूकशिम्ब्यां स्यात् जाङ्गलस्तु कपिञ्जले। जाङ्गलः स्यात् कपिञ्जले जाङ्गली तु शूकशिम्ब्याम्, हे.

जाङ्गुल. जाङ्गुली विषविद्यायाम् जाङ्गुलं जालिनीफले, मे, वि. जाङ्गुलं जालिनीफले। जाङ्गुली विषविद्यायाम्, हे.

जात. जातं व्यक्तौघजन्मसु। क्लीवं त्रिलिङ्गमुत्पन्ने, मे. जातं व्यक्तौघजन्मसु, त्रि. जातं जातपौघजन्मसु, वि. जातं जातव्रौघजनिषु, हे.

जाति. जातिः स्त्री गोत्रजन्मनोः। अश्मन्तिकामलक्योश्च सामान्यच्छन्दसोरपि। जातीफले च मालत्याम्, मे. जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः। जाति र्जातीफले धात्र्यां चुल्लीकम्पिल्लयोरपि, वि. जातिः सामान्यगोत्रयोः। मालत्यामामलक्यां च चुल्ल्यां कम्पिल्लजन्मनोः। जातीफले छन्दसि च, हे. जातिः सामान्यजन्मनोः, म. जातिश्छन्दसि मालत्यां चुल्ल्यां जातीफले कुले, त्रि. जातिः स्यात् मडजाख्यानं मालती

जातिरुच्यते। गोत्वादिजन्म जातिः स्यात् जातिर्वल्लीति कथ्यते, अने.

जातु. जातु शब्दे विगर्ह्येऽपि कदाचिदर्थेऽपि, मे.

जात्य. कुलीनश्रेष्ठयो र्जात्यम्, हे.

जानपद. v. जनपद.

जामातृ. जामाता दुहितुः पत्यौ सूर्यावर्त्ते धवे पुमान्, मे. जामाता वल्लभे सूर्यावर्त्तेऽपि दुहितुः पत्यौ, वि. जामाता दुहितुः पत्यौ। सूर्यावर्त्ते वल्लभे च, हे. सूर्यावर्त्तेऽपि जामाता, त्रि.

जामि. जामिः स्वसृकुलस्त्रियोः, वि, हे, श. जामिः कुलबालिकायां च, ह. v. यामि.

जायानुजीविन्. जायानुजीवी पुंसि स्यात् नटे च बकपक्षिणि, मे. जायानुजीवी तु नटे दुर्गताश्विनयो र्बके, वि. अथ जायानुजीविनः। बकाश्विननटदुःस्थाः, हे.

जार. जारी स्यादौषधीभेदे स्त्रियामुपपतौ पुमान्, मे. जारी स्यादोषधीभेदे जारस्तूपपतावपि, त्रि. जारस्तूपपतौ जार्यौषधीभिदि, हे.

जाल. जालं गवाक्ष आनाये क्षारके दम्भवृन्दयोः। जालो नीपद्रुमे जाली पाटलिकौषधौ स्त्रियाम्, मे. जालं समूह आनायगवाक्षक्षारकेष्वपि, श. जालं दम्भेऽपि, त्रि. जालं कपटेऽपुत्रक्षम्, ह. जालं गवाक्ष आनाये कोरके दम्भवृन्दयोः। जालो नीपद्रुमे जाली कोशातक्यामुदाहृता, वि. जालन्तु गवाक्षे क्षारके गणे। दम्भानाययो र्जालो नीपे जाली पटोलिका, हे.

जालक. जालकं कोरके दम्भे पुलाकानाययोरपि। न पुंसि मोचकफले स्त्रियान्तु वसनान्तरे। गिरिसारजलौकायामपि स्यात् विधवास्त्रियाम्। भटानामश्मरचिताङ्गरक्षिण्यां च जालिका। जालिको वागुरवग्रामजालिजालोपजीविनोः, मे. जालिका जालिनीफले। भटानामश्मरचिताङ्गरक्षिण्याश्च जालिका। गिरिसारे जलौकायामपि स्याद्वि-

भवास्त्रियाम्। जालिकः पुनरुद्दिष्टो ग्रामकूटे च धीवरे, वि. जालकं कोरके मोक्तं कुलाये जालिनीफले। आनाये दम्भभेदे च वस्त्रभेदे च जालिका, वि. जालिका वस्त्रभित् कूटकृत्कैवर्त्तौ च जालकौ, त्रि.

जाल्म. जाल्मः सप्रात् पामरे क्रूरे पुंस्यसमीक्ष्यकारिणि, मे. जाल्मः स्मात् पामरे क्रूरे जाल्मोऽसमीक्ष्यकारिणि, वि. जाल्मस्तु पामरे। असमीक्ष्यकारिणि च, हे.

जाहक. जाहको गोकुमार्जारखट्वाकाकचिडकासु च, मे, वि. गोकुं काकचिडकायाञ्च जाहकध्वनिरिष्यते, श.

जिगत्नु. जिगत्नुः पुंसि जन्तौ वैश्वानरेऽपि च, मे. जिगत्नुरग्नौ जन्तौ च, वि.

जिगीषा. जिगीषा जेतुमिच्छायां व्यवसायप्रकर्षयोः, मे, वि. जिगीषा तु जयस्पृहा। व्यवसायः प्रकर्षश्च, हे.

जिन. जिनोऽर्हति च बुद्धे च पुंसि स्याज्जित्वरे त्रिषु, मे. जिनः स्यादतिवृद्धे च बुद्धे चार्हति जित्वरे, वि. जिनोऽर्हद्‌बुद्धविष्णुषु, हे. बुद्धे जिनो जित्वरे च, त्रि. वीतरागो जिनः प्रोक्तो जिनो नारायणः स्मृतः। कन्दर्पोऽपि जिनश्चैव जिनः सामान्यकेवली, धने.

जिष्णु. जिष्णुर्ना वासवेऽर्जुने। जित्वरे वाचप्रलिङ्गः, मे. जिष्णुः शक्रे धनञ्जये। जित्वरे च, वि. जिष्णुः शक्रेऽर्जुने विष्णौ जित्वरेऽर्के वसुष्वपि, हे. जेतरीन्द्रेऽर्जुने जिष्णुः, त्रि.

जिह्म. जिह्मस्तु कुटिले मन्दे क्लीवं तगरपादपे, मे. जिह्मस्तु कुटिले मन्दे जिह्मन्तगरपादपे, वि. जिह्मः कुटिले मन्दे च जिह्मं तगरपादपे, हे. जिह्मस्तु कुटिलेऽलसे, श. जिह्मः स्मात् कुटिले मन्दे, त्रि.

जिह्मग. जिह्मगोऽहौ च मन्दगे, मे. जिह्मगो मन्दगे सर्पे, हे, वि.

जिह्वा. जिह्वा तु वाचि ज्वालारसज्ञयोः, हे

जिह्वाप. जिह्वापः पुंसि मार्जारे, मे, लि. जिह्वापः पुंसि मार्जारे व्याघ्रचित्रकयोरपि, वि. जिह्वापस्तु पुंसि व्याघ्रे द्वीपिबिडालयोः, हे. जिह्वापो द्वयर्थे स्यादिन्द्रमत्तकासुके, श.

जीमूत. जीमूतोऽद्रौ भृतिकरे देवताड़े पयोधरे, मे. जीमूतः स्याद्भृतिकरे शक्रेऽद्रौ घोषके घने, वि. जीमूतो वासवेऽम्बुदे। घोषकेऽद्रौ भृतिकरे, हे. जीमूतो मेघपर्वतौ, धने. जीमूतं पर्वतेऽपि कथयन्ति, श.

जीर. जीरस्तु जरणे खड्गे, मे. जीरः खड्गे वणिग्द्रव्ये, वि. जीरस्त्वजाजौ खड्गे च, हे.

जीर्ण. जीर्णं परिपक्वपुराणयोः, मे. जीर्णं पक्वे पुराणे च, वि.

जीव. जीवः प्राणिनि वृत्तौ च वृक्षभेदे वृहस्पतौ। जीवा जीवन्तिकामौर्वीवचाशिञ्जितभूमिषु। न स्त्री तु जीविते, मे. जीवः स्यात् त्रिदशाचार्ये द्रुमभेदे शरीरिणि। जीवितेऽपि च जीवा तु वचायां धनुषो गुणे। शिञ्जिते चितिजीवन्तरो र्वृत्तौ, हे. जीवोऽस्त्री जीविते पुंसि गुरुजन्त्वोः स्त्रियां गुणे, त्रि. जीवो वृक्षप्रभेदे स्यात् जीवः प्राणिनि गीष्पतौ। जीवा जीवन्तिकाभूम्यो र्मौर्वीशिञ्जितवृत्तिषु। वचायामपि जीवा स्यात् जीवं जीवा च जीविते, वि.

जीवक. जीवकः प्राणके पीतसालक्षपणयोरपि। कूर्चशीर्षेऽपि पुंसि स्यात् आजीवे जीविका मता। त्रिषु सेविनि वृद्धग्राही जीविनोराहितुण्डिके, मे. जीवकः पीतशाले स्यात् क्षपणे वृद्धिजीविनि। सेविनि प्राणकेऽप्याहितुण्डिके पादपान्तरे। आजीवे जीविकामाहु र्जीवन्त्यामपि कुत्रचित्, वि. जीवको वृद्धिजीविनि। क्षपणे प्राणके पीतसालसेवकयो र्द्रुमे। व्यालग्राहे जीविका तु जीवन्त्यां वर्त्तनेऽपि च, हे.

जीवञ्जीव. जीवञ्जीवश्चकोरे स्याद् द्रुमभेदेऽपि पुंस्ययम्, मे. जीवञ्जीवश्चकोरे स्याद्द्रुमपक्षिविशेषयोः, वि. जीवञ्जीवः खगान्तरे। द्रुमभेदे चकोरे च, हे.

जीवद्. जीवदो वैद्यविद्विपोः, मे, वि जीवदो रिपुवैद्ययोः। ग्रन्थिपर्णे, हे.

जीवन जीवनं वर्त्तने नीरप्राणधारणयोरपि। जीवनी जीवना चापि जीवन्तीभेदयो: क्रमात्, मे. जीवनं वर्त्तने नीरे पुत्रजीवे तु जीवनः। जीवनी जीवना चेति जीवन्तीभेदयोः क्रमात्, वि. जीवनस्तु पुत्रजीवे जीवनं वृत्तिवारिणोः। सत्राज्जीवना तु मेदायां जीवनी तु मधुस्रवा, हे जीवनं वर्त्तनाम्भसोः, त्रि.

जीवन्तिका. जीवन्तिका गुडूच्याञ्च जीवाख्याशाकवन्द्यो, मे. जीवन्तिकापि जीवाख्याशाकवन्दागुडूचिषु वि.

जीवन्ती जीवन्ती जीवनीशाख्यो गुडूचीवन्द्योरपि, मे. जीवन्ती जीवनीशाख्यो गुडूचिवन्द्योरपि, वि जीवन्ती शमिवन्द्योः। जीवन्त्यां च गुडूच्यां च, हे.

जीवपुष्प. जीवपुष्पन्तु दमनके फणिज्जके, हे.

जीवातु जीवातुरस्त्रियां भक्ते जीविते जीवनौषधौ, मे. जीवातु जीविते भक्ते जीवातु जीवनौषधे, वि जीवातु जीवनौषधे। जीविते-ऽपि, हे.

जीवितेश. जीवितेशो यमे पुंसि त्रिषु सत्रात् जीवितेश्वरे, मे. जीवितेशो यमे कान्ते जीवाती जीविताधिपे, वि जीवितेश प्रिये यमे। जीवितस्वामिजीवात्वो, हे. जीवितेशो यमे नाथे, त्रि.

जुष्ट. जुष्टन्तु क्लीवमुच्छिष्टे सेविते वाच्यलिङ्गकम्, मे.

जुङ्गाण जुङ्गाणोऽपि चाध्वयत्रावपि सत्रात् चातमेदसि, मे. जुङ्गाणोऽनलेऽध्वर्यो, वि. जुङ्गाणोऽध्वर्युरवङ्गतो, हे.

जू जूस्त्वरागमने प्रोक्ता सामान्यगमने स्त्रियाम्। जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम्, मे. जूराकाशे सरस्वत्यां पिशाच्यां जवनेऽपि च, वि, हे.

जृम्भा. जृम्भा विकाशजृम्भणयोस्त्रिषु, मे जृम्भा जृम्भे विकाशे

ण, वि. जृम्भा जृम्भणे विकाशे, हे.

जृम्भित. जृम्भितं करणे स्त्रीणामीहास्फुटितयोरपि, मे, वि. जृम्भितं तु विचेष्टितप्रवृद्धयोः। जृम्भायां स्फुटिते चापि, हे.

जैवातृक. जैवातृकः पुमान् सोमे दीर्घायुःकृशयोस्त्रिषु, मे. जैवातृकः स्याद्रजनीकरे। कृशायुष्मद्भेषजेषु, हे. जैवातृकः कृशे चन्द्रे भैषजायुष्मतोरपि, वि. जैवातृकः शशाङ्केऽपि, श्र. जैवातृकः कृशे चन्द्रे दीर्घायुषि च सविषु, ति.

जोषम्. जोषम् सुखे प्रशंसायां तूष्णीं लङ्घनयोरपि, मे, वि. जोषं सुखे स्तुतौ। मौनलङ्घनयोश्चापि, हे. तूष्णीमर्थे सुखे जोषम्, श्र.

ज्ञ. ज्ञो ब्रह्मबुधविद्वत्सु, मे. ज्ञो विरिञ्चे बुधे सौम्ये, वि. ज्ञः सम्राड् विचक्षणे पद्मासने चान्द्रमसायनौ, हे.

ज्ञाति. ज्ञातिर्ज्ञातसगोत्रयोः। पुमान्, मे. ज्ञातिः सगोत्रे पितरि, वि. ज्ञातिः पितृसगोत्रयोः, हे.

ज्ञानिन्. ज्ञानी स्यात् पुंसि दैवज्ञे ज्ञानयुक्तेऽन्यलिङ्गकः, मे.

ज्या. ज्या मातरि वसुधायां मौर्व्याम्, मे. ज्या मौर्वीमातृभूमिषु, वि. ज्या तु मातरि क्ष्मामौर्व्योः, हे. ज्या स्यान्मौर्व्यां चितावपि, ति.

ज्यानि. ज्यानि जीर्णे च हानौ च तटिन्यामपि योषिति, मे. ज्यानि र्हानौ स्रवन्त्यां च, वि.

ज्यायस्. ज्यायो वृद्धेऽतिप्रशस्ते, मे. ज्यायान् वृद्धे च शस्ते च, वि. ज्यायान् वृद्धे प्रशस्ते च, हे. (अतिशये) वृद्धप्रशस्ययो र्ज्यायान्, श्र.

ज्येष्ठ. ज्येष्ठः श्रेष्ठे चातिवृद्धे त्रिषु मासान्तरे पुमान्। ज्येष्ठा तु गृहगोधाख्यजन्तुनक्षत्रभेदयोः, मे. ज्येष्ठः श्रेष्ठेऽतिवृद्धे च ज्येष्ठो मासान्तरेऽपि च। गृहगोधर्क्षयो र्ज्येष्ठा, वि. ज्येष्ठः स्यादग्रजे श्रेष्ठे मासभेदातिवृद्धयोः। ज्येष्ठा भे गृहगोधायाम्, हे. त्रिषु ज्येष्ठोऽतिप्रशस्तेऽपि, श्र. ज्येष्ठो मासि च वृद्धे च। ज्येष्ठा च गृहगोधिका, ति.

ज्योतिस्. ज्योतिरग्नौ दिवाकरे। पुमान् नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः, मे. ज्योतिः प्रकाशे दृशि तारकासु ज्योति दिंनेशानलयोरपि स्यात्, वि. ज्योति र्वह्निदिनेशयोः। प्रकाशे दृशि नक्षत्रे, हे. ज्योति र्भद्योतदृष्टिषु, श. दीप्तौ दृष्टौ च तारासु ज्योतिः शब्दो निगद्यते, अने चक्षुषि ज्योतिः, ह.

ज्योत्स्ना. ज्योत्स्ना चन्द्रातपेऽपि स्यात् ज्योत्स्नायुक्तनिशि स्मृता। ज्योत्स्नी पटोलिकायां स्यात् ज्योत्स्नायुक्तनिशि स्त्रियाम्, मे. ज्योत्स्ना स्याज्ज्योतिःसंयुक्तनिशि चन्द्रातपेऽपि च। ज्योत्स्नी पटोलीज्योत्स्नावन्निशोः, हे. ज्योत्स्नी पटोलिकायां स्यात् ज्योत्स्नायुक्तविभावरौ। ज्योत्स्ना सचन्द्रनक्तरात्रौ चन्द्रातपेऽपि च, वि.

ज्वलित. ज्वलितं दग्ध उज्ज्वले, मे. ज्वलितं भास्वरे दग्धे, वि. ज्वलितौ दग्धभास्वरौ, हे.

भ. भो झण्टीशे सुरगुरौ दैत्यराजे ध्वनावपि, मे. स्थितिः पाशो तथाजेशो वामाङ्गुलितलस्थितः। स्वलिकः स्यात्संख्य भकारो जान्तसंज्ञकः, मा.

झञ्झा. झञ्झा वाते तारवायौ नष्टेऽपि कीर्त्यते बुधैः। झञ्झा ध्वनिविशेषे च स्यादम्बुकणवर्षके, मे. झञ्झा ध्वनिविशेषेऽपि झञ्झाम्बुजलवर्षणे, वि.

झर्झर. झर्झरः स्यात् कलियुगे वाद्यभाण्डे नदान्तरे, मे. झर्झरस्तु कलियुगे वाद्यभाण्डे नदान्तरे, वि. झर्झरो वाद्यभाण्डे कलियुगे, हे. नदप्रभेदे वाद्ये च झर्झरः, त्रि.

झला. झला स्यादातपज्योर्मौ दुहितर्यपि च स्त्रियाम्, मे. झला दुहितरि स्मृता। आतपोर्मावपि सुतायां झाली क्वापि विलोक्यते, वि. झला पुत्रयामातयोर्मौ, हे. झलाऽऽतपोर्मि र्दुहिता, त्रि.

झल्लरी. झल्लरी भिल्लरी च द्वे उड्डुके भालकुन्तले, मे. झल्लरीव भिल्लरी। वाद्यभेदे केशचक्रे, हे. झल्लरी भिल्लरी च द्वे उड्डुके भालचक्रके, वि

झष. झषा नागबलायां स्त्री तापमत्स्याटवीषु ना, मे. झषा नागबलायां सम्राट् वैसारिणि झषो मतः, वि. झषस्तु मकरे वने। मीने झषा पुनः नागबलायाम्, हे.

झाट. झाटो निकुञ्जे कान्तारे व्रणादीनाञ्च मार्जने, मे. झाटो व्रणादिसंमार्टौ कुञ्जकान्तारयोरपि, हे. झाटो निकुञ्जे कान्तारे व्रणःसंमार्जनेऽपि च, वि.

झाली. V. झला.

झिञ्झिम. वनदाघेऽपि झिञ्झिमः, हा.

झिल्लरी. V. झल्लरी.

झिल्लिका, झिल्लीका. झिल्लिकोद्वर्त्तनपटे स्त्रियां द्योते च झिल्लिका। आतपस्य रुचौ झिल्ल्याम्, मे. झिल्लीका झिल्लिकाऽपि च। विलेपनमले झिल्लयामातपस्य रुचि स्मृता, वि. झिल्लीका झिल्लिकावत् स्याच्चीर्यां रुच्यातपस्य च। विलेपनस्य च मले, हे.

झिल्ली. झिल्ली चीर्यातपरुचो वर्त्त्यामुद्वर्त्तनांशुके, मे. झिल्ली स्यादातपरुचि वर्त्त्यामुद्वर्त्तनांशुके, वि. झिल्ली दृद्वर्त्तनांशुके। वर्त्त्यातपरुचोश्चीर्याम्, हे.

झूणि. भूणिः क्रमुकभेदेऽपि दुष्टदैवश्रुतौ स्त्रियाम्, मे. भूणिः क्रमुकभेदेऽपि दुष्टदैवश्रुतावपि, वि. भूणिः क्रमुकभेदे स्याद् दुष्टदैवश्रुतावपि, हे. झूणिः कठिनपूगयोः, वि.

ञ. ञः पुमान् स्यात् बलीवर्दे युक्तो वामगतावपि, मे. वामाङ्ग्ल्यग्रतः सिञ्चिरङ्ग्यो सर्वसंज्ञकः। भासज्ञो ञानुगासनश्च ञकारस्य निरञ्जनः, मा.

ट. टः पुमान् वामने पादे निःस्वनेऽपि क्वचिन्मतः, मे. जरा मुकुन्दः सोमेशः दचपादादिगोमुखः। गजाङ्कश्च बालेन्दुः अष्टतादष्टकः स्मृतः, मा.

टगर टगरष्टङ्कणक्षारे हेलाविभ्रमगोचरे। नाऽन्यवत् केकराक्षे

स्यात्, मे टगरष्टङ्कणचारे हेलाविभ्रमगोचरे। वाचस्पतवत् केकराक्षे तु, वि टगरष्टङ्कणे केकराक्षके, हे

टङ्क टङ्को नीलकपित्थे च खनित्रे टङ्कणे स्त्रियाम्। जङ्घायां स्त्री पुमान् कोपे कोशासिग्रावदारणे, मे टङ्को नीलकपित्थेऽसिकोषे कोपेऽश्मदारणे। मानान्तरे खनित्रे च जङ्घायां टङ्कणेऽपि च, हे टङ्क. कपित्थभेदे स्त्रीमानान्तरखनित्रयोः। कोपेऽसिकोशे जङ्घायां टङ्कणे ग्रावदारणे, वि जङ्घायामद्रिभित्तौ च खनित्रे ग्रावदारणे। कपित्थे चास्त्रिया टङ्कः, त्रि टङ्क स्यादभिमाने मस्तरघटनोपकरणेऽपि च, ह

टङ्कार टङ्कारो विस्मये पुंसि प्रसिद्धौ शिञ्जिनीध्वनौ, मे टङ्कारः शिञ्जिनीध्वनौ। विस्मये च प्रसिद्धौ च, वि टङ्कारो ज्यारवेऽद्भुते। प्रसिद्धौ च, हे ज्याघ गुणध्वनौ। प्रसिद्धावपि टङ्कार, त्रि

टङ्ग टङ्गोऽस्त्री स्यात् खनित्रके। खङ्गभेदे च जङ्घायाम्, मे टङ्गः खनित्रे जङ्घासेत्राः, हे टङ्ग. लपाणभेदे स्यात् जङ्घायाञ्च खनित्रके, वि

टट्टरी टट्टरी स्यान्मृषावादे लम्पापटहवाद्ययोः, मे, वि टट्टरी त्वद्भुताख्याने लम्पापटहवाद्ययोः, हे

टार टारो लङ्गतुरङ्गयोः, हे, वि, मे

टुण्टुक टुण्टुकः शोषकाल्पयोः, मे टुण्टुकावल्पशोषकौ, हि टुण्टुक शोषके क्रूरे, वि

ठ लाङ्गलीशो नन्दजश्च पालिनी च कमण्डलुः। दक्षजानुगतस्थायी ठकारः स्थविरः स्मृत, मा ठो मण्डले चन्द्रविम्बे शून्येऽच लोकगोचरे, मे

ड नन्दो धान्ति दीरकश्च डामरो दक्षगुल्फगः। व्याघ्रपादः शुभाङ्गिश्च डकारश्चामरो मतः, मा डः पुमान् वाडवाग्नौ स्यात् डाकिन्यां स्त्री निगद्यते, मे

डिङ्गर डिङ्गरो डङ्गरेऽपि च। घेषे मे डिङ्गरो डङ्गरे घेषे, वि

डिम्ब डिम्बो भयध्वनावण्डे पुप्पुसप्लीहविस्रवे, मे डिम्बः

स्यात् विस्मयत्नोद्भोरैरवद्दे पुपफुसे भये, वि. डिम्ब एरण्डभययो र्विप्लवे मोभ्रि पुपफुसे, ह. क्लीवविप्लवयो र्डिम्बः, त्रि. डिम्ब भये च कलले फुपफुसे च प्रपचते, धा.

डिम्बिका. डिम्बिका जलविम्बे स्त्रात् नोपरे कामुकस्त्रियाम्, मे.

डिम्भ. डिम्भोऽपि बालिशे बाले, मे. डिम्भो बालिशपोतयोः, वि. डिम्भो वैधेयबालयोः, ह. डिम्भौ तु शिशुबालिशौ, ध.

डुलि. डुलिस्तु कमठे मुनौ, वि. ४. दुलि.

ढ. ढो ढक्कायां पुमानुक्तः ध्वनि तथा च लाङ्गुले, मे. ऐश्वरो चार्धनारीशः नरः प्रासान्तराकृतिः। दयपादाश्च,सौमूलः फलो ढक्को ढकारकः, मा.

ण. णः पुमान् विन्दु,देवे सत्राद्, भूषणे गुणवर्जिते। पानीयनिलयेऽपीति केचिद्गुर्विपश्चितः, मे. उमाकान्तो नरकजित् रति दंघपदाग्रगः। निर्वाणस्त्रिगुणाकारः त्रिरेखो णः समोरितः, मा.

त. तथौराम्रतपुच्छे पु क्रोड़े म्लेच्छे च कुत्रचित्। चपुमांस्तरणे पुण्ये कथितः शब्दवेदिभिः, मे. वामोरुम,लनिलय श्चाषाढ़ी कामिका हरिः। सौमध सरलो नीलः तकारः कीर्तितो बुधैः, मा.

तक्षक. तक्षकस्तु पुमान् नागराजभेदे च वर्धकौ, मे. तक्षकः फणिभेदे च वर्धकिद्रुमभेदयोः, वि. तक्षकस्त्रिषु पन्नगे। द्रुमभेदे, ह. तक्षको नागवर्धकयोः, ध.

तट. तटं नपुंसकं क्षेत्रे प्रतीरे तु तटौ त्रिषु, मे.

तड़ाग. तड़ागोऽस्त्री जलाधारविशेषे यन्त्रकूटके, मे. तड़ागस्तु जलाधारविशेषे कूटकेऽपि च, वि.

तण्डक. तण्डकः खञ्जने फेने समाससमायवाचि च। गृहदारुतरुस्कन्धमायाबङ्कलकेष्वपि, मे. तण्डकः खञ्जने फेने समाससमायवाचि च। गृहदारौ तरुस्कन्धमायाबङ्कलयोरपि, वि. तण्डकस्तु समस्तपदजातके। तरुस्कन्धे वेश्मदारुमायाबङ्कलयोरपि। फेनखञ्जनयोश्चापि.

हे. गृहदारौ तण्डकोऽस्त्री समासप्रायवाचि च, त्रि. तण्डकः खञ्जने फेने, द्वा.

तण्डुरीण. तण्डुरीणः कीटमात्रे बर्बरे तण्डुलोदके, मे, वि. तण्डुरीणस्तु बर्बरे। तण्डुलाम्बुनि कीटे च, हे.

तण्डुल. तण्डुलः स्यात् विडङ्गे च धान्यादिनिकरे पुमान्, मे. तण्डुलाख्या विडङ्गे स्यात् धान्यादिनिकरेऽपि च, वि. तण्डुलः। विडङ्गे धान्यसारे च, हे. विडङ्गेऽपि च तण्डुलः, त्रि.

तण्डुलीय. तण्डुलीयः शाकभेदे विडङ्गतरुताप्ययोः, मे, वि, हृ.

तत. अथ ततं व्याप्ते विस्तृते च त्रिलिङ्गकम्। क्लीवं वीणादिवाद्ये स्यात् पुंलिङ्गस्तु समीरणे, मे. व्याप्तविस्तृतवाद्येषु ततम्, त्रि. ततं विततवद् व्याप्ते विस्तृते वाच्यवन् मतम्। ततं वीणादिवाद्ये च पवमाने, वि. ततं वीणादिवाद्ये स्यात् ततो व्याप्तेऽनिले पृथौ, हे.

ततस्. तत आदौ परिप्रश्ने कथान्तरे। आनन्तर्ये, वि. तत आदौ कथान्तरे। पञ्चम्यर्थे परिप्रश्ने, हे.

तत्व. तत्वं स्वरूपे परमात्मनि। स्यात् विलम्बितनृत्ते च, मे. तत्वं वाद्यप्रभेदे स्यात् स्वरूपे परमात्मनि, वि. तत्वं परमात्मनि। वाद्यभेदे स्वरूपे च, हे. तत्वं विलम्बिते नृत्ते स्वरूपे परमात्मनि, त्रि तत्वं याथार्थ्यब्रह्मणोः, श्र.

तथा. तथाऽभ्युपगमे तुल्यप्रतिवाक्ये समुच्चये। सत्ये निश्चयेऽपि स्यात्, मे. तथा स्यान् निश्चये तुल्यप्रतिवाक्ये समुच्चये, वि, हे.

तद्दिन. तद्दिनं दिनमध्ये स्यात् तथैव प्रतिवासरे, मे. तद्दिनं दिनमध्ये स्यात् तद्दिनं प्रतिवासरे, वि तद्दिनं पुनः। दिनमध्ये प्रतिदिने, हे.

तनु. तनुः काये त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे, मे. तनुः काये कृशे चाल्पे विरलेऽपि च वाच्यवत्, वि. तनु र्वपुस्त्वचोः। विरले-

ऽल्पे सूक्ष्मे, हे. गुणदेहयोरपि तनुः, श्र. विरलेऽल्पे सूक्ष्मे तनुः, त्रि.

तनूरुह. तनूरुहन्तु लोम्नि स्यात् पतत्रे च नपुंसकम्, मे. तनूरुहं गरुल्लोम्नोः, वि. तनूरुहस्तु पुत्रे गरुति लोम्नि च, हे.

तन्त्र. तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे। प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे। श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके। इतिकर्तव्यतायाञ्च तन्त्री वीणागुणे मता। श्रघ्नतादेहशिरयोः, मे. तन्त्रं कुटुम्बकृत्ये स्यात् कारणे च परिच्छदे। शास्त्रे प्रधाने सिद्धान्ते तन्तुवायेऽगदोत्तमे। तत्वादिसाधनोपाये श्रुतिशाखान्तरेऽपि च। इति कर्तव्यतायां च तन्त्री वीणागुणे तनोः। शिरायामघ्नतायां च, वि. तन्त्रं सिद्धान्ते राष्ट्रे च परच्छन्दप्रधानयोः। अगदे कुटुम्बकृत्ये तन्तुवाये परिच्छदे। श्रुतिशाखान्तरे शास्त्रे करणे व्यर्थसाधके। इतिकर्तव्यतातन्त्री-स्तन्त्री स्याद् वल्लकीगुणे। अघ्नतायां च नाड्यां च शिरायां वपुषोऽपि च, हे. तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे, श्र. इतिकर्तव्यता तन्त्र-मुपायश्च हिसाधकः, त्रि, तन्त्रं शास्त्रं कुलं तन्त्रं तन्त्रं सिद्धौषधी क्रिया। तन्त्रं सुखं बलं तन्त्रं तन्त्रं पवनसाधनम्, धने. तन्त्रं तन्तुषु तन्त्रेषु सिद्धान्तपरिच्छदप्रधानेषु, ह.

तन्द्री. तन्द्री निद्राप्रमीलयोः, मे, वि, श्र. तन्द्री निद्रा प्रमीला च, हे.

तपन. तपनोऽरुष्करेऽपि स्याद् भास्करे निरयान्तरे, मे. तपन-स्तरणौ तापे भल्लाते नरकान्तरे, वि. तपनो रवौ। भल्लाते नरके ग्रीष्मे, हे. तपनो नरके भानौ, त्रि.

तपस्. तपो लोकान्तरेऽपि च। चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोः, मे. तपश्चान्द्रायणादौ स्याद् धर्मे लोकान्तरेऽपि च। तपा माघे च शिशिरे, वि. तपः कृच्छ्रादिकर्मणि। धर्मे लोकप्रभेदे च तपाः शिशिरमाघयोः, हे. तपः कृच्छ्रादिकर्म च, श्र. अथ हिमर्तौ ना धर्मे व्रते तपः, त्रि.

तपस्त्र. तपस्त्रा व्रतचर्यायां तपस्त्रः फाल्गुने पुमान्, मे. तपस्त्रः फाल्गुने पार्थे तपस्त्रा नियमस्थितौ, हे. तपस्त्रा व्रतचर्यायां तपस्त्रो नास्ति फाल्गुने, वि.

तपस्विन्. तपस्वी तापसे चानुकम्प्ये त्रिष्वथ योषिति। मांसिका-कटुरोहिण्योः, मे. तपस्वी तापसे चानुकम्पने च तपस्विनी। मांसिका-कटुरोहिण्यो, वि. तपस्वी तापसे दीने, हे. तपस्विनी पुन र्मांसी कटुरोहिणिकाऽपि च, हे. अनुकम्प्यस्तपस्वी स्यात् तपस्वी च कृतव्रतः, श्रा. व्रतिशोच्यौ तपस्विनौ, लि. करुणाप्रतिपादने तपस्वी च, क.

तपोधन. तपोधनस्तापसे स्यात् मुण्डीर्यां तु तपोधना, मे. तपोधनस्तापसे स्यात् मुण्डीर्यां च तपोधना, वि. तपोधना तु मुण्डीर्यां तपोधनस्तपस्विनि, हे.

तमस्. तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुन्तुदे, मे. तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तरे, वि. तमो राहौ गुणे पापे ध्वान्ते, हे. राहौ ध्वान्ते गुणे तमः, श्रा. तमः शोकेऽपि, लि.

तमाल. तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे, मे. तमाल-स्तिलके खड्गे तापिच्छे च त्वग्द्रुमे, वि. तमालो वरुणे पुण्ड्रे तापिच्छे, हे. तमालो वरुणे खड्गे तापिच्छे तिलकेऽपि च, लि.

तमालपत्र. तमालपत्रं तापिच्छे तिलके पत्रकेऽपि च, मे, वि. तमालपत्रं तिलके तापिच्छे पत्रकेऽपि च, हे.

तमिस्र. तमिस्रं तिमिरे कोपे स्त्री तु तमस्ततौ। कृष्णपक्ष-निशायां च मे. तमिस्रं तिमिरे कोपे तमिस्रा च तमस्ततौ। कृष्ण-पक्षनिशायां च, वि. तमिस्रं तिमिरे कोपे तमिस्रा दर्शयामिनी। तमस्ततिः, हे.

तमोघ्न. तमोघ्नः सूर्यवह्नीन्दुबुद्धशङ्करविष्णुषु, मे, वि. तमोघ्नो वह्निसूर्येन्दुबुद्धकेशवशम्भुषु, हे.

तमोनुद. तमोनुदग्नीन्द्वर्के ना, मे तमोनुदग्नीन्द्वर्केषु, वि तमो-

शुक्ल शशिमातेयडवह्निषु, हे. चन्द्राग्न्यर्कास्तमोनुदः, श्र.

तमोऽपह. तमोऽपहः सहस्रांशुश्वगाङ्कजिनवह्निषु, मे, वि. तमोऽपहो जिने रवौ। चन्द्रेऽग्नौ, हे. अग्नीन्द्वर्कास्तमोऽपहाः, श्र.

तर, रि. तरस्तु तरणे पुंसि दशालौ पेटके तरी, मे. तरि नौवि दशायां च वस्त्रादीनां च पेटके, वि. तरि दशायां वेड़ायां वस्त्रादीनां च पेटके, हे. पेटके नावि च तरी, त्रि.

तरणि. तरणि द्रुमणौ पुंसि कुमारीनौकयोः स्त्रियाम्, मे. तरणिस्तरणे भानौ कुमार्योषधिनौकयोः, वि. तरणिस्तरणेऽर्केऽंशौ कुमार्योषधिनौकयोः। यष्टावश्वौ, हे. द्रुमणौ तरणिः पुंसि कुमारीनौकयोः स्त्रियाम्, त्रि.

तरण्ड. तरण्डो वडिशौस्त्रलवद्धकाष्ठादिके प्लवे। नौकायामपि स्त्री स्यात्, मे. तरण्डो वडिशीस्त्रलावद्धवस्तुनि भेलके, वि.

तरद्. तरत् स्त्रियां प्लवेऽपि सरात् कारण्डे च विहङ्गमे, मे. तरत् कारण्डवे प्लवे, वि.

तरल. तरलं चञ्चले पिङ्गे भास्करेऽपि त्रिलिङ्गकम्। हारमध्यमणौ पुंसि यवागूसुरयोः स्त्रियाम्, मे. तरलश्च चले पिङ्गे हारमध्यमणावपि। भासुरे चाथ तरला यवागूसुरयोर्मता, वि. तरलो भास्वरे चले। हारमध्यमणौ पिङ्गे तरला मधुमक्षिका, हे. लोहे हारमणौ पुंसि यवाग्वां तरला स्त्रियाम्, त्रि.

तरस्. तरो बले च वेगे च, मे, वि. तरो जवे बले, हे. तरो वेगे बलेऽपि च, त्रि.

तरस. तरसं मांसमाख्यातं तरसं बलमुच्यते, अने.

तरस्विन्. तरस्वी शूरवेगिनोः, मे. तरस्वी वेगिशूरयोः, वि, हे. वेगिशूरौ तरस्विनौ, श्र.

तरीष. तरीषः शोभनाकारे भेलेऽब्धिव्यवसाययोः, वि. तरीषः शोभनाकृतौ। भेलेऽब्धौ व्यवसाये च, हे.

तल्लस्तु जलाधारान्तरेऽपि च, वि. तल्लो जलाधारभेदे तल्ली तु वरुणस्त्रियाम्, हे.

तवीप. तवीपो ब्रह्मकन्यायां पुंसि स्वर्गे महोदधौ, मे.

ताड़. ताड़स्तु ताड़ने घोषे मुष्टिमेयतृणादिषु। ताड़ी पत्रद्रुमे च, मे. ताड़स्ताड़नघोषयोः। मुष्टिमेयतृणादौ च ताड़ी तालो दलद्रुमे, वि. ताड़ोऽद्रौ ताड़ने घोरे मुष्टिमेयतृणादिके। ताड़ी तालो दलतरौ, हे.

ताण्डव. ताण्डवोऽस्त्री तृणान्तरे। भवेदुद्धतनृत्ये च, मे. ताण्डवं कथितं नृत्ये तृणभेदेऽपि ताण्डवम्, वि. ताण्डवं तृणभिन्नाढ्यभेदयोः, हे.

तात. तातोऽनुकम्प्ये त्र जनके, मे, वि. तातोऽनुकम्प्ये त्र पितरि, हे. तातः पित्रनुकम्प्ययोः, त्रि.

तातगु तातगुः पुद्रताते ना जनकस्य हिते त्रिषु, मे. तातगुः पुद्रताते स्याज्जनयितृहितेऽपि च, वि.

तातल. तातलो रुजि पाके च लोहकूटे मनोजवे, मे.

ताप. तापः सन्तापकृच्छ्रयोः। तापी नद्यन्तरे, मे. तापोऽस्ति तापे द्वयो तापी तु सरिदन्तरे, वि. तापः सन्तापे कृच्छ्रे च तापी तु सरिदन्तरे, हे.

तामरस. अथ तामरसं पद्मे ताम्रकाञ्चनयोरपि, मे. अथ तामरसं पद्मे ताम्रकाञ्चनयोरपि, वि. तामरसन्तु पङ्कजे। ताम्रकाञ्चनयोः, हे. पद्मे स्वर्णे तामरसम्, त्रि.

तामस. तामसी निशि दुर्गायां तामसो भुजगे खले, मे, वि. निशा दुर्गा च तामसी, त्रि. तामसः सर्पखलयोस्तामसी स्यात् निशोमयोः, हे.

ताम्बूल. ताम्बूली नागवल्ल्यां स्त्री क्रमुके तु नपुंसकम्, मे. ताम्बूली नागवल्ल्यां च ताम्बूलं क्रमुकेऽपि च, वि. ताम्बूलं क्रमुकीफले। ताम्बूली नागवल्ल्यां स्यात्, हे. गुवाकेऽपि च ताम्बूलम्, त्रि.

ताम्र ताम्रं शुल्वेऽरुणेऽपि च, मे. ताम्रं शुल्वेऽरुणेऽप्यवत, वि.

ताम्रन्तु शुल्बे शुल्वनिभेऽपि च, हे. ताम्रं शुल्वेऽरुणे त्रिषु, त्रि.

तार. तारो वानरभिन्मुक्ताविशुद्ध्योः शुद्धमौक्तिके। ना नक्षत्रेऽचिमध्ये च न ना रूप्ये नपुंसकम्। स्त्री बुद्धदेवताभेदे वालिसुग्रीवयोस्ति-भार्ययोः। त्रिलिङ्गोऽत्युच्चशब्दे च, मे. तारो मुक्तादिसंशुद्धौ [तरणे शुद्धमौक्तिके। तारा च रजतेऽत्युच्चस्वरेऽप्यन्यवदीरितम्। नक्षत्राचिमध्य-योस्तारा सुग्रीवगुरुयोषितोः। बुद्धदेव्यां मता तारा, वि. तारो निर्मल-मौक्तिके। मुक्ताशुद्धौ उच्चनादे नक्षत्रनेत्रमध्ययोः। तारं रूप्ये तारा बृहद्देव्यां सुरगुरुस्त्रियाम्। सुग्रीवपत्न्याम्, हे. मुक्ताशुद्धौ च तारः स्यात्, च. तारोऽत्युच्चस्वरे त्रिषु। तारित्यक्तदमात्रोः स्त्री न ना नक्षत्राचिम-ध्ययोः, त्रि. तारो मुक्तागुणेऽप्युत्कटः, रु.

तारक. तारको दैत्यभित्कर्णधारयो र्न द्वयो र्दृशि। कनीनिकाया-मृक्षे च न पुमान् तारिरि त्रिषु, मे. तारकः कर्णधारे स्याद् दैत्ये च दृशि तारकम्। कनीनिकायां नक्षत्रे तारकं तारकेति च, वि. तारकः कर्णधारके। दैत्ये च तारकमुडौ नेत्रतन्मध्ययोरपि, रु. दैत्ये ना कर्ण-धारे च तारकं दृशि भे न ना, त्रि.

तार्क्ष्य. तार्क्ष्यः स्यादश्वकर्णाख्यद्रुमे रथतुरङ्गयोः। तार्क्ष्यं रसा-ञ्जने तार्क्ष्यौ गरुडे गरुडाग्रजे, वि. तार्क्ष्योऽश्वसर्पयोः। गरुडाग्रजे सुपर्णे च पुंसि क्लीवं रसाञ्जने, मे. तार्क्ष्यस्तु स्यन्दने वाहे गरुडे गरुडा-ग्रजे। अश्वकर्णाह्वयतरौ स्यात्तार्क्ष्यन्तु रसाञ्जने, हे. तुरङ्गगरुडौ तार्क्ष्यौ, च.

ताल. ताल करतलेऽङ्गुष्ठमध्यमाभ्याञ्च सम्मिते। गीतकालक्रि-यामाने कराम्फाले द्रुमान्तरे। वाद्यभाण्डे च कांस्यस्य त्सरौ तालो जटौ-षधौ। क्लीवन्तु हरिताले स्यात्, मे. तालः करतलेऽङ्गुष्ठमध्यमाभ्यां च सम्मिते। गीतकालक्रियामाने तालः खड्गादिमुष्टिषु। द्रुमभेदे कराम्फाले तालन्तु हरितालके। वाद्यभाण्डे च कांस्यस्य, वि. तालः कालक्रिया-माने हस्तमानद्रुभेदयोः। कराम्फोटे करतले हरिताले त्सरावपि, हे.

तालो गीतक्रियामाने हरिताले द्रुमान्तरे, त्रि. तालः कालक्रियामानं तालः पातालमिष्यते। वृक्षभेदः स्मृतस्तालः तालः करतलध्वनिः, धने. v. ताड़.

तालपत्र. तालपत्रन्तु ताटङ्के खण्डायां तालपत्रपि, मे. तालपत्रन्तु ताड़ङ्के खण्डायां तालपत्रपि, वि. तालपत्रन्तु कुण्डले। स्त्रयात् तालपत्री खण्डायाम्, हे.

तालाङ्क. तालाङ्कः करपत्रे स्यात् शाकभेदेऽचुत्रताग्रजे। महालक्षणसम्पूर्णपुरुषे पुस्तके हरे, हे.

तालीशपत्र. तालीशपत्रं भूम्यामलकीतालीशयोः स्मृतम्, मे. तालीशपत्रं तालीशे तामलक्यामपि स्मृतम्, वि. तालीशपत्रं तु तामलक्यां तालीशके क्वचित्, हे.

तावत्. तावन् मानेऽवधारणे। सम्भ्रमे च परिच्छेदे तथा कात्स्न्यऽधिकारयोः, मे. v. यावत्.

ताविष. ताविषोऽब्धिसुवर्णयोः। स्वर्गे च, हे. ताविषी चन्द्रकन्यायां ना स्वर्गाम्बुधिकाञ्चने, मे. ताविषः कनकेऽम्बुधौ, वि.

तिक्त. तिक्तो रसे सुगन्धे च तिक्तं पर्पटके स्मृतम्। तिक्ता तु कटुरोहिण्याम्, वि. तिक्तं सुगन्धत्रपि, त्रि. तिक्तो रससुगन्धयोः। तिक्ता तु कटुरोहिण्यां पर्पटे तु नपुंसकम्, मे. तिक्तस्तु सुरभौ रसे। तिक्ता तु कटुरोहिण्यां तिक्तं पर्पटकौषधे, हे. v. कषाय.

तिक्तपर्वन्. तिक्तपर्वा हिलमोचीगुड़ूचीयष्टिषु स्त्रियाम्, मे. तिक्तपर्वा तु यष्ट्याह्वगुड़ूचीहिलमोचिषु, वि. तिक्तपर्वा हिलमोचीगुड़ूचीमधुयष्टिषु, हे, हा.

तिक्तशाक. तिक्तशाकस्तु खदिरे वरुणे पत्रसुन्दरे, मे. तिक्तशाकस्तु पत्रसुन्दरे। वरुणे खदिरे, हे. तिक्तशाकस्तु खदिरे वरुणे पत्रसुन्दरे, वि. तिक्तशाकः खदिरे वरुणद्रुमे, त्रि.

तित्तिरि तित्तिरिः पक्षिणि मुनौ, हे तित्तिरि विहगे मुनौ, वि.

तिन्तिड़ तिन्तिडी डिम्बचिञ्चयोः, मे. अथ तिन्तिडः। दैत्यभेदे तिन्तिड़ीके कालदासे मङ्गीरुहे। तिन्तिड़ो पुमं चिञ्चायाम्, हे तिन्तिड़ी भूरुहे कालदासे दैत्यान्तरेऽपि च। तिन्तिड़स्तिन्तिड़ी तु स्यात् चिञ्चाहचाम्लयोरपि, वि.

तिमिर. तिमिरं ध्वान्ते नेत्रामयान्तरे, मे. तिमिरं ध्वान्ते नेत्रामयेऽपि च, वि. तिमिरं तु दृष्टिरोगान्धकारयोः, हे. तमस्यन्धे तिमिरं ध्वान्ते, त्रि.

तिरस्. तिरोऽन्तर्धौ तिर्यगर्थे, अ, मे, वि. तिरोऽन्तर्धौ तिरश्चि च, हे.

तिर्यच् तिर्यक् तिरोऽर्थे वक्रे च विहङ्गादौ त्वनव्ययम्, मे, वि. तिर्यक् स्यात् तिरश्चीनवक्रयोः, हे

तिलक. तिलको द्रुमरोगाश्वभेदे च तिलकालके। क्लीवं सौवर्चलक्लोम्नो न स्त्रियान्तु विशेषके, मे. तिलकं चित्रके माङ्गल्लाम्मे तिलकालके। रोगविद्रुमभेदेषु क्लोम्नि सौवर्चलेऽपि च, वि. तिलकोऽश्वद्रुमभिदोः पुण्ड्रके तिलकालके। तिलकं रुचके क्लोम्नि, हे. तिलकं चित्रके क्लोम्नि ना नरो तिलकालके। तिलकोऽपि विशेषकः, त्रि. तिलको दृक्षभेदश्च तिलकं चित्रकं विदुः। तिलकं क्लोमसंज्ञा स्यात् प्रधानं तिलकं मतम्, अने. V. मोघ.

तिलपर्ण. तिलपर्णी तु सिह्लके। श्रीवासे चन्दने, हे. तैलपर्णी मलयजे श्रीवासे सिह्लकेऽपि च, मे, वि.

तिष्य. तिष्यो नक्षत्रभेदे स्यात् कलौ धात्र्याश्च योषिति, मे, तिषत्रः पुष्ये कलौ धात्रां तिष्या पुष्यवदिष्यते, त्रि तिष्यः पुष्यवत् कलौ भे तिष्या त्वामलकीतरौ, हे तिष्यः पुष्ये कलियुगे, अ.

तीक्ष्ण तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके। क्लीवं यवाग्रजे पुंसि तिग्मात्मत्यागिनोस्त्रिषु, मे. तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके। तीक्ष्ण. क्षारे च तिग्मात्मत्यागिनो वाचवद् भवेत्, वि.

तीक्ष्णं सामुद्रलवणे विषायोमरकाजिषु। आत्मत्यागिनि तिग्मे च, हे. विषाभिमरलोहेषु तीक्ष्णं क्लीवे खरे त्रिषु, श. तीक्ष्णं तीव्रं समाख्यातं तीक्ष्णं लोहमुशन्ति च, धने.

तीक्ष्णगन्ध. तीक्ष्णगन्धा वचाराजिकयोः शोभाञ्जने पुमान्, मे. तीक्ष्णगन्धा वचायां च शिग्रुराजिकयोरपि, वि. तीक्ष्णगन्धा वचौषधी। शोभाञ्जने राजिकायाम्, हे.

तीर. तीरन्तु रोधसि। पुंसि त्रपुणि, मे. तीरं तटे त्रपौ तीरम्, वि. तीरो वङ्गे तीरं पुनस्तटे, हे.

तीर्थ. तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च। अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु, मे. तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु। अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम्, वि. तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः। ऋषिजुष्टे जले सत्रिणुत्रपाये स्त्रीरजस्यपि। योनौ पात्रे दर्शने च, हे. निपानागमयोस्तीर्थं ऋषिजुष्टे जलेऽपि च, श. तीर्थं ह्युपाययोगयोः, त्रि. योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि। *पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद् दर्शनेषु च, ह.*

तीवर. तीवरो नाम्बुधौ व्याधे, मे.

तीव्र. तीव्रा तु कटुरोहिण्यां राजिकागण्डदूर्वयोः। त्रिष्वतुष्णे नितान्ते च कटौ, मे. तीव्रमतुष्णकटुकनितान्तेष्वन्यवच्चतम्। तीव्रा च कटुरोहिण्यामासुरीगण्डदूर्वयोः, वि. तीव्रं कटूष्णात्यर्थेषु तीव्रा च कटुरोहिणी। *गण्डदूर्वाऽसुरी, हे. तीव्रं कटु नितान्तञ्च, त्रि.*

तु. तु पादपूरणे भेदे समुच्चयेऽवधारणे। पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे, मे. तु पादपूरणे भेदे समुच्चयेऽवधारणे, वि. तु विशेषेऽवधारणे। समुच्चये पादपूर्त्तौ, हे. तु स्याद् भेदेऽवधारणे, ह.

तुङ्ग. तुङ्गो निशावर्बरयोः पुन्नागनगयोः पुमान्। उन्नते त्रिषु, मे. तुङ्गः स्यादुन्नतेऽन्यवत्। वर्बरानिशयोस्तुङ्गी, वि. तुङ्गी मोता हरिद्रायां वर्वरायामपीष्यते। तुङ्गः पुन्नागनगयो र्बुधे स्यादुन्नतेऽ-

न्यवत्, हे. तुङ्गौ मुन्नागशोच्छ्रयौ, त्रि.

तुङ्गभद्र. तुङ्गभद्रा नदीभेदे स्त्रियां पुंसि मदोत्कटे, मे. तुङ्गभद्रा नदीभेदे तुङ्गभद्रो मदोत्कटे, वि. तुङ्गभद्रो मदोत्कटे। तुङ्गभद्रा नदीभेदे, हे.

तुङ्गीश. तुङ्गीशस्तु पुमान् गौरीवल्लभे हिमदीधितौ, मे. तुङ्गीशः शङ्करे चन्द्रे वि. तुङ्गीशः शशाङ्के शशिशेखरे, हे.

तुण्डिकेरी. तुण्डिकेरी तु कार्पास्यां विम्बिकायामपि स्त्रियाम्, मे. तुण्डीकेरी तु कार्पास्यां विम्बिकायामपीष्यते, वि. तुण्डिकेरी तु कार्पासी विम्बिकापि च, हे.

तुत्थ. तुत्थमञ्जनभेदे स्यात् नीलीसूक्ष्मैलयोः स्त्रियाम्, मे. तुत्थोऽग्नावञ्जने तुत्था नीलिसूक्ष्मैलयोरपि, वि. तुत्थोऽग्नौ तुत्थमञ्जने। तुत्था नीलत्यां सूक्ष्मैलायाम्, हे.

तुमुल. तुमुलः कलिद्रुमे ना क्लीवन्तु रणसङ्कुले, मे. तुमुलः कलिद्रुमे स्यात् तुमुलं रणसङ्कुले, वि. तुमुलं रणसङ्कुले। तुमुलो विभीतकद्रौ, हे.

तुम्बरी. तुम्बरी कुक्कुरस्त्रियाम्। धन्याकेऽपि, मे. तुम्बरी सरमार्दयोः, वि. धन्याके तुम्बरी शुन्याम्, त्रि. तुम्बरी धान्यकं शुनी, हे.

तुर (ङ्ग) ग. तुरगी चाश्वगन्धायां तुरगश्चित्तवाजिनोः, मेः तुरगी त्वश्वगन्धायां तुरगो वाजिचित्तयो, हे. तुरङ्गी चाश्वगन्धायां तुरङ्गश्चित्तवाजिनोः, वि.

तुरायण. तुरायणः समः सङ्गः क्रियाहीनस्तुरायणः, धने.

तुरुष्क तुरुष्कः सिह्लके म्लेच्छजातौ देशान्तरेऽपि च, मे. तुरुष्कः सिह्लके म्लेच्छजातौ श्रीवासकेऽपि च, वि. अथ तुरुष्कस्तु देशे श्रीवाससिह्लयोः, हे. तुरुष्कः सिह्लके देशे, त्रि.

तुल. तुला सादृश्यमानयोः। गृहाणां दारुबन्धाय पीठिकायामपीष्यते। राशौ पलशते भाण्डे, मे. तुला पलशते राशौ भाण्डे

साहश्यमानयोः। गृहाणां दारुबन्धाय पीठिकायामपीष्यते, वि. तुला माने पलशते साहश्ये राशिभाण्डयोः। गृहाणां दारुबन्धाय पीठ्याम्, हे. तुलासाहश्ययोस्तुला, त्रि.

तुलाकोटि. तुलाकोटि र्मानभेदेऽवु दे स्त्रयान् नूपुरेऽपि च, हे.

तुलाधार. तुलाधारस्तुलाराशौ पुंसि वाणिजके त्रिषु, मे. तुलाधारस्तुलाराशौ भवेद् वाणिजकेऽपि च, वि. तुलाधारस्तुलागुणे। वाणिजे, हे.

तुवर. तुवरस्तु कषाये स्त्रयात् काचराढ़क्योस्तुवर्यपि, मे.

तुष. तुषा धान्यत्वगक्षद्रुोः, मे. तुषो धान्यत्वचि ख्यातो विभीतक-तरावपि, वि. तुषस्तु धान्यत्वचि विभीतके, हे.

तुषार. तुषारस्तु शीकरे शीतले हिमे, मे. तुषारः शीकरे हिमे, त्रि. तुषार चन्द्रपाषाणस्तुषारः शीत उच्यते, अने. तुषारो हिमदेशयोः। शीकरे हिमभेदे, हे. तुषारो हिमभेदे च शीकरेऽपि हिमेऽपि च, वि.

तूण. तूणी नील्यां निषङ्गे ना, मे. तूणी नील्यां तूणो निषङ्गके, वि. तूणी नीलीनिषङ्गयोः, हे.

तूल. तूलं तुल्ये पिचौ। ब्रह्मदारुणि, हे. ब्रह्मदारौ पिचौ तूलम्, त्रि. तूलः पिचौ भवेत् तूलं ब्रह्मदारुविहायसोः, वि. तूलं स्त्रयाद् ब्रह्म-दारुणि। आकाशेऽथ पिचौ न स्त्री, मे.

तूलिका. तूलिका कूर्चिकायाञ्च शय्योपकरणेऽपि च, मे. तूलिका कथिताऽऽलेख्यकूर्चिकातूलशय्ययोः, वि. तूलिका तूलशय्या स्त्यादालेख्यस्य च लेखनी, हे.

तूवर. तूवरोऽश्मश्रुपुरुषे शौढ़ाश्टङ्गे वृषेऽपि च। पुरुषव्यञ्जन-तरक्ते स्त्रयात् कषायरसेऽपि च, मे तूवरोऽश्मश्रुपुरुषे शौढ़ाश्टङ्गानडुह्यपि, हे. तूवरोऽश्मश्रुपुरुषे शौढ़ाश्टङ्गवृषेऽपि च, वि. तूवरो निर्विषाणो गौः निःश्मश्रुस्तूवरः पुमान्, अने.

तूस्त तूस्तं रेणौ च विख्यातं जटायां च नपुंसकम्, मे.

तृणगोधा. तृणगोधा चित्रकोले सकलासेऽपि योषिति, मे. तृणगोधा चित्रकोले सकलासे च लक्ष्यते, वि. सकलासे चित्रकोले तृणगोधाध्वनिं विदुः, हा.

तृणता. तृणता धनुषि तृणत्वे, मे. तृणताऽपि तृणत्वे स्यात् तृणता कार्मुकेऽपि च, वि. चापे तृणत्वे तृणता, त्रि. तृणता तृणत्वे कार्मुकेऽपि च, हे.

तृणशून्य. तृणशून्यं मल्लिकायां त्रिषु स्यात् केतकीफले, मे. तृणशून्यं मल्लिकायां केतकीशाखिनः फले, हे. तृणशून्यं मल्लिकायां केतकत्राश्च फले मतम्, वि.

तृष्. तृट् लिप्सायामुदन्यायां सरपुत्र्यामपि स्त्रियाम्, मे. तृट् तृष्णावत् तर्षवच्च भवेल् लिप्सापिपासयोः, हे.

तृषा. तृषा लिप्सातर्षयोः स्त्रियाम्, मे.

तृष्णा. तृष्णा स्यात् तर्षलिप्सयोः, मे. तृष्णा लिप्सापिपासयोः, वि. तृष्णे स्पृहापिपासे द्वे, अ. पिपासालोभयोस्तृष्णा, अने. V. तृष्.

तेजन. तेजनः पुंसि वंशे स्यात् तेजनी पीलुपर्ण्यपि, मे.

तेजस्. तेजो दीप्तौ प्रभावे च स्यात् पराक्रमरेतसोः, मे. तेजो धाम्नि पराक्रमे। प्रभावरेतसोश्च, वि. तेजस्त्विट्रेतसो र्बले। नवनीते प्रभावेऽग्नौ, हे. तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि, श.

तेमन. तेमनं त्वार्द्रीकरणे व्यञ्जनेऽपि च, मे. तेमनं व्यञ्जने क्लेदे तेमनी चुल्लिकान्तरे, वि. तेमनं व्यञ्जने क्लेदे तेमनी चुल्लिकाद्यपि, हे.

तेवन. अथ तेवनं केलिकानने। क्रीडायाम्, के.

तैतिल. तैतिलो गण्डके पुंसि क्लीबन्तु करणान्तरे, मे. तैतिलो गण्डके प्रोक्तस्तैतिलं करणान्तरे, वि तैतिलं करणान्तरे। तैतिलो गण्डकसुरे, हे

तोक्म. तोक्मं कर्णमले तोक्मो हरिते च हरिद्यवे, वि. तोक्मं कर्णमले तोक्मः सम्राद् हरितहरिद्यवे, हे. तोक्मं कर्णमले पुंसि हरिते च हरिद्यवे, त्रि, मे.

तोत्र. तोत्रं वेणुके प्रतोदे, हे. तोत्रं तु प्रतने वेणुकेऽपि च, मे, वि. तोत्रं प्रजनवेणुके, त्रि.

तोदन. तोदनं व्यथने तोत्रे, मे, वि, हे.

तोयद. तोयदो मुस्तके मेघे पुमानाज्ये नपुंसकम्, मे. तोयदं तु घृते प्रोक्तं तोयदं मुस्ताकाब्दयोः, वि.

तोयधर. अथ तोयधरो मुस्तासुनिषण्णौषधीघने, मे. भवेत् तोयधरो मेघे सुनिषण्णौषधेऽपि च, वि. तोयधरो जलधरे सुनिषण्णाख्यभेषजे, हे.

तैलपर्णी. v. तिलपर्णी.

त्याग. त्यागो वर्जनदानयोः, वि, हे. त्यागो दाने च वर्जने, मे. v. विसर्ग.

त्यागिन्. त्यागी दातरि शूरे, मे. शूरे दातरि च त्यागी, त्रि.

त्रपा. त्रपा लज्जाकुलटयोः, मे, वि, हे.

त्रपु. त्रपु सीसकरङ्गयोः, हे, मे.

त्रयी त्रयी त्रिवेद्यां त्रितये. न ना, मे. त्रयी त्रिवेद्यां त्रितये पुरन्ध्र्यां सुमतावपि, वि, हे. त्रिवेद्यां त्रितये त्रयी, त्रि.

त्राण. त्राणा तु त्रायमाणायां रक्षणे रक्षिते त्रिषु, मे. त्राणा तु त्रायमाणायां रक्षिते रक्षणेऽपि च, वि. त्राणं त्राते रक्षणे च त्रायमाणौषधावपि, हे. त्राणं रक्षितरक्षयोः, त्रि.

त्रायमाण. त्रायमाणा वार्षिके स्त्री रक्ष्यमाणेऽभिधेयवत्, मे.

त्रास. त्रासो भये मणेर्दोषे, मे. त्रासो भीममणिदोषयोः, वि. त्रासो भये मणिदोषे, हे. मणिदोषे दरे त्रास., त्रि. मणिदोषेऽपि त्रासः, ह. .

त्रिक. . त्रिका कूपस्य नेमौ स्यात् त्रिकं पृष्ठाधरे त्रये, मे, वि.

त्रिका कूपस्थ नेमौ स्यात् त्रिकं पृष्ठाधरत्रये, हे. माण्यङ्गे त्रितये त्रिकम्। कूपाङ्गे स्त्री, त्रि.

त्रिकूट. त्रिकूटं सिन्धुलवणे त्रिकूटः पर्वतान्तरे, मे. त्रिकूटं सिन्धुलवणे त्रिकूटस्तु सुवेलके, हे.

त्रिगर्त. त्रिगर्तो गणितान्तरे। देशेऽपि ना घुघुरिकाकामुकाङ्गनयोः स्त्रियाम्, मे. त्रिगर्तः स्याज्जनपदे त्रिगर्तो गणितान्तरे। भवेद् घुघुरिकायान्तु त्रिगर्ता कामुकस्त्रियाम्, वि. त्रिगर्तो गणिते देशे त्रिगर्ता कामुकस्त्रियाम्। घुघुर्याम्, हे.

त्रिदिव. त्रिदिवा सरिदन्तरे। पुंसि स्वर्गे, मे. त्रिदिवस्त्रिदशावासे त्रिदिवा सरिदन्तरे, वि. त्रिदिवं सुखे। स्वर्गे च त्रिदिवा नद्याम्, हे.

त्रिपुट. त्रिपुटा मल्लिकायाञ्च सूक्ष्मैलात्रिवृतोः स्त्रियाम्। सतीनके च तीरे च त्रिपुटः समुदाहृतः, वि, मे. त्रिपुटौ तीरसतीनौ त्रिपुटा त्रिवृदीषधौ। सूक्ष्मैलायां मल्लिकायाम्, हे.

त्रिवर्ग. त्रिवर्गो धर्मकामार्थे त्रिफलायां कटुत्रिके। वृद्धिस्थानक्षये सत्वरजस्तमसि चोच्यते, मे, वि.

त्रिवर्णक. त्रिवर्णकं गोक्षुरके त्रिफलायां कटुत्रिके, मे, वि. त्रिवर्णकस्तु गोक्षुरेऽथ त्रिवर्णकम्। व्यूषणं त्रिफला, हे.

त्रिशङ्कु. त्रिशङ्कुर्ना राजभेदे शलभे टपदंशके, मे. त्रिशङ्कुः शलभे नृपे। मार्जारे, हे. त्रिशङ्कुः शलभे राजविशेषे टपदंशके, वि.

*त्रिशिख. त्रिशिखो राक्षसे क्लीवं त्रिशूले मण्डलान्तरे, मे.* त्रिशिखं शेखरे विद्यात्त्रिशिखो राक्षसान्तरे, वि. त्रिशिखो रक्षस्त्रिशिखं स्यात् किरीटत्रिशूलयोः, हे. त्रिशिखं स्यात् त्रिशूलेऽपि, त्रि.

त्रिस्रोतस्. त्रिस्रोता जह्नुकन्यायां स्रोतस्त्र्यन्तरे स्त्रियाम्, मे. त्रिस्रोता जह्नुकन्यायां त्रिस्रोताः सरिदन्तरे, वि. त्रिस्रोता जाह्नवीसिन्धुभिदोः, हे.

त्रुटि. त्रुटिः स्त्री संशये स्वल्पे सूक्ष्मैलाकालमानयोः, मे. त्रुटिः संशयलेशयोः। सूक्ष्मैलायां कालमाने, हे. स्त्रात् त्रुटिः संशये लेशे सूक्ष्मैलाकालमानयोः, वि. सूक्ष्मैलायां त्रुटि. स्त्री स्त्रात् कालेऽल्पे संशयेऽपि सा, च.

त्रेता. त्रेता युगेऽग्नित्रितये, मे, वि, हे. त्रेता त्वग्नित्रये युगे, अ. हवनीयादिषु त्रिषु त्रेता, ह.

त्रोटि. त्रोटिः स्त्री कटफले चञ्च्वां खगे मीनान्तरेऽपि च, मे. त्रोटिः स्त्रात् कटफले चञ्च्वां खगमीनविशेषयोः, वि. त्रोटिश्चञ्च्वां खगान्तरे। मीनकटफलयोः, हे.

त्र्यङ्कट. त्र्यङ्कटं शिक्यभेदेऽपि धौताञ्जन्याश्च न द्वयोः, मे. त्र्यङ्कटौ धौताञ्जन्यां शिक्यभिदीश्वरे, हे. त्र्यङ्कटं शिक्यभेदेऽपि धौताञ्जन्यामपि स्मृतम्, वि.

त्र्यम्बक. त्र्यम्बकस्ताम्रधातुः स्त्रात् त्र्यम्बकश्च महेश्वरः, अने.

त्वक्पत्र. त्वक्पत्रं तु वराङ्गके। स्त्री कारव्यां च, मे. त्वक्पत्रं तु वराङ्गके। त्वक्पत्रीति च कारव्याम्, वि.

त्वच्. त्वक् स्त्री चर्मणि वल्के च गुड़त्वचि विशेषतः, मे. त्वक् चर्मवल्कयोस्त्वचे, वि. त्वक् वल्कले चर्मणि च, हे. त्वक् स्त्री चर्मगुड़त्वचोः, त्रि.

त्वष्टृ. त्वष्टा पुमान् देवशिल्पितक्ष्णोरादित्यभिद्यपि, मे. त्वष्टा शिल्पिनि देवानां तथा वर्धकिसूर्ययोः, वि. देवशिल्पिन्यपि त्वष्टा, अ.

त्विष्. त्विट् कान्तौ वाचि रुचौ स्त्रियाम्, मे. त्विट् कान्तौ व्यवसाये च जिगीषायां रुचौ गिरि, वि. त्विट् शोभायां जिगीषायां व्यवसाये रुचौ गिरि, हे. त्विट् शोभाऽपि, ध.

थ. थं रक्षणे मङ्गले च साध्वसे च नपुंसकम्। शिलोच्चये पुमानेव क्वचित्तु भयरक्षके, मे. दण्डीशो वरदः कृष्णो वामजानुगतः स्मरः। शौरिश्चापि विशालाक्षः थकारः परिकीर्त्तितः, मा.

द. दः पुमानचले दत्तं स्त्रियां शोधनदानयोः। छेदोपतापर-क्षासु पुमांस्तु दातरि स्मृतः, मे. सत्प्रोऽक्षीमो ह्लादिनी च वामगुल्फगत-स्तथा। शूली कुवेरो दाता च दकारो धादिमः स्मृतः, मा.

दंश. दंशः कीटविशेषश्च वर्मदंशनयोः पुमान्, मे. दंशः स्यात् खण्डने दोषे दंशो मर्मणि कीर्त्तितः। सर्पक्षतेऽपि सन्नाहवनमक्षिक-योरपि, वि. दंशो वर्मणि मर्मणि। दोषे वनमक्षिकायां खण्डने भुजगक्षते, हे. दंशः संहननेऽपि च। सर्पक्षते, त्रि.

दंशन. दंशनं दंशवर्मयोः, मे, वि. दंशनं वर्मदंशयोः, हे.

दंशित. दंशितमपि जातदंशेऽपि स्यात्। कवचाचिते, मे. दंशितस्तु दष्टवर्मितयोरपि, वि. दंशितो वर्मिते दष्टे, हे.

दक्ष. दक्षस्त्रिषु पटौ पुंसि ताम्रचूडे प्रजापतौ। मुनिभेदे हर-वृषे द्रुमभेदे स्त्रियां भुवि, मे. दक्षः पटौ हरवृषे ताम्रचूडे प्रजा-पतौ। मुनिभेदे द्रुमे वह्नौ दक्षो दक्षा भुवि स्मृता, वि. दक्षः प्रजापतौ रुद्रवृषभे कुक्कुटे पटौ। द्रुमे दक्षा तु मेदिन्याम्, हे. दक्षः प्रजा-पतौ ताम्रचूडे हरवृषे पटौ, त्रि मुनिकुक्कुटयो र्दक्षः, रु.

दक्षिण दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्त्तिषु। अवामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्, मे. दक्षिणः सरलावामपरच्छन्दा-नुवर्त्तिषु। वाच्यवद् दक्षिणाऽवाची यज्ञदानप्रतिष्ठयोः, वि दक्षि-णस्तु परच्छन्दानुवर्त्तिनि। दक्षेऽपसव्येऽत्र सरलेऽपाचीनेऽप्यय दक्षिणा। दिक् प्रतिष्ठा यज्ञदानम्, हे. दक्षिणा दिशि दाने च दक्षिणः सरलेऽपि च, त्रि.

दग्ध. दग्धं प्लुष्टेऽन्यलिङ्गं स्यात् स्थितार्कदिशि च स्त्रियाम्, मे. दग्धं प्लुष्टेऽन्यवद्दग्धा स्थितार्कदिशि दर्शिता, वि.

दण्ड. दण्डोऽस्त्री लगुडे पुमान्। व्यूहभेदे प्रकाण्डेऽश्वे कोण-मन्थानयोरपि। सैन्ये कालमानभेदे चण्डांशोः पारिपार्श्विके। दमे यमेऽ-भिमाने च, मे दण्डो यमे मानभेदे लगुडे दमसैन्ययोः। व्यूहभेदे

प्रकाण्डेऽस्त्रे कोणमन्यानयोरपि। अभिमाने ग्रहे दण्डश्चण्डांशोः पारिपार्श्विके, वि. दण्डः सैन्ये दमे यमे। मानवूहग्रहभेदेष्वश्वेऽर्कानुचरे मथि। प्रकाण्डे लगुड़े कोणे चतुर्थोपायगर्वयोः, हे. दण्डोऽस्त्री लगुड़ेऽपि स्यात्, श. दण्डौ सैन्यार्कपार्श्वगौ, त्रि. दण्डो दमने सैन्ये, ह.

दण्डधार. दण्डधारः पुमान् ष्टयूनाथे प्रेताधिपेऽपि च, मे. दण्डधारो यमे भूपे, वि. दण्डधारो यमे राज्ञि, हे.

दण्डयात्रा. दण्डयात्रा दिग्विजये संयानवरयात्रयोः, मे, वि. दण्डयात्रा तु दिग्जये। संयाने वरयात्रायाम्, हे. दिग्जये वरयात्रायां दण्डयात्रां विदु र्बुधाः, हा.

दण्डयाम. दण्डयामस्तु कीनाशे दिवसे कुम्भसम्भवे, वि, मे. दण्डयामस्तु दिवसे कुम्भजे यमे, हे.

दण्डार. दण्डारो वहने मत्तवारणे भ्ररयन्त्रके। कुम्भकारस्य चक्रे च, मे, हे. दण्डारः भ्ररयन्त्रके। कुलालचक्रे वहने दण्डारो मत्तवारणे, वि. कुलालचक्रे वहने दण्डारः भ्ररयन्त्रके, हा.

दण्डिन्. दण्डी यमे द्वाःस्थसदण्डयोः, हे.

दत्त. दत्तं विश्राणितेऽविते, वि. दत्तं विश्राणितेऽर्चिते, मे. विसृष्टे रचिते दत्तम्, त्रि.

दधि. दधि गोरसभेदे स्यात् तथा श्रीवासवासयोः, हे. दधि क्षीरोत्तरावस्थाभावे श्रीवासवासयोः, वि, मे.

दन्त. दन्तोऽद्रिकटके कुञ्जे दशनेऽथौषधौ स्त्रियाम्, मे. दन्तो दशनसानुनोः। दन्त्यौषध्याम्, हे. दन्तो निकुञ्जे दशने दन्तः सानुनि कथ्यते। दन्ती स्यादौषधीभेदे, वि. दशने शैलश्टङ्गे च दन्तः स्यादौषधौ स्त्रियाम्, त्रि.

दन्तधावन. दन्तधावनः खदिरे दन्तशुद्धौ नपुंसकम्, मे.

दन्तशठ. स्याद्दन्तशठो जम्बीरे कपित्थे कर्मरङ्गके। नागरङ्गेऽपि च पुमान् स्याच्चाङ्गेर्याञ्च योषिति, मे. दन्तशठः स्याज्जम्बीरे क-

पित्थे कर्मरङ्गके। नागरङ्गेऽपि चाङ्गेर्यां स्मृता दन्तशठा बुधैः, वि. दन्तशठः पुनः। जम्बीरे नागरङ्गे च कर्मरङ्गकपित्थयोः, हे. अम्ललोणयां दन्तशठा ना जम्बीरकपित्थयोः, त्रि.

दन्तुर. दन्तुरस्तून्नतरदे नतोन्नतनते त्रिषु, मे. दन्तुरं वाचत्र-वद्विद्यात् विषमोन्नतदन्तयोः, वि. दन्तुरः उन्नतदन्ते विषमे, हे.

दन्दशूक. दन्दशूकस्तु पुंलिङ्गो राक्षसे च सरीसृपे, मे. दन्द-शूकोऽहिरक्षसोः, वि. दन्दशूकस्तु फणिरक्षसोः, हे.

दम. दमस्तु दमथे दण्डे कर्दमे दमने पुमान्, मे. दमः स्मृतः दमथे दण्डे कर्दमे दमनेऽपि च, वि. दमः स्मृतः कर्दमे दण्डे दमने दमथेऽपि च, हे. दमो दमथुदण्डयोः, त्रि.

दमथ. दमथस्तु पुमान् दण्डे दमे च परिकीर्त्तितः, मे. दम-थो दमदण्डयोः, वि. दमथो दमके दण्डे, हे.

दमन. दमनः पुष्पधीरयोः, मे. दमनः कुसुमे वीरे, वि. दमनो वीरपुष्पयोः, हे.

दम्भ. दम्भस्तु कैतवे कल्के, मे, वि. दम्भः कल्के कैतवे च, हे. दम्भः कैतवकल्कयोः, त्रि.

दया. दया हिंसानुकम्पयोः, अने.

दर. दरोऽस्त्री साध्वसे गर्त्ते कन्दरे तु दरी स्मृता। दराऽव्यय-मनागर्थे, मे. दरः साध्वसगर्त्तयोः। कन्दरे तु दरीमाऽऽदरीपदर्थे दरा-व्ययम्, वि. दरः स्मृतः भयगर्तयोः। दरी तु कन्दरे, हे. दरोऽस्त्रि-यां भये श्वभ्रे, अ. दरं छिद्रं दरो भयम्, अने.

दरद्. दरत् स्त्रियां प्रपातेऽपि भयपर्वतयोरपि, मे. दरत् प्रपा-तान्द्रिभये, वि.

दर्दुर. दर्दुरः पर्वते पुंसि लिप्वीपङ्कभाजने, मे. दर्दुरस्तु गि-रावीपद्. भग्नवस्तुनि वाचत्रवत्, वि. दर्दुरः स्मृतः दैपद्भग्ने गिरावपि,

दर्दुर. दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः। दर्दुरा चण्डिकायां स्यात् ग्रामजाले नपुंसकम् मे. दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः। दर्दुरा चण्डिकायाञ्च ग्रामजाले तु दर्दुरम्, वि. दर्दुरो भेकमेघयोः। वाद्यभेदे शैलभेदे दर्दुरं ग्रामजालके। दर्दुरोमा, हे. वाद्यमेघौ च दर्दुरौ, त्रि.

दर्प. दर्पः कस्तूरीगन्धवत्याहङ्कृतौ, मे. दर्पोऽहङ्कारकस्तूर्योः, वि. दर्पो मृगमदे गर्वे, हे.

दर्भ. दर्भः ग्रन्थे कुशेऽपि च, हे.

दर्वी. (र्वी) दर्वी स्त्रियां खजाकायां फणायामुरगस्य च, मे. दर्वी भवेत् खजाकायां फणायामुरगस्य च, वि. दर्वी फणातर्द्वोः, हे.

दर्श. दर्शस्तु सङ्गमे सूर्यचन्द्रयोरवलोकने। पचान्ते वैदिकविधौ दर्शश्च समुदाहृतः, वि. दर्शः सूर्येन्दुसङ्गमे। पचान्तेऽब्धौ दर्शने च, हे. दर्शस्तु स्यादमावस्या यागभेदावलोकने, मे.

दर्शक. दर्शकः स्यात् प्रतीहारे दर्शयितृप्रवीणयोः, मे, वि. दर्शको दर्शयितरि प्रतीहारप्रवीणयोः, हे.

दर्शन. दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिषु। शास्त्रदर्पणयोश्च, मे, वि. दर्शनं दर्पणे धर्मोपलब्धौ बुद्धिशास्त्रयोः। स्वप्नलोचनयोश्चापि, हे. दर्शनं वर्णसुकुरचक्षुःशास्त्रोपलब्धिषु, त्रि.

दल. दलमुत्सेधखण्डयोः। शस्त्रीच्छदेऽप्यवद्रव्ये पत्रेऽपि, मे. दलं शस्त्रीच्छदोत्सेधावद्रव्येष खण्डपर्णयोः, वि. दलं शस्त्रीच्छदेऽर्द्धपर्णयोः। उत्सेधावसुनि च, हे.

दलाढ़क. दलाढ़कः स्वयंजाततिले पृश्निकाञ्च गैरिके। फेनखातकयो नागकेशरे च महत्तरे, मे. दलाढ़कस्तु कुन्दे स्यात् करिकर्णशिरीषयोः। स्वयंजाततिले फेने खातके नागकेसरे। वातरायां पृश्निकायाञ्च गैरिके च महत्तरे, वि. दलाढ़कोऽरण्यतिले गैरिके नागकेसरे। कुन्दे महत्तरे फेने करिकर्णशिरीषयोः। . वातराया खातके पृश्न्याम्,

हे. दश्मर्यां कुन्दे दलाढ्क, त्रि.

दलामल. दलामलं मरुवके दमनेऽपि नपुंसकम्, मे. दलामलं दमनके तथा मरुवकेऽपि च, वि. दलामलं पुन र्दमनके मरुककेऽपि च, हे.

दव. दवदावौ तु वनवह्नौ वनेऽप्युभौ, मे. दवो दाव इति ख्यातः वनाग्निवनयोरपि, वि. दवदावौ वनानले। वने, हे. दवदावौ वनारण्यवह्नी, अ. वनारण्यानलौ दावौ, अने. काननेऽपि दवदावौ, ह.

दशन. दशनः शिखरे दन्ते कवचे तु नपुंसकम्, मे. दशनः कवचे दन्ते दशनः शिखरेऽपि च, वि.

दशनोच्छिष्ट. दशनोच्छिष्टः पुंसि स्यात् निश्वासेऽधरचुम्बयोः, मे. अथ स्याद्दशनोच्छिष्टो निश्वासेऽधरचुम्बयोः, वि. दशनोच्छिष्टो निःश्वासे चुम्बने दन्तवाससि, हे. निश्वासो दशनोच्छिष्टः चुम्बे दन्तच्छदेऽपि च, त्रि.

दशपुर. विदु र्दशपुरं देशे मुस्तायां पत्तनेऽपि च, वि. दशपुरं पत्तने स्यात् मुस्तायां नीरदन्तरे, हे. अथो दशपुरं देशे पुरेऽपि स्यात् नपुंसकम्, त्रि.

दशमीस्थ दशमीस्थो नष्टवीर्येऽ स्थविरेऽप्यन्यलिङ्गकः, मे. दशमीस्थं नष्टवीजे स्थविरेऽपि प्रचक्षते, वि. दशमीस्थः स्थविरे स्यात् क्षीणरागे मताशने, हे. दशमीस्थौ क्षीणरागवृद्धौ, अ.

दशा. दशाऽवस्थादीपवर्त्त्योर्वस्त्रान्ते भूम्नि योषिति, मे. दशा वर्त्ताववस्थायां वस्त्रांशे सूत्र र्दशा अपि, वि. दशा वर्त्तावस्थायां दशास्तु वसनाञ्चले, हे. दशाऽवस्थानेकविधाऽपि, अ. कर्मविपाकेऽपि दशा गतिः स्मृते, ह.

दस्म. दस्मस्तु यजमाने स्याद् अपि चौरे हुताशने, मे, वि. दस्मस्तु हव्यवाहे सम्राद् यजमाने मलिम्लुचे, हे.

दस्यु. दस्युश्चौरे पुंसि रिपौ, मे. दस्युः स्तेने च शत्रौ च, वि. दस्युः प्रत्यर्थिचौरयोः, हे. दस्यु तस्करवैरिणौ, त्रि.

दस्र. दस्रः खरेऽश्विनीसुते, मे. दस्रः खरो दस्रौ रवेः सुतौ, हे. दस्रः खरे चाश्विनयोः, वि.

दहन. दहनश्चित्रके भल्लातकेऽग्नौ दुष्टचेष्टिते, मे. दहनश्चित्रके वह्नौ भल्लाते दुष्टचेष्टिते, वि. दहनो दुष्टचेष्टिते। भल्लाते चित्रकेऽग्नौ च, हे.

दह्र. दह्रो मूषिकायाश्च स्वल्पे भ्रातरि बालके, मे, वि. दह्रो मूषिकास्वल्पभ्रात्रो डिम्बे च, हे.

दाक्षायणी. दाक्षायणी त्वपर्णायामश्विन्यादुडुषु स्त्रियाम्, मे. दाक्षायणीत्यपर्णायां रोहिण्यां तारकासु च, वि. दाक्षायण्युमायाश्च भेषु च। रोहिण्याश्च, हे.

दाक्षिणात्य. दाक्षिणात्यो नारिकेरे त्रिषु दक्षिणदिग्भवे, मे.

दाड़िम. दाड़िमस्तु त्रिलिङ्गः स्याद्, एलायां करके त्रिषु, मे. दाड़िमः करकैलयोः, वि, हे.

दाढ़ा. दाढ़ा दंष्ट्राभिलाषयोः, वि, हे.

दात्यूह. दात्यूहस्तु पुमान् कालकण्ठचातकपक्षिणोः मे. दात्यूहः कालकण्ठे स्याद् दात्यूहश्चातकेऽपि च, वि. दात्यूहः कालकण्ठके। चातकेऽपि, हे. दात्यूहश्चातकेऽपि च, त्रि.

दान. दानं गजमदे त्यागे पालनच्छेदशुद्धिषु, मे, वि. दानं मतङ्गजमदे रक्षणच्छेदशुद्धिषु। वित्राणनेऽपि, हे. दानं गजमदे त्यागे खण्डने रक्षणेऽपि च, त्रि.

दाशु. दाशु दातरि विक्रान्ते, मे, वि.

दान्त दान्तस्तु दमितेऽपि स्यात् तपःक्लेशसहे त्रिषु, मे.

दाय. दायः सोल्लुण्ठभाषणे। विभक्तव्यपितृद्रव्ये तथा हरणदानयोः, मे. दायो दाने यौतुकादिधने सोल्लुण्ठभाषणे। विभक्तव्यपितृद्रव्ये दायमाहुर्मनीषिणः, वि. दायो दाने यौतुकादिधने सोल्लुण्ठभाषणे। विभक्तव्यपि[illegible], हे. दाने विशेदसज्ञौ दायो भागार्हपितृरिक्थे च, त्रि.

दायाद. दायादस्तु भवेत् पुंसि सपिण्डे तनयेऽपि च, मे. दायादो ज्ञातिपुत्रयोः, वि. दायादौ सुतसपिण्डौ, हे: दायादौ सुतबान्धवौ, श्र. दायादो बान्धवः प्रोक्तो दायादस्तनयो मतः, अने. दायादस्तुक्सपिण्डयोः, रु.

दारक. दारको बालकेऽपि स्याद् भेदके त्वभिधेयवत्, मे. दारको भेदकेऽपत्ये, वि. दारको भेदके पुत्रे, हे.

दारद. दारदो विषभेदे स्यात् पारदे हिङ्गुले पुमान्, मे. दारदो विषभेदे स्याद् हिङ्गुले पारदेऽपि च, वि. दारदो विषभेदे स्यात् पारदे हिङ्गुलेऽपि च, हे.

दारु. दारु स्यात् पित्तले काष्ठे देवदारौ नपुंसकम्, मे. दारु स्याद्देवदारु च, त्रि. दारु काष्ठं निगद्यते, अने.

दारुण. दारुणो रसभेदे ना त्रिषु तु स्याद् भयावहे, मे.

दार्वी (र्वी). दार्वी दारुहरिद्रायां तथा गोजिह्विकौषधौ, मे. दार्वी दारुहरिद्रायां देवदारुहरिद्रयोः, वि. दार्वी स्याद्देवदारुणि। हरिद्राद्वितये चापि, हे.

दाय. v. दय.

दास. दासो वाच्यभुजिष्ययोः। दासो भृत्ये च शूद्रे च ज्ञातात्मनि च धीवरे, मे. दासः शूद्रे दानपात्रे भृत्यधीवरयोरपि। दासी चेट्यां च भिण्ट्यां च, वि. दासो धीवरभृत्ययोः। वृषले दानपात्रे च दासी भिण्ट्यपि चेट्यपि, हे. दासो विज्ञातार्थचेटयोः। भिण्ट्याञ्च दासी, त्रि.

दासेर. दासेरो दासिकापत्रे त्रिषु पुंसि क्रमेलके, मे. दासेरो दासिकापुत्रे दासेरः स्यात् क्रमेलके, वि. दासेर उष्ट्रे चेटे च, हे. दासीसुतोष्ट्रौ दासेरौ, त्रि.

दासेरक. दासेरकस्तु करभे दासीपुत्रे च धीवरे, मे. दासेरः स्यात् करभे दासीपुत्रे च धीवरे, वि. उष्ट्रे दासीसुते चैव दासेरक आस्मृतः, श्रा.

दिगम्बर. दिगम्बरः सत्रात् क्षपणे नग्ने तमसि शङ्करे, मे, वि. दिगम्बरस्तु शङ्करे। अन्धकारे क्षपणके सत्राद्वस्त्ररहितेऽपि च, हे. दिगम्बरोऽन्धकारे च, त्रि.

दिग्ध. दिग्धो विषाक्तबाणे सत्रात् पुंसि लिप्तेऽन्यलिङ्गक, मे. दिग्धं विषाक्तबाणे सत्राद्, दिग्धो लिप्तार्थकेऽन्यवत्, वि. दिग्धो लिप्ते विषाक्ते पौ प्रदङ्गस्नेहयोरपि, हे. दिग्धं लिप्ते विषाक्ते च, त्रि.

दिति. दिति दैत्यजनन्यां च खण्डनेऽपि च योषिति, मे. दितिर्दैत्यमातरि खण्डने, हे. दितिः सत्रात् खण्डनेऽपि च, वि. दितौ खण्डनदैत्यमात्रे, त्रि.

दिव्. द्यौः स्वर्गे च गगने, मे. द्यौः स्वर्गनभसोः, हे.

दिव. दिवं स्वर्गेऽन्तरीक्षे च, वि. दिवं खे त्रिदिवे वने, हे. दिवं क्लीवं तयोः स्मृतम्, मे. v. दिव्.

दिवाभीत. दिवाभीतः कुम्भिले सत्राद्, उलूके कुमुदाकरे, मे, वि. दिवाभीतः काकरिपौ कुम्भिले कुमुदाकरे, हे. दिवाभीत उलूके सत्रात् कुम्भिले कुमुदाकरे, त्रि.

दिवौ (वो) कस्. दिवोकाश्च दिवौकाश्च पुंसि देवे च चातके, मे. दिवौकाश्चातके सुरे, वि. दिवौकसौ। चातकस्त्रिदशश्चापि, हे. सारङ्गाश्च दिवौकसः, श.

दिव्य. दिव्यं लवङ्गे धात्र्यां स्त्री वल्लौ दिविभवे त्रिषु, मे. दिव्यं लवङ्गके दिव्यं वल्लौ दिविभवेऽन्यवत्। आमलक्यां स्मृता दिव्या, वि. दिव्यं यवगुलवङ्गयोः। द्युभवे दिव्याऽमलक्याम्, हे.

दिव्यचक्षुस्. दिव्यचक्षुः सुगन्धस्त्रं भेदे नाऽन्धे सुलोचने, मे. दिव्यचक्षुः सुगन्धस्त्र भेदेऽन्धे च सुलोचने, वि. दिव्यचक्षुस्त्वन्धे सुलोचने। सुगन्धभेदे, हे.

दिष्ट. दिष्टं दैवे पुमान् काले, मे. दिष्टं दैवे दिष्टस्त्वनेहसि, हे. दिष्टं दैवे पुं काले सत्रा दिष्टः, वि दिष्टं दैवेऽपि न द्वयोः, श.

दिष्टः कालोपदिष्टयोः, त्रि. दिष्टं दैवेऽपि कीर्त्तितम्, हा.

दिष्टि. दिष्टि सुतपरिमाणयोः। स्त्रियाम्, मे. दिष्टिरानन्दे माने च, हे. दिष्टिः परीमाणमुदोः, वि. परिमाणमुदो दिष्टिः, त्रि.

दिष्ट्या. दिष्ट्या हर्षे मङ्गले च, मे.

दीदिवि. दीदिवि नौ धिषणेऽन्ने तदस्त्रियाम्, मे. दीदिवि धिषणान्नयोः, वि.

दीन. दीना स्त्री मूषिकस्त्रियाम्। वाचत्रवद्दुर्गते भीते, मे. दीना मूषिकयोषायां दुर्गते कातरेऽन्यवत्, वि. मूषिकाऽपि भवेद्दीना, हा.

दीप. दीपः प्रदीपोत्तरीये लतायां लोचमस्तके, मे.

दीपक. दीपकं वागलङ्कारे वाचत्रवद्दीप्तिकारके, मे. दीपकं वागलङ्कारे दीपको दीप्तिकारके, वि. दीपकं स्यादलङ्कृतिः। दीपकौ दीप्तिकृद्दीपौ, हे.

दीप्त. दीप्तं निर्भासिते दग्धे ज्वलिते, मे. दीप्तं निर्भासिते दग्धे, हे. दीप्तं निर्भासिते दग्धे वदन्ति ज्वलितेऽपि च, वि.

दीप्यक. दीप्यकश्चाजमोदायां यवानीबर्हिचूडयोः, मे. दीप्यकस्त्वाजमोदे स्याद्यवानीबर्हिचूडयोः, वि. दीप्यकं त्वजमोदके। मयूरशिखायवान्योः, हे. यवान्यामपि दीप्यकः, अ.

दीर्घाध्वग. दीर्घाध्वगः पुमानुष्ट्रे लेख्यहारे तु भेद्यवत्, मे. दीर्घाध्वगः स्मृतः क्रमेलके लेखकारे तु भेद्यवत्, वि. दीर्घाध्वगः क्रमेलके। लेखहारे मल्लनागे वात्स्यायनसुरेभयोः, हे. दीर्घाध्वगः स्यादुष्ट्रेऽपि, त्रि.

दीर्घायुस्. दीर्घायुः शाल्मलीवृक्षे वायसे जीवकद्रुमे। मार्कण्डेये च पुंसि स्यात् चिरजीविनि वाचत्रवत्, मे. दीर्घायुः षट्सु पिः काकश्च शाल्मलिः, त्रि. दीर्घायुः शाल्मलौ काके मार्कण्डेयेऽतिजीविनि, वि. दीर्घायु जीवके हिके। मार्कण्डेये शाल्मलितरौ, हे.

दीर्ण. दीर्णं विदारिते भीते, मे. दीर्णं दारितभीतयोः, वि.

दुःस्पर्श. दुःस्पर्शो धन्वयासे ना कण्टकार्यां स्त्रियां त्रिषु। खर-

स्पर्शे, मे. दुःस्पर्शाख्या खरस्पर्श कण्टकार्यत्रा च यासके, वि.

दुःस्थ. दुःस्थः स्याद्दुर्गते मूर्खे दुःखेन तिष्ठति त्रिषु, मे. दुःस्थः स्याद्दुर्गते मूर्खे, वि. दुःस्थो दुर्गतमूर्खयोः, हे.

दुकूल. दुकूलं श्लक्ष्णवस्त्रे सत्रात् क्षौमे, मे. दुकूलं तु क्षौमे सूक्ष्मांशुकेऽपि च, वि. दुकूलं सूक्ष्मवाससि। क्षौमवस्त्रे, हे. दुकूलं श्लक्ष्णवस्त्रेऽपि च, त्रि.

दुग्ध. दुग्धं प्रपूरिते क्षीरे दुग्धी क्षीराविकौषधी, मे. दुग्धं प्रपूरिते क्षीरे, वि. दुग्धं क्षीरे पूरिते च, हे. दुग्धं क्षीरे प्रपूरिते, त्रि.

दुग्धतालीय. दुग्धतालीयमितेरतद्, दुग्धाम्रक्षीरफेनयोः, मे. दुग्धतालीयमितेरतद्, दुग्धाम्रे दुग्धफेनके, वि. दुग्धतालीयं दुग्धाम्रदुग्धफेनयोः, हे.

दुन्दुभि. दुन्दुभिः पुमान्। वरुणे दैत्यभेर्योश्च स्त्रयक्षविन्द-त्रिकद्वये, मे. दुन्दुभि र्दितिजे भेर्यामक्षविन्दुत्रिकद्वये, वि. दुन्दुभिस्तु भेर्यां दितिसुते विषे। अक्षविन्दुत्रिकद्वन्द्वे, हे. स्याद् भेर्यां दुन्दु-भिः पुंसि सत्रादर्चे दुन्दुभि. स्त्रियाम्, अ. दुन्दुभि दैंतत्रभेदेऽपि, त्रि. द्वन्द्वे दुन्दुभिरर्चे तु दुन्दुभिः सत्रात्तयानकः, अने.

दुर् दु र्निषेधे च दुष्टे च, मे. दुः सत्रात् कष्टनिषेधयोः, वि.

दुरोदर. दुरोदरं द्यूतभेदे द्यूतकृत्पणयोः पुमान्, मे. दुरोदरः पुन र्द्यूते द्यूतकारे पणेऽपि च, हे. दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्, अ. पणेऽर्चे कितवे द्यूते दुरोदर इति स्मृतः, अने.

दुर्गति. दुर्गति र्नरके नैःस्वे स्त्री, मे. दुर्गति र्नरके नैःस्वे, वि, त्रि. दुर्गतिः। नरके निःस्वतायाञ्च, हे.

दुर्ग. दुर्गामानील्योः स्त्री दुर्गमे त्रिषु, मे. दुर्गं भवेद् दुर्गमे तु दुर्गा सत्रान्नीलिकोमयोः, हे. दुर्गः सत्राद्, दुर्गमे दुर्गा गौरीनीलि-कयोरपि, वि.

दुर्जात. दुर्जातं व्यसने क्लीबेऽसम्यग्जातेऽन्यलिङ्गकम्, मे. दुर्जातं

व्यसने प्रोक्तमसम्यग्जातवस्तुनि, वि. दुर्जातं व्यसनासम्यग्जातयोः, हे. दुर्जातं व्यसनेऽपि च, त्रि.

दुर्द्दर. दुर्द्दरः पुंसि नरकान्तरे सप्राद् ऋषभौषधौ, मे. दुर्द्दरं वाचप्रवद् दुःखधार्य्ये स्याहृषभौषधे। दुर्द्दरः, वि. दुर्द्दरस्त्वृषभौषधौ। दुःखधार्य्यं, हे.

दुर्नामन्. दुर्नामाऽख्यातिरुद्जदीर्घकोशिकयोरपि, वि. दुर्नाम क्लीवमर्शसि। स्याद्दीर्घकोशिकायां स्त्री, मे. दुर्नाम पुनरर्शसि। दुर्नामा दीर्घकोशी स्यात्, हे.

दुर्मुख दुर्मुखः कपिभिन्नागभिदो र्ना मुखरे त्रिषु, मे. दुर्मुखो नागराजेऽपि मुखरे वानराख्ययोः, वि. दुर्मुखो मुखरे नागराजे वाजिनि वानरे, हे. सर्पेऽपि दुर्मुखः, त्रि.

दुर्लभ. दुर्लभस्त्रिषु दुष्प्रापेत्र कच्छुरे, मे. दुर्लभः कच्छुरे प्रेयो दुष्प्रापे वल्लभेऽपि च, वि. दुर्लभः कच्छुरे प्रिये। दुष्प्रापे, हे. दुर्लभः कच्छुरे काम्ये, त्रि.

दुर्वर्ण. दुर्वर्णं त्रिष्वसद्वर्णे क्लीवमैलेयरूप्ययोः, मे. दुर्वर्णञ्च कुवर्णे स्याद् वालुके रजतेऽपि च, वि. अथ दुर्वर्णं कलधौतकुवर्णयोः, हे. दुर्वर्णं रजतेऽपि स्यात्, त्रि.

दुर्विध. दुर्विधो वाचप्रलिङ्गः स्याद् दुर्गतेऽपि खलेऽपि च, मे. दुर्विधो दुर्गते खले, वि. दुर्विधो दुर्जने निःस्वे, हे. दुर्विधौ खलदुर्गतौ, त्रि.

दुलि. दुलिः स्त्रियां कमठ्यां ना मुनौ, मे. v. डुलि.

दुष्कक. दुष्कको गन्धकुव्यां स्याद् विहाराद्यवकाशके, मे, वि.

दुष्ठ. दुष्ठं स्याद् दुर्बलेऽधमे, वि.

दूत्य. दूत्यं दूतस्वभावे च भावे कर्मण्यपि स्मृतम्, मे.

दूषिका. दूषिका तूलिकायाञ्च मले स्याल्लोचनस्य च, मे, दूषिका तूलिका स्मृता। नयनस्य मलेऽपि स्यात्, हे

दूष्य दूष्यं त्रिषु दूषणीये क्लीवं वस्त्रे च तम्बुहे, मे. दूष्यन्तु

दूष्यणीये सत्राद् दूष्यं वस्त्रे च तद्गृहे, वि. दूष्यं वाससि तद्गृहे। दूष्यणीये, हे. निन्द्ये वस्त्रगृहे दूष्यम्, त्रि.

दृम्भू. दृम्भूः स्त्री सर्पवज्रयोः, मे. दृम्भूः पन्नगवज्रयोः, वि. दृम्भूः पवौ भास्करे च, हे.

दृढ़ दृढ़ं स्थूले नितान्ते च प्रगाढ़े बलवत्यपि, मे. दृढ़ः स्थूले भृशे शक्ते प्रगाढ़ेऽपि दृढ़ो मतः, वि. दृढ़ः शक्ते भृशे स्थूले, हे. शक्तस्थूलौ त्रिषु दृढ़ौ, अ.

दृति. दृतिश्चर्मपुटे मत्स्ये ना, मे. दृतिश्चर्मपुटे भषे, वि.

दृश्. दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके, मे. दृग् दर्शने लोचने च दृग् बुद्धौ वीक्षकेऽपि च, वि. दृग् द्रष्टरि दर्शनेऽक्षिण, हे. दृग् ज्ञाने ज्ञातरि त्रिषु, अ. ज्ञाने च लोचने दर्शने च दृक्, त्रि.

दृशान. दृशानं ज्योतिषि प्रोक्तं दृशानश्च विरोचने, वि. दृशानं ज्योतिषि क्लीवं पुंलिङ्गः सत्राद्विरोचने, मे.

दृषद्. दृषद् निष्पेषणशिलापट्टप्रस्तरयोरपि, मे. दृषद् पेषणपट्टे सत्राद् दृषद् पाषाणमात्रके, वि. दृषद् पाषाणमात्रके। निष्पेषणार्थपट्टे सत्रान्, हे.

दृषद्वती. दृषद्वती नदीभेदे कात्यायन्यामपि स्त्रियाम्, मे.

दृष्टान्त. दृष्टान्त उदाहृतौ। शास्त्रे च मरणे, मे. दृष्टान्तः सत्रादुदाहृतौ। शास्त्रे, हे. दृष्टान्तावुभौ शास्त्रनिदर्शने, अ.

दृष्टि. दृष्टि. स्त्रियां बुद्धौ लोचने दर्शनेऽपि च, मे. दृष्टि र्ज्ञानेऽक्ष्णि दर्शने, हे. दृष्टि र्धीदर्शनाक्षिषु, वि. दृष्टिरक्षिण तथा मतौ, अने.

देव. देवो मेघे सुरे राज्ञि सत्रान्नपुंसकमिन्द्रिये। देवी कृताभिषेकायां तेजनीस्पृक्कयोरपि, मे. देवः सुरे घने राज्ञि देवमाख्यातमिन्द्रिये। देवी भट्टारिकायाञ्च तेजनीस्पृक्कयोरपि, वि. देवं हृषीके देवस्तु नृपतौ तोयदे सुरे। देवी कृताभिषेकायां तेजनीस्पृक्कयोरपि, हे. मेघे-राज्ञि सुरे देवः, त्रि. पर्जन्ये राज्ञि गीर्वाणे व्यवहर्तरि ,भर्तरि। मूर्खे बले

जिगीषौ च देवोक्ति नरि कुष्ठिनि, अने,

देवताड़. देवताड़ः सैंहिकेये जीमूते च कृताशने, मे. देवताड़स्तु घोषके। सैंहिकेयग्रहे चापि देवताड़ो कृताशने, वि. देवताड़ो घोषकेऽग्नौ राहौ, हे.

देवन. देवनं व्यवहारे स्यात् जिगीषाक्रीड़योरपि। देवनोऽक्षेषु पुंसि स्यात्, मे. देवनं व्यवहारे स्यात् जिगीषाक्रीड़योरपि। अक्षेषु देवनः प्रोक्त, वि. देवनोऽक्षेऽथ देवनम्। व्यवहारे जिगीषायां क्रीड़ायाम्, हे. क्रीड़ादावपि देवनम्, अ. क्रीड़ादौ देवनं नाऽक्षे, त्रि.

देवमणि. अथ देवमणि र्भर्गेऽश्वावर्त्ते कौस्तुभेऽपि च, मे. देवमणिः शिवेऽश्वस्य कण्ठावर्त्ते च कौस्तुभे, वि. देवमणि विष्णुवक्षोमणौ हरे। अश्वस्य कण्ठावर्त्ते च, हे.

देवयु. देवयु र्वाच्यलिङ्गस्तु धार्म्मिके लोकयात्रिके, मे. देवयुर्धार्म्मिके स्यातो देवयु र्लोकयात्रिके, वि.

देवरुच. देवरुचः सप्तपर्णे मन्दारादिषु गुग्गुलौ, मे, वि. देवरुचो मन्दारादौ गुग्गुलौ विषमच्छदे, हे.

देवसहा. भवेद् देवसहाभिख्या लूते दण्डोत्पलौषधे, वि.

देवसेना. देवसेना तु वज्रिणः। सुतायामपि सेनायां देवतानाञ्च योषिति, मे. देवसेनेन्द्रवाहिन्यां सेनायाञ्च दिवौकसाम्, वि. देवसेनेन्द्रकन्यायां सैन्ये दिविषदामपि, हे.

देष्णु. देष्णु, दातरि दुर्गमे, मे, वि, हे.

देहयात्रा. देहयात्रा यमपुरीगमने भोजनेऽपि च, मे, ए. देहयात्रा भोजने स्यात् यमान्तागमनेऽपि च, वि. देहयाताऽशने मृतौ, त्रि.

दैत्य. दैत्योऽसुरे सुरायान्तु दैत्या चण्डौषधावपि, मे, वि. दैत्योऽसुरे मुरौषधौ, हे.

दैत्यारि. दैत्यारिः पुंसि सामान्यदेवे च गरुड़ध्वजे, मे. दैत्यारिस्त्रिदशे विष्णौ, वि.

दैवज्ञ. दैवज्ञो गणके पुमान्। दैवज्ञा गणिकायां स्त्री, मे. दैवज्ञो गणकेऽपि च, वि.

दोग्धृ. दोग्धाऽर्थोपजीविकवौ वत्सगोपालयोः पुमान्, मे. दोग्धा गोपालके वत्से कवौ अर्थोपजीविनि, वि. दोग्धा गोपालवत्सयोः। अर्थोपजीविनि कवौ, हे. दोग्धा गोपे कवौ वत्से, त्रि.

दोला. दोला नील्यां यानान्तरेऽपि च, मे. दोला यानान्तरे नील्याम्, वि.

दोष(षा). दोषः स्याद्दूषणे पापे दोषा रात्रौ भुजेऽपि च, मे, वि. दोषा रात्रौ च तन्मुखे, मे. दोषा रात्रिमुखे रात्रौ अतोऽनव्ययमप्यसौ, वि. दोषा निशि निशामुखे, हे.

दोषज्ञ. दोषज्ञः प्राज्ञवैद्ययोः, हे.

दोहदलक्षण. दोहदलक्षणमुक्तं वयःसन्धौ च गर्भे च, मे. दोहदलक्षणं गर्भे सजात् सन्धौ यौवनस्य च, हे. दोहदलक्षणं गर्भे वयः-सङ्गे च दृश्यते, त्रि.

दौर्वीण. दौर्वीणं स्पष्टपर्णे स्याद् दूर्वायाः सुरसेऽपि च, मे, वि. दौर्वीणं स्पष्टपर्णे स्याद्धरितालीरसेऽपि च, हे.

द्युत्र. द्युत्र क्लीवमक्षि गमने च। ना ज्वलने, मे. द्युत्रग्नौ दिवसेऽपि स्यात्, वि. द्युत्र दिने वह्नौ, हे.

द्युत्रति. द्युत्रतिः स्त्री रश्मिशोभयोः, मे. द्युत्रतिश्च शोभादीधित्योः, हे.

द्युम्न. द्युम्नं वित्ते बलेऽपि च, मे. द्युम्नं वित्ते पराक्रमे, वि. द्युम्नं द्रविणवद् धनौजसोः, हे. द्युम्नं बले धने, त्रि.

द्युवन्. द्युवा त्वभिनवे भानौ, वि.

द्यो द्यौस्त्रिदशालयत्रिदशवर्त्मनो र्योषिति, मे. द्यौः स्वर्ग-सुरवर्त्मनोः, वि. द्यौस्तु स्वर्गे विहायसि, हे.

द्रव. द्रवः मद्रावनर्मणोः। .. रसेऽपि, मे. द्रवः प्रद्रावरसयो-

र्गतौ नर्मणि विद्रवे, वि द्रवो विद्रवनर्मणोः। भङ्गाये रसगतशेश्च, हे.

द्रवन्ती. स्रवन्ती च द्रवन्त्यपि। नद्यामोषधिभेदे च, हे. V. स्रवन्ती.

द्रविण द्रविणं न द्वयो र्वित्ते काञ्चने च पराक्रमे, मे. द्रविणं काञ्चने वित्ते द्रविणश्च पराक्रमे, वि. द्रविणन्तु बलं धनम्, अ. V. द्रविण.

द्रव्य द्रव्यं सत्रात् पित्तले वित्ते पृथ्व्यादौ च विलेपने। क्लीवे च भेषजे भवेत्र द्रुविकारे च वाच्यवत्, मे. द्रव्यं स्याद् द्रविणे भवेत्र पृथिव्यादौ च पित्तले। भेषजे चापि विनये जतुद्रुमविकारयो, वि. द्रव्यं भवेत्र धने च्मादौ जतुद्रुमविकारयोः। विनये भेषजे वीर्यत्रौ, हे. द्रव्यं भवेत्र गुणाश्रये, अ. भेषजे द्रुविकारे च द्रव्यं भवेत्र च पित्तले, त्रि.

द्रावक. द्रावको ग्रावभेदे स्यात् विदग्धे मोषकेऽपि च, मे. द्रावकस्तु शिलाभेदे स्यात् मोषकविदग्धयोः, हे. द्रावकस्तु शिलाभेदे विदग्धे मोषकेऽपि च, वि.

द्राविड. द्राविडो देशभिज्जाते सङ्करामिद्वेषमुख्ययोः, मे. द्राविडः सत्राज्जानपदे वेधमुख्यकसङ्करयोः, वि.

द्रुघण द्रुघणो मुद्गरेऽपि स्यात् द्रुहिणे च परश्वधे, मे, वि. द्रुघणः परशु वेधसोः। मुद्गरेऽपि, हे.

द्रुण. द्रुणं चापेऽलिनि द्रुणः। द्रुणस्त्व द्रोणीकच्छप्योः, मे. द्रुणं चापे च खड्गे च द्रुणो वृश्चिकभृङ्गयो। द्रुणी कच्छपिकायाश्च जलद्रोण्यामुदाहृता, वि. द्रुणः स्याद् वृश्चिके भृङ्गे द्रुणं चापकृपाणयोः। द्रुणी कूर्म्यां जलद्रोण्याम्, हे. द्रुणोऽलिः कच्छपी द्रुणी, त्रि.

द्रुत. द्रुतं त्रिषु। शीघ्रे विलीने विद्राणे, मे. द्रुतं शीघ्रविलीनयोः, हे, वि द्रुतं शीघ्रे विलीने च विद्राणे चाभिधेयवत्, वि.

द्रुम. द्रुमो महीरुहे पारिजाते किम्पुरुषेश्वरे, मे. द्रुमस्तरौ पारिजाते द्रुमः किम्पुरुषेश्वरे, वि. द्रुमस्तु पादपे पारिजाते किम्पुरुषेश्वरे, हे. द्रुमो यक्षेश्वरे वृक्षे, त्रि द्रुमो वृक्षे प. शैलेय. माने.

द्रू. द्रू: स्वर्णे कामरूपिणि, वि द्रू कामरूपिणि स्वर्णे, हे.

द्रोण. द्रोणोऽस्त्रियामाढ़के स्यादाढ़कानां चतुष्टये। पुमान् क्षपीपतौ दग्धकाके स्त्री नीवृदन्तरे। तथा काष्ठाम्बुवाहिन्यां गवाद-न्यामपीष्यते, मे. द्रोण क्षपीपतौ कृष्णकाके स्यादाढ़केऽपि च। आढ़-कानां चतुष्के च द्रोणी स्यान्नीवृदन्तरे। द्रोणी काष्ठाम्बुवाहिन्यां गवां घासभुजि स्थितौ, वि. द्रोण: पार्थगुरौ काके माने द्रोणी तु नीवृति। नौभेदे शैलभेदे च, हे. अथ द्रोण. काकेऽपि, अ. काठा गावेऽम्बुवाहिन्यां शैलसन्धौ च योषिति। द्रोणी न स्त्री मानभेदे द्रोण: काक: क्षपीपतौ, त्रि. द्रोण: सम्राट् कौरवाचार्य्यो द्रोण: काक इतीरित:। द्रोणो गिरिविशेषश्च द्रोण: स्याच्चतुराढ़क:, अने.

द्रोहाट. द्रोहाट: कथितो गाथाप्रभेदे स्मृगलुब्धके। वैड़ालव्रतिके च, मे, वि. द्रोहाटो मृगलुब्धके। चतुष्पदीप्रभेदे च विड़ालव्रतिकेऽपि च, हे.

द्वन्द द्वन्दं रहस्येऽत्र कलहे तथा मिथुनयुग्मयो:, मे. द्वन्द्वो रहस्येऽत्र कलहे द्वन्दं मिथुनयुग्मयो:, वि. द्वन्द: से द्वन्दमाहवे। रहस्येऽत्र मिथुने युग्मे, हे. द्वन्दं कलहयुग्मयो:, अ

द्वापर. द्वापर: संशये युगे, मे, वि, हे. द्वापरौ युगसंशयौ, अ सन्देहेऽपि द्वापरमाहु:, ध.

द्वार द्वारं निर्गमनेऽपि स्याद् अभ्युपाये, मे. द्वारं पुन निर्ग-मनेऽभ्युपाये, वि द्वारं निर्गमेऽभ्युपाये, हे. उपाये निर्गमे द्वारम्, त्रि.

द्विक दिक: स्यात् काककोकयो:, मे, हे. द्विक: काके च कोके च, वि द्विकौ काकचक्रवाकौ, त्रि

द्विज द्विज: स्याद् ब्राह्मणक्षत्रवैश्यदन्ताण्डजेषु ना। द्विजा भार्गीं हरेणौ च, मे द्विजा विप्रेऽण्डजे दन्ते भाण्डारेणुकयो द्विजा, वि द्विजो विप्रक्षत्रिययो वैश्येऽत्र दन्ते विहङ्गमे। द्विजा भार्गीरेणुकयो:, हे दन्तविप्राण्डजा द्विजा:, अ दन्तविप्रौ तथा द्विज, धने.

द्विजन्मन्. द्विजन्मा दशने विप्रे, मे, वि. द्विजन्मानौ रदविप्रौ, हे. द्विजन्मा दन्तविप्रयोः, त्रि.

द्विजाति. द्विजाति विप्राण्डजयोश्च पुंलिङ्गः, मे. द्विजातिरण्डजे विप्रे, वि. द्विजाति र्ब्राह्मणेऽण्डजे, हे.

द्विजराज. द्विजराजस्तु चन्द्रेऽनन्ते गरुत्मति, मे. द्विजराजः शशधरे सुपर्णेऽनन्तभोगिनि, वि. द्विजराजस्तु शशाङ्के गरुडेऽपि च, हे. हंसेऽग्नौ गरुडे चन्द्रे द्विजराज इति ध्वनिः, अने.

द्विजिह्व. (ह्व) द्विजिह्वस्तु खले सर्पे, मे. द्विजिह्वो भुजगे खले, वि. द्विजिह्वः खलसर्पयोः, हे. द्विजिह्वौ सर्पसूचकौ, ध. द्विजिह्वः सूचको ज्ञेयो द्विजिह्वस्तु भुजङ्गमः, अने. दृष्टिविषे सूचके च द्विजिह्वः परिकीर्त्तितः, हा.

द्वितीय. द्वितीया तिथिभित्पत्न्योः पूरणे द्वभये त्रिषु, मे. द्वितीया तिथिभित्पत्न्योः पूरणत्रामपि च द्वयोः, वि. द्वितीया तिथिगेहिन्यो-र्द्वितीयः पूरणे द्वये, हे. द्वितीया तिथिभित्पत्न्योः, त्रि. सपत्न्यामपि द्वितीया, ह.

द्वीपवत्. द्वीपवान् सिन्धुनदयो र्द्वीपवत्यापगाभुवोः, मे, वि.

द्वैमातुर. द्वैमातुरो जरासन्धवारणाननयोः पुमान्, मे. द्वैमातुरो जरासन्धवारणाननयो र्मतः, वि.

ध. धो ना धर्मे कुबेरे च क्लीवं तु वसुनि स्मृतम्। धो धा च ब्रह्मणि ख्यातो धा तु स्याद् धारकेऽपि च, मे. मीनेशः सात्वतः मौति र्वामपादाङ्गुलीगतः। धनेशो धरणीशश्च धकारो दान्तिमः स्मृतः, मा.

धट. धटो दिव्यतुलायां स्याद् धटी चीरे च वाससः, मे. धटी खण्डे च वाससः। परीक्षार्थतुलायां च धटः सूरिभिरिष्यते, वि.

धन. धनं तु गोधने वित्ते, मे. धनं गोधनवित्तयोः, वि. धनं वित्ते गोधने च स्मृतम्, हे.

धनञ्जय. धनञ्जयोऽर्ज्जुने वह्निनागदिग्देहमारुते, मे. धनञ्जयोऽर्ज्जुने वह्नौ ककुभे देहमारुते। नागान्तरे च, वि. धनञ्जयो नागभेदे ककुभे देहमारुते। पार्थेऽग्नौ, हे. पार्थेऽग्नौ च धनञ्जयः, त्रि.

धनद. धनदस्तु कुवेरे स्यात् पुंलिङ्गो दातरि त्रिषु, मे. धनदो दातरि श्रीदे, वि धनदौ दातृगुह्यकौ, हे.

धनिक धनिका साधुनार्यां ना धन्याके त्रिषु साधुधनिनोश्च, मे धनिकः साधुधन्याकधवेषु धनिका स्त्रियाम्, वि. धनिको धान्यके धवे। धनाढ्ये धनिका वध्वाम्, हे.

धनु धनुः पुमान् पियालद्रौ राशिभेदे शरासने, मे. धनुसंज्ञा पियालद्रौ राशिभेदे शरासने, वि. धनुशब्दः पियालद्रौ राशिभेदे धनुष्यपि, हे.

धनुस्. धनुः पियाले ना न स्त्री राशिभेदे शरासने। धनुर्धरे त्रिषु, मे. धनुः पियालद्रुमराशिभेदयोः शरासने चापि धनु र्धनुर्धरे, वि. धनुः शरासने राशौ पियालद्रौ धनुर्धरे, हे.

धन्य. धन्या धात्र्यामलक्योः स्याद् धन्यं पुण्यवति त्रिषु, मे. धन्यो धनवति स्मृतः। धन्या धान्यामलक्योश्च, वि. धन्यः पुण्ययुते धन्यामलक्यामुपमातरि, हे.

धन्वन् धन्वा तु मरुदेशे ना क्लीवं चापे स्थलेऽपि च, मे. धन्वा जाङ्गलदेशे स्याद् धन्व चापे स्थलेऽपि च, वि. धन्व स्थलचापयोः, हे. धन्वा मरौ धन्व चापे, त्रि

धन्विन् धन्वी धनुर्धरेऽपि स्यादर्ज्जुने ककुभद्रुमे, मे. धन्वी धनुर्धरे पार्थे विदग्धे ककुभद्रुमे, वि. धन्वी पार्थे च्छेके ककुभचापिनोः, हे

धमन धमनो नाऽनले भस्त्राध्मापकक्रूरयोस्त्रिषु। धमनी तु शिराहट्टविलासिन्योश्च योषिति, मे. धमनोऽप्यनले भस्त्राध्मापकक्रूरयोः स्मृता। धमनी तु हरिद्रायां कन्धराशिरयोरपि, वि धमनोऽनले। क्रूरे भस्त्राध्मापके च धमनी कन्धरा शिरा। हरिद्रा च, हे.

धर. धरो गिरौ। कार्पासतूलके कूर्मराजे वस्वन्तरेऽपि च। धरा विश्वम्भरायाञ्च स्त्री गर्भाशयमेदसोः, मे. धरस्तु शैले कार्पासतूलके कमठाधिपे। धरा मेदसि भूम्यां च स्त्रीणां गर्भाशयेऽपि च, वि. धरः कूर्माधिपे गिरौ। कार्पासतूलेऽथ धरा मेदोभूमिजरायुषु, हे. धरा पृथ्वी धरा धारा धरः शैलो धरा धृतिः, अने. (धरो धूर्ते च पर्वते, अने.) धरा पृथ्वी धरो गिरिः, त्रि.

धरण. धरणं मानभेदेऽपि धारणे धरणी भुवि, मे, वि. धरणं धारणे मानविशेषे धरणी भुवि, हे.

धराधर. धराधरो हरौ शैले, मे. धराधरः प्माभृति दकपाणौ, वि धराधरः। कृष्णोऽद्रौ च, हे. हरिशैलौ धराधरौ, त्रि.

धरुण. धरुणः सम्मते नीरे स्वर्लोके परमेष्ठिनि, मे, वि.

धर्म. धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ। अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे, मे. धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ। उपमायामहिंसायां चापे चोपनिगद्यते, वि. धर्मो यमोपमापुण्यस्वभावाचारधन्वसु। सत्सङ्गेऽर्हत्यहिंसादौ न्यायोपनिषदोरपि। धर्मं दानादिके, हे. धर्मोऽहिंसोपमायोगोपनिषद्सु धनुष्यपि, त्रि.

धर्मण. धर्मणस्तु पुमान् वृक्षभेदसर्पभभेदयोः, मे. धर्मणोऽहिद्रुभेदयोः, वि.

धर्मराज. धर्मराजो यमे बुद्धे युधिष्ठिरनृपे पुमान्, मे. धर्मराणो यमे बुद्धे धर्मराजो युधिष्ठिरे, वि. धर्मराणस्तु सुगते श्राद्धदेवे युधिष्ठिरे, हे. धर्मराजो जिनयमौ, अ.

धर्षण. धर्षणं स्यात् परिभवे रतेऽसत्यां तु धर्षणी, मे, वि. धर्षणं रतेऽभिभवे धर्षणी त्वभिसारिका, हे. असतौ स्याद् धर्षणी च धर्षणा निकृतौ रते, त्रि.

धव. धवः पुमान् नरे धूर्ते पत्यौ वृक्षान्तरेऽपि च, मे. धवः पत्यौ नरे धूर्ते वृक्षभेदेऽपि कीर्तितः, वि. धवो धूर्ते नरे पत्यौ द्रुभेदे, हे. पति-

शाखिनरा धवाः, अ. धवो धूर्त्तेऽपि, त्रि. धवः पति र्धवो मर्त्त्यो वृक्षजाति-र्धवो मतः, अने.

धवल. धवला गवि। दृषभ्येष्ठे पुमान् वाच्यलिङ्गः शुक्ले च सुन्दरे, मे. धवलः सुन्दरे सिते। महोक्षे चाथ धवली सौरभेयशु-सुदीरिता, वि. धवलो महोक्षे सुन्दरे सिते। धवली गौः, हे. धवला गवि ना श्रेष्ठे शुक्लसुन्दरयोस्त्रिषु, त्रि.

धातु. धातु र्नेन्द्रियेषु च। शब्दयोनिमहाभूततद्गुणेषु रसा-दिषु। मनःशिलादौ श्लेष्मादौ विशेषाद् गैरिकेऽस्थ्नि च, मे. धातू-रसादौ श्लेष्मादौ भूादिग्रावविकारयोः। महाभूतेषु लोकेषु शब्दादावि-न्द्रियेऽस्थनि, हे. धातुः स्यादश्मविकृतौ विषयेष्विन्द्रियेषु च। भुवादि-रसरक्तादिश्लेष्मादिवसुधादिषु। वर्त्तते धातुशब्दोऽयं विशेषादस्ति गैरि-के, वि. श्लेष्मादिरसरक्तादिमहाभूतानि तद्गुणाः। इन्द्रियाण्यश्मविकृ-तिः शब्दयोनिश्च धातवः, अ. वातादिप्रकृति र्धातु र्धातु र्देहरसादिकः। क्रियाभावः स्मृतो धातु र्धातुः शैलोपलोद्भवः, अने. पृथिव्यादिषु भूतेषु शरीरेषु रसादिषु। लाहेषु च स्मृतो धातुः स्वभावे गैरिकादि-षु, रु. राशौ च धातुः, त्रि.

धातृ. धाता हिरण्यगर्भे ना पालके त्रिषु, मे. धात्री जनन्या-मलकीवसुमत्युपमातृषु, मे. धाता हिरण्यगर्भ स्यात् पालके त्वभि-धेयवत्, वि. धात्री जनन्यामलकीवसुमत्युपमातृषु, वि. धात्री भुव्युप-मातरि। आमलक्यां जनन्यां च, हे. धाता वेधस पालके, हे. धात्री स्यादुपमाताऽपि चितिरप्यामलक्यपि, अ. धात्री भुव्यामलक्यां च, त्रि. धातकी प्रोच्यते धात्री धात्री चामलकी तथा। धात्री वसुन्धरा ज्ञेया धात्री स्यात् स्तनदायिनी, अने.

धाना. धाना भृष्टयवेऽपि च। धान्याकेऽभिनवोद्भिन्ने, मे. धाना भृष्टयवे प्रोक्ता धान्याकेऽभिनवोद्भिदि, वि. धाना भृष्टयवेऽङ्कुरे धान्याके चूर्ण-

धान्य  धान्यं ब्रीहिषु धान्याके, मे, वि  धान्यं तु ब्रीहौ धान्याके, हे

धामन्  धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः, मे, वि धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः, हे  गृहदेहत्विट्प्रभावा धामानि, अ  प्रभावे तेजसि स्थाने धामशब्दो निगद्यते, अने

धामार्गव  धामार्गवस्तु पुंसि स्याद् अपामार्गे च घोषके, मे. धामार्गवस्त्वपामार्गे देवदालप्रामपि स्मृत, वि  धामार्गवस्तु घोषके। अपामार्गेऽपि, हे

प्रतिसर. भवेत् प्रतिसरो मन्त्रभेदे मालेव च कङ्कणे । व्रणशुद्धौ चमूपृष्ठे पुंसि न स्त्री तु मण्डने । आरक्षे करसूत्रे च नियोज्ये त्वन्यलिङ्गकः, मे. आरक्षः प्रतिसरं हस्तसूत्रे मालेऽपि मण्डने । व्रणशुद्धौ चमूपृष्ठे नियोज्यारक्षकङ्कणे । मन्त्रभेदेऽपि, त्रि. प्रतिसरश्चमूपृष्ठे नियोज्यकरसूत्रयोः । मन्त्रभेदे व्रणशुद्धे चारक्षे मण्डने स्रजि । कङ्कणे, हे. ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम्, श.

प्रतिसूर्यक. प्रतिसूर्यकमिच्छन्ति शकलासोपसूर्ययोः, वि.

प्रतिसृष्ट. प्रतिसृष्टः प्रेषिते स्यात् प्रत्याख्याते च वाच्यवत्, मे, वि. प्रतिसृष्टः पुनः प्रत्याख्याते च प्रेषितेऽपि च, हे. प्रत्याख्याते प्रेषिते च प्रतिसृष्टं त्रिलिङ्गकम्, त्रि.

प्रतिहत. प्रतिहतस्तु विद्दिष्टे प्रतिस्खलितरुद्धयोः, हे. भवेत् प्रतिहतो द्दिष्टे प्रतिस्खलितरुद्धयोः, वि, मे. द्दिष्टेऽपि च प्रतिहतः, त्रि.

प्र(ती)तिहार. प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायान्तु योषिति, मे. प्रतीहारप्रतीहार्यौ द्वाःस्थे द्वारेऽप्यनन्तरे, वि. प्रतीहारो द्वारि द्वाःस्थे, हे. द्वारेऽपि प्रतिहारः, श. द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्यप्यनन्तरे, श.

प्रतीक. प्रतीकोऽवयवेऽपि स्यात् प्रतिकूलविलोमयोः, मे. प्रतीकोऽवयवे प्रोक्तः प्रतिकूलविलोमयोः, वि. प्रतीकोऽङ्गप्रतीपयोः, हे. प्रतिकूले प्रतीकस्त्रिष्वङ्के तु पुंसयम्, श.

प्रतीचर. * प्रतीचरः प्रतिपालेऽप्र सप्रात् पूजेऽप्र च, हे.

प्रतीत. प्रतीतः सादरे ज्ञाते हृष्टप्रख्यातयोस्त्रिषु, मे. प्रतीतः सादरे ज्ञाते प्रख्याते प्राज्ञहृष्टयोः, वि. प्रतीतः सादरे प्राज्ञे प्रथिते ज्ञातहृष्टयोः, हे. ख्याते हृष्टे प्रतीतः, ध. प्रतीतः सादरेऽपि च, त्रि. v. वसन्तदूत.

प्रत्यच् ( च् ). प्रत्यग् दिग्देशकालेषु वाच्यवच्चिन्तयेऽव्ययम्, मे. v. उदच्.

प्रत्यय. प्रत्ययः प्रथितत्वे च सनादिज्ञानयोरपि। आचारे शपथे रन्ध्रे विश्वासाधीनहेतुषु, मे. प्रत्ययः शपथे रन्ध्रे विश्वासाचारहेतुषु। प्रथितत्वे सनादौ चापत्राधीनज्ञानयोरपि। अतिक्रमे च दण्डे च विनाशे दोषकृच्छ्रयोः, वि. प्रत्ययो ज्ञानरन्ध्रयोः। विश्वासे शपथे हेतौ आचारे प्रथितत्वयोः। अधीने निश्चये स्यादौ, हे. प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु। रन्ध्रे शब्दे, ध.

प्रत्यर्थिन्. प्रत्यर्थी वाच्यलिङ्गः स्यात् शत्रौ च प्रतिवादिनि, मे. प्रत्यर्थी कथितः शत्रौ प्रत्यर्थी प्रतिवादिनि, वि.

प्रत्यालीढ. प्रत्यालीढन्तु चरणन्यासभेदेऽशिते त्रिषु, मे.

प्रत्युद्गमनीय. प्रत्युद्गमनीयमुपस्थेये धौतांशुकद्वये, मे, वि, हे.

प्रत्रप. प्रत्रपोऽङ्कुशे वशौ, मे, वि. प्रत्रपः स्याद् वशौ मतः, हे.

प्रथम. प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत्, मे. प्रथमः स्यात् प्रधानाद्योः, हे. आद्ये प्रधाने प्रथमस्त्रिषु, ध.

प्रदर. प्रदरो रोगभेदे स्याद् विदारे शरभङ्गयोः, मे. प्रदरो रोगभेदे स्यात् प्रदरः शरभङ्गयोः, वि. प्रदरः शरे। भङ्गे रोगे, हे. प्रदरा भङ्गनारीरुग्बाणाः, ध. प्रदरौ रोगमार्गणौ, अने.

प्रदेश. प्रदेशो देशमात्रे स्यात् तर्जन्यङ्गुष्ठसम्मिते। भित्तावपि च, मे. प्रदेशो देशमात्रे स्यात् तर्जन्यङ्गुष्ठसम्मिते। भित्तावपि प्रदेशः स्यात्, वि. प्रदेशो देशमात्रके। भित्तौ मानविशेषे च, हे.

प्रदोष. प्रदोषः समये दोषे, मे. प्रदोषः कालभेदे स्यात् प्रदोषो दोष इष्यते, वि. प्रदोषः कालदोषयोः, हे.

प्रधन. प्रधनं दारणे रणे, मे, वि. प्रधनं युधि दारणे, हे.

प्रधान. प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि। प्रज्ञायामपि च क्लीवमेकत्वे तूत्तमे सदा, मे. प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि। प्रज्ञायाञ्च प्रधानं स्याद् एकत्वे तु सदोत्तमे, वि. प्रधानं प्रकृतौ बुद्धावुत्तमे परमात्मनि। महामात्रे, हे. प्रधानं परमात्मा धीः, श्र. प्रधानं प्रकृतावपि, रु. प्रधानं प्रकृतिः स्यान् प्रधानं विदुरुत्तमम्, अने.

प्रधूपिता. प्रधूपिता क्लेशितायां सूर्येत्रगन्तर्यादिश्यपि, मे, वि. प्रधूपिता क्लेशितायां रविगन्तव्यदिश्यपि, हे.

प्रपञ्च. प्रपञ्चः सञ्चयेऽपि स्याद् विस्तरे च प्रतारणे, मे. प्रपञ्चः सञ्चये प्रोक्तो विस्तरे च प्रतारणे, वि. प्रपञ्चो विप्रलम्भने। विस्तरे सञ्चये चापि, हे. विपर्यासे विस्तरे च प्रपञ्चः, श्र.

प्रपात. प्रपातो निर्झरेऽतटे, मे. प्रपातो निर्झरे भृगौ, वि. प्रपातौ भृगुनिर्झरौ, त्रि. प्रपातः सौप्तिके भृगौ, हे.

प्रपितामह. प्रपितामह इत्येष विधौ पितृपितामहे, वि, मे.

प्रवाल. प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे, मे. प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे, वि. प्रवालो विद्रुमे वीणादण्डेऽभिनवपल्लवे, हे. प्रवालमङ्कुरेऽप्यस्त्री, श्र. वीणादण्डे प्रवालोऽस्त्री विद्रुमे नवपल्लवे, त्रि. वीणादण्डः प्रवालः स्यात् प्रवालः पल्लवः स्मृतः। प्रवालो विद्रुमः प्रोक्तः प्रवालः सबलो गजः, अने.

प्रभव. प्रभवो जलमूले स्यात् जन्महेतौ पराक्रमे। ज्ञानस्य चादिमस्थाने, मे. प्रभवो जलमूले स्यात् जन्मभूमौ पराक्रमे। चाद्योपलब्ध्ये स्थाने, वि. प्रभवो जन्मकारणे। चाद्योपलब्ध्ये स्थानेऽपां मूले सुनिभिदापि, हे. स्यात्जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये, श्र.

प्रभाकर. प्रभाकरोऽग्निसूर्ययोः, मे.

प्रभाव. प्रभावः शक्तितेजसोः, मे, वि. प्रभावस्तेजसि शक्तौ, हे.

प्रभूत. प्रभूतमुद्गते प्राज्ये, मे, हे. प्रभूतं प्राज्य उद्गते, वि.

प्रमथ. प्रमथा स्यादुरीतक्यां हरपारिषदे पुमान्, मे. प्रमथोऽपि गणे प्रोक्तः पथ्यायां प्रमथा भवेत्, वि

प्रमद. प्रमदः सम्मदे मत्ते स्त्रियामुत्तमयोषिति, मे. प्रमदः सम्मदे मत्तकामिन्यां प्रमदा मता, वि. प्रमदो मुदि। प्रमदा स्त्री, हे.

प्रमाण प्रमाणं नित्यमर्यादाशास्त्रेषु सत्यवादिनि। इयत्तायाञ्च हेतौ च क्लीवैकत्वे प्रमातरि, मे. प्रमाणं नित्यमर्यादासत्यवादिप्रमातृषु। एकतायामियत्तायां हेतुशास्त्रेषु च स्मृतम्, वि. प्रमाणन्तु मर्यादासत्यवादिनोः। प्रमातर्येकतेयत्तानित्येषु हेतुशास्त्रयोः, हे. प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु, ध. शास्त्रे प्रमाणमिच्छन्ति स्थितौ हेतौ च कोविदाः, धने.

प्रमीढ़. प्रमीढ़ो मूत्रिते घने, वि, मे.

प्रमीत. प्रमीतं वाच्यलिङ्गं स्यात् प्रोक्षितेऽपि मृतेऽपि च, मे. प्रमीतन्तु प्रोक्षितेऽपि मृतेऽपि च, वि. प्रमीतं प्रोक्षिते मृते, हे.

प्रमुख प्रमुखः प्रथमे श्रेष्ठे, मे, वि. प्रमुखं प्रथमे मुख्ये, हे. चाद्रौ प्रधाने प्रमुखम्, त्रि.

प्रयाग. प्रयागस्तीर्थभेदे स्याद् यज्ञे शतमखाश्वयोः, मे, वि प्रयागो वाजिशक्रयोः। यज्ञे तीर्थविशेषे च, हे.

प्रयोग. प्रयोगः कार्मणेऽपि स्यात् प्रयुक्तौ च निदर्शने,, मे. प्रयोगः कार्मणे प्रोक्तः प्रयुक्तौ च निदर्शने, वि. प्रयोगस्तु निदर्शने। कार्मणे च प्रयुक्तौ च, हे.

प्रयोजन. प्रयोजनं कार्यहेत्वोः, मे, वि, हे.

प्ररूढ़. प्ररूढ़ो जरठे बद्धमूले, मे. प्ररूढ़ो जरठे स्मृतः। बद्धमूले, वि. प्ररूढ़ो जरठे वृद्धे, हे.

प्रलम्ब. प्रलम्बो दैत्यभेदे स्यात् त्रपुषेऽपि पयोधरे। लता-

ङ्क,रेऽपि शाखायां हारभेदे प्रलम्बने, मे. प्रलम्बो दैत्यभेदे स्यात्‌ बालाङ्क,रकशाखयोः। प्रलम्बो हारभेदे स्यात्‌ त्रपुसेऽपि पयोधरे, वि. प्रलम्बस्तु प्रलम्बनम्‌। दैत्यस्त्वालाङ्क,रः शाखा, हे. प्रलम्बो दैत्यशाखयोः, त्रि. v. प्रालम्ब.

प्रलय. प्रलयो स्त्वत्रकल्पान्तमूर्च्छापायेषु पुंस्त्रयम्‌, मे. प्रलयो मृतौ। संहारे नष्टचेष्टत्वे, हे.

प्रवचन. अथ प्रवचनं वेदे प्रकृष्टवचनेऽपि च, मे. प्रवचनं श्रुतं वेदे प्रकृष्टवचनेऽपि च, वि. स्यात्‌ प्रवचनमागमे। प्रकृष्टवचने, हे.

प्रवचनीय. अथ प्रवचनीयश्च स्यात्‌ प्रवक्तृप्रवाचयोः, मे. भवेत्‌ प्रवचनीयाख्यं प्रवाचेत्र च प्रवक्तरि, वि.

प्रवण. प्रवणो ना चतुष्पथे। क्रमनिम्नमहीभागोदारप्रह्वेषु च त्रिषु, मे. प्रवणः क्रमनिम्नोर्व्यामायत्ते च चतुष्पथे। प्रगुणेऽपि क्षणेऽपि स्यात्‌, वि. प्रवणस्तु क्षणे प्रह्वे क्रमनिम्ने चतुष्पथे। आयत्ते च, हे. प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे, अ.

प्रवर. प्रवरः सन्ततौ गोत्रे क्लीवं श्रेष्ठे तु वाच्यवत्‌, मे. प्रवरं सन्ततौ गोत्रे श्रेष्ठे तु प्रवरोऽन्यवत्‌, वि. प्रवरं सन्ततौ गोत्रे श्रेष्ठे च, हे.

प्रवह. प्रवहस्तु वहिर्यात्रामातरिश्वप्रभेदयोः, मे. प्रवहो वायुभेदे स्याद्‌ वायुमात्रे वहिर्गतौ, हे.

प्रवारण. प्रवारणं निषेधे स्यात्‌ काम्यदाने च न द्वयोः, मे. प्रवारणं निषेधे स्यात्‌ काम्यदाने प्रवारणम्‌, वि. प्रवारणं काम्यदाने निषेधे च, हे.

प्रवाह. प्रवाहस्तु प्रवृत्तौ स्यादपि स्रोतसि वारिणः, मे. प्रवाहो व्यवहारे स्याद्‌ अपि स्रोतसि वारिणः, वि. प्रवाहो व्यवहाराम्बुवेगयोः, हे. प्रवाहो व्यवहारे च, त्रि.

प्रविदारण. प्रविदारणमाख्यातं सम्परायेऽवदारणे, मे. प्रवि-

दारणमाख्यातं सङ्गरे च विदारणे, वि. प्रविदारणम्। दारणे युधि च, हे.

प्रवृत्ति प्रवृत्तिस्तु प्रवाहे स्यादुदन्ते च प्रवर्त्तने। स्ववक्यादौ च (स्त्रियां), मे. प्रवृत्तिः कथिता वृत्तौ प्रवाहोदन्तयोरपि, वि. प्रवृत्ति वृत्तौ वार्त्तायां प्रवाहे, हे. वृत्तिवार्त्ताप्रवाहेषु प्रवृत्तिः, त्रि.

प्रवेणि. प्रवेणिः स्त्री कुथावेण्योः, मे. प्रवेणि वेणिकुथयोः, वि, हे.

प्रव्रजिता. अथ प्रव्रजिता मांसीमुण्डीरीतापसीषु च, मे. प्रव्रजिता तपस्विन्यां मुण्डीर्यां मांसिकौषधौ, वि. प्रव्रजिता तु मुण्डीर्यां तापस्यां मांसिकौषधे, हे.

प्रष्ठ. प्रष्ठस्त्रिष्वग्रगे श्रेष्ठे पुंसि चण्डालिकौषधौ, मे. प्रष्ठः श्रेष्ठाग्रयोरुक्तः प्रष्ठा चण्डालिकौषधौ, वि.

प्रष्ठहायन. सत्रात् प्रष्ठहायनो धान्यविशेषे च मतङ्गजे, मे.

प्रसन्न. प्रसन्ना स्त्री सुरायां सत्रात् स्वच्छसन्तुष्टयोस्त्रिषु, मे. प्रसन्ना मदिरायाञ्च प्रसादसहितेऽन्यवत्, वि. प्रसन्नं प्रसादवत्। प्रसन्ना तु मदिरायाम्, हे.

प्रसर. प्रसरः प्रणये वेगे, मे. प्रसरः प्रणये वेगे सङ्गरे च, वि. प्रसरस्तु सङ्गरे प्रणये जवे, हे. प्रसरः प्रणयेऽपि निर्दिष्टः, श.

प्रसव. प्रसवो गर्भमोचने। उत्पादे स्यादपत्येऽपि फलेऽपि कुसुमेऽपि च, मे. प्रसवस्तु फले पुष्पे वृक्षाणां गर्भमोचने। लोकोत्पादे च, वि प्रसवः पुष्पफलयोरपत्ये गर्भमोचने। उत्पादे च, हे. स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने, श.

प्रसव्य. प्रसव्यं वाच्यलिङ्गं स्यात् प्रतिकूलानुकूलयोः, मे. प्रसव्यमनुकूले स्यात् प्रतिकूले च वाच्यवत्, वि. प्रसव्यस्तु प्रतिकूलानुकूलयोः, हे.

प्रसहन. प्रसहनमपि भङ्गे स्यात् क्षेपे, मे.

... प्रसाद. प्रसादोऽनुग्रहे काव्यगुणस्वास्थ्यप्रसत्तिषु, मे, वि. प्रसादोऽनुग्रहस्वास्थ्यप्रसत्तिषु। काव्यगुणे, हे सत्रात् प्रसादोऽनुरागेऽपि, श. प्रसादस्त्वनुरोधने। स्वच्छे काव्यगुणे च, त्रि.

प्रसाधन. प्रसाधनी तु कङ्कत्यां सिद्धौ वेषे प्रसाधनम्, मे. प्रसाधनी कङ्कतिकासिद्ध्यो र्वेषे प्रसाधनम्, वि. प्रसाधनी कङ्कतिकासिद्ध्योः प्रसाधनं पुनः। वेषे, हे.

प्रसिद्ध. प्रसिद्धो भूषिते ख्याते, मे, हे. प्रसिद्धोऽलङ्कृतेऽपि च। विख्यातेऽपि च, वि. प्रसिद्धौ ख्यातभूषितौ, ध.

प्रसू. प्रसूरश्वाजनन्योश्च कन्दलीवीरुधोः स्त्रियाम्, मे. प्रसूरश्वाजनन्योश्च कन्दलीवीरुधोरपि, वि. प्रसूरश्वा जनन्यपि, हे. प्रसूरश्वाऽपि, ध.

प्रसूत. प्रसूतं कुसुमे क्लीवं त्रिषु सञ्जातसूतयोः, मे. प्रसूतं वाच्यवज्जाते प्रसूतं कुसुमेऽपि च, वि. प्रसूतं जातपुष्पयोः, हे.

प्रसूति. प्रसूतिश्चङ्गवेऽपि स्यात् तनये दुहितर्य्यपि। स्त्रियाम्, मे. प्रसूतिस्तनयोत्पत्तौ तथा दुहितरि स्मृता, वि. प्रसूतिः स्त्रादपत्ये प्रसवेऽपि च, हे. प्रसूति र्जन्मतोकयोः, त्रि.

प्रसून. प्रसूनो वाच्यवज्जाते क्लीवन्तु फलपुष्पयोः, मे. प्रसूनं वाच्यवज्जाते प्रसूनं फलपुष्पयोः, वि. प्रसूनन्तु प्रसूते फलपुष्पयो, हे. प्रसूनं पुष्पफलयोः, ध.

प्रसृत. प्रसृतः सुप्रसारे स्यात् विनीते वेगिते त्रिषु। अर्धाञ्जलौ तु पुंलिङ्गः जङ्घायां प्रसृता मता, मे. प्रसृतः सुप्रसारे स्यात् विनीते वेगितेऽपि च। अर्धाञ्जलौ तु प्रसृतं जङ्घायां प्रसृता मता, वि. प्रसृतस्त्वर्धाञ्जलौ वेगिविनीतयोः। तते च प्रसृता जङ्घा, हे. प्रसृतः कुञ्चिते पाणौ जङ्घायां स्त्री गते त्रिषु, त्रि.

प्रसेक. प्रसेकः सेचने स्रुतौ, मे, वि.

प्रसेव. प्रसेवः पुंसि वीणाङ्गे स्यूते च, मे. प्रसेवः कथितो धीरै-र्वीणाङ्गस्यूतयोरपि, वि. प्रसेवस्तु वीणाङ्गस्यूतयो र्गौ, हे.

प्रस्तार. प्रस्तारो ग्रावणि मणौ, मे. प्रस्तारः प्रस्तारे ग्रावणि मणौ च, हे. व. संस्तर.

प्रस्थ. प्रस्थोऽस्त्रियां मानभेदे सानावभ्निरसानि. मे. प्रस्थः गिव्हर-

मानयोः, वि. प्रस्थः सानौ मानभेदे, हे. प्रस्थोऽस्त्री सानुमानयोः, च. परिमाणेऽपि प्रस्थः, छ.

प्रस्फोटन. प्रस्फोटनं तु शूर्पे स्यात्ताड़ने च विकाशने, मे. प्रस्फोटनं भवेत् शूर्पे ताड़ने च प्रकाशने, वि. प्रस्फोटनं शूर्पे प्रकाशने। ताड़ने, हे.

प्रस्रुत. प्रस्रुतं विततं घृष्टे, मे, वि प्रस्रुतं विस्मृते घृष्टे, हे.

प्रहसन. प्रहसनमपि प्रहासे रूपकभेदे च परिहासे, मे. प्रहसनन्तु प्रहासाक्षेपयो रूपकान्तरे, हे. प्रहसनं भवेद् भङ्गं प्रहासाक्षेपयोरपि, वि.

प्रह्वि. प्रह्विः कूपः प्रह्विः सरः, धनं.

प्रह्लाद. प्रह्लादः प्रमदे दैत्ये, वि. प्रह्लादस्तु निनदे दानवान्तरे, हे.

प्राच् (च्). प्राक् पूर्वस्मिन्नव्यान्तरे। अग्रे प्रभातेऽतीते च देशे दिक्कालयोरपि, मे. प्राक् प्रभातेऽप्यतीते च दिग्देशकालतः स्मृतम्। प्रागग्रेऽपि च पूर्वस्मिन् भवे प्रागव्ययन्तरे, वि. प्राक् पूर्वस्मिन् प्रभाते दिग्देशकालेष्वव्यान्तरे। अतीतेऽग्रे, हे. प्राक्शब्दो दिशि देशे च काले च वाच्यलिङ्गकः, मे.

प्राण. प्राणो हृन्मारुते बाले काव्यजीवेऽनिले बले। पुंलिङ्गः पूरिते वाच्यलिङ्गः पुंभूम्नि चासुषु, मे. प्राणो हृन्मारुते बाले काव्यजीवेऽनिले बले। वाच्यवत् पूरिते प्राणं प्राणाश्चासुषु कीर्त्तिताः, वि. प्राणोऽनिले बले। हृद्वायौ पूरिते गन्धरसे प्राणास्तु जीविते, हे बाले वाते बले प्राणः पूर्णे पुंभूम्नि चासुषु, त्रि.

प्राणक. प्राणकः सत्त्वजातीये जीवकद्रुमबोलयोः, मे, वि. प्राणकौ जीवकतरौ सत्त्वजातीयबोलयोः, हे

प्राणनाथ. प्राणनाथो यमे ना स्यादिष्टे प्राणाधिपे मतः, मे.

प्राणिद्यूत. प्राणिद्यूतं यदन्ति युद्धेऽपि, छ

प्राति. प्रातिः पूर्तिप्रदेशयोः स्त्रियाम्, मे. प्राप्तिः पूर्तिप्रदेशयोः, वि.

प्रादुस्. नामप्राकाश्ययोः प्रादुः, श्र. प्रादुः प्राकाश्य दृश्यते। सम्भावे च प्रवृत्तौ च, मे.

प्राध्व. प्राध्वन्तु प्रणते चातिदूरवर्त्मनि वन्धने, मे. प्राध्वं सुप्रणते चातिदूरवर्त्मनि वन्धने, वि. प्राध्वं दूरपथे प्रह्वे वन्धे, हे. प्राध्वं वन्धनमितुग्रक्तं प्राध्वं प्रह्वे च सूरिभिः, धने. प्रह्ववन्धनयोः प्राध्वं, रु.

प्राध्वम्. प्राध्वं नत्वानुकूलयोः, मे, वि, हे.

प्रान्तर. प्रान्तरं विपिने दूरशून्यवर्त्मनि कोटरे, मे, वि. प्रान्तरं कोटरेऽरण्ये दूरशून्यपथेऽपि च, हे.

प्राप्त. प्राप्तं लब्धे समक्षके, मे. प्राप्तं विन्ते समक्षके, वि. लब्धे समक्षके प्राप्तम्, त्रि.

प्राप्तरूप. प्राप्तरूपो बुधरम्ययोः, मे. प्राप्तरूपो बुधे रम्ये, वि. प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः, श्र. V. सुरूप.

प्राप्ति. प्राप्ति र्महोदये। लाभेऽपि च स्त्रियाम्, मे. प्राप्ति र्लाभे महोदये, वि. प्राप्ति र्महोदये लाभे, हे. उदयेऽधिगमे प्राप्तिः, श्र. उदयाधिगमौ प्राप्ती, धने.

प्राय. प्रायः पुमान् अनशने मृत्यौ बाहुल्यतुल्ययोः, मे. प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपि, वि. प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोः, हे. प्रायो भूम्न्यन्तगमने, श्र. प्रायो ना भूमतुल्ययोः, त्रि.

प्रार्थित. प्रार्थितं याचिते शत्रु संरुद्धेऽभिहते त्रिषु, मे. प्रार्थितं याचिते शत्रुसंरुद्धेऽभिहतेऽपि च, वि. प्रार्थितं हते। याचिते शत्रु संरुद्धे, हे. अभियुक्तहतौ च प्रार्थितौ समौ, त्रि

प्रालम्ब प्रालम्बः स्यात् पयोधरे। लपुपे हारभेदे च, हे. V. प्रलम्ब.

प्रावृषेण्य. प्रावृषेण्यः पुमान् नीपे प्रावृट्कालभवे त्रिषु, मे.

प्रासाद. प्रासादो देवभूपयो र्गृहे, मे. प्रासादः कथ्यते देवनरदेवनिवासयोः, वि. प्रासादो राजमन्दिरे। देवतायतने चापि, हे.

प्रिय प्रियो हृद्येऽन्यवत् पुंसि ऋद्धिनामौषधौ धवे, मे. प्रियो धवे चौहृद्ये च ऋद्धिनामौषधेऽपि च, वि प्रियो ऋद्धयौषधे हृद्ये धवे, हे.

प्रियंवद. प्रियंवदः खेचरे ना प्रियवाचि तु वाच्यवत्, मे. प्रियंवदः खेचरे स्यात् प्रियवाचि तु वाच्यवत्, वि. प्रियंवदः प्रियवादिनभश्चरविशेषयोः, हे.

प्रियक. प्रियकः पीतशालके। नीपे चित्रमृगे चाली प्रियङ्गौ कुङ्कुमेऽपि च, मे. प्रियकस्तु चम्वरीके नीपे काश्मीरजन्मनि। प्रियङ्गौ चित्रहरिणे पीतशालतरावपि, हे. प्रियकः पीतशाले स्यान्नीपे चित्रमृगेऽलिनि। कुङ्कुमे च प्रियङ्गौ च, वि. प्रियको मृगनीपयोः, त्रि प्रियको बीजसारश्च प्रियकौ द्वौपिचित्रकौ। प्रियकं प्रियतोयं स्यात् प्रियको मुक्तिको व्रती, अने.

प्रियङ्गु. प्रियङ्गुः स्त्री राजिकाकणयोरपि। फलिन्यां कङ्गुसंज्ञे च, मे. प्रियङ्गुः फलिनीकङ्गुपिप्पलीराजिकासु च, वि. प्रियङ्गू राजसर्षपे। पिप्पल्यां फलिनीकङ्ग्वोः, हे.

प्रीत. प्रीतं हृषितनर्मणोः, मे, वि

प्रीति. प्रीतिर्योगान्तरे प्रेम्णि स्मरपत्नीमुदोः स्त्रियाम्, मे. प्रीतिर्योगान्तरे प्रेम्णि स्मरपत्नीप्रमोदयोः, वि. प्रीतिः स्मरस्त्रियाम्। प्रेम्णि योगमुदोः, हे.

प्रेघा. प्रेघा ऋतेरघणे मुद्दौ, मे, वि. प्रेघा धीरोघणं ऋत्यम्, हे. प्रेघा ऋतेरघणं प्रघा, अ.

प्रेङ्खा. प्रेङ्खा पर्यटनेऽप्यश्वगतौ संवेशनान्तरे, मे प्रेङ्खा पर्यटने नृत्ये दोलायां वाजिनां गतौ, हे. प्रेङ्खा पर्यटने नृत्ये भवेदश्वगतावपि, वि.

प्रेत. प्रेतो भूतान्तरे पुंसि मृते स्याद् वाच्यलिङ्गकः, मे. प्रेतो मृते भूतविशेषे च, हे प्रेतो भूतान्तरे मृते, वि. प्रेतः प्राण्यन्तरे मृते, अ. प्रेतो मृते प्राणिभेदे, त्रि.

प्रेत्य. प्रेत्यामुत्र भवान्तरे, ह.

प्रेत्वन्. प्रेत्वा ना वासवे वाते, मे. [illegible]

प्रेमन्. प्रेमाऽस्त्री स्नेहहर्षयोः, मे. प्रेम नर्मणि च स्नेहे, वि. प्रेम तु स्नेहनर्मणोः, हे.

प्रैष. प्रैषः क्लेशे च मर्दने। उन्मादे प्रेषणे, मे. प्रैषः स्यात् प्रेषणे क्लेशे मर्दनोन्मादयोरपि, वि. प्रैषः प्रेषणपीड़ने, हे. प्रैषः प्रेषणमर्दने, अ.

प्रोक्षण. प्रोक्षणं सेचने वधे, मे, त्रि.

प्रोक्षित. प्रोक्षितं निहते सिक्ते, मे, वि. प्रोक्षितं सिक्तहतयोः, हे. सिक्ते तु प्रोक्षितं निहतेऽपि च, त्रि.

प्रोत. प्रोतं नपुंसकं वस्त्रे खचिते वाच्यलिङ्गकम्, मे. प्रोतं गुम्फित-वासयोः, हे. प्रोतं तु गुम्फिते वस्त्रे, वि.

प्रोथ. प्रोथोऽस्त्री हयघोणायां ना कटग्रामध्वगे त्रिषु, मे. प्रोथोऽध्वगे-ऽश्वघोणायां कटीस्त्रीगर्भयोरपि, वि. प्रोथोऽश्वघोणाध्वगयोः, हे. कटग्र-श्वघोणयोः प्रोथः, त्रि. प्रोथमित्युच्यते प्राज्ञैर्हलशूकरयो र्मुखे, रु.

प्रोष्ठ. प्रोष्ठो गजाङ्घ्रिपर्वणोः। वाच्यवन्निपुणे तर्के, मे. प्रोष्ठो निपुणतर्के स्यात् प्रोष्ठो हस्त्यङ्घ्रिपर्वणोः, वि. प्रोष्ठो निपुणतर्के स्याद् गजाङ्घ्रिपर्वणोरपि, हे.

प्लक्ष. प्लक्षो जटीगर्दभाण्डद्वीपभित्कुञ्जराशने, मे. प्लक्षो द्वीपविशेषे स्यात् पर्कटीगर्दभाण्डयोः। पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्त्तितः, वि. प्लक्षो द्वीपे गर्दभाण्डेऽश्वत्थे जटिनि पर्कके, हे.

प्लव. प्लवः स्यात् प्लवने भेले भेकेऽवौ श्वपचे कपौ। जलकाके च कुलके प्रवणे पर्कटीद्रुमे। कारण्डवाख्यविहगे शब्दे प्रतिगतौ पुमान्। कैवर्त्तमुस्तके गन्धतृणेऽपि स्यान्नपुंसकम्, मे. प्लवः कारण्डवे भेके कुलके भेलके कपौ। शब्दे सुतगतौ प्लक्षे चण्डालजलकाकयोः। प्लवं गन्धतृणे प्रोक्तं कैवर्त्तीमुस्तकेऽपि च, वि. प्लवः प्लक्षे सुतौ कपौ। शब्दे कारण्डवे म्लेच्छजातौ भेलकभेकयोः। क्रमनिम्नमहीभागे कुलके जलवायसे। जला-न्तरे प्लवं गन्धतृणे मुस्तकभिद्यपि, हे. प्लवो निषादे मर्कटयां भेके भेले गतौ कपौ. त्रि

प्लवग(ङ्ग). प्लवगो वानरे भेके सारथौ चोष्णदीधितेः, मे, वि. प्लवगः कपिभेकयोः। चार्कसूते, हे. कपौ च प्लवगः, ध. प्लवङ्गः कपिभेकयोः, अने.

प्लवङ्गम. प्लवङ्गमस्तु मण्डूके तथा शाखामृगेऽपि च, मे. प्लवङ्गमः कपौ भेके, वि, हे. कपिभेकौ प्लवङ्गमौ, ध.

प्लुत. प्लुतं तुरङ्गमगतौ क्लीबं पुंसि त्रिमात्रके, मे. प्लुतं तुरङ्गमगतौ प्लुतमाङ्गस्त्रिमात्रके, वि. प्लुतमश्वस्य गतौ प्लुतस्त्रिमात्रके, हे. प्लुतः स्वरे च, त्रि. ह्रस्वं दीर्घं प्लुतं चेयं प्लुतं चित्तव्यथा प्लुतिः, अने.

फ. फो यज्ञसाधने ख्याते भञ्झावातेऽपि पुंस्त्रयम्। फं रुपोक्तौ फूत्कृतौ च तथा निष्फलभाषणे, मे. कफे वाते फकारः स्यात् तथा ख्याते प्रकीर्तितः। फूत्कारेऽपि च फः प्रोक्तस्तथा निष्फलभाषणे, ए. जनार्दनः शिखी रौद्री वामपार्श्वस्ततालयः। फट्कारः प्रोच्यते सद्भिः फकारः पान्तिमः स्मृतः, मा.

फटा. फटा तु फणदम्भयोः, मे. फटा तु कितवे फणे, हे. फटा च फणदम्भयोः, वि.

फणा. गोविषाणे फणा ज्ञेया भुजङ्गमशिरः फणा। फणा फटा फणा स्फटा फणा मन्यनकुण्डली, अने.

फर्फरीक. फर्फरीकश्चपेटे स्यात् फर्फरीकन्तु मार्दवे, मे, वि. फर्फरीकन्तु मार्दवे। फर्फरीकश्चपेटायाम्, हे.

फल. फलं जातिफले सस्ये हेतुत्थे व्युष्टिलाभयोः। त्रिफलायां च कक्कोले प्रियङ्गौ च फली स्मृता, मे. फलं हेतुसमुत्थे स्यात् फलके व्युष्टिलाभयोः। जातिफलेऽपि कक्कोले सस्यशस्त्राग्रयोरपि॥ फलिन्यां तु फलां प्राङ्स्त्रिफलायां फलं क्वचित्, वि. फलं हेतुफले जातीफले फलकसस्यराः। त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः॥ फली फलिन्याम्, हे. सस्ये हेतुकृते फलम्, ध. फलं जातीफले लाभे बाणाग्रे फलकेऽपि च, त्रि.

फलकिन्. फलकी मत्स्यभेदे ना वाच्यवत् फलकान्विते, मे. फलकी स्यादिल्लिसाख्यमत्स्ये फलकपाणिके, वि.

फलिन्. फलिन्यग्निशिखायां स्त्री फलिन्यां फलिते त्रिषु, मे.

फलोदय. फलोदयः पुमान् लाभे त्रिदिवेऽप्यालयेऽपि च, मे. फलोदयः स्यात् त्रिदिवे लाभेऽपि च फलोदयः, वि. फलोदयो द्युसलाभयोः, हे. स्वर्गलाभौ फलोदयौ, त्रि.

फाणि. फाणि गुडे करम्भे च स्त्रियाम्, मे. फाणि गुडकरम्भयोः, वि, हे, श.

फाण्ट. अनायासकृतेऽपि फाण्टम्, श.

फाल. फालः पुंसि महादेवे कालिन्दीभेदनेऽपि च। क्लीवं सीरोपकरणे त्रिषु कार्पासवाससि, मे. फालं सीरोपकरणे कार्पासादिकवाससि, वि. फालस्तु वस्त्रभेदे फाल उत्प्लुतौ।' कुशिके च, हे.

फाल्गुन. फाल्गुनस्तु गुडाकेशे नदीजार्जुनभूरुहे। तपस्यसंज्ञे मासि तत्पूर्णिमायां तु फाल्गुनी, मे. फाल्गुनस्तु तपस्ये स्यात् पूर्णिमायां तु फाल्गुनी। फाल्गुनः कथितः पार्थे नदीजे ककुभेऽपि च, वि. फाल्गुनो मासपार्थयोः। नदीजेऽर्जुनवृक्षे च फाल्गुनी पूर्णिमाभिदि, हे. फाल्गुनो मासि पार्थे च, त्रि.

फेनिल. फेनिलोऽरिष्टपादपे। ना सफेने त्रिषु क्लीवं कोलीमदनयोः फले, मे. फेनिलः स्यादरिष्टे च फेनिलं बदरीफले। मदनस्य फले चाथ फेनिलोऽरिष्टपादपे, वि. फेनिलं मदनफले बदरे फेनवत्यपि, हे. फेनिलं बदरेऽरिष्टे, त्रि.

फेरव. फेरवो जम्बुकेऽरक्षपे, मे, वि. फेरवो राक्षसे फेरौ, हे.

ब. (बः पुमान् वरुणे सिन्धौ भगे तोये गते तु वा। गन्धने तन्तुसन्ताने पुंस्येव वपने स्मृतः, मे.) छगलान्त्रो भूधरश्च भगष्ठगतस्तथा। सुरसो वरुणमुष्टिश्च बकारो आदिमो मतः, मा.

बक. बकस्तु बकपुष्पे स्यात् कह्ने श्रीदे च रक्षसि, मे, वि. बको

भिदि श्रीदे शिवमल्लीवकोटयोः, हे. शिवमल्लयां बकः करु, लि.

बकेरुका. बकेरुका बलाकाभिद्वातावर्जितशाखयोः, मे, वि. बके- ा बलाधिका। वातावर्जितशाखा च, हे.

वणिज्. अथ वणिक् स्त्रियाम्। वणिज्यायां पुमान् बाणिजके करणान्तरे, मे. वणिक् बाणिज्यजीविनि। वणिक् करणभेदे च वणि- ज्यायामपीष्यते, वि. वनिग् वानिज्यजीविनि। वानिज्ये करणभेदे हे.

बदर. बदरा गृष्टिकार्पासयोरेलापर्ण्यां स्त्रियां पुमान्। कार्पा- सास्थ्नि बदरी कोलौ क्लीवन्तु तत्फले, मे. बदरं कोलिकार्पासयोः फले याद् बदरी तयोः। एलापर्ण्याञ्च बदरा विष्णुक्रान्तौषधावपि, वि. दरा स्यादेलापर्ण्यां विष्णुक्रान्तौषधावपि। बदरी कोलिकार्पासयो- दरन्तु तयोः फले। बदरस्तु कार्पासास्थ्नि, हे.

बहुशिख. अथ बहुशिखा स्त्री स्यादुच्चटायां शिखी त्रिषु, मे. बहुशिखोच्चटायां स्याद् बाले बहुशिखो मतः, वि. बहुशिखो बाले बहु- शिखोच्चटौषधे, हे.

बन्ध. बन्ध आधौ च बन्धने, मे, हे. बन्धस्त्वाधौ बन्धने, वि.

बन्धक. बन्धकः स्याद् विनिमये पुंश्चल्यां स्याच्च बन्धकी, मे. बन्धकः स्याद् विनिमये पुंश्चली स्याच्च बन्धकी, वि. बन्धकस्तु सतत्रद्धारे- ऽथ बन्धकी। स्वैरिण्याञ्च करिण्याञ्च, हे करिण्यामपि बन्धकी, लि.

बन्धन. बन्धनं वधबन्धयोः, मे, वि.

बन्धु. बन्धुः स्यात् पुंसि बन्धूके मित्रे भ्रातरि बान्धवे, मे. बन्धु- र्बन्धूकपुष्पे स्याद् बन्धु भ्रातरि बान्धवे, वि. बन्धु भ्रातृबान्धवयोः, हे.

बन्धुर. बन्धुरं मुकुरे पुंसि क्लीवाङ्गतैलकल्कयोः। बन्धूके बधिरे हंसे त्रिषु स्याद् रम्यनम्रयोः। बन्धुरा पण्ययोषायां स्त्रियां भूम्नि च सक्तुषु, मे. बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः। बन्धूके च विडङ्गे च बन्धुरा पण्ययोषिति, वि. बन्धूरो रम्यनम्रयोः। बन्धुरन्तु

तयो र्हंसे बन्धुजीवविडङ्गयोः। बन्धुरा पण्यत्रयोषायाम्, हे. बन्धुरं रम्य नम्रयोः, त्रि.

बन्धूक. बन्धूकं बन्धुजीवे सत्राद्, बन्धूकः पीतशालके, मे, वि बन्धूके: पीतशालके। बन्धुजीवे, हे.

बन्धूर. बन्धूरः शोभने नम्रे, मे. V. बन्धुर.

बन्ध्य. बन्ध्यस्त्वफलद्रुमादौ स्त्रियां सत्रादप्रजःस्त्रियाम्, मे. बन्ध्यो ऽफलद्रुमे बन्ध्या त्वप्रजातस्त्रियामपि, वि.

बभ्रु. बभ्रु वैश्वानरे शूलपाणौ च गरुडध्वजे। विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत्, मे. बभ्रु विशाले नकुले कृशानौ वज्रे मुनौ शूलिनि पिङ्गले च, वि. बभ्रुः पिङ्गाग्निशूलिषु। विशाले नकुले विष्णौ, हे. विपुले नकुले विष्णौ बभ्रुर्ना पिङ्गले त्रिषु, अ. बभ्रू नकुलपिङ्गलौ, अने. बभ्रुः सत्रान्नकुलेऽपि च, ह

बर्बटी. बर्बटी पण्यत्रयोषायां व्रीहिभेदे च योषिति, मे. बर्बटी व्रीहिभेदे सत्राद्, बर्बटी पण्यत्रयोषिति, वि. बर्बटी व्रीहिभिद् वेश्या, हे. वर्बट्यौ व्रीहिभिद्वेश्ये, त्रि.

बर्बर बर्बरः पामरे केशे चक्रले नीवृदन्तरे। फञ्जिकायां पुमान्, शाकभेदपुष्पभिदोः स्त्रियाम्, मे. बर्बरः पामरे केशविन्यासे नीवृदन्तरे। बर्बरा फञ्जिकायां तु बर्बरा शाकपुष्पयोः, वि. बर्बरो नीवृदन्तरे। बर्बरा तु फञ्जिकायां पामरे केशचक्रले। पुष्पे च बर्बरा शाके, हे.

बर्बरीक. बर्बरीकः केशविन्यासकर्मणि। शाकभेदे महाकाले, हे

बर्ह. बर्हं पिच्छे दले स्त्रियाम्, मे बर्हं दले केकिपिच्छे, वि. बर्हं पर्णे परिवारे कलापे, हे. दलेऽपि बर्हम्, अ

बल बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः। पुमान् हलायुधे दैत्यभेदे वायसेऽपि च। बलयुक्तोऽन्यलिङ्ग. सत्राद्, वाय्यालके तु योषिति, मे. बलं गन्धरसे रूपे स्थामनि स्थौल्यसैनयोः। बलो हलायुधे दैत्यभेदे बलिनि वायसे। वाय्यालके बला हका, वि. बलं रूपे स्थामनि स्थौल्यसैन्ययोः।

मौलें बलस्तु बलिनि काके दैत्ये हलायुधे। बला त्वोषधिभेदे स्यात्, हे. स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः, म. बलं गन्धरसे रूपे स्थौल्यं वाच्यालके स्त्रियाम्, त्रि. बलो हली बलं सैन्यं बलं सत्त्वं बलौषधी। रत्न-जोति बलो दैत्यो बला लक्ष्मी बला मही, अने. बलः काके, ह.

बलज. बलजं गोपुरक्षेत्रे शस्यसङ्गरयोरपि। बलजा वरयोषायां यूथ्याम्, मे. बलजं गोपुरे क्षेत्रे सस्यसङ्गरयोरपि। बलजा वरयोषायां वसुमत्यामपि स्मृता, वि. बलजं गोपुरे शस्ये क्षेत्रसङ्गरयोरपि। सदाकारे बलजा तु पृथिव्यां वरयोषिति, हे. बलजे क्षेत्रपूर्द्वारे बलजा वल्गुदर्शना, अ.

बलदेव. बलदेवो बले वाते त्रायमाणौषधौ स्त्रियाम्, मे. बलदेवः स्मृतो वाते कालिन्दीभेदनेऽपि च। बलदेवामपि प्राज्ञः त्रायमाणौषधे बुधाः, वि. बलदेवस्तु कालिन्दीकर्षणे मातरिश्वनि। बलदेवा त्रायमाणा, हे.

बलभद्र. बलभद्रा त्रायमाणाकुमार्योः पुंसि सीरिणि, मे. बलभद्रो रौहिणेये त्रायमाणौषधावपि। बलभद्रा कुमार्यां स्यात्, वि. बलभद्रस्त्वनन्ते बलशालिनि। बलभद्रा कुमार्यां स्यात् त्रायमाणौषधावपि, हे.

बलाक. बलाका बकपंक्तौ स्याद् बलाका विसकण्ठिका। बलाका कामुकी प्रोक्ता बलाकश्च बको मतः, वि.

बलाहक. बलाहको गिरौ मेघे दैत्यनागविशेषयोः, मे, वि. बलाहकोऽम्बुदे गिरौ। दैत्ये नागे, हे. गिरिमेघौ बलाहकौ, त्रि.

बलि. बलि दैत्यप्रभेदे च करचामरदण्डयोः। उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि। गृहदारुप्रभेदे च जठरावयवेऽपि च, मे. बलिश्चामरदण्डे च जरया श्लथचर्मणि। उदरावयवे दैत्ये करपूजोपहारयोः। गृहदारुविशेषे च गन्धकेऽपि कचिन् मतः, वि. बलि दैत्योपहारयोः। करे चामरदण्डे च गृहदारूदरांशयोः। त्वक्सङ्कोचे गन्धके च, हे. बलिश्चामरदण्डेऽपि, श्रा. करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्, अ. बलिर्भराश्लथत्वे च गृहदार्वसुरौ बलौ, त्रि. बलिः स्त्री मध्यभागोर्मि बलिचर्म

तयो र्हंसे बन्धुजीवविडङ्गयोः। बन्धुरा पण्यस्त्रीयायाम्, हे. बन्धुरं रम्य-नम्रयोः, त्रि.

बन्धूक. बन्धूकं बन्धुजीवे स्त्राद्, बन्धूकः पीतशालके, मे, वि. बन्धूके पीतशालके। बन्धुजीवे, हे.

बन्धूर. बन्धूरः शोभने नम्रे, मे. v. बन्धुर.

बन्ध्य. बन्ध्यस्त्वफलदृच्छादौ स्त्रियां स्यादप्रजःस्त्रियाम्, मे. बन्ध्यो-ऽफलद्रुमे बन्ध्या त्वप्रजातस्त्रियामपि, वि.

बभ्रु. बभ्रु वैश्वानरे शूलपाणौ च गरुड़ध्वजे। विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत्, मे. बभ्रु विशाले नकुले कृशानौ वज्रे मुनौ शूलिनि पिङ्गले च, वि. बभ्रुः पिङ्गाग्निशूलिषु। विशाले नकुले विष्णौ, हे. विपुले नकुले विष्णौ बभ्रुर्ना पिङ्गले त्रिषु, श्र. बभ्रू नकुलपिङ्गलौ, अने. बभ्रुः स्यान्नकुलेऽपि च, श्व.

बर्बटी. बर्बटी पण्ययोषायां व्रीहिभेदे च योषिति, मे. बर्बटी व्रीहि-भेदे स्याद् बर्बटी पण्ययोषिति, वि. बर्बटी व्रीहिभिद् वेश्या, हे. वर्बट्यौ व्रीहिभिद्वेश्ये, त्रि.

बर्बर. बर्बरः पामरे केशे चकले नीष्टदन्तरे। फञ्जिकायां पुमान् शाकभेदपुष्पभिदोः स्त्रियाम्, मे. बर्बरः पामरे केशविन्यासे नीष्टदन्तरे। बर्बरा फञ्जिकायां तु बर्बरा शाकपुष्पयोः, वि. बर्बरो नीष्टदन्तरे। बर्बरा तु फञ्जिकायां पामरे केशचकले। पुष्पे च बर्बरा शाके, हे.

बर्बरीक. बर्बरीकः केशविन्यासकर्मणि। शाकभेदे महाकाले, हे.

बर्ह. बर्हं पिच्छे दले स्त्रियाम्, मे. बर्हं दले केकिपिच्छे, वि. बर्हं पर्णे परिवारे कलापे, हे. दलेऽपि बर्हम्, श्व.

बल. बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः। पुमान् हलायुधे दैत्यभेदे वायसेऽपि च। बलयुक्तोऽन्यलिङ्गः स्याद् वाट्यालके तु योषिति, मे. बलं गन्धरसे रूपे स्थामनि स्थौल्यसेनयोः। बलो हलायुधे दैत्यभेदे बलिनि वायसे। वाट्यालके बला तत्का, वि. बलं रूपे स्थामनि स्थौल्यसैन्ययोः।

योलें बलस्तु बलिनि काके दैत्ये हलायुधे। बला त्वोषधिभेदे स्यात्, हे. स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः, अ. बलं गन्धरसे रूपे क्लीवं वाह्यालके स्त्रियाम्, त्रि. बलो हली बलं सैन्यं बलं सत्त्वं बलौषधी। रक्तजोति बलो दैत्यो बला लक्ष्मी बला मही, अने. बलः काके, ह.

बलज. बलजं गोपुरक्षेत्रे प्रसस्यसङ्गरयोरपि। बलजा वरयोपायां यूथ्याम्, मे. बलजं गोपुरे क्षेत्रे सस्यसङ्गरयोरपि। बलजा वरयोपायां वसुमत्यामपि स्मृता, वि. बलजं गोपुरे प्रक्षेत्र क्षेत्रसङ्गरयोरपि। सदाकारे बलजा तु पृथिव्यां वरयोपिति, हे. बलजे क्षेत्रपूर्द्वारे बलजा वल्गुदर्शना, अ.

बलदेव. बलदेवो बले वाते त्रायमाणौषधौ स्त्रियाम्, मे. बलदेवः स्मृतो वाते कालिन्दीभेदनेऽपि च। बलदेवामपि प्राज्ञः त्रायमाणौषधे बुधाः, वि. बलदेवस्तु कालिन्दीकर्षणे मातरिश्वनि। बलदेवा त्रायमाणा, हे.

बलभद्र. बलभद्रा त्रायमाणाकुमार्य्योः पुंसि सीरिणि, मे. बलभद्रो रौहिणेये त्रायमाणौषधावपि। बलभद्रा कुमार्य्यां स्यात्, वि. बलभद्रस्त्वनन्ते वलशालिनि। बलभद्रा कुमार्य्यां स्यात् त्रायमाणौषधावपि, हे.

बलाक. बलाका बकपंक्तौ स्याद् बलाका विसकण्ठिका। बलाका कामुकी प्रोक्ता बलाकश्च बको मतः, वि.

बलाहक. बलाहको गिरौ मेघे दैत्यनागविशेषयोः, मे, वि. बलाहकोऽम्बुदे गिरौ। दैत्ये नागे, हे. गिरिमेघौ बलाहकौ, त्रि.

बलि. बलि दैत्यप्रभेदे च करचामरदण्डयोः। उपहारे पुमान् स्त्री तु जरया श्लथचर्म्मणि। गृहदारुप्रभेदे च जठरावयवेऽपि च, मे. बलिश्चामरदण्डे च जरया श्लथचर्म्मणि। उदरावयवे दैत्ये करपूजोपहारयोः। गृहदारुविशेषे च गन्धकेऽपि क्वचिन् मतः, वि. बलि दैत्योपहारयोः। करे चामरदण्डे च गृहदार्व्वदरांशयोः। त्वक्सङ्कोचे गन्धके च, हे. बलिश्चामरदण्डेऽपि, श. करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्, अ. बलिर्जराश्लथत्वे च गृहदार्व्वसुरौ बलौ, त्रि. बलिः स्त्री मध्यभागोर्म्मि वलिश्चर्म्म

जराकृति। बलिः पूजोपहारः स्यात्, बलि र्दानवसत्तमः, अने. बलिः करे, ह.

बल्य. बल्यं प्रधाने धातौ स्यात् क्लीवं बलकरे त्रिषु, मे. बल्यं प्रधाने धातौ स्यात् क्लीवं बलकरेऽपि च, वि. बलत्रं रेसोबलक्षतो:, हे.

बहु. बहु त्र्यात् त्र्यादिसंख्यासु विपुलेऽप्यभिधेयवत्, मे. बहु त्र्याद् विपुले त्र्यादिसंख्यासु त्वभिधेयवत्, वि. बहु भूयसि। त्र्यादिकासु च संख्यासु, हे. बहु विपुलसंख्ययो:, त्रि.

बहुक. बहुकः कर्कटेऽर्के च दात्यूहे जलखादके, वि. बहुको जलखादके। दात्यूहे कर्कटेऽर्के च, हे. v. बाहुक.

बहुफल. भवेद् बहुफलो नीपे नाऽस्त्रलक्याम्तु योषिति, मे. भवेद् बहुफलाभिख्या मलपूनीपदृवयो:, वि. बहुफलः पुनः। नीपे बहुफली फल्गौ, हे.

बहुरूप. बहुरूपः शिवे विष्णौ धूनके सरटे स्मरे, मे, वि. बहुरूपः स्मरे विष्णौ सरटे धूनके शिवे, हे.

बहुल. बहुला नीलिकायां स्यादेलायां गवि योषिति। कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम्। पुंस्यग्नौ कृष्णपक्षे च वाच्यवत् प्राज्यकृष्णयो:, मे. बहुलः कृष्णपक्षेऽग्नौ शितौ च बहुला गवि। एलायां नीलिकायाञ्च बहुलाः कृत्तिकासु च। बहुलं प्राज्यनभसो:, वि. बहुलं भूरिवियतो र्बहुलः पावके शितौ। कृष्णपक्षे बहुला तु सुरभ्यां नीलिकैलयो:। बहुलास्तु कृत्तिकासु, हे. बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु, ध. बहुलः कृष्णपक्षेऽपि, त्रि. बहुलाः कृत्तिका ज्ञेया गावश्च बहुला मताः, अने.

बा. उपमायां विकल्पे बा, अ. v. वा.

बाणिजक. अथ बाणिजकः वाड़वाग्नौ वणिज्यपि, मे. बाणिजको वड़वाग्नौ वणिज्यपि, वि.

बाध. बाधा दुःखे निषेधे च, मे. बाधा दुःखनिषेधयो:, वि, हे, ह. निषेधदुःखयो र्बाधः, त्रि.

बान्धव. बान्धवो बन्धुसुहृदोः, मे, वि. बान्धवो बन्धुमित्रयोः, हे.

बार्दल. बार्दलं दुर्दिने मेलानन्दायां बार्दलः स्मृतः मे. बार्दलं दुर्दिने मेलानन्दायामपि वार्दलः, वि. बार्दलं दुर्दिने मसत्राम्, हे. मेलानन्देऽपि बार्दलम्, हा.

बार्वटीर. बार्वटीरो रङ्ग आमास्थ्ङ्कुरे गणिकासुते, मे. बार्वटीरस्तपावामास्थ्रङ्कुरे गणिकासुते, वि. बार्वटीरस्तपुन्यामास्थाङ्कुरे गणिकासुते, हे.

बाल. बालो ना कुन्तलेऽश्वसत्र करिणश्चापि बालधौ। नालिकेरे हरिद्रायां मल्लिकाभिदयपि स्त्रियाम्। वाच्यलिङ्गोऽर्भके मूर्खे क्लीबेरे पुंनपुंसकम्। अलङ्कारान्तरे मेध्ये बालो बाला तु टिस्त्रियोः, मे. बालः कचे शिशौ मूर्खे क्लीवेरेऽश्वेभपुच्छयोः। अलङ्कारान्तरे मेध्ये बालौ बाला त्रुटिस्त्रियोः, वि. बालोऽस्त्रेऽश्वेभपुच्छयोः। शिशौ क्लीवेरकचयो र्बाला तु त्रुटियोषितोः। बालो भूपान्तरे मेध्ये, हे. मूर्खेऽर्भकेऽपि बालः स्यात्, अ. बालो क्लीवेरकेशयोः, लि. बालः केशो जलं बालं बालं काश्चटणं स्मृतम्। बालो मूर्खः शिशु र्बालो बालो सेग उदाहृतः, अने.

बालक. बालकस्तु शिशावश्वे बालधौ हयहस्तिनोः। अङ्गुलीयकक्लीबेरवलये पुंसि बालिका। बालायां बालुकापत्रकाच्छलाकर्णभूषणे, मे. बालकोऽस्त्रे शिशौ केशे वाजिवारणबालधौ। अङ्गुलीयकक्लीबेरपारिहार्येषु बालकम्। बालिका बालुकाबालापिञ्जोलाकर्णभूषणे, वि. बालिका कर्णभूषणे। पिञ्जोलायां बालुकायां बालायां बालकः पुनः। शिशौ मूर्खेऽश्वगजयो र्बालधौ, हे. पिञ्जोला सिकता कर्णभूषा कन्या च बालिका, लि. बालकः खेचरो व्याघ्रो बालकः पृथुकः स्मृतः। बालकं गन्धद्रव्यञ्च जटाजूटञ्च बालकम्, अने.

बालिश. बालिशश्च शिशौ मूर्खे, मे. बालिशः शावके मूर्खे, वि. बालिशस्तु शिशौ मूर्खे, हे. शिशावर्भे च बालिशः च बालेऽपि बालिशः स्यात्, श.

बालेय. बालयो गर्दभे पुंसि स्त्री बलिहिते त्रिषु, मे. वालेयस्तु गर्दभे। बल्यर्थे कोमलाङ्गारवल्लर्यायाम्, हे. वालेयोऽङ्गारवल्लर्यां खरे बलिहिते त्रिषु, वि. वालेयौ मृदुगर्दभौ, त्रि.

बाल्हक. बाल्हकः कर्कटे चार्के दात्यूहे जलखातके, मे. v. बल्हक.

बाल्हज. बाल्हजः क्षत्रिये कीरे स्वयंजाततिलेऽपि च, मे, वि. बाल्हजस्तु स्वयंजाततिले क्षत्रियकीरयोः, हे.

बीभत्स. बीभत्सो नाऽर्जुने क्रूरघृणात्मविकृतौ त्रिषु, मे. बीभत्सो विकृते क्रूरेऽप्यर्जुने च घृणात्मनि, वि बीभत्सो विकृते क्रूरे रसे पार्थे घृणात्मनि, हे. बीभत्सो हिंस्रोऽपि, अ. रसे क्रूरे च विकृतौ बीभत्सस्त्रिषु नाऽर्जुने, त्रि.

बुक्कस. बुक्कसी नीलिकाकाल्यो बुक्कसः श्वपचेऽधमे, हे. v. पुक्कस.

बुद्ध. बुद्धो जिने लब्धवर्णे पुंसि स्याद् बुधितेऽन्यवत्, मे. बुद्धो जिने च धीरे च सौम्ये च बुधितेऽपि च, वि. बुद्धः पण्डिते बुधिते जिने, हे. बुद्धो ज्ञाते जिने बुधे, त्रि.

बुध. बुधः सौम्ये च पण्डिते, मे. बुधः सौम्ये कवौ, हे. बुधः कवौ रौहिणेये, वि. बुधवृद्धौ पण्डितेऽपि, अ. रौहिणेयकवौ बुधः, त्रि.

बुधान. बुधानस्तु गुरौ विज्ञे, मे. बुधानः पण्डिते गुरौ, वि.

बुघ्न. बुघ्नो ना मूलरुद्रयोः, मे. बुघ्नः शिफायां रुद्रे च, वि. बुघ्नस्तुखण्डगिरीशयोः, ह. v. ब्रघ्न.

बृ(बे)हती. बृहती वसनान्तरे। छन्दोभित्क्षुद्रवार्त्ताकीवारिधानीषु वाचि च। कण्टकारीमहत्योश्च, मे. बृहती क्षुद्रवार्त्ताक्यां कण्टकार्यां च वाचि च। वारिधान्यां महत्याश्च छन्दोवसनभेदयोः, वि. बृहती क्षुद्रवार्त्ताक्यां छन्दोवसनभेदयोः। महत्यां वाचि वार्धान्याम्, हे. बृहती क्षुद्रवार्त्ताकीच्छन्दोभेदे महत्यपि, अ.

बोधन. बोधनं गन्धदीपने। बोधनी बोधिपिप्पल्योः, मे. बोधनी बोधिपिप्पल्यो बोधनं गन्धदीपने, वि.

बोधि. बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपे, मे. बोधिः समाधिभेदे सत्राद्, बोधिः पिप्पलपादपे, वि. बोधि र्बौद्धसमाधौ चार्हद्धर्मोपतौ च पिप्पले, हे.

ब्रध्न ब्रध्नो गिरिश्नमूलयोः, हे. V. बुध्न.

ब्रह्मन्. ब्रह्म तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि। ऋत्विग्योगभिदो र्विप्रे, मे. ब्रह्मा विरिञ्चिद्विजयो ऋत्विक्चन्द्रार्कयोगयोः। ब्रह्म प्रोक्तं तपोऽध्यात्मवेदज्ञानेषु सूरिभिः, वि. ब्रह्म तु तपसि ज्ञाने वेदेऽध्यात्मे द्विजे विधौ। ऋत्विग्योगभिदोश्च, हे. वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः, अ. वेदाध्यात्मब्राह्मणहिरण्यगर्भेषु कथ्यते ब्रह्म, रु.

ब्रह्मण्य. ब्रह्मण्यो ब्रह्मसाधौ सत्राद्, ब्रह्मदारुशनैश्चरे, मे. ब्रह्मण्यो ब्रह्मणो हिते। शनैश्चरे, हे. ब्रह्मण्यो ब्रह्मसाधौ सत्राद्, ब्रह्मण्यश्च शनैश्चरे, वि.

ब्रह्मपुत्र. ब्रह्मपुत्रः क्षेत्रभेदे नदभेदे च पुंस्ययम्, मे.

ब्रह्मबन्धु. ब्रह्मबन्धुरधिक्षिप्ते निर्देशे ब्राह्मणस्य ना, मे. ब्रह्मबन्धुरधिक्षेपे निर्देशे च द्विजन्मनाम्, वि. ब्रह्मबन्धु र्निन्द्यविप्रे बान्धवे ब्राह्मणस्य च, हे. ब्रह्मबन्धुरधिक्षेपे निर्देशे, अ.

ब्राह्मण. ब्राह्मणं ब्रह्मसङ्घाते वेदभागे नपुंसकम्। भूमिदेवे तु पुंलिङ्गः फञ्जिकाश्वकयोः स्त्रियाम्, मे. ब्राह्मणी फञ्जिकास्पृक्काद्विजपत्नीषु विश्रुता। विप्रे तु ब्राह्मणो वेदे ब्राह्मणं विप्रसंहतौ, वि. ब्राह्मणं विप्रसंहतौ। वेदे च ब्राह्मणो विप्रे, हे. मन्त्राख्यवेदे विप्रौघे क्लीवं ना ब्राह्मणो द्विजे, लि.

ब्राह्मण्य. ब्राह्मण्यं ब्राह्मणत्वे च समूहे च द्विजन्मनाम्, मे. ब्राह्मण्यं ब्राह्मणत्वे स्यात् समूहे च द्विजन्मनाम्, वि. ब्राह्मण्यं ब्रह्मसङ्घेऽपि, लि.

ब्राह्मी ब्राह्मी तु फञ्जिकायां स्याच्छाकमत्स्यप्रभेदयोः। ब्राह्मी·

तु भारतीसोमवल्लरीब्रह्मशक्तिषु, मे. ब्राह्मी तु भारतीसोमवल्लरीब्रह्मशक्तिषु। फञ्जिकापङ्कगण्डिकाशाकभेदेषु च स्मृता, वि. ब्राह्मी तु भारती। शाकभेदः पङ्कगण्डी हञ्जिका सोमवल्लरी। ब्रह्मशक्तिः, हे.

भ. भं नक्षत्रे गभस्तौ स्त्री पुंसि स्याद् भृगुनन्दने, मे. भा स्यात् मयूखे शुक्रे भं नक्षत्रं च प्रकीर्त्तितम्, वि. भः शुक्रे भमुड़ौ भांऽशौ, हे. भक्षत्रे भृगुजे पुमान्, त्रि. नक्षत्रे भं बुधाः प्राहु र्भवने भः प्रकीर्त्तितः। दीप्ति र्भा स्यात्, ए. विश्वमूर्त्ति र्हिरण्डेशो निद्रा नाभिगतोऽपि च। भ्रुकुटी च भरद्वाजो भकारश्च जयापहः, मा.

भक्त. भक्तमन्ने तत्परे च, हे.

भक्ति. भक्ति र्विभागे सेवायां स्त्रियाम्, मे, वि. भक्तिः सेवागौणवृत्त्यो र्भङ्ग्यां श्रद्धाविभागयोः, हे. सेवाविभागयो र्भक्तिः, त्रि.

भग. भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्त्तिषु। माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षे च ना रवौ, मे. भगोऽर्कज्ञानमाहात्म्ययशोवैराग्यमुक्तिषु। रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु, हे. भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु। यशोवीर्यप्रयत्नेच्छाश्रीधर्मरविमुक्तिषु, वि. भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्त्तिषु, अ. भगं वैराग्ययोनीच्छाज्ञानैश्वर्येषु, त्रि. श्रियां यशसि सौभाग्ये योनौ कान्तौ महिम्नि च। सूर्यं संज्ञाविशेषे च शशाङ्के च भगश्रुतिः, अने.

भगवत्. भगवान् ना जिने गौर्यां स्त्रियां पूज्ये तु वाच्यवत्, मे. भगवान् बुद्धपूज्ययोः, वि. जिने पूज्ये च भगवान्, त्रि.

भङ्ग. भङ्गो जयविपर्यये। भेदरोगतरङ्गेषु भङ्गा शणप्रान्तरे स्त्रियाम्, मे. भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये। कौटिल्ये भयविच्छित्त्योर्भङ्गा शणे, हे. भङ्गस्तरङ्गे रुग्भेदे भेदे जयविपर्यये। भङ्गा शणाख्यसस्येऽपि, वि. तरङ्गभेदयो र्भङ्गः भङ्गा शस्ये शणाह्वये, त्रि. भङ्गः पलायनं वीचि र्भङ्गः शस्यस्य भञ्जनम्, अने.

भङ्गि. भङ्गिः पुन र्भक्तिवीच्योः, हे.

भङ्गुर. भङ्गुरी वक्रानश्वरौ, हे.

भट. भटः स्त्राद् पुंसि वीरे च विशेषे पामरस्त्र च, मे. भटो वीरे म्लेच्छभेदेऽपि च, हे. भटः पामरभेदे च वीरे च, वि.

भटि. अगमे भटिः, वि.

भट्टारक. भट्टारको नृपे नाटयवाचा देवे तपोधने, मे. भट्टारकः सुरे राज्ञि कथितश्च तपोधने, वि. भट्टारको राज्ञि मुनौ सुरे, हे. राज्ञि भट्टारकः सुरे, त्रि.

भट्टिनी. भट्टिनी द्विजभार्यायां नाटयोक्त्यां राजयोषिति, मे, वि. भट्टिनी तु ब्राह्मण्यां नृपयोषिति, हे

भण्डन भण्डनं कवचे युद्धे खलीकारेऽपि न द्वयोः, मे. भण्डनं कवचे युद्धे खलीकारे च वर्त्तते, वि. भण्डनं कवचे युधि। खलीकारे, हे.

भद्र. भद्रः शिवे खञ्जरीटे वृषे मेरुकदम्बके। करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः। काञ्चने च स्त्रियां रास्नाकृष्णाव्योमनदीषु च। तिथिभेदे प्रसारिण्यां कट्फलानन्तयोरपि॥ त्रिषु श्रेष्ठे च साधौ च न पुंसि करणान्तरे, मे. भद्रं स्यान्मङ्गले हेम्नि मुस्तके करणान्तरे। भद्रो रुद्रे वृषे रामचरे मेरुकदम्बके॥ हस्तिजात्यन्तरे भद्रो वाच्यवत् श्रेष्ठसाधुनोः। भद्रा मन्दाकिनीरास्नाकृष्णाऽनन्तासु कट्फले, वि. भद्रन्तु मङ्गले। मुस्तक-श्रेष्ठयोः साधौ काञ्चने करणान्तरे। भद्रो रामचरे हस्तिजातौ मेरुकदम्बके। गवि शम्भौ भद्रा विष्टौ नभःसरिति कट्फले। कृष्णानन्तारास्नासु च, हे.

भद्रकाली. भद्रकाली तु गन्धोल्यां कात्यायन्यामपि स्त्रियाम्, मे. भद्रकाली तु गन्धोल्यामुमायामोषधीभिदि, वि. भद्रकाल्यौषधीभिदि। गन्धोल्यां छत्रपत्रां च, हे.

भन्द. भन्दं कल्याणशर्मणोः, मे, वि. भन्दं कल्याणे सौख्ये च, हे.

भय भयं प्रतिभये घोरे प्रसूने कुब्जकस्य च, मे, वि. भयं भीतौ भयङ्करे। कुब्जकपुष्पे, हे. भयं भीकुब्जपुष्पयो, त्रि

भयानक भयानकः स्मृतो व्याघ्रे रसे राहौ भयङ्करे, मे भयानकः

स्मृतो व्याघ्रे सैंहिकेयेऽपि भीषणे, वि. भयानकस्तु भीषणे। व्याघ्रे राहौ रसे, हे.

भर. भरोऽतिशयभारयोः, मे, वि, हे, त्रि.

भरण. भरणी घोषके ऋक्षे भरणं वेतने भृतौ, मे. भरणी घोषके ऋक्षे भरणं वेतने भृतौ, वि.

भरत. भरतो नाट्यशास्त्रमुनौ नटे। रामानुजे च दौष्मन्तौ, मे. भरतो वाद्यभेदेऽपि दौष्मन्तौ शबरे नटे। रामानुजे च भरतस्तन्तुवायेऽपि च क्वचित्, वि. भरतः शबरे नटे। क्षेत्रे रामानुजे शास्त्रे दौष्मन्ता-ट्यपभालजे। तन्तुवाये, हे. रामानुजे नाट्यशास्त्रे दौष्मन्तौ भरतो नटे, त्रि.

भरद्वाज. भरद्वाजो गुरोः पुत्रे व्याघ्राटाख्यविहङ्गमे, मे, वि. भरद्वाजो गुरोः पुत्रे व्याघ्राटाख्ये च पक्षिणि, त्रि. भरद्वाजः पक्षिभेदे बृहस्पतिसुतेऽपि च, हे.

भरु. भरुः स्वर्णे हरे पुंसि, मे. भरु र्भर्तरि काञ्चने, वि. भरु र्भर्तृकनकयोः, हे.

भर्तृ. भर्ता स्वामिनि पुंसि स्यात् त्रिषु धातरि पोष्टरि, मे. भर्ता पोष्टरि धारके, हे. भर्ता स्वामिनि धारके, वि. भर्ता धातरि पोष्टरि, श्र.

भर्मन्. भर्म स्यात् काञ्चने भृतौ, मे. भर्म स्वर्णे भृतौ भानौ, वि. भर्म भारे भृतौ हेम्नि, हे. भृतिकाञ्चनयो र्भर्म, त्रि.

भल्ल. भल्लः स्यात् पुंसि भल्लूके शस्त्रभेदेऽपि न द्वयोः। भल्लातक्यां स्त्रियां भल्ली, मे. भल्लो भल्ली च बाणे स्याद् भल्लो भल्लूक इष्यते। भल्लातक्यां तु भल्ली स्यात्, वि. भल्लो भल्लूकबाणयोः। भल्ली भल्लातकः, हे.

भव. भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः, मे. भवः संसार-संप्राप्त्यैयःशङ्करजन्मसु, वि. भवः सत्ताप्तिजन्मसु। रुद्रे श्रेयसि संसारे, हे. जन्महरौ भवौ, च. सत्तासंसारयो र्भवः, शा. भवः संसारे, ह.

भवत्. भवद् युष्मत्सतोस्त्रिषु। स्त्री याप्यभेदे, मे. भवती याप्यभेदे स्यादन्यवत् त्वत्सदर्थयोः, वि. भवान् युष्मद् सदर्थयोः, त्रि.

भवन. भवनं स्याद्गृहे भावे, मे. भवनं भाववेश्मनोः, वि. भवनं सद्मे भावे, हे. जन्माश्रयश्च भवनम्, त्रि.

भव्य. भव्यं शुभे च सत्ये च योग्ये भाविनि तु त्रिषु। कर्मरङ्गतरौ पुंसि स्त्रियां करिकणोमयोः॥ क्लीवमस्थनि, मे. भव्यं सत्ये शुभे चाथ मेद्यवद् योग्यभाविनोः। कर्मरङ्गतरौ भव्यो भव्या करिकणोमयोः, वि. भव्यन्तु फले योग्ये शुभेऽस्थनि। सत्ये भाविनि भव्यस्तु कर्मरङ्गतरौ सति। भव्योमाकरिपिप्पल्योः, हे.

भषक. भषको दुर्जनः प्रोक्तो भषकः सरमासुतः, अने.

भसद्. भसत् स्त्री भास्वरे योनौ, मे. भसद् भास्वरमासयोः, हे. भसत् प्रभास्वरे मासे, वि.

भस्मक. भस्मकं रोगभेदे स्याद् विडङ्गकलधौतयोः, मे, वि.

भस्मतूल. भस्मतूलं ग्रामकूटे पांशुवर्षे हिमेऽपि च, मे, वि. भस्मतूलं पुन र्हिमे। ग्रामकूटे पांशुवर्षे, हे.

भाकूट. भाकूटः शैलभषयो र्भेदे स्यात्, मे. भाकूटः शैलमीनयोः, हे. भात् कूटः कथ्यते मीनभेदे शैलान्तरेऽपि च, वि.

भाग. भागो रूपार्धके भाग्यैकदेशयोः, मे, हे. भागो रूपार्धके प्रोक्तो भागधेयैकदेशयोः, वि. एकदेशांशयो र्भागः, त्रि.

भागधेय. भागधेयं मतं भाग्ये भागप्रत्याययोः पुमान्, मे. भागधेयं स्मृतं भाग्ये भागप्रत्याययोरपि, वि. भागधेयः पुनः करे। दायादे भागधेयं तु भाग्ये, हे.

भाग्य. भाग्यन्तु स्यात् शुभाशुभकर्मणोः, मे. भाग्यं शुभात्मकविधौ स्यात् शुभाशुभकर्मणि, वि. भाग्यं कर्म शुभाशुभम्, हे, अ.

भाजन. भाजनं योग्यपात्रयोः, मे, वि. भाजनं पात्रयोग्ययोः, त्रि.

भाण्ड. भाण्डं पात्रे वणिङ्मूलधने भूषाश्वभूषयोः, मे. भाण्डं भूषणमात्रेऽपि भाण्डं मूलवणिग्धने। नदीपात्रे तुरङ्गानां भूषणे भाजनेऽपि च, वि. भाण्डं मूलवणिग्वित्ते तुरङ्गानां च मण्डने। नदीकूलद्वयी-

मध्ये भूषणे भाजनेऽपि च, हे. स्याद्भाण्डमश्वाभरणेऽमत्रे मूलवणिग्धने, श्र. भाण्डं भूषणमात्रेऽपि, हा.

भानु. भानु र्ना किरणे सूर्ये, मे. भानुः किरणसूर्ययोः, वि. भानुरंशौ रवौ दिने, हे. भानू रश्मिदिवाकरौ, श्र. भानु र्ष्णिरङ्कारः, अने.

भाम. भामः क्रोधे रवौ दीप्तौ, मे. भामः क्रोधे रुचौ रवौ, हे.

भार. भारः स्याद्वीवधे विष्णौ पलानां द्विसहस्रके, मे. भारस्तु वीवधे स्वर्णपलानामयुतद्वये, वि. भारो द्वयग्रतीद्वये। पलानां वीवधे चापि, हे.

भारत. भारतं ग्रन्थभेदे स्याद् वर्षभेदेऽथ भारती। वचने च सरस्वत्यां पक्षिवृत्तिप्रभेदयोः, मे. भारतं ग्रन्थभेदे स्याज्जम्बुद्वीपेऽपि भारतम्। भारती तु सरस्वत्यां पक्षिणीवृत्तिभेदयोः, वि. भारतन्तु प्रास्क्ने द्वीपांशमि-द्यपि। भारती पक्षिणीवृत्तिभिदो र्वाचि, हे. पक्षिण्यां वाचि वृत्तौ च भारती भारतं पुनः। जम्बुद्वीपे व्यासकृतौ, त्रि.

भारद्वाज. भारद्वाजी वनकार्पास्यां ना द्रोणर्षिभेदयोः, मे. भारद्वाजः स्मृतो मुनौ। द्रोणे च वनकार्पास्यां भारद्वाजी च कणव्रते, वि. भारद्वाजो मुनौ चापि पिचुमन्दद्रुमेऽपि च, हे. बुधैः ख्यातो भारद्वाजो द्रोणाचार्ये मुनावपि, त्रि.

भार्गव. भार्गवो गजधन्विनोः। शुक्रे परशुरामे च भार्गवी पार्वती-श्रियोः। दूर्वायाम्, मे. भार्गवः परशुरामे स्याद् गजे शुक्रे सुधन्वनि। भार्गवी चैनवत्यां च कमलाऽसितदूर्वयोः, वि. भार्गवः परशुरामे सुधन्वनि मतङ्गजे। दैत्यगुरौ भार्गवी तु कृष्णदूर्वोमयोः स्त्रियाम्, हे. गजे धन्विनि शुक्रे च परशुरामे च भार्गवः। दूर्वा गौरी च भार्गव्यौ, त्रि.

भार्याटिक. भार्याटिकः पुमान् भार्यानिर्जिते हरिणान्तरे, मे. भार्याटिको भवेद् भार्यानिर्जिते हरिणान्तरे, वि. भार्याटिको मुनिभेदे भार्यया च विनिर्जिते, हे.

भार्याट. भार्याटः शैलभेदे स्यात् मृगभेदे च रात्र च। कौलया

परभार्यायां पुत्रो येनोपपादितः, मे, वि. भार्योदरन्यस्त्रीपुत्रोत्पादके स्वग-श्चैलयोः, हे.

भाल. भालं तेजोललाटयोः, मे. भालं ललाटमहसोः, वि. भालं स्याल्ललाटे महस्यपि, हे.

भालाङ्क. भालाङ्कः करपत्रे स्यात् शाकभेदे च रोहिते। महालक्षण-सम्पन्नपुरुषे कच्छपे हरे, मे, वि. भालाङ्कः कच्छपे हरे। महालक्षणसम्पूर्ण-पुरुषे करपत्रके। रोहिते शाकभेदे च, हे. भालाङ्को लोहिते दृष्टः करपत्रे च कच्छपे, हा.

भाव. भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। क्रियालीलापदा-र्थेषु विभूतिबुधजन्तुषु॥ रत्यादौ, मे. भावः स्वभावेऽभिप्राये चेष्टासत्तात्म-योनिषु। क्रियालीलापदार्थेषु बुधजन्तुविभूतिषु, वि. भावोऽभिप्रायवस्तुनोः। स्वभावजन्मसत्तात्मक्रियालीलाविभूतिषु। चेष्टायोन्यो र्बुधे जन्तौ शृङ्गा-रादेश्च कारणे। शब्दप्रवृत्तिहेतौ च, हे. भावः सत्तास्वभावाभिप्राय-चेष्टात्मजन्मसु, अ. भावो गौरविते जन्तौ पदार्थेऽभिनयान्तरे, त्रि. आत्मा भावो मनो भावो भावः सत्ता भवोऽपि च। भावः पूजात्मको लोकः पदार्थो भाव उच्यते, अने. चेष्टात्मजन्मसत्ताभिप्रायेष्वभिहितो भावः, रु.

भावना. भावना तु न ना ध्याने पर्यालोचेऽधिवासने, मे. भावना लेपने ध्याने, वि. भावना वासना ध्यानम्, हे.

भावाट. भावाटो भावुके साधुनिवेशे कामुके नटे, मे. भावाटो भावुके साधुनिवेशे कामुकेऽपि च, हे, वि.

भावित. भावितं वासिते प्राप्ते, मे, वि, हे.

भाषा. V. वाच्

भास्. भाः प्रभावे मयूखे स्त्री, मे. भाः प्रभावे मयूखे च, वि, हे.

भास. भासः पुंसि प्रभायां स्याद् विशेषे शिखण्डस्य च, मे. भासस्तु भासि गृध्रशकुन्तयोः, हे. ? भासः सुवर्णचूडे स्यात् प्रभेदे किष्कु-पर्वणः, वि.

भासन्त. भासन्तः सुन्दराकारे त्रिषु ना भासपक्षिणि, मे. भासन्तो मे सूर्ये रम्यभासयोः, हे.

भास्कर. भास्करोऽग्नौ प्रभाकरे, मे. भास्करस्तपने वह्नौ प्रभाकरसमः स्मृतः, वि. भास्करो वह्निसूर्ययोः, हे.

भास्वत्. भास्वान् भास्करसूर्यत्रयोः, मे, वि. भास्वान् दीप्ते रवौ, हे. भास्वन्तौ सूर्यभास्वरौ, त्रि.

भिक्षा. भिक्षा भृतौ याञ्चासेवाभिक्षितवस्तुषु, मे. भिक्षा भृतौ च याञ्चायां सेवाभिक्षितवस्तुनोः, वि. भिक्षासेवाप्रार्थनयो र्भृतौ भिक्षितवस्तुनि, हे. भिक्षा सेवाऽर्थना भृतिः, अ.

भित्ति. भित्तिः कुड्यप्रदेशयोः, मे. भित्तिः कुड्ये प्रभेदे च संविभागावकाशयोः, वि. भित्तिः कुड्ये प्रदेशे च, हे. कुड्यभेदनयो र्भित्तिः, त्रि.

भिन्न. भिन्नः स्यात् त्रिषु दारिते। सङ्गतेऽन्यत्र फुल्ले च, मे. भिन्नमन्यार्थवचने सङ्गते दारिते स्फुटे, वि. भिन्नोऽन्यः सङ्गतः फुल्लो दीर्णः, हे. भिन्नं दीर्णं विशेषिते, त्रि.

भीत. भीतं भयेऽथ भीयुते त्रिषु, मे. भीतं भये भययुते वाच्यवत् परिकीर्त्तितम्, वि.

भीति. भीति र्भये स्त्रियाम्, मे. भीतिः साध्वसकम्पयोः. वि.

भीम. भीमोऽम्लवेतसे घोरे शम्भौ मध्यमपाण्डवे, मे. भीमोऽम्लवेतसे शम्भौ घोरे चापि वृकोदरे, वि. भीमो वृकोदरे घोरे शङ्करेऽप्यम्लवेतसे, हे. भीमः शम्भौ च पाण्डवे, त्रि.

भीरु. भीरुरार्त्ते त्रिलिङ्गः स्याद् वरयोषिति योषिति, मे. भीरुर्योषिति कातरे, हे.

भीषण. भीषणो रसे सल्लकर्यां ना गाढ़े दारुणे त्रिषु, मे. भीषणो दारुणे रुद्रे भीषणं सल्लकीरसे, वि भीषणं शल्लकीरसे। भीषणो दारुणे गाढ़े, हे.

भीष्म. भीष्मो गाङ्गेयभीमयोः, मे. भीष्मस्तु भीषणे रुद्रे गाङ्गेये

च निशाचरे, वि. भीष्मो रुद्रे च गाङ्गेये राक्षसे च भयङ्करे, हे. गाङ्गेय-भीषणौ भीष्मौ, त्रि.

भुज (जा). भुजा। द्वयो र्बाहौ करे, मे. भुजो बाहौ करे, हे. भुजः पाणौ च बाहौ च, वि.

भुजङ्ग. भुजङ्गोऽहौ च पिङ्गे च, मे. भुजङ्गः पिङ्गसर्पयोः, वि. भुजङ्गः सर्पपिङ्गयोः, हे. भुजङ्गो भुजगे पिङ्गे, त्रि.

भुजिष्य. भुजिष्यस्तु स्वतन्त्रे स्याद् हस्तसूत्रकदासयोः। स्त्रियां दासीगणिकयोः, मे. भुजिष्यः स्यात् सहाये हस्तसूत्रके। स्वतन्त्रे च भुजिष्या तु दासीगणिकयो र्मता, वि. भुजिष्यः स्यादनधीने किङ्करे हस्तसूत्रके। भुजिष्या गणिकादास्योः, हे. अनधीने सहाये च भुजिष्यो हस्तसूत्रयोः, त्रि.

भुण्ड. भुण्डाविर्वारुकुष्माण्डौ, श.

भुवन. भुवनं पिष्टपेऽपि स्यात् सलिले गगने जले, मे. भुवनं विष्टपे मह्यां सलिलेऽपि वियत्यपि, वि. भुवनं पिष्टपे तोये, त्रि. भुवनं लोकतोययोः, अने. भुवनं लोकखाम्बुषु, हे.

भुवनुग्र. भुवनुग्रस्तु पुमान् भानौ ज्वलने शशलाञ्छने, मे. भुवनुग्र-र्ज्वलने भानौ भुवनुग्रः शशलाञ्छने, वि.

भू. भूः स्थानमात्रे कथिता धरण्यामपि योषिति, मे. भूस्तु भूमिरिव क्षितौ। स्थाने च, हे. भूः पृथिव्यां स्थानमात्रे, वि. भू र्भूमौ स्थानमात्रे च, त्रि.

भूक. भूकं छिद्रे च काले च, मे. भूकः काले छिद्रे, हे. भूक-श्छिद्रे च काले च, वि.

भूकुटिन्. भूकुटी शूकरः स्यात्तो भूकुटी च क्षपीवलः, अने.

भूकेश. भूकेशः शैवले वटे। भूकेशी वल्लजेऽपि स्यात्, मे. भूकेशी वल्लजेषु स्यात् भूकेशः शैवले वटे, वि. भूकेशः शैवले वटे, हे.

भूत. भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवं त्रिषूचिते। प्राप्ते वित्ते समे सत्ये देवयोन्यन्तरे तु ना, मे. भूतं क्ष्मादौ पिशाचादौ न्यायेन सत्योपमानयोः। भूतो देवलके प्राप्तवृत्तयोरभिधेयवत्, वि. भूतं सत्योपमानयोः। प्राप्तेऽतीते पिशाचादौ पृथ्व्यादौ जन्तुयुक्तयोः, हे. युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु, अ. अपत्ये च पृथिव्यादौ कालेऽतीते च राक्षसे। प्राप्ते प्राणिनि कीनाशे भूतशब्दो निगद्यते, धने. चतुर्विधेषु जीवेषु पृथिव्यादिषु पञ्चसु। अतीते देवयोनौ च भूतशब्दं प्रचक्षते, ह.

भूतवृक्ष. भूतवृक्षस्तु शाखोटद्रुमे श्योनाकपादपे, मे. भूतवृक्षस्तु शाखोटे तथा श्योनाकपादपे, वि. भूतवृक्षस्तु शाखोटे श्योनाककलिवृक्षयोः, हे.

भूतात्मन्. भूतात्मा पुंसि निर्दिष्टो देहे च परमेष्ठिनि, मे. भूतात्मा पुद्गले विधौ, वि. भूतात्मा द्रुहिणे देहे, हे. भूतात्मानौ धातृदेहौ, अ.

भूति. भूति र्भस्मनि सम्पत्तिहस्तिशृङ्गारयोः स्त्रियाम्, मे. भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि सम्पदि, वि. भूतिस्तु भस्मनि। मांसपाकविशेषे च सम्पदुत्पातयोरपि, हे. भूति र्भस्मनि सम्पदि, अ. भूतिर्विभवे, ह.

भू(ति)तीक. भूतीकमपि भूनिम्बे दीप्यकर्पूरकत्तृणे, मे, वि. भूतीकं कट्फलौषधे। यवान्यां घनसारे च भूनिम्बे भूस्तृणेऽपि च, हे. सशाङ्कृतिकन्तु भूनिम्बे कत्तृणे भूस्तृणेऽपि च, अ.

भूभृत्. भूभृन्नाऽद्रौ महीपते, मे. भूभृन्नरेन्द्रे शैले च, वि. भूभृन्महीधरे पृथ्वीपतौ, हे.

भूमि. भूमि र्वसुन्धरायां स्यात् स्थानमात्रेऽपि च स्त्रियाम्, मे. भूमिः क्षितौ स्थानमात्रे, वि, हे. भूमिः स्थानमात्रेऽपि, त्रि. v. भू.

भूमिका. भूमिका रचनायां स्याद् वेशान्तरपरिग्रहे, मे. भूमिका रचनायां स्यान् मूर्त्यन्तरपरिग्रहे, वि. भूमिका तु रचनायां रूपान्तरपरिग्रहे, हे. भूमिका रचनायां च मूर्त्यन्तरपरिग्रहे, त्रि.

भूमिज. भूमिजो नरकेऽङ्गारे सीतादेव्यां तु भूमिजा, मे. भूमिजो नरकेऽङ्गारे सीतायामपि भूमिजा, वि. भूमिजो नरकाङ्गारौ भूमिजा जनकात्मजा, हे.

भूमिस्पृश्. भूमिस्पृक् पुंसि मानववैश्ययोः, मे. भूमिस्पृग् वैश्यनरयोः, वि.

भूयस्. भूयांस्त्रिषु बहुतरे पुनरर्थे तदव्ययम्, मे. भूयः पुनः पुनः स्यात् प्रभूतार्थे त्वनव्ययम्, वि. भूयोऽधिकारे च पुनः पुनः, मे.

भूरि. भूरि र्ना वासुदेवे च हरे च परमेष्ठिनि। नपुंसकं सुवर्णे च प्राज्ये त्वत्राद्यवाच्यलिङ्गकः, मे. भूरि र्ब्रह्माच्युतेशेषु भूरि प्राज्य-सुवर्णयोः, वि. प्रचुरं भूरि विज्ञेयं भूरि काञ्चनमेव च, अने. भूरिः स्वर्णे प्रचुरे च, हे. स्वर्णेऽपि भूरिचन्द्रौ द्वौ, अ.

भूस्पृश्. भूस्पृग् वैश्ये मानवे च, हे.

भृगु. भृगुः पुमान्। मुनौ हरेऽतटे शुक्रे, मे. अथ भृगुः सानौ जमदग्निप्रपातयोः। शुक्रे रुद्रे च, हे. भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि, वि. जमदग्न्यतटौ भृगू, त्रि.

भृङ्ग. भृङ्गो धूम्याटपिङ्गयोः। मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्वचि, मे. भृङ्गं त्वक्पत्रं भृङ्गास्तु पिङ्गधूम्याटमार्कवाः। षट्पदः, हे. भृङ्गो धूम्याटपिङ्गयोः। मधुव्रतेऽपि भृङ्गन्तु केशराजगुडत्वचोः, वि. भृङ्गो धूम्याटकेऽपि च, त्रि.

भृङ्गराज. अथ भृङ्गराज उक्तः पक्षिविशेषे च मार्कवे भ्रमरे, मे. भृङ्गराजस्तु मधुपे मार्कवे विहगान्तरे, वि. भृङ्गराजो मधुकरे मार्कवे विहगान्तरे, हे. भृङ्गराजः खगौषधोः, त्रि.

भृङ्गार. भृङ्गारः कनकालुके। भृङ्गारी भिल्लिकायां स्यात्, वि. भृङ्गारी स्याज्झिल्लिकायां भृङ्गारः कनकालुका, हे. भृङ्गारी झिल्लिकायां स्यात् कनकालौ पुनः पुमान्, मे.

भृति. भृतिः स्त्री स्यान्मूल्येऽपि भरणेऽपि च, मे. भृति भरण-मूल्ययोः, वि., त्रि. भृति मूल्यभरणयोः, हे

भृत्य. भृत्यो दासे भृतौ भृत्या, वि, मे.

भृशम्. भृशं प्रकर्षेऽत्यर्थे च, हे. भृशं प्रकर्षे चात्यर्थे, वि.

भृष्टि. भृष्टिः स्याद् भर्जने शून्यवाटिकायां च योषिति, मे. भृष्टिस्तु भर्जने। शून्यवाट्याम्, हे. भृष्टिः स्याद् भर्जने शून्यवाटिकायां च भाषिता, वि.

भेक. भेको मण्डूकमेघयोः, मे, वि. भेको मेघमण्डूकभीरुषु, हे.

भेद. भेदो द्वैधे विशेषे स्याद् उपजापे विदारणे, मे, वि. भेदो विदारणे भेदे उपजापविशेषयोः, हे.

भेरुण्ड. भेरुण्डा देवताभेदपक्षिणश्चान्तरयोः स्त्रियाम्। भयानके वाच्यवत्, मे. भेरुण्डो भीमदर्शने। भेरुण्डा देवताभेदे पक्षिणीभिद्धि चेष्यते, वि. भेरुण्डौ भीषणखगौ भेरुण्डा देवताभिदि, हे.

भेल. भेलः प्लवे मुनौ पुंसि भीरावज्ञे च वाच्यवत्, मे. भेलः प्लवे भीरुके च निर्बुद्धिमुनिभेदयोः, वि. भेलः प्लवे मुनिभेदे भीरौ बुद्धिविवर्जिते, हे. ऋषिभेदे प्लवे पुंसि भेलं भीरुह्रदि त्रिषु, त्रि.

भैरव. भैरवः पुंसि शङ्करे। भीषणे त्रिषु, मे. भैरवं भीषणे भर्गे भैरवः समुदाहृतः, वि. भैरवो भीषणे रुद्रे रागभेदे, हे.

भोग. भोगः सुखे धने चाहेः शरीरफणयोरपि। पालने व्यवहारे च योषिदादिभृतावपि, मे. भोगस्तु राजन्न वेश्याभृतौ सुखे। धनेऽहिकायफणयोः पालनाऽभ्यवहारयोः, हे. भोगः सुखे धने चाहेः शरीरफणयो र्मतः। पालनेऽभ्यवहारे च निर्वेशे पणयोषिताम्, वि. भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः, अ. पालनेऽभ्यवहारे च निर्वेशे पणयोषिताम्। भोगः सुखे धने चाहेः शरीरफणयोरपि, त्रि.

भोगवत्. अथ भोगवती नागपुरीनद्योरह्नी पुमान्, मे. भोगवती भुजङ्गानां नगरीसरितोरपि, वि. भोगवती तु सर्पाणां नगरेऽपि सरित्यपि, हे. नदीनगर्यौ नागानां भोगवती, अ. भोगवान् नाऽऽढ्यनागयोः, वि.

भोगिन्. भोगी भुजङ्गमेऽपि स्याद् ग्रामपाले नृपे पुमान्। विहाय

मन्त्रिणीमन्यराजयोषिति भोगिनी, मे. भोगी भुजङ्गमे राज्ञि ग्रामण्यां नापितेऽपि च। विहाय मन्त्रिणीं चान्यराजयोषिति भोगिनी, वि. भोगी भुजङ्गमे। वैयावृत्त्यकरे राज्ञि ग्रामण्यां नापितेऽपि च, हे.

भोस्. भोस्तु सम्बोधनविषादयोः, मे.

भौम. भौमः कुजे च नरके पुंसि भूमिभवे त्रिषु, मे. भौमो मङ्गल-दैत्ययोः, हे. नरके मङ्गले भौमः, त्रि.

भ्रम. भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दभ्रमणयोरपि, मे. भ्रमोऽम्बु-निर्गमे भ्रान्तौ कुन्दाख्ये शिल्पयन्त्रके, वि. भ्रमस्तु स्यात् भ्रमणे वारि-निर्गमे। भ्रान्तौ कुन्दाख्ययन्त्रे च, हे. कुन्दाम्बुनिर्गमभ्रान्तिषु भ्रमः, त्रि.

भ्रमणी. भ्रमणी कारण्डिकायां क्रीडायामप्यधीश्वितुः, मे, वि. भ्रमणी स्यादधीश्वितुः। क्रीडादौ कारण्डिकायाम्, हे.

भ्रमर. भ्रमरः कामुके भृङ्गे, मे, त्रि. भ्रमरो भृङ्गे कामुकेऽपि मधुव्रतः, वि. भ्रमरः कामुकेऽपि स्यात्, हा.

भ्रमरक. अथ भ्रमरको भृङ्गे गिरिके चालकान्तरे, मे. भ्रमरको जले भृङ्गे गिरिके चूर्णकुन्तले, वि. भ्रमरको मधुव्रते। गिरिके चूर्णकेशे च, हे.

भ्रातृव्य. भ्रातृव्यो भ्रातृजे रिपौ, हे. भ्रातृव्यौ भ्रातृजद्विषौ, अ.

भ्रान्ति. भ्रान्तिस्तु योषिति। मिथ्यामतौ च भ्रमणे, मे. भ्रान्ति-र्मिथ्याज्ञानेऽनवस्थितौ, हे.

भ्रामक. भ्रामको जम्बुके धूर्त्ते सूर्यावर्त्ताश्मभेदयोः, मे. भ्रामकः फेरुधूर्त्तयोः। सूर्यावर्त्तेऽश्मभेदे च, हे. कुन्देऽपि भ्रामको वटी, हा.

भ्रामर. भ्रामरं मधुनि स्मृतम्। पुंसि प्रस्तरभेदे च, मे. भ्रामरं मधुहृपदोः, हे. भ्रामरं ग्रावमधुनोः, वि.

भ्रूण. भ्रूणः स्त्रीगर्भडिम्भयोः, मे, वि. अथ भ्रूणो गर्भिण्यां श्रोत्रियद्विजे। अर्भकस्त्रैणगर्भे च, हे. भ्रूणोऽर्भके स्त्रैणगर्भे, अ. भ्रूणो भीरु द्विजो भ्रूणः भ्रूणो गर्भाशयः स्त्रियाः। भ्रूणोऽण्डजः शिशुः भ्रूणो भ्रूणो विकल दृश्यते, अने. भ्रूणोऽपि गर्भिण्याम्, रु.

म. मो यमे समयेऽपि सप्राद् विषे च मधुसूदने। मा स्त्री पद्मालयायां सत्रात् पुंलिङ्गश्चन्द्रशेखरे, मे. मः शिवे मा रमायां च मा निषेधेऽव्ययं मतम्, वि. मः पुनः शम्भौ मा लक्ष्म्यां वारणेऽव्ययम्, हे. मः शिवश्चन्द्रमा वेधा मा लक्ष्मीश्च प्रकीर्त्तिता। मा च मातरि माने स्र बन्धने मः प्रकीर्त्तितः, ए. वैकुण्ठश्च महाकालसन्त्री जठरसंस्थितः। सत्त्वेशो मण्डलो मानी विषः स्थूयर्ग मकारकः, मा. लक्ष्मी मा च निगद्यते, भने.

मकर. मकरो यादसो भेदे निधिराशिप्रभेदयोः, मे. मकरो यादसि ज्ञेयो निधिराशिप्रभेदयोः, वि. मकरो निधौ। नक्रे राशिविशेषे च, हे. मकरो राशियादसोः, त्रि.

मकुर. V. मुकुर.

म(मु)कुष्ठ. मकुष्ठो व्रीहिभेदे ना मन्थरे पुनरन्यवत्, मे. मकुष्ठो व्रीहिभेदे सत्रान् मकुष्ठो मन्थरेऽन्यवत्, वि. मुकुष्ठौ धान्यमन्थरौ, हे.

मघ. मघा मघी च नक्षत्रे धान्यभेदे यथाक्रमम्। मघो द्वीपान्तरे, मे. मघा मघी च नक्षत्रे भेषजे च यथाक्रमम्, वि. नक्षत्रस्य मघा नाम कुन्दस्य कलिका मघा, भने.

मङ्गु. मङ्गु शीघ्रे भृशार्थे च, मे. मङ्गु शीघ्रे भृशार्थे च तत्त्वार्थेऽपि क्वचित् मतम्, वि. मङ्गु शीघ्रे भृशे तत्त्वे, हे.

मङ्गल. मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे। नपुंसकं तु कल्याणे सर्वार्थरक्षणेऽपि च, मे. मङ्गलं श्रेयसि श्वेतदूर्वायामपि मङ्गला। सर्वार्थरक्षणे चापि मङ्गलं समुदीरितम्, वि. मङ्गलं पुनः। कल्याणे मङ्गलो भौमे मङ्गला श्वेतदूर्विका, हे. ग्रहे ना मङ्गलं शुभे, त्रि.

मङ्गल्य. मङ्गल्यः सरात् त्रायमाणाऽश्वत्थविल्लमसूरके। स्त्रियां शमत्राग्धःपुष्पीभिसीशुक्लवचासु च। रोचनायामथो दध्नि क्लीवं शिवकरे त्रिषु, मे. मङ्गल्यस्त्रायमाणे सत्राद् विल्वेऽश्वत्थे मसूरके। मङ्गल्यं दध्नि मङ्गल्यो मनोज्ञे त्वभिधेयवत्। मङ्गल्या रोचनायां च प्रियङ्गुशतपुष्पयोः। अधः-

पुष्पीशङ्खपुष्पीशमीमुद्गलवचासु च, वि. मङ्गल्यो रुचिरेऽश्वत्थे त्रायमाणे मसूरके। विल्वे मङ्गल्यं तु दध्नि मङ्गल्या रोचना शमी। शतपुष्पा मुद्गवचा प्रियङ्गुः शङ्खपुष्प्यपि। अधःपुष्पी, हे.

मञ्जरी. मञ्जरी तिलकस्थूलमुक्तयो र्वल्लरी द्वयोः, मे. मञ्जरी वल्लरी-स्थूलमुक्तातिलकशाखिषु, वि. मञ्जरी तिलकद्रुमे। वल्लर्यां स्थूलमुक्तायाम्, हे.

मञ्जुल. मञ्जुलं त्रिषु मञ्जौ ना जलरङ्कौ नपुंसकम्। जलाश्वले निकुञ्जे च, मे. मञ्जुलम्। निकुञ्जे शैवले मञ्जौ जलरङ्कौ तु मञ्जुलः, वि. मञ्जुलं सुन्दरेऽपि च। रम्ये कुञ्जे मञ्जुलं तु दात्यूहे, हे. मञ्जुलो मधुरे कुञ्जे जलरङ्के जलाश्वले, हा.

मणि. मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिकेऽपि च। कण्ठदेशस्तनेऽजायाः लिङ्गाग्रेऽलिञ्जरेऽपि च, मे. मणि र्गौले मेढ्नाग्रे रत्ने चाजा-गलस्तने, वि. मणिश्छागलस्तने। मेढ्राग्रेऽलिञ्जरे रत्ने, हे. लिङ्गाग्रेऽ-लिञ्जरे मौक्तिकादौ स्त्रीपुंसयो र्मणिः। अजागलस्तने चापि, त्रि. मणि-र्लिङ्गाग्रिमो भागो मणिः प्रोक्तो भगध्वजः। मणिः क्रूपसुखं ज्ञेयं पद्मरागा-दिको मणिः, अने.

मणिक. मणिकोऽलिञ्जरो ज्ञेयो मणिको मणिरत्नके, अने.

मणिच्छिद्रा. मणिच्छिद्रा तु मेदायाख्यभाख्यौषधेऽपि च, मे, वि. मणिच्छिद्रा तु मेदायाख्यभाख्यौषधावपि, हे.

मणिमाला. मणिमाला तु हारे दन्तघतान्तरे, मे. मणिमाला स्मृता हारे स्त्रीणां दन्तघतान्तरे, वि. मणिमाला हारे स्त्रीणां दशनघत-भिद्यपि, हे.

मण्ड. मण्डः पञ्चाङ्गुले शाकभेदे क्लीवं तु मस्तुनि। आमलक्यां स्त्रियां मण्डाऽयास्त्रियां सारपिच्छयोः, मे. मण्डं मस्तुनि शाके च मण्डः सरात् सारपिच्छयोः। एरण्डे भूषणे चाथ मण्डा धात्रामुदीरिता, वि. मण्डो मस्तुनि भूषायामेरण्डे सारपिच्छयोः। शाके मण्डा त्वामलक्याम्, हे. मण्डः सरात् सारपिच्छयोः। एरण्डे मस्तुनि क्लीवम्, त्रि.

मण्डन. मण्डनं भूषणे क्लीवं सत्रात् त्रिष्वलङ्करिष्णुनि, मे. मण्डनं सत्रादलङ्कारेऽलङ्करिष्णुनि वाच्यवत्, वि. मण्डनं तु प्रसाधने। मण्डनोऽलङ्करिष्णौ सत्रात्, हे.

मण्डल. मण्डलं परिधौ कुष्ठे देशे द्वादशराजसु। क्लीबेऽथ निवहे बिम्बे त्रिषु पुंसि तु कुक्कुरे, मे. सत्रान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च। कुष्ठभेदेऽपुत्रपत्त्र्यर्थकेऽपि भुजङ्गभेदे शुनि मण्डलः स्यात्, वि. मण्डलं देशबिम्बयोः। भुजङ्गभेदे परिधौ शुनि द्वादशराजके। सङ्घाते कुष्ठभेदे च, हे. मण्डलं परिधौ गणे। बिम्बे देशे ना च शुनि, त्रि. मण्डलं भूमिभागश्च मण्डलः सरमासुतः। मण्डलं वर्त्तुलं प्रोक्तं सङ्घातो मण्डलं मतम्, अने.

मण्डलक. भवेन् मण्डलकं बिम्बे कुष्ठभेदे च दर्पणे, मे, वि.

मण्डूक. मण्डूकः शोणके मुन्यन्तरे स्याद् गूढवर्चसि। मण्डूकपर्ण्यां मण्डूकी, मे. मण्डूकं बन्धभेदेऽपि दर्दुरे शोणके विदुः। मण्डूकपर्ण्यां मण्डूकी, वि. मण्डूको भेकशोणयोः। मण्डूकी मण्डूकपर्ण्याम्, हे.

मण्डूकपर्ण. मण्डूकपर्णी मञ्जिष्ठाब्राह्मयो र्ना तु शोणके, मे. मण्डूकपर्णोऽरलुकशोणकयोः कपीतने। मण्डूकपर्णी मञ्जिष्ठाब्राह्मी गोजिह्विकौषधौ, हे. मण्डूकपर्णोऽरलुके शोणके च कपीतने। मण्डूकपर्णी मञ्जिष्ठाब्राह्मीगोजिह्विकासु च, वि.

मण्डोदक. मण्डोदकं चित्तरागे क्लीवमातर्पणेऽपि च, मे. मण्डोदकश्चित्तरागे भवेदातर्पणेऽपि च, वि.

मत. मतं तु सम्मते ज्ञाते, मे. मतं तु सम्मतेऽर्चिते, हे. मतं पूजितसम्मते, वि.

मति. मति र्धीच्छास्मृतिष्वपि, वि. मतिः स्त्रीच्छाधियोः स्मृतौ, मे. मति र्बुद्धीच्छयोः, हे. मतिरिच्छाऽपि, त्रि.

मत्कुण. मत्कुणो निर्विषाणेभे निःश्मश्रुपुरुषेऽपि च। उद्दंशे नालिकेरे च, मे. मत्कुणो निर्विषाणेभे निःश्मश्रुपुरुषेऽपि च। उद्दंशे

नारिकेले च, वि. मत्कुणोऽश्मश्रुपूरुषे। उद्‌गमे नारिकेले च निर्विषाणे गजेऽपि च, हे. निश्मश्रुपुरुषोद्‌गमौ मत्कुणौ, त्रि.

मत्तवारण. उक्तो मत्तवारणस्तु प्रक्लिन्नकटकुञ्जरे। क्लीवं प्रासादवीथीनां कुण्डदृष्टनावपि, मे. मत्तवारणमिच्छन्ति दानक्लिन्नकटद्विपे। मत्ता-प्रासादवीथीनां वरण्डे चाप्यपाश्रये, वि. मत्तवारणः। प्रासादवीथीवरण्डे मत्तहस्तिन्यपाश्रये, हे.

मत्सर. मत्सरो मक्षिकायां सत्रान् मात्सर्यक्रोधयोः पुमान्। असहत्र-परसम्पत्तौ क्षपणे चाभिधेयवत्, मे. मत्सरः। असहत्रपरसम्पत्तौ मात्सर्ये क्षपणे क्रुधि। मत्सरा मक्षिकायां स्यात्, वि. मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि। क्षपणे मत्सरा तु सत्रान् मक्षिका, हे. मत्सरोऽन्यशुभद्वेषे तद्वत्क्षपणयोस्त्रिषु, श्र. मक्षिकायां च मत्सरः, त्रि.

मत्स्य. मत्स्यो मीनेऽथ पुंभूम्नि देशे, मे. मत्स्यो देशान्तरे मीने विराटाभिख्ययादवे, वि, हे.

मथित. मथितं पुनः। क्लीवं निर्जलघोले स्यात् त्रिष्वालोड़ित-घृष्टयोः, मे. मथितं निर्जले घोले व्यालोडितनिघृष्टयोः, हे.

मद. मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः। मद्येऽपि मद आख्यातो मदी चषकवस्तुनि, वि. मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः, मे. मदो रेतस्यहङ्कारे मद्ये हर्षेभदानयोः। कस्तूरिकायां चैवेत्र च मदी चषकवस्तुनि, हे. हर्षेऽप्यामोदवन् मदः, श्र. अथ मदः स्यात् कस्तूरीभ-दानयोः, त्रि.

मदकल. भवेन्मदकलो मत्तेभमदाव्यक्तवाचिनोः, मे. मदकलः सत्रान् मत्तेभे मदेनाव्यक्तवाचि च, वि. मदकलो मदद्विपे। मदेनाव्यक्त-वचने, हे.

मदन. मदनः स्मरवसन्तद्रुभिद्धूस्तूरसिक्थके, मे. मदनः स्मर-धुस्तूरवसन्तद्रुमसिक्थके, वि. मदनः सिक्थके स्मरे। राढ़े वसन्ते धत्तूरे, हे. मदनः सिक्थधूस्तूरतरुभेदमनोभवाः, त्रि.

मदनशलाका. मदनशलाका कामोद्दीपकभैषजसारिकयोः, मे. स्यात् मदनशलाकाऽपि सार्यां कामोद्यौषधौ, वि.

मदयित्नु. मदयित्नु र्मदयते पुमान् मद्ये नपुंसकम्, मे. मदयित्नु-र्भवेत् सीधौ मद्ये सत्रान् मदयित्नु, च, वि.

मदार. मदारो हस्तिधूर्तयोः, मे. मदारो द्विरदे धूर्ते, वि.

मधु. मधु पुष्परसे चौद्रे मद्ये ना तु मधुद्रुमे। वसन्तदैत्यभिच्चैत्रे स्यात्ज्जीवन्त्यान्तु योषिति, मे. मधु चौद्रे जले चीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च जोवाशोके मधुद्रुमे, वि. मधुश्चैत्रतु दैत्येषु जीवाशोक-मधूकयोः। मधु चीरे जले मद्ये चौद्रे पुष्परसेऽपि च, हे. मधु मद्ये पुष्परसे चौद्रेऽपि, अ. दैत्यचैत्रवसन्तेषु द्रुमभेदे च ना मधुः, त्रि. मधु मद्यं मधु चौद्रं मधु पुष्परसं विदुः। मधु दैत्यो मधुश्चैत्रो मधुकोऽपि मधु-र्मतः, अने, शा.

मधुक. मधुका मधुपर्ण्यां स्यात् मधुकं त्रौतके खगे। वन्द्यन्तरे ना, मे. मधुको वन्दिभेदे स्याद्यष्ट्याह्वे विहगान्तरे। मधुका मधुपर्ण्यां स्त्रियाम्, वि. मधुकं त्रपु। मधुयष्टिश्च मधुको वन्दिजीवदपक्षिणोः, हे. मधुका वल्लिभेदे च, त्रि.

मधुद्रु. मधुद्रोऽली च कामुके, मे. V. भ्रमर,

मधुपर्णी. मधुपर्णी तु गम्भार्यां नीलीसंज्ञौषधावपि, मे.

मधुर. मधुरा शतपुष्पायां मिश्रेयानगरीभिदोः। मधुकर्कटिका-मेदामधूलीयष्टिकासु च। क्लीवं विषे पुंसि रसे तद्वत् स्वादुप्रियेऽन्यवत्, मे. मधुरस्तु रसे विषे। मधुरं रसवत्स्वादुप्रियेषु मधुरोऽन्यवत्। मधुरा शतपुष्पायां मिश्रेयानगरीभिदोः। मधुकुक्कुटिकामेदामधूलीयष्टिकासु च, वि. मधुरं विष। मधुरस्तु प्रिये स्वादौ रसे च रसवत्यपि। मधुरा मथुरापुर्यां यष्टिमेदामधूलिषु। मधुकुक्कुटिकायां च मिश्रेयाशतपुष्पयोः, हे. स्वादुप्रियौ च मधुरौ, अ. विषे स्वादे च मधुरम्, त्रि. मधुरौ च प्रियस्वादू, अने.

मधुरसा. भवेत् मधुरसा द्राक्षामूर्विकादुग्धिकासु च, मे. स्मृता मधुरसा द्राक्षामूर्विकादुग्धिकासु च, वि. मधुरसा तु मूर्वायां द्राक्षादुग्धिकयोरपि, हे.

• मधुसूदन. मधुसूदनस्तु पुंसि स्याद् भ्रमरे वनमालिनि, मे. मधुसूदनसंज्ञा च भ्रमरे वनमालिनि, वि. मधुसूदनः। भ्रमरे केशवे, हे. विष्णुली मधुसूदनौ, त्रि.

मध्य. मध्यं विलग्ने न स्त्री स्यान् न्याय्येऽन्तरेऽधमेऽपि च, मे. मध्यं न्याय्येऽवकाशेऽप्यवलग्नेऽन्तरेऽधमे, वि. मध्यं न्याय्येऽवलग्नेऽन्त, हे. न्याय्येऽपि मध्यम्, त्र.

मध्यम. मध्यमो मध्यजेऽन्यवत्। पुमान् स्वरे मध्यदेशेऽप्यवलग्ने तु न स्त्रियाम्। स्त्रियां दृष्टरजोनार्यां कर्णिकाङ्गुलिभेदयोः। तन्त्रवरच्छन्दसि तथा, मे. मध्यमः स्यात् स्वरे मध्ये ऽवलग्ने च मध्यजे। वाच्यवत् मध्यमा तूक्ता राकादृष्टरजःस्त्रियोः। कर्णिकातन्त्रवरच्छन्दःकरमध्याङ्गुलीषु च, वि. मध्यमो मध्यजे स्वरे। देहमध्ये मध्यदेशे मध्यमा कर्णिकाऽङ्गुलिः। कन्या रजस्वला चापि, हे. स्वरे मध्ये च मध्यमः, त्रि.

मनस्. मनश्चित्ते मनीषायाम्, मे. मनश्चित्तमनीषयोः, वि.

मनाक्. मनागप्यल्पमन्दयोः, मे. मनागल्पे च मन्दे च, वि. स्यात् मनागल्पमन्दयोः, हे.

मन्तु. मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ, मे. मन्तुः स्यादपराधेऽपि मनुष्येऽपि प्रजापतौ, वि.

मन्त्र. मन्त्रो वेदविशेषे स्याद् देवादीनां च साधने। गुह्यवादेऽपि च पुमान्, मे. मन्त्रो वेदविशेषे स्याद् देवादीनां च साधने। गुप्तवादे च, वि. मन्त्रो देवादिसाधने। वेदांशे गुप्तवादे च, हे वेदभेदे गुप्तवादे मन्त्रः, त्र.

मन्थ. मन्थः स्यात् पुंसि मन्थाने सक्तुके च दिवाकरे, मे. मन्थः सक्तुकमन्थाननेत्रामयदिवाकरे, वि. मन्थो रवौ मथि। सक्तुके नेत्ररोगे च, हे. सूर्यमन्थानयो मन्थः सक्तुके, त्रि.

मन्थर. मन्थरः कोशफलयोः बोधमन्थानयोः पुमान्। कुसुम्भत्रो न द्वयो भेदे पृथौ वक्रेऽभिधेयवत्, मे. मन्थरः सूचके कोशे मन्थाने चाथ मन्थरम्। कुसुम्भत्रां मन्थरे मन्दे पृथौ वक्रे च वाच्यवत्, वि. मन्थरः सूचके कोशे वक्रे मन्दे पृथौ मथि। मन्थरं तु कुसुम्भत्रां सत्रात्, हे. 'दर-वक्रे च मन्थरः, ति.

मन्द. मन्दोऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः। अल्पे च तिषु पुंसि सत्राद् हस्तिजात्यन्तरे शनौ, मे. मन्दः खले मन्दरते मूर्खे स्वैरे-ऽल्परोगिणोः। अभाग्येऽपि च मातङ्गिगजजातिप्रभेदयोः, वि. मन्दो मूढ़े शनौ रोगिण्यलसे भाग्यवर्जिते। गजजातिप्रभेदेऽल्पे स्वैरे मन्दरते खले, हे. मूढ़ाल्पापटुनिर्भाग्या मन्दाः सुत्र., श्र. मन्दौ स्वैरशनिश्चरौ। हस्तिभेदे च, ति. रोगार्ताभाग्यमूढाल्पा मन्दाः प्रोक्ताः विचक्षणैः, अने.

मन्दर. मन्दरस्तु पुमान् मन्थशैले मन्दारपादपे। वाच्यवद् बहुले मन्दे, मे. मन्दरो मन्थशैले सत्रात् स्वर्गमन्दारयोरपि। मन्दरो बहुले मन्दे, वि. मन्दरो मन्थपर्वते। स्वर्गमन्दारयो र्मन्दे, हे.

मन्दार. मन्दारः सत्रात् सुरद्रुमे। पारिभद्रेऽर्कपर्णे च, मे. मन्दारः पारिभद्रार्कपर्णयोः। सुरद्रुमेऽपि, वि. मन्दारस्त्रिदशद्रुमे। पारिभद्रे-ऽर्कपर्णे च, हे.

मन्दिर. मन्दिरं नगरेऽगारे क्लीबं ना मकरालये, मे. मन्दिरं नगरेऽगारे मन्दिरे मकरालये, वि. मन्दिरो मकरावासे मन्दिरं नगरे गृहे, हे.

मन्दुरा. मन्दुरा वाजिशालायां शयनीयार्थवस्तुनि, मे. मन्दुरा वाजिशालायां वासतेयत्रां तथा भुवि, वि. मन्दुरा वाजिशालायां स्यादा-वासेऽपि मन्दुरा, धने

मन्मथ. मन्मथः कामचिन्तायां कपित्थे कुसुमायुधे, मे, वि. अथ मन्मथः। कपित्थे कामदेवेऽपि, ति.

मन्यु. मन्युः पुमान् क्रुधि दैन्ये शोके यज्ञे च, मे. मन्युः क्रोधे

कर्तौ दैन्ये, वि. मसुर दैन्ये कर्तौ क्रुधि, हे, श्र. कर्तौ क्रोधे तथा दैन्ये मनुत्रशब्दं प्रचक्षते, अने. मनुत्र दैन्ये कर्तौ कोपे, ह.

मय. मयः शिल्पिनि दैत्यानां कारभेऽश्वतरेऽपि च, मे, वि. मया दैत्योष्ट्रवेसराः, हे. दैत्यशिल्पुरष्ट्रयो र्मयः, त्रि. मय उष्ट्रच गन्धर्वः, अने.

मयु. मयु र्ना किन्नरे मृगे, मे. मयुस्तुरङ्गवदने मृगेऽपि मयुरुच्यते, वि. मयु र्मृगाश्वमुखयोः, हे.

मयूख. मयूखः किरणेऽपि च। ज्वालायामपि शोभायाम्, म. मयूख-त्विट्करज्वाले, वि. मयूखा ज्वालरुक्त्विषः, हे. मयूखस्त्विट्करज्वालासु, श्र.

मयूर. मयूरो बर्हिचूडायामपामार्गे शिखण्डिनि, मे, वि. मयूरः केकिचूडाख्यौषधेऽपामार्गकेकिनोः, हे.

मयूरक. मयूरकोऽपत्रपामार्गे क्लीवं तुत्याञ्जने पुनः, मे. मयूरको-ऽपामार्गे तुत्थके तु मयूरकम्, वि मयूरकस्त्वपामार्गे मयूरकं तु तुत्थके, हे. मयूरकोऽपामार्गे च, त्रि.

मरीचि. मरीचि र्मुनिभेदे ना गभस्तावनपुंसकम्, मे. मरीचिः सपणे दीप्तावृषिभेदेऽपि दृश्यते, वि. मरीचिः सपणे घृणौ। ऋषिभेदे च, हे. मरीचि र्मुनिभेदेऽपि, त्रि.

मरु. मरु र्ना गिरिधन्वनोः, मे. मरु र्भूधरधन्वनोः, वि. मरुः पर्वतदेशयोः, हे. मरू धन्वधराधरौ, श्र. देशपर्वतयो र्मरुः, ह.

मरुत्. मरुद् देवे समीरे ना ग्रन्थिपर्णे नपुंसकम्, मे. मरुद् देवे समीरे सत्रात्, वि मरुत् सुरेऽनिले, हे. मरुतौ पवनामरौ, श्र. त्रिदशा मरुतः प्रोक्ता मरुतोऽपि समीरणाः, अने.

मरुवक. भवेन् मरुवकः पुष्पविशेषे मदनद्रुमे, मे, वि. मरुवकः पुष्पभेदे मदनद्रौ फणिज्झके, हे.

मर्कट. मर्कटी। करञ्जभिच्छूकशिम्ब्योः पुंसि वानरलूतयोः, मे. मर्कटी वानरीशूकशिम्ब्यां सत्रात् करजान्तरे। मर्कटसूर्णनाभेऽपि कपौ

स्त्रोकरणेऽपि च, वि. मर्कटस्तु ध्वपावर्णनाभेऽपि करणान्तरे। मर्कटी करञ्जभेदे शूकशिम्ब्यां च, हे. मर्कटी शूकशिम्ब्यपि, त्रि.

मर्कटक. अथ मर्कटकः सस्यभेदे वानरलूतयोः, मे.

मर्जू मर्जूः स्त्री शुद्धौ धावकेऽपि च, मे. मर्जूः स्याद् रजके शुद्धौ, वि. मर्जूः शुद्धौ च रजकेऽपि च, हे.

मर्मर. मर्मरो वस्त्रभेदे स्याच्छुष्कपर्णध्वनौ तथा। पुंसि स्त्रियां पुनः प्रोक्ता मर्मरी पीतदारुणि, मे. मर्मरी पीतदारौ स्याद् वस्त्रभेदे च मर्मर, वि. मर्मरो वसनान्तरे। शुष्कपर्णध्वनौ चापि मर्मरी पीतदारुणि, हे.

मर्यादा. मर्यादा सीमनि स्थितौ, मे. मर्यादा धारणे स्थितौ, त्रि. मर्यादा स्थितिसीमयोः, हे. मर्यादा धारणसीम्नोः, त्रि.

मल. मलोऽस्त्री पापविट्किट्टे कृपणे त्वभिधेयवत्, मे. मलं किट्टे पुरीषे च पापे च कृपणे मलः, वि. मलस्त्वघे। किट्टे कदर्य्ये विष्ठायाम्, हे. मलोऽस्त्री पापविट्किट्टानि, अ.

मलन. मलनः पटवासे ना मर्दने तु नपुंसकम्, मे. मलनः पट-वासे स्यात् मर्दने मलनं मतम्, वि

मलय. मलयः पर्वतान्तरे। शैलांशे देश आरामे त्रिवृतायां तु योषिति, मे. मलयो देश आरामे शैलांशे पर्वतान्तरे। मलया त्रिवृतायां स्यात्, वि मलयः पर्वतान्तरे। शैलांशे देश आरामे मलया त्रिवृ-दौषधौ, हे

मलिन. मलिनं दूषिते कृष्णे चर्तुमत्यां तु योषिति, मे. मलिनं दूषिते कृष्णे चर्तुमत्यां मलिन्यपि, वि मलिनं कृष्णदोषयोः। मलिनी रजस्वलायाम्, हे. मलिनं दूषितेऽसिते, त्रि

मलिनमुख मलिनमुखोऽग्नौ गोलाङ्गूले पुंसि त्रिषु क्रूरे, मे. स्यात् मलिनमुखः प्रेते गोलाङ्गूले खलेऽनले, वि मलिनमुखो गोलाङ्गूले प्रेतेऽनले खले, हे

मलिम्लुच. मलिम्लुचो मासभेदे चौरप्वलनयोः पुमान्, मे. मलि-

म्लु,चोऽनिले चौरे, वि. मलिम्लुचस्तु तस्करे। वाते, हे. चौरवह्नी मलिम्लुचौ, त्रि.

मलीमस. मलीमसस्तु मलिने पुष्पकाशीशलोहयोः, मे, वि. मलीमसः पुनः पुष्पकाशीशे मलिनायसोः, हे.

मल्ल. मल्लः पात्रे कपोले च मल्लभेदे बलीयसि, मे, वि. मल्लः कपोले बलिनि मल्ला पात्रे, हे. मल्लः पात्रे कपालिनि। बलीयसि च मल्लत्रे च, त्रि.

मल्लनाग. मल्लनागोऽभ्रमातङ्गे वात्स्यायनमुनावपि, मे, वि. मल्लनागो वात्स्यायनसुरेभयोः, हे.

मल्लिक. मल्लिको हंसभिद्यपि। मल्लिका तृणशून्येऽपि मीनघटत्पात्रभेदयोः, मे. मल्लिका तृणशून्येऽपि मीनघटत्पात्रभेदयोः। मल्लिको हंसभेदे स्यात्, वि. मल्लिको हंसभेदे स्यान् मल्लिका कुसुमान्तरे। मीने घटत्पात्रभेदे स्यात्, हे. हंसभेदे च मल्लिकः, त्रि.

मशको. मशको रोगकीटप्रभेदयोः, मे. मशकः कथ्यते क्षुद्ररोगकीटप्रभेदयोः, वि. मशकः क्षुद्ररुग्जन्तुभेदयोः, हे.

मसु(सू)र. मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः। मसूरी पापरोगे स्यादुपधाने पुनः पुमान्, मे. मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति। मसूरमसुरौ च द्वावेतावप्येतयो र्मतौ, वि. मसूरो मसुरोऽपि च। मसुरा च मसूरा च चत्वारः पण्ययोषिति। तथा व्रीहिविशेषे च, हे.

मसृण. मसृणोऽकर्कशे स्निग्धे त्रिपूमायां तु योषिति, मे. मसृणोऽकर्कशे स्निग्धे क्षुमायां मसृणा भवेत्, वि. मसृणोऽकठिने स्निग्धे मसृणा स्यादतस्यपि, हे. मसृणौ स्निग्धकर्कशौ, त्रि.

मह. मह उत्सवतेजसोः, मे, वि. महावुत्सवतेजसी, हे.

महत्. महती वल्लकीभेदे राज्ये स्यात् तु नपुंसकम्। तत्त्वभेदे पुमान् दृढे, मे. महद् दृढति धीतत्वे राज्ये, हे. वीणाभेदेऽपि महती, श. महद्राज्ये विशाले च महती वल्लकीभिदि, वि. ..

महस्. मह उत्सवतेजसोः, मे. महो भवेदुत्सवतेजसोश्च, वि. महस्तेजस्युत्सवे च, हे. महस्तूत्सवतेजसोः, अ.

महाकच्छ. महाकच्छस्तु पुंसि स्यात् समुद्रे च प्रचेतसि, मे. महाकच्छः समुद्रे च प्रचेतसि, वि.

महाकाल. महाकालो महादेवे किम्पाके प्रमथान्तरे, मे. महाकालस्त्रिनयने किम्पाके प्रमथान्तरे, वि. महाकालो महेश्वरे किम्पाके गणभेदे च, हे.

महाघोष. महाघोषा तु कर्कटश्टङ्ग्यां पुंस्यतिघोषणे। क्लीवं हट्टे, मे. महाघोषो मतङ्गे च महाघोषोऽतिघोषणे। स्मृता कर्कटश्टङ्ग्यां च महाघोषा मनीषिभिः, वि. महाघोषो महाशब्दे स्यान् महाघोषं आपणे। महाघोषा श्टङ्ग्यौषधाम्, हे.

महाधन. महाधनं महामूल्ये सुवर्णे सिह्लकेऽपि च, मे, वि. महाधनं महामूल्ये सिह्लके चारुवाससि, हे.

महानाद. महानादः कुञ्जरे स्याद् वर्षुकाब्दे महास्वने, मे. महानादः कुञ्जरे स्याद् वर्षुकाब्दे भयानके, वि. महानादो वर्षुकाब्दे महाध्वाने भयानके। गजे च, हे. महानादो गजेऽपि च, त्रि.

महानील. महानीलो भृङ्गराजे मणिनागविशेषयोः, मे, वि. महानीलो मणेर्भिदि। नागभेदे भृङ्गराजे, हे.

महापद्म. महापद्मः पुमान् नागनिधिसंख्यान्तरेषु च, मे. महापद्मः स्मृतो नागनिधिसंख्यान्तरेषु च, वि. महापद्मः पुन र्निधौ। नागसंख्याभिदोः, हे.

महाबल. महाबलं सीसकेऽतिबलायां स्त्री बलोत्कटे त्रिलिङ्गम्, मे. महाबलं सीसके स्याद् बलाढ्येऽपि महाबला। भवेदतिबलायां च, वि. महाबलो बलीयसि। वायौ महाबलं सीसे महाबला बलाभिदि, हे.

महामात्र. महामात्रः समृद्धे चामात्ये हस्तिपकाधिपे, मे. महामात्रः समृद्धेऽप्यमात्ये हस्तिपकाधिपे, वि महामात्रः प्रधाने स्यादारोहकसमृद्धयोः, हे.

महामुनि. महामुनिरगस्त्ये ना कुस्तुम्बुरुणि न द्वयोः, मे. महामुनिरगस्त्ये स्याद् धन्याकागस्त्ययोरपि, वि. महामुनिः। अगस्ति-कुस्तुम्बुरुणोः, हे.

महामूल्य. महामूल्यः पद्मरागे ना महार्घेऽन्यलिङ्गकः, मे. महामूल्यं महार्घे स्यात् पद्मरागमणावपि, वि. महामूल्यं महार्घके। पद्मरागमणौ, हे.

महारजन. महारजनमुद्दिष्टं शातकुम्भकुसुम्भयोः, मे, वि. महारजनं कुसुम्भे स्वर्णे, हे.

महारस. महारसस्तु स्यात् खर्जूरे कोशकारकशेरुणोः, मे, वि. महारसः पुनरिक्षौ खर्जूरद्रौ कशेरुणि, हे. खर्जूरेक्षो र्महारसः, त्रि.

महार्घ. महार्घस्तु महामूल्ये त्रिषु स्यात् लावके पुमान्, मे. महार्घस्तु महामूल्ये तथा लावकपक्षिणि, वि. महार्घो लावकाण्डजे। महामूल्ये, हे. महार्घस्तु महामूल्ये पुंसि लावकपक्षिणि, त्रि.

महालय. महालयो विहारे स्यात् तीर्थे च परमात्मनि, मे, वि. महालयः पुनः। तीर्थे विहारपरमात्मनोः, हे. महालयोऽपि तीर्थे स्यात्, हा.

महावीर. महावीरस्तु गरुड़े शूरे सिंहे मखानले। वज्रे श्वेततुरङ्गे च सन्तानविहगेऽपि च, मे. महावीरः पवौ तार्क्ष्ये शूरे सिंहेऽपि कोकिले। मखानले च कर्के च महावीरो जराटके, वि. महावीरोऽन्तिमजिने परपुष्टे जराटके। तार्क्ष्ये कर्के पवौ शूरे सिंहे मखकृताग्नने, हे. मखाग्नौ च महावीरः, त्रि.

महाशङ्ख. महाशङ्खो मानुषास्थिसंख्याभेदालिकेषु च, मे. महाशङ्खो नरास्थ्नि स्यात् निधिसंख्याप्रभेदयोः, वि. महाशङ्खो निधिभेदे संख्याभेदे नरास्थनि, हे.

महासहा. महासहा माषपर्ण्यामम्लानेऽपि योषिति, मे. महासहा माषपर्ण्यामम्लानकुसुमेऽपि च, वि.

महासेन. महासेनः कार्त्तिकेये महासैन्यपतावपि, मे. महासेनो विशाखे स्यात् महासैन्यपतावपि, वि. महासेनो महासेनेऽत्र स्कन्देऽपि, हे.

महिला. महिला फलिनोस्त्रियोः, मे. महिला भीरुगुन्द्रयोः, वि. महिला नार्यां गुन्द्रायाम्, हे.

महिषी. महिषी कृताभिषेकासैरिन्ध्योरोषधीभिदि, मे. महिषी नृपपत्न्यां च सैरिन्ध्यामोषधीभिदि, वि. महिषी रूपयोषिति। सैरिन्ध्यामोषधीभेदे, हे. महिषी राजपत्न्यपि, त्रि.

मही. मही नद्यन्तरे भूमौ, मे. मही भूमौ मही नद्याम्, वि. मही भूमौ नदीभेदे, हे.

महेन्द्र. महेन्द्रः पर्वते शक्रे, मे, वि. महेन्द्रो वासवे शैले, हे. महेन्द्रो भूधरे शक्रे, त्रि.

महेश्वर. महेश्वरो महादेवे कथितोऽधीश्वरेऽपि च, मे.

महोदय. महोदयो कान्यकुब्जे चाधिपत्यापवर्गयोः, मे. महोदयः कान्यकुब्जेऽप्याधिपत्यापवर्गयोः, वि. महोदयं पुरे। महोदयः स्वामिमुक्त्योः, हे.

महौषध. महौषधं तु शुण्ठ्यां स्याद् विषायां लशुनेऽपि च, मे. महौषधं शृङ्गवेरे विषायां लशुनेऽपि च, त्रि. महौषधं तु शुण्ठ्यां विषारसोनयोः, हे. लशुनेऽतिविषायां च शुण्ठ्यामपि महौषधम्, त्रि.

मा. मा वारणे विकल्पे च, मे. V. म.

मांस. मांसः स्यादामिषे क्लीवं कक्कोलीजटयोः स्त्रियाम्, मे. मांसं स्यादामिषे मांसी कक्कोलीजटयोरपि, वि.

माकन्द. माकन्दः सहकारेऽस्त्री धात्रीनगरभेदयोः, मे. माकन्दः सहकारे सरान् माकन्द्यामलकीफले, वि, हे. अथ माकन्द्यामलक्यां नाम्नपादमे, त्रि.

मागध. मागधी स्त्री कणायूथ्यो बाचयवन् मगधोद्भवे। पुंसि वैश्यात् चत्रियाजे शुक्लजीरकवन्दिनोः, मे. मागधी पिप्पलीयूथ्यो मांगधो मगधोद्भवे। वैश्यतः चत्रियापुत्रे शुक्लजीरकवन्दिनोः, वि. मागधो मगधोद्भूते शुक्लजीरकवन्दिनोः। वैश्यतः चत्रियापुत्रे मागधी सत्रात् तु पिप्पली। यूथो

मायाविशेषश्च, हे. अथ मागधी। पिप्पल्यां यूथिकायां ना लग्ने मगधजे त्रिषु, त्रि.

माचल. माचलो वन्दिचौरे च ग्राहरोगयोः, मे. माचलो वन्दिचौरे स्याद् ग्राहे रुजि चामये, वि. माचलः। वन्दिचौरे रुजि ग्राहे, हे.

माठर. माठरो व्यासेऽर्कपारिपार्श्विके, मे. माठरो द्विजभेदे स्याद् व्यासेऽर्कपारिपार्श्विके, वि. माठरो व्यासविप्रयोः। सूर्यानुगे, हे.

माढ़ि. माढ़िः स्त्री पत्रभङ्गौ च माढ़ि दैन्यप्रकाशने, मे. माढ़िः पत्रादिभङ्गौ सत्रान् माढ़ि दैन्यप्रकाशने, वि. माढ़ि दैन्यं पत्रसिराऽर्चा, हे.

माणवक. माणवको हारभेदे बाले कुपुरुषेऽपि च, मे. माणवकस्तु पुंसि स्याद् बालहारभिदोरपि, हे. हारभेदे माणवको बाले कुपुरुषे वटौ, त्रि.

मातङ्ग. मातङ्गः श्वपचे गजे, मे, वि. मातङ्गः श्वपचो हस्ती, हे. गजेऽपि नागमातङ्गौ, अ, टा. V. नाग.

मातुल. मातुलो व्रीहिभिन्मातृभ्रात्रोश्च मदनद्रुमे। धूस्तूरे, मे. मातुलो मदनद्रुमे। मातुर्भ्रातरि धत्तूरे व्रीहिभेदेऽपि मातुलः, वि. मातुलो मदनद्रुमे। धत्तूरेऽहिविव्रीहिभिदोः पितुः श्याले, हे. धूस्तूरेऽपि च मातुलः, त्रि,

मातुलपुत्रक. मातुलपुत्रक इत्यपि मामकतनये फले च धूर्तस्य, मे. मातुलपुत्रको धूर्तफले सत्रान् मामकात्मजे, वि. मातुलपुत्रकः। धत्तूरकस्य च फले मातुलस्य च नन्दने, हे.

मातुलानी. मातुलानी कलापे स्याद् भङ्गायां मातुलस्त्रियाम्, मे, वि. मातुलानी पुनः शणे। कलापे मातुलपत्न्याम्, हे. मातुलानी तु भङ्गायां मातृभ्रातृस्त्रियामपि, त्रि

मातृ. माता गौर्यादिजननीगोब्रह्माण्यादिभूमिषु, (स्त्रियाम्) मे. माता काव्याप्रसूगोषु ब्राह्मीत्याद्यासु मातरः, वि. माता गौ दुर्गा ..

जननी मही। मातरस्तु ब्रह्माण्याद्याः, हे. पृथिवीजननीगावो ब्रह्माण्या-द्याश्च मातरः, त्रि.

मातृका. मातृका धातृकामातो देवीभिद्वर्णमालयोः, मे. मातृका करणे स्वरे। मातृवर्णसमाम्नायोपमातृषु, हे.

मात्र. मात्रा कर्णविभूषायां वित्ते माने परिच्छदे। अचरावयवे स्वल्पे क्लीवं कात्स्न्र्येऽवधारणे, मे. मात्रं चावधृतौ कात्स्न्र्ये मात्रा कर्ण-विभूषणे। अचरावयवे वृत्ते मानेऽल्पे च परिच्छदे, वि. मात्रं त्ववधृतौ स्वार्थे कात्स्न्र्ये मात्रा परिच्छदे। अचरावयवे द्रव्यमानेऽल्पे कर्णभूषणे। काले वृत्ते च, हे. मात्रा परिच्छदे। अल्पे च परिमाणे सा मात्रं कात्स्न्र्ये-ऽवधारणे, अ. परिच्छदे प्रमाणे च मात्राख्या परिकीर्तिता, अने. मात्रा परिच्छदेऽपि, ह.

माधव. माधवोऽजे मधौ राधे यादवे ना स्त्रियां मिसौ। मधुशर्क-रावासन्तीकुट्टनीमदिरासु च। गोमहिषादिसम्पत्तौ, मे. माधवस्तु वसन्ते स्यात् वैशाखे गरुडध्वजे। माधवी मदिरायां च कुट्टन्यामतिमुक्तके। मधुनः शर्करायां च, वि. माधवः। विष्णौ वसन्ते वैशाखे माधवी मधुशर्करा। वासन्ती कुट्टनी हाला, हे. माधवौ हरिवैशाखौ, त्रि

मान. मानश्चित्तोन्नतौ ग्रहे। क्लीवं प्रमाणे प्रस्थादौ, मे. मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नतौ ग्रहे, वि, हे. मानं प्रमाणे तौल्ये च, त्रि.

मानस. मानसं सरसि स्वान्ते, मे, वि. मानसं स्वान्तसरसोः, हे स्वान्ते सरसि मानसम्, त्रि मानसं चित्तमित्युक्तं मानसं त्रैदशं सरः, अने.

मानिन्. मानिनी तु स्त्रियां फल्यां मानी मानवति त्रिषु, मे.

मामक. मामकं स्यात् मदीयार्थे त्रिषु पुंसि तु मातुले, मे. मामकं ममतायुक्ते मातुले मामकः स्मृतः, वि मामकं तु मदीये स्यात् मामको मातुले स्मृतः, हे

माय. माया सा‍च्छाम्बरीबुद्ध्योः मायः पीताम्बरे सुरे, मे. स्त्रान् माया शाम्बरीधियोः। माया दम्भे कृपायां च मायः पीताम्बरेऽसुरे, वि. स्त्रान् माया शाम्बरी कृपा। दम्भो बुद्धिश्च मायस्तु पीताम्बरेऽसुरेऽपि च, हे. स्त्रान् माया शाम्बरीबुद्ध्योः, त्रि.

मार. मारो स्मृतौ स्मरे विघ्ने मारी चण्ड्यां जनक्षये, मे. मारो मृतौ दर्पेऽनङ्गे मारी चण्ड्यां जनक्षये, वि. मारोऽनङ्गे मृतौ विघ्ने मारी चण्ड्यां जनक्षये, हे. विघ्नमन्मथयो मारः, त्रि,

मारि. मारिः स्त्री मारणे वर्षे, मे.

मारिष. मारिषः शाकभिद्यार्ये नाट्योक्त्या पुंसि योषिति। दक्षा-म्बायां च, मे. मारिषः शाकभेदे स्यात् मारिषा दक्षमातरि। नाट्योक्त्यां मारिषश्चार्ये, वि. मारिषस्त्वार्यशाकयोः। मारिषा दक्षजननी, हे.

मारीच. मारीचो रक्षसो भेदे कक्कोले याजकद्विजे। मारीची देवताभेदे, मे, वि. मारीच. कक्कोले याजकद्विपे। रक्षोभेदे, हे. कक्कोलेऽपि च मारीचः, त्रि.

मारुण्ड. मारुण्डोऽण्डे भुजङ्गानां मार्गे गोमयमण्डले, मे, वि, हे.

मार्ग. मार्गो मृगमदे मासप्रभेदेऽन्वेषणाध्वनोः, मे, वि. मार्गो मृगमदे मासे सौम्यर्क्षेऽन्वेषणे पथि, हे. मार्गस्तु मासान्वेषणवर्त्मसु, त्रि. अन्वेषणेऽपि मार्गः, द्व

मार्गण. मार्गणो याचके शरे। याञ्चान्वेषणयोः क्लीवम्, मे मार्गणं प्रार्थनेऽन्वेषे मार्गणो याचके शरे, वि. मार्गणं याचनेऽन्वेषे मार्गणस्तस्करेऽर्थिनि, हे. मार्गणो याचको ज्ञेयो मार्गणोऽपि शिलीमुख, अने.

मार्जन. मार्जनं न द्वयो मार्ष्टौ पुंसि स्यात्लोध्रशाखिनि, मे. मार्जनं कथितं मार्ष्टौ मार्जनो रोध्रशाखिनि, वि मार्जनो लोध्रशाखिनि। मार्जनं शुद्धिकरणे मार्जना मुरजध्वनौ, हे

मार्जार. मार्जार ओतौ खट्टाशे, मे, वि. मार्जारः स्यात् खट्टाश-विडालयोः, हे

मार्जालीय. मार्जालीयः स्मृतः शूद्रे विड़ाले कायशोधने, मे. मार्जालीयः स्मृतः शूद्रे चण्डाले कायशोधने, वि. मार्जालीयः शूद्रविड़ालयोः। शरीरशोधने, हे.

मार्तण्ड. मार्तण्डः क्रोड़सूर्ययोः, मे. मार्तण्डस्तपने क्रोड़े, वि. मार्तण्डस्तरणौ क्रोड़े, हे. मार्तण्डौ खगदंष्ट्रिणौ, त्रि.

माल. मालं क्षेत्रे स्त्रियां श्वाखजो जात्यन्तरे पुमान्, मे. मालं क्षेत्रे जने मालो माला पुष्पादिदामनि, वि. मालं तु कपटे वने। मालो जने स्यान् माला तु पंक्तौ पुष्पादिदामनि, हे.

मालती. मालती जातियुवतिजप्रोत्स्नासु सरिदन्तरे। काकमाचत्रां विशल्यायां विभावर्यामपीष्यते, वि. मालती युवती काकमाचत्रां जातिविशल्ययोः। ज्योत्स्नायां निशि नद्यां च, हे.

मालिक. मालिका सप्तलापुत्रीग्रीवालङ्करणेषु च। पुष्पमाल्ये नदीभेदे पक्षिभेदे तु मालिकः, मे. मालिका सरिदन्तरे। ग्रैवेये पुष्पमालायां पक्षिमद्ये च मालिका, वि. अथ मालिका। पक्षिभेदे सरिद्भेदे ग्रैवेये पुष्पदामनि, हे.

मालिनी. मालिनी मातृकावृत्तभिदो मौलिकयोषिति। गौरीचम्पानगर्योश्च मन्दाकिन्यां नदीभिदि, मे. मालिनी वृत्तभेदे स्यान् मालाकारस्त्रियामपि। चम्पानगर्यां गौर्यां च मन्दाकिन्यां च मालिनी, वि. मालिन्यमायां गङ्गायां चम्पावृत्तप्रभेदयोः। मालिक्याम्, हे. छन्दश्चम्पा च मालिनी, त्रि.

मालु. मालुः पत्रलतानार्योः स्त्रियाम्, मे. मालुः पत्रलतास्त्रियोः, वि. मालुः स्त्रियां पत्रवल्याम्, हे.

मालुधान. मालुधानो मातुलाहौ मालुधानी लतान्तरे, मे. मालुधानश्चित्रसर्पे मालुधानो लतान्तरे, वि. मालुधानी लताभिदि। मालुधानो मातुलाहौ, हे. मालुधानश्चित्रसर्पे महापद्मोऽपि दृश्यते, त्रा.

माल्य. माल्यं कुसुमतत्स्रजोः, मे. माल्यं मालाप्रसूनयोः, वि. माल्यं मालाकुसुमयोः, हे

माष. माषो व्रीह्यन्तरे मूर्खे मानत्वग्दोषभेदयोः, मे, वि. माषो माने धान्यभेदे मूर्खे त्वग्दोषभिद्यपि, हे मूर्ख माने फले माषः, त्रि.

मास. मास्चन्द्रमासयोः पुमान्, मे. माः स्त्रीतश्चन्द्रमासयोः, वि. मास्सु मासे निशाकरे, हे. मास्चन्द्रमासयोः पुंसि, त्रि.

मास. मासो मासि समाख्यातो गोष्ठे कुक्कुटराभयोः, वि.

मिति. मिति र्मानेऽप्यवच्छेदे, (स्त्रियाम्) मे. मिति र्माने व्यवच्छेदे, वि. मितिरैयत्तप्रमानयोः, हे.

मित्र. मित्रं सुहृदि न द्वयोः। सूर्ये पुंसि, मे. मित्रं सुहृदि मित्रोऽर्के, वि. मित्रं तु सख्यौ मित्रो दिवाकरे, हे. मित्रो रवावपि, अ. मित्रो भानुः सुहृन् मित्रम्, अने.

मिथस् मिथोऽन्योन्ये रहस्यत्रे च, मे. मिथोऽन्योन्यं रहस्यपि, हे, अ मिथोऽन्योन्यं मिथो रहः, वि.

मिथुन. मिथुनं तु द्वयो राशिभेदे स्त्रीपुंसयुग्मके, मे. मिथुनो राशिभेदे स्यात् मिथुनं दम्पतीयुगे, वि मिथुनं राशौ मिथुनं पुंस्त्रियोर्युगे, हे. राशौ युग्मे च मिथुनम्, त्रि.

मिद्ध मिद्धं चित्ताभिसंक्षेपे क्लीबमालस्यनिद्रयोः, मे. मिद्धमालस्यनिद्रयोः। तथा चित्ताभिसंक्षेपे, वि. मिद्धं चित्ताभिसंक्षेपे निद्रालसितयोरपि, हे. मिद्धं चित्ताभिसंक्षेपे निद्रायां च, त्रि.

मिष. मिषं व्याजे स्पर्धने ना, मे. मिषश्च स्पर्धने व्याजे, वि. मिषं व्याजे स्पर्धने च, हे.

मिसि. मिसिः स्त्री मधुरामांस्योः शतपुष्पाजमोदयोः, मे. मिसिस्तु मधुरामांस्यो र्गजपुष्पाजमोदयोः, वि. मिसि र्मांस्यजमोदयोः। शतपुष्पामधुर्योश्च, हे.

मिहिर. मिहिरः सूर्यवृद्धयोः, मे. मिहिरो भास्करे वृद्धे, वि. मिहिरोऽर्केऽम्बुदे वृद्धे, हे.

मीन. मीनो राश्यन्तरे झषे, मे, त्रि. मीनो राश्यन्तरे मत्स्ये, वि. मीनो मत्स्ये राशिभेदे, हे.

मीनाम्नीण. मीनाम्नीणस्तु पुंलिङ्गो दर्दुराम्ने च खञ्जने, मे. मीनाम्नीणो दर्दुराम्ने मीनाम्नीणश्च खञ्जने, वि. मीनाम्नीणस्तु खञ्जने। दर्वीराले, हे.

मुकुन्द. मुकुन्दः पारदे विष्णौ रत्नभेदे च कुन्दुरौ, मे. मुकुन्दः पुण्डरीकाक्षे रत्नभेदे च पारदे, वि. मुकुन्दः पारदे रत्नविशेषे गरुड़ध्वजे, हे.

मुकुर. मुकुरः सत्रान् मकुरवद् दर्पणे वकुलद्रुमे। कुलालदण्डे, मे. मुकुरो मल्लिकापुष्पे दर्पणे वकुलद्रुमे। कुलालदण्डे मुकुरो मकुरोऽप्येषु विश्रुतः, वि. मुकुरो मकुरो यथा। कुलालदण्डे वकुले कोरकादर्शयोरपि, हे.

मुकुष्ठ. v. मकुष्ठ.

मुक्त मुक्तः प्राप्तमोक्षे च मोचिते। त्रिषु स्त्री मौक्तिके, मे. मुक्ता तु मौक्तिके मुक्तः प्राप्तमुक्तौ च मोचिते, वि. मुक्ता मौक्तिकपुंश्चल्योः, हे. मुक्तौ निर्वृतमोचितौ, त्रि.

मुक्ताफल. मुक्ताफलं तु कर्पूरे मौक्तिके लवलीफले, मे, वि. मुक्ताफलं घनसारे मौक्तिके लवलीफले, हे.

मुक्ति. मुक्ति र्मोक्षे च मोचने। मालाद्यः स्त्रियाम्, मे. मुक्तिः सत्रान् मोचने मोक्षे, वि. मुक्ति र्मोचनमोक्षयोः, हे.

मुख. मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि। सन्ध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम्, मे मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि, वि. मुखमुपाये प्रारम्भे श्रेष्ठे निःसरणास्ययोः, हे.

मुग्ध. मुग्धस्तु सुन्दरे मूढे, मे. मुग्ध. सुन्दरमूढयोः, वि. मुग्धो मूढे रमेत्र, हे.

मचकुन्द. मुचुकुन्दो द्रुमभेदे मान्धातृतनयेऽपि च, मे मुचु-

कुन्दो द्रुभेदे स्यात् मुनिदैत्यविशेषयोः, वि. मुचुकुन्दस्तु द्रुभेदे मुनिदैत्ययोः, हे.

मुण्ड. मुण्डो दैत्यान्तरे राहुग्रहे ना मुण्डिते त्रिषु। मुण्डा मुण्डीरिकायां स्यात् स्त्रियामस्त्री तु मूर्धनि, मे. मुण्डो दैत्यान्तरे राहौ मूर्धमुण्डितयोरपि, वि. मुण्डो मुण्डितमौर्ययोः। राहौ दैत्यान्तरे, हे. राहौ दैत्यान्तरे मुण्डो मूर्ध्नि स्त्री मुण्डिते त्रिषु, त्रि.

मुण्डन. मुण्डनं वपने त्राणे, मे, वि. मुण्डनं रक्षणे क्षौरे, हे.

मुदिर. मुदिरः कामुके मेघ, मे, हे. मुदिरः कामुकेऽम्बुदे, वि.

मुद्गर. मुद्गरं मल्लिकाभेदे पुंसि लोष्टादिभेदने, मे. मुद्गरं मल्लिकाभिदि। लोष्टादिभेदनेऽपि स्यात्, वि. मुद्गरः कोरकास्त्रयोः। लोष्टादिभेदने चापि, हे.

मुनि. मुनिः पुंसि वशिष्ठादौ वङ्गसेनतरौ जिने, मे. मुनि र्यमीन्द्रदीबुद्धपियालागस्तिकिंशुके, वि. मुनि र्वाचंयमेऽर्हति। पियालागस्तिपालाशे, हे. मुनि र्वाचंयमे बुद्धे, त्रि.

मुनिभेषज. मुनिभेषजमागस्त्ये हरितक्यां च लङ्घने, मे, वि. मुनिभेषजं त्वगस्तिपथ्यायां लङ्घनेऽपि च, हे. लङ्घने मुनिभेषजम्। आगस्त्ये च हरितक्याम्, त्रि.

मुर. मुरा गन्धद्रव्येऽ दैत्यान्तरे पुमान्, मे.

मुर्मुर. मुर्मुरस्तुपवह्नौ स्यात् मन्मथे रविवाजिनि, मे, वि. मुर्मुरो मन्मथे सूर्यतुरगे तुषपावके, हे.

मुषित. मुषितं हृतखण्डितयोः, मे. मुषितं खण्डिते हृते, वि, हे.

मुष्क. मुष्को मोचकवृक्षे सप्रात् सङ्घाते वृषणेऽपि च, मे. मुष्को मोचद्रुमे सङ्घे तस्करे मांसलाण्डयोः, हे. मुष्कोऽण्डकोशे सङ्घाते मुष्को मोचे च पादपे, वि.

मुष्टि. मुष्टि र्द्वयोः फले। बद्धपाणौ तसरौ, मे. मुष्टि र्बद्धकरे फले, वि.

मु(ष)सल. मुसलं सत्रादयोऽग्रे तु पुंनपुंसकयोः स्त्रियाम्। तालमूल्यामाखुपर्णीगृहगोधिकयोरपि, मे. मुसलं तु स्यादयोऽग्रे मुसली मता। तालमूल्यामाखुपर्णीगृहगोधिकयोरपि, वि. मुसलं सत्रादयोऽग्रके। मुसली तालमूल्याखुपर्णिका गृहगोधिका, हे.

मुहिर. मुहिरः काममूर्खयोः, मे, वि, हे.

मूक. मूकस्त्ववाचि ना दैत्ये रेके कृपणमन्दयोः, मे. मूकोऽप्यवाक्कृतौ दीने, वि. मूको दैत्यावाग्दीनेषु, हे.

मूढ़. मूढ़स्तु तन्द्रिते बाले, मे. मूढ़स्तन्द्रितबालयोः, वि. मूढ़स्तन्द्रिते जड़े, हे. विचेष्टबालिशौ मूढ़ौ, त्रि.

मूर्छित. मूर्छितमपि सोच्छ्रये च मूढ़े च, मे. मूर्छितं सोच्छ्रये मूढ़े, वि, हे. मूर्छितौ मूढ़सोच्छ्रयौ, अ.

मूर्त. मूर्तं सत्रात् त्रिषु मूर्च्छाले कठिने मूर्तिमत्यपि, मे, त्रि. मूर्तं मूर्तिमति प्रोक्तं मूर्च्छाले कठिनेऽपि च, वि.

मूर्ति. मूर्तिः कायकाठिन्ययोः स्त्रियाम्, मे. मूर्तिः काठिन्यकाययोः, वि, अ. मूर्तिः पुनः प्रतिमायां कायकाठिन्ययोरपि, हे.

मूर्धाभिषिक्त. मूर्धाभिषिक्तो भूपाले मन्त्रिणि क्षत्रियेऽपि च, मे. मूर्धाभिषिक्तो भूपाले प्रधाने क्षत्रियेऽपि च, वि. मूर्धाभिषिक्तः प्रधाने क्षत्रियक्षितिपालयोः, हे. मूर्धाभिषिक्तो भूपेऽपि, अ. मूर्धाभिषिक्तोऽमात्येऽपि, त्रि.

मूल. मूलं शिफादयोः। मूलविन्तेऽन्तिके वा ना भे, मे. मूलं पार्श्वाद्ययोरुड़ौ। निकुञ्जशिफयोः, हे. मूलमाद्ये शिफाभयोः, अ. निकटेऽपि च मूलं सत्रात्, त्रि. मूलमाद्ये शिफायां सत्राद् भे निकुञ्जेऽन्तिकेऽपि च, वि.

मूल्य. मूल्यं सत्राद् वेतने वस्त्रे, मे. मूल्यं तु वेतने वस्त्रे, वि. मूल्यं वस्त्रे वेतने च, हे.

मृग. मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः। अन्वेषणे च याञ्चायां

मृगी तु पत्नितान्तरे, मे. मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः। याञ्चायां मृगयायां च मृगी स्यात् वनितान्तरे, वि. मृगः कुरङ्गे याञ्चायां मृगयायां गजान्तरे। पशौ नक्षत्रभेदे च मृगी तु वनितान्तरे, हे. पशवोऽपि मृगाः, अ. मृगोऽन्विष्टौ, त्रि. मार्गणेऽपि मृगः क्वचित्, शा.

मृगनेत्रा. मृगनेत्रा रात्रिभेदे विशेषे योषितस्तथा, मे.

मृगयु. मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि, मृगयु र्ब्रह्मणि प्रोक्तो गोमायुव्याधयोरपि, वि. मृगयुस्तु फेरौ ब्रह्मणि लुब्धके, हे.

मृगाक्षी. मृगाक्षी तु विशालामृगनेत्रयोः, मे. मृगाक्षी चेन्द्रवारुण्यां मृगनेत्रात्रियामयोः, वि. मृगाक्षी मृगलोचना। त्रियामेन्द्रवारुणी च, हे.

मृगाङ्क. मृगाङ्को मारुते चन्द्रे वि.

मृगारि. मृगारिः स्यात् पुंसि कण्ठीरवशार्दूलयोरपि, मे.

मृणाल. मृणालं नलदे क्लीवं स्त्रीनपुंसकयो र्बिसे, मे. मृणालं बिसिनीमूलं मृणालं च जलाकुलम्, अने.

मृत. मृतं तु याचिते मृत्यौ क्लीवं मृतुप्रमति त्रिषु, मे. मृतं मृत्यौ याचितेऽपि, हे. मृतं स्याद् याचिते मृत्यौ मृतुप्रमत्यभिधेयवत्, वि.

मृतुत्र. मृतुत्र र्ना मरणे यमे, मे. मृतुत्र र्मरणदेवयोः; वि आतङ्केऽजगरे कुन्ते मृतुत्रः स्यात् मरणेऽपि च, अने.

मृतुत्रफल. स्यात् मृतुत्रफला कदल्यां महाकालफले पुमान्, मे. मृतुत्रफलो महाकाले कदल्यां मृतुत्रफल्यपि, वि. मृतुत्रफलो महाकाले मृतुत्रफली कदल्यथ, हे.

मृतुत्रवञ्चन. स्यात् मृतुत्रवञ्चनः पुंसि श्रीफलद्रोणकाकयोः, मे, वि. मृतुत्रवञ्चनः श्रीफले हरे। द्रोणकाके, हे.

मृत्सा. मृत्सा काक्षयां श्रेष्ठमृदि, मे मृत्सा तु कथिता वासीश्रेष्ठमृत्तिकयो र्बुधैः, वि मृत्सा वासी तु मृत्तिका, हे.

मृत्स्ना मृत्स्ना मृत्सातुवर्योश्च, मे मृत्स्ना तुवरिकायां स्यात् मृत्सायामपि दृश्यते, वि मृत्स्ना मृत्सा तुवर्यपि, हे.

मृदङ्ग. मृदङ्गः पटहे घोषे, मे, वि. मृदङ्गो घोषवाद्ययोः, हे.

मृदु. मृदुः स्यात् कोमलेऽतीक्ष्णे, मे. मृदुः स्यात् कोमले खरे, वि. मृदतीक्ष्णे कोमले च, हे. मृदू. चातीक्ष्णकोमलौ, अ.

मृष्टेरुक. मृष्टेरुको वदानेऽपि मिष्टाशिन्यतिथिद्विषि, मे, वि. मृष्टेरुकः स्यात् मृष्टाशे दानशौण्डेऽतिथिद्विषि, हे.

मेखला. मेखला खङ्गबन्धे स्यात् काञ्चीशैलनितम्बयोः, मे, वि. मेखलाऽद्रिनितम्बे स्यात् रसनाखङ्गबन्धयोः, हे. मेखलाऽद्रिनितम्बेऽपि, त्रि. कटिदेशे तु मेखला, रु.

मेघ. मेघो मुस्ताजलदयोः पुमान्, मे. मेघः स्यात् मुस्तके घने, वि. मेघस्तु मुस्तके जलदेऽपि च, हे. मेघो वारिदमुस्तयोः, त्रि.

मेघनाद. मेघनादस्तु वरुणे तनये रावणस्य च, मे. मेघनादस्तु वरुणे रावणस्य सुतेऽपि च, वि. मेघनादो मेघशब्दे वरुणे रावणात्मजे, हे.

मेघपुष्प. मेघपुष्पं पिण्डाभ्राम्बुनादेये ना हरे हये, मे. मेघपुष्पं तु पिण्डाभ्रे नादेयजलयोरपि, वि. मेघपुष्पं तु नादेये पिण्डाभ्रे सलिलेऽपि च, हे. मेघपुष्पं तु नादेये पिण्डाभ्रे सलिले विदुः, त्रि.

मेचक. मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान्। तद्युक्ते वाच्यवत् क्लीवं स्रोतोऽञ्जनान्धकारयोः, मे. मेचको वर्हिचन्द्रे स्यात् मेचकः श्यामलेऽपि च। तिमिरे कृष्णवर्णे तु मेचकं वाच्यवद् भवेत्, वि. मेचकः श्यामले कृष्णे तिमिरे वर्हिचन्द्रके, हे. वर्हिचन्द्रे च मेचकः, त्रि.

मेध. मेधा शुद्धौ क्रतौ पुमान्, मे. मेधः क्रतौ *धियां मेधा, वि.* मेधः क्रतौ मेधा तु शेमुषी, हे.

मेधाविन्. मेधावी ना शुके प्राज्ञवत् स्त्रियां मेधान्विते त्रिषु, मे.

मेधि. मेधिः स्यात् खलदारुणि, वि.

मेध्य. मेध्यं त्रिषु शुद्धौ रक्तवचारोचनयोः स्त्रियाम्, मे. मेध्यं शुचौ मेदुरे च वाच्यवत् सेध्यमाश्मे, वि.

मेनाद. मेनादस्तु पुमान् केकिमार्जारच्छगलेषु च, मे. मेनादः

केकिमार्जारच्छगलेषु समीरितः, वि. मेनादास्तु त्रयश्छागमार्जारकशिखण्डिनः, त्रि. मेनादः केकिनि छागे मार्जारे, हे.

मेला. मेला स्यात् मेलके मसौ, मे, वि. मेला त्वञ्जने मेलकेऽपि च, हे.

मेष. मेषो राश्यन्तरे रभे। भैषजाभिदि, मे. मेषो राशिविशेषे स्यात्‌ उरणे भेषजान्तरे, वि. मेषो राश्यन्तरे रुरौ, हे मेषौ राश्यन्तरोरणौ, त्रि.

मेहन. मेहनं मूत्रशिश्नयोः, मे, वि, हे.

मैथुन मैथुनं सुरतेऽपि स्यात् सङ्गतेऽपि नपुंसकम्, मे. मैथुनं सङ्गते रते, वि. मैथुनं रतसङ्गत्योः, हे. मैथुनं सङ्गतौ रते, अ. मैथुनं कथ्यते सद्भिः सम्बन्धग्राम्यधर्मयोः, रु.

मोघ. मोघस्तु मुक्तिपाटलिमोचने, मे. मोघो मुष्ककवृक्षे स्यात्‌ चापवर्गे च मोचने, वि. मोघो निःश्रेयसे वृक्षविशेषे मोचने मृतौ, हे. नन्द्यावर्तः सरलः शालः पाको धवोऽर्जुनस्तिलकः। पद्मस्यन्दनमोघा वृक्षविशेषेऽपि कथ्यन्ते, रु.

मोघ. मोघा स्त्री पाटलायां स्यात्‌ हीननिष्फलयोस्त्रिषु, मे. मोघाऽपि पाटलायां स्यात् मोघा निष्फलहीनयोः, वि. मोघो हीने निष्फले च मोघा स्यात् पाटलातरौ, हे.

मोच. मोचः शोभाञ्जने पुंसि मोचा शाल्मलिरम्भयोः, मे. मोचः शोभाञ्जने मोक्षो मोचा शाल्मलिरम्भयोः, वि. मोचा शाल्मलिकदल्यो र्मोचः शिग्रौ, हे. मोचा शाल्मलिरम्भयोः, त्रि. मोचा शाल्मलिराख्याता मोचा तु कदली मता, धने.

मोचक. मोचक. कदलीशिग्रुनिर्मोचकविरागिषु, मे, वि. मोचको मोचकदलीशिग्रुद्रुमविरागिषु, हे.

मोचाट. मोचाटः कृष्णजीरे च रम्भास्थि मलयोद्भवे, मे, वि. मोचाटः कृष्णजीरके। चन्दने कदलीगर्भे, हे.

मोण. मोणः शुष्कफले नक्रमक्षिकाऽहिकरण्डयोः, मे, वि. मोणः सर्पकरण्डके। वाने नक्रमक्षिकायाम्, हे.

मोदक. मोदकः खाद्यभेदेऽस्त्री हर्षके पुनरन्यवत्, मे. मोदको हर्षके ज्ञेयः खाद्यभेदे च मोदकम्, वि. मोदको हर्षके खाद्ये, हे.

मोरट. मोरटं तु भवेदिक्षुमूलाङ्कोटमस्तनयोः। सप्तरात्रात् परे क्षीरे मूर्विकायां तु मोरटा, मे, वि. मोरटम्। सप्तरात्रात् परे क्षीरेऽङ्कोटपुष्पेक्षुमूलयोः। मोरटा तु मूर्विकायाम्, हे. मोरटं गो र्नवे क्षीरेऽङ्कोटपुष्पेक्षुमूलयोः, त्रि.

मोह. अथ मोहोऽन्यलिङ्गः स्यादविद्यायां च मूर्छने, मे. मोहमिच्छन्ति मूर्छायामविद्यायां च सूरयः, वि. मोहौ मूर्छाविपर्ययौ, हे. अथ मूर्छने। अविद्यायां च मोहः स्यात्, त्रि. मोहः सम्रान् मौढ्यमूर्छयोः, रु.

मौलि. मौलिः किरीटे धम्मिल्ले चूडायामनपुंसकम्। नाऽशोकद्रौ स्त्रियां भूमौ, मे. मौलिः किरीटे धम्मिल्ले चूडाकङ्केलिमूर्धसु, हे. मौलिः किरीटे धम्मिल्ले कङ्केलिद्रुमचूडयोः, वि. चूडा किरीटं केशाश्च संयता मौलयस्त्रयः, अ. मौलिः कङ्केलिद्रुमेऽपि, त्रि.

म्लिष्ट. म्लिष्टं त्वव्यक्तवाचि म्लाने, मे. म्लिष्टमव्यक्तवाचि स्यात् म्लिष्टं म्लानेऽन्यवत् मतम्, वि. अथ म्लिष्टं म्लानमस्पष्टभाषितम्, हे. मिष्टं म्लाने कुवचने, त्रि.

म्लेच्छ. म्लेच्छः पामरभेदे च पापरक्तेऽपभाषणे, मे. म्लेच्छः पापरते जातिभेदे स्यादपभाषणे, वि म्लेच्छो जातिभेदे ह्यपभाषणे, हे.

य. यो ना वायौ यमने या यात्रात्रिधूमितत्यागेषु। वारणयोगसमन्वायानेषु पुमांसु गन्तरि स्यातः, मे. यः सर्वनामानिलयोः, वि. बुधा वाला च वायुश्चक् श्रुङ्गः पुरुषोत्तमः। यमुनो यामुनेयश्च यकारो मान्तिमः स्मृतः, मा. यमो यः कथितः प्राज्ञै र्यो वायुरिति शब्दितः। याने यातरि यमारागे कथितः शब्दवेदिभिः, ए.

यक्ष. यक्षो गुह्यकमात्रे च गुह्यकाधीश्वरेऽपि च, मे. यक्षः श्वेदे च गुह्यके, वि. यक्षः श्वेदे गुह्यके च, हे.

यक्षराट्. यक्षराट् त्र्यम्बकसखे मल्लानां रङ्गचत्वरे, वि. यक्षराट् पुंसि धनदे मल्लानां रङ्गचत्वरे, मे

यज्ञ. यज्ञः सत्रादात्मनि मखे नारायणकृताश्वयोः, हे. यज्ञः पूजा च दानं च, अने.

यतस्. V. इतस्.

यति. यतिः स्त्री पाठविच्छेदे निकारयतिनोः पुमान्, मे. यति-र्निकारे यतिनि पाठच्छेदक्रमे यतिः, वि. यति र्निकारे विरतौ भिक्षौ, हे. अथ यतिः। पाठच्छेदे मुनौ पुमान्, वि.

यथा. यथा तुल्यार्थमानयोः। प्रशंसायाम्, मे. यथाशब्दस्तु निर्दिष्टस्तुल्ययोगानुमानयोः, वि. यथा निदर्शने द्वौ दृष्टे शं निर्देशसाम्ययोः। हेतूपपत्तौ च, हे.

यद्. यद् गर्हाहेत्ववष्टत्योः, मे.

यदि. यदि गर्हावितर्कयोः, मे.

यद्वत्. यद्वत् प्रश्ने वितर्के च, मे.

यन्तृ. यन्ता मठे च सूते ना, मे. यन्ता सूते निषादिनि, हे. यन्ता हस्तिपके सूते, वि, ध.

यन्त्र. यन्त्रं वेदाद्यधिष्ठाने पात्रभेदे नियन्त्रणे, हे.

यन्त्रण. यन्त्रणं रक्षणे स्मृतम्। बन्धने सत्रान् नियमने, मे. यन्त्रणं सत्रान् नियमने बन्धने रक्षणेऽपि च, वि. यन्त्रणं बन्धने त्राणे नियमे, हे.

यम. यमोऽन्यलिङ्गो यमजे ना काके शमने शनौ। शरीरसाधना-पेक्षनित्यकर्मणि संयमे, मे. यमो दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि च। शरीरसाधनापेक्षनित्यकर्मणि चोच्यते, वि. यमः कालयमजयोरहिंसादिषु पञ्चसु। संयमे यमने ध्वाङ्क्षे, हे. यमः संयमकीनाशयामलेषु, त्रि.

यमक. यमकं यमजे शब्दालङ्कारे पुंसि संयमे, मे. यमकं यमजे शब्दालङ्कारे संयमेऽपि च, वि. यमको यमजे व्रते। यमकं वागलङ्कारे, हे. यमकं संयमे शब्दालङ्कारे यमजे त्रिषु, त्रि.

यमन. यमनं बन्धने चोपरतौ क्लीवं यमे पुमान्, मे. यमनं दुःखे चोपरतौ यमे, वि. यमनं यमबन्धयोः, हे.

यमल. यमलं युगले क्लीवं यमलौ चोटिकाद्वये, मे.

यमस्वसृ. यमस्वसा तु दुर्गायां यमुनायामपि स्त्रियाम्, मे.

ययु. ययुः पुमानश्वमेधतुरगे च तुरङ्गमे, मे. ययुः क्रतुहये हये, वि. ययु र्यज्ञहये हये, हे. ययुरश्वे क्रतुहये, त्रि.

यव. यवो धान्ये पृथक्कृते, हे.

यवन. यवनो देशभेदे ना वेगिवेगाधिकाश्वयोः। यवन्योषधिभेदे स्त्री वाचवद्वद् वेगिनि स्मृता, मे.

यवफल. भवेद् यवफलो वेणौ मांसीकुटजयोरपि, मे. यवफलः स्मृतो वेणौ मांसीकुटजयोरपि, वि. यवफलो मांसिकायां कुटजत्वचि-सारयोः, हे.

यवीयस्. यवीयाननुजेऽपि स्याद् यतियूनि च वाचवत्, मे.

यष्टि. यष्टिः पुंसि स्याद् भुजदण्डके। द्वयो र्हारलताभार्ग्यो-र्मधुकाशस्त्रभेदयोः, मे. यष्टि र्भार्गत्रां मधुयष्ट्यां ध्वजदण्डेऽस्त्रहारयोः, हे. यष्टि र्हारलताशस्त्रभेदयो र्ध्वजदण्डके। भार्गत्राश्च मधुयष्ट्याश्च, वि.

याजक. याजकस्तु गजे राज्ञो याज्ञिकेऽपि, मे. याजको याजिनि ख्यातो याजको राजकुञ्जरे, वि याजको राजकुञ्जरे। याज्ञिके च, हे.

याज्ञिक. याय याज्ञिकः। याजके च कुशे च, मे. याज्ञिको याजके कुशे, वि. याज्ञिको याजके दर्भे, त्रि.

यातयाम. यातयामोऽन्यवज्जीर्णे परिभुक्तोज्झितेषु च, मे. यातयामस्तु जीर्णे स्यात् परिभुक्तोज्झितेषु च, वि. यातयामो भुक्तसमुज्झिते जीर्णे च, हे. जीर्णेश्च परिभुक्तश्च यातयाममिदं द्वयस्, श.

यात्रा. यात्रा तु यापनेऽपि स्याद् गमनोत्सवयोः स्त्रियाम्, मे. यात्रा तु यापनोपाये गतौ देवार्चनोत्सवे, वि. यात्रोत्सवे गतौ वृत्तौ, हे. यात्रा स्यादनुवृत्तौ च, रु. यात्रा स्याद् यापने गतौ, श. गमनोत्सवयोर्यात्रा, त्रि.

यादव. यादवः पुंसि केशवे, मे.

यादसाम्पति. यादसाम्पतिरम्भोधौ पश्चिमाशापतावपि, मे. यादसाम्पतिरम्भोधौ प्रतीचीदिक्पतावपि, वि. यादसाम्पतिः पाश्यब्धयोः, हे. पाश्यब्धी यादसाम्पती, त्रि.

यान. यानं स्याद् वाहने गतौ, मे. यानं गतौ वाहनेऽपि, वि. यानं युग्ये गतौ, हे. स्यात्तु वाहने। गतौ च यानम्, त्रि.

यापन. यापनं वर्तने कालक्षेपे निरसनेऽपि च, मे, वि. यापनं कालविक्षेपे निरासे वर्तनेऽपि च, हे. यापनं स्यात् निरसने कालक्षेपे च वर्तने, त्रि.

याप्य याप्यस्तु यापनीये स्यात् निन्दितेऽप्यभिधेयवत्, मे.

याम. यामस्तु पुंसि प्रहरे संयमेऽपि प्रकीर्तितः, मे. यामस्तु प्रहरे व्रते, वि. यामौ प्रहरसंयमौ, हे.

यामि. यामिः कुलस्त्रीस्वस्रोः, मे. यामिः स्वसृकुलस्त्रियोः, अने. v. जामि.

याम्य. याम्याऽप्राचर्या भरण्याश्च पुंस्यगस्त्ये च चन्दने, मे. याम्याऽवाचर्या भरण्याश्च याम्योऽगस्त्ये च चन्दने, वि. याम्याऽप्राचर्या भरण्याश्च, हे.

याव. यावोऽलक्ते पाकभेदे, हे.

यावत्. यावत् कार्त्स्न्येऽवधारणे। प्रशंसायां परिच्छेदे मानाधिकारसम्भ्रमे। पक्षान्तरे च, मे. यावत् तावत् परिच्छेदे कार्त्स्न्यमानावधारणे, वि. यावत् तावदिवावधौ। कार्त्स्न्येऽवधारणे माने, हे. यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे, श.

युक्त v. युज

युक्ति. युक्तिः स्त्री न्याययोगयोः, मे. युक्ति र्न्याये योजने च, हे. न्याययोजनयो र्युक्तिः, त्रि.

युग. युगो रथहलाद्यङ्गे न द्वयोस्तु कृतादिषु। युग्मे हस्तचतुष्केऽपि वृद्धिनामौषधेऽपि च, मे. युगं हस्तचतुष्के स्याद् रथाद्यङ्गे कृतादिके। वृद्धिनामौषधे युग्मे, हे. युगं हस्तचतुष्केऽपि रथसीराङ्गयो र्युगः। युगं कृतादौ युगले वृद्धिनामौषधेऽपि च, वि. यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु, अ.

युञ्जान. युञ्जानः सारथौ विप्रे, मे, वि.

युत. युतो युक्तोऽपृथग्भूते क्लीवं हस्तचतुष्टये, मे. युतोऽन्विते पृथक्, हे. युतं हस्तचतुष्के स्याद् युतं युक्ते युतं पृथक्, वि.

युतक. युतकं संशये युगे। नारीवस्त्राञ्चले युक्ते चलनाग्रेऽपि यौतुके, मे. युतकं संशये युगे। यौतुके चलनाग्रे च स्त्रीवस्त्राञ्चलयुक्तयोः, वि. युतकं तु यौतुके युग्मयुक्तयोः। संशये चलनाग्रे स्त्रीवस्त्रभेदे पटाञ्चले, हे. युतकं वस्त्रभेदे च यौतुके संशयेऽपि च, त्रि.

युध्न युध्नो धनुषि संयुगे, मे. युध्नः संग्रामधनुषोः, वि.

युवन्. युवा सप्रात् तरुणे श्रेष्ठे निसर्गबलशालिनि, मे, वि.

यूथ. यूथं तिर्यक्समूहेऽस्त्री पुष्पभेदे च योषिति, मे. यूथी पुष्पप्रभेदे सप्रान् मागध्यां च कुरुण्टके। यूथं तिर्यक्समूहे स्याद् वृन्दमात्रे च भाषितम्, वि. यूथं तिर्यग्गणे गणे। यूथी तु मागधी पुष्पविशेषयोः कुरुण्टके, हे.

यूथिका यूथिका म्लानके पुष्पविशेषेऽपि च योषिति, मे यूथिका म्लानके पुष्पविशेषेऽपि च यूथिका, वि.

योग योगोऽपूर्वार्थसम्प्राप्तौ सङ्गतिध्यानयुक्तिषु। वपुःस्थैर्यप्रयोगे च विष्कम्भादिषु भेषजे। विस्रम्भघातके द्रव्योपायसन्नहनेष्वपि। कार्मणेऽपि च, मे योगो विस्रम्भघातिनि। लब्धलाभे सङ्गत्यां कार्मणध्यानयुक्तिषु। वपुःस्थैर्यप्रयोगे च सन्नाहे भेषजे धने। विष्कम्भाद्युपाये च, हे.

योगोऽपूर्वार्थसम्प्राप्तौ सङ्गतिध्यानयुक्तिषु। वपुःस्थैर्य्यप्रयोगे च विष्कम्भादिषु भेषजे। विश्रब्धघातिनि द्रव्योपायसन्नहनेष्वपि। कार्म्मणेऽपि च योगः स्यात्, वि. योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु, अ. योगश्चारे पूर्वलाभे सूत्रे विश्रब्धघातिनि। उपाये सङ्गतौ- ध्यानौषधसन्नाहयुक्तिषु, त्रि, योगो युक्तिविशेषः स्यात् संयोगो योग उच्यते। योगश्चागामिको लाभः समाधि र्योग उच्यते, अने.

योग्य. योग्यः प्रवीणयोगार्होपायिशक्तेषु वाच्यवत्। योग्यंच्छत्रा-ख्यभैषज्ये योग्याऽभ्यासार्कयोषितोः, वि. योग्यो योगार्हशक्तयोः। उपायिनि प्रवीणे च योग्यच्छत्राह्वयौषधौ। योग्याऽर्कयोषित्यभ्यासे, हे. योग्यः प्रवीणयोगार्होपायिशक्तेषु वाच्यवत्। क्लीवच्छद्यौषधौ पुष्ये ना स्त्र्यभ्यासा-र्कयोषितोः, मे.

योजन. योजनं परमात्मनि। चतुःक्रोश्याञ्च योगे, मे. योजनञ्च चतुःक्रोश्यां योगे च परमात्मनि, वि. योजनन्तु चतुःक्रोश्यां स्याद् योगे परमात्मनि, हे. चतुःक्रोश्याञ्च योगे च योजनम्, त्रि.

योजनगन्धा. योजनगन्धा कस्तूर्य्यां सीतायां व्यासमातरि, मे, वि. योजनगन्धा व्यासमातरि। कस्तूरीसीतयोश्चापि, हे. सीता योजन-गन्धा स्यात् कस्तूरी व्यासस्वरपि, त्रि.

योनि. योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे, मे योनिः स्यादाकरे भगे, वि. योनिः कारणे भगतोययोः, हे. योनिरुत्पत्तिस्थाने भगेऽपि च, त्रि.

यौवनलक्षण यौवनलक्षणमपत्राप्यार्त लावण्यकुचयोश्च,मे. यौवनलक्षं पयोरुहे च लवणिम्नि च, हे. यौवनलक्षणाभिख्या लावण्ये च पयोधरे, वि.

र. रः स्मृतः पावके तीक्ष्णे, मे. रः पावके तीक्ष्णे च, वि. रस्तीक्ष्णे दहने, हे. क्रोधिनी च भुजङ्गो च ज्वाली रुधिरपायकी। रोचिष्मान् दक्षिणास्य रुधिरो रेफ ईरितः, मा. रश्च रामेऽनिले वह्नौ भूमा-वपि धनेऽपि च। इन्द्रिये धनरोधे च, ए.

रक्त. रक्तोऽसुरक्ते नील्यादिरञ्जिते लोहिते त्रिषु। क्लीबन्तु कुङ्कुमे ताम्रे प्राचीनामलकेऽसृजि, मे. रक्तः स्यात् कुङ्कुमे ताम्रे प्राचीनामलकेऽसृजि। अनुरागिणि नील्यादिरञ्जिते लोहितेऽन्यवत्, वि. रक्तं नील्यादिरागि च, अ. रक्तं नील्यादिरञ्जिते। कुङ्कुमेऽसृजत्रनुरक्ते प्राचीनामलकेऽरुणे, हे.

रक्तक. रक्तको म्लानबन्धूकरक्तवस्त्रानुरागिषु, मे, वि.

रक्तप. रक्तपा स्याज्जलौकायां डाकिन्यां ना तु राक्षसे, मे. रक्तपो रक्षसि प्रोक्तो जलौकायां तु रक्तपा, वि. रक्तपः सम्राट् यातुधाने रक्तपा तु जलौकसि, हे.

रक्तपाद. रक्तपादो मतङ्गजे। स्यन्दने च, हे.

रक्तरेणु. रक्तरेणुः पलाशकलिकोद्गमे। सिन्दूरे, हे. रक्तरेणुस्तु सिन्दूरे पलाशकोरके पुमान्, मे. रक्तरेणुस्तु सिन्दूरे पलाशकलिकोद्गमे, वि.

रक्ताक्ष. रक्ताक्षः कासरे क्रूरे पारावतचकोरयोः, मे, वि. रक्ताक्षो रक्तलोचने। चकोरे महिषे क्रूरे पारावते, हे.

रक्ताङ्ग. रक्ताङ्गस्तु महीसुते। कम्पिल्ले स्त्री तु जीवन्त्यां क्लीबं विद्रुमधीरयोः, मे. रक्ताङ्गं विद्रुमे भौमे विदात् कम्पिल्लधीरयोः। रक्ताङ्गी चापि जीवन्त्याम्, वि. रक्ताङ्गो भौमे रक्ताङ्गं कम्पिल्ले विद्रुमेऽपि च। रक्ताङ्गा जीवन्तिकायाम्, हे. रक्ताङ्गो मङ्गलेऽपि च, त्रि.

रक्षा. रक्षा भस्मरक्षणयोः, मे. रक्षा रक्षणलाक्षयोः, वि. रक्षा रक्षणभस्मनोः, हे.

रङ्क. रङ्कः कृपणमन्दयोः, मे, हे. रङ्कस्तु कृपणे मन्दे, वि.

रङ्ग. रङ्गो ना रागे नृत्ये रणक्षितौ। अस्त्री त्रपुणि, मे. रङ्गः स्यान् नृत्ययुद्धभुवोः। रागे रङ्गं तु त्रपुणि, हे. रङ्गो रणे खले रागे नृत्ये रङ्गं त्रपुण्यपि, वि. नृत्ये रणे खले रागे रङ्गः क्लीबे त्रपुण्यपि, त्रि.

रङ्गमाल. रङ्गमाता तु कुट्टिन्यां दृषद्रोगान्तरे स्त्रियाम्, मे. रङ्गमाता लाक्षालुब्धोः, हे. रङ्गमाता तु कुट्टन्यां स्मृता भूमिरुहामये, वि.

रज. रजो रेणौ परागे स्याद् आवर्त्ते च गुणान्तरे, मे. V. रजस्.

रजक. रजको धावके शुके, वि. रजकौ धावकशुकौ, हे.

रजत. रजतं त्रिषु शुक्ले स्यात् क्लीवं हारे च दुर्वर्णे, मे. रजतं विश्वदे दन्तिदन्तयोस्तारहारयोः, वि. रजतं दन्तिदन्तयोः। धवले शोणिते हारे दुर्वर्णे कूटशैलयोः, हे. रजतं हेम्नि रूप्ये सिते, अ. रजतं हारेऽपि, ह.

रजनी. रजनी नीलिनीरात्रिहरिद्राजतुकासु च, मे. रजनी नीलिकालाक्षाहरिद्रायामिनीषु च, वि. रजनी निशि। लाक्षानीलीहरिद्रासु, हे. निशा हरिद्रा रजनी, त्रि. हरिद्रा रजनी प्रोक्ता रजनी च विभावरी, अने.

रजस्. रजः क्लीवं गुणान्तरे। आर्त्तवे च परागे च रेणुमात्रे च दृश्यते, मे. रजः स्यादार्त्तवे गुणे। रजः परागे रेणौ तु रजवत् परिकीर्तितम्, वि. रजो रेणुपरागयोः। स्त्रीपुष्पे गुणभेदे च, हे. रजो गुणे च स्त्रीपुष्पे, अ.

रजस्वल. रजस्वला पुष्पवत्यां स्त्रियां स्यात् सौरभे पुमान्, मे. रजस्वला पुष्पवत्यां सौरभेऽपि रजस्वलः, वि.

रज्जु. रज्जु, वेणग्रौ गुणे योषित्, मे. रज्जु, वेणग्रौ गुणे स्मृता, वि.

रञ्जन. रञ्जनो रागरजने रञ्जनं रक्तचन्दने। गुण्डारोचनिकानीलीमञ्जिष्ठासु च रञ्जनी, मे. रञ्जनो रागरजने रञ्जनं रक्तचन्दने। गुञ्जारोचनिकानीलीमञ्जिष्ठासु च रञ्जनी, वि. रञ्जनं रञ्जके रक्तचन्दनेऽप्यथ रञ्जनी। मञ्जिष्ठारोचनानीलीगुञ्जासु, हे.

रण. रणः कोणे क्वणे पुंसि समरे पुंनपुंसकम्, मे. रणः कोणे क्वणे युधि, हे. प्राणो रवे रणः, अ. रणः क्वणनयुद्धयोः, त्रि. रणः कोणक्वणाजिषु, वि.

रण्डा. रण्डा मूषिकपर्ण्यांश्च विधवायाश्च योषिति, मे. रण्डा मूषिकपर्ण्याञ्च रण्डा विधवयोषिति, वि. रण्डा त्वाखुपर्णी सतमिया, हे. रण्डा स्याद् विधवौषधोः, वि.

रत. रतं सुरतगुह्ययोः, मे, वि.

रतनारीच. रतनारीचो नारीणां सीत्कारे च शुनि स्मरे, मे. रतनारीच इत्येष कथितो रतिवल्लभे। कुक्कुरे रतनारीचः सीत्कारे वरयोषिताम्, वि. रतनारीचो मन्मथे शुनि स्त्रीणां च शीत्कृतौ, हे. कुक्कुरे रतनारीचः शीत्कारे वरयोषिताम्, त्रि.

रतर्धिक. रतर्धिकं स्याद् दिवसे सुखस्नानेऽष्टमङ्गले, मे, वि. रतर्धिकं तु दिवसे सुखस्नानेऽष्टमङ्गले, हे.

रति. रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः, मे. रतिः स्मरप्रियायाञ्च रागे च रमणे रतिः, वि. रतिः स्मरस्त्रियां रागे रते, हे.

रद्ध. रद्ध वर्त्मनि नद्यां स्त्री, मे. रद्धः सरिति वर्त्मनि, वि.

रत्न. रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्, मे. रत्नं श्रेष्ठे मणावपि, वि. रत्नं स्वजातिश्रेष्ठे स्यात् मणौ, हे. रत्नं स्वजातिश्रेष्ठेऽपि, अ.

रथ. रथः पुमानवयवे स्यन्दने वेतसेऽपि च, मे. रथः स्यात् स्यन्दने काये चरणे वेतसेऽपि च, वि. रथस्तु स्यन्दने पादे शरीरे वेतसद्रुमे, हे. रथः पौरुषदेहयोः, त्रि.

रथकार. रथकारस्तु माहिष्यात् करणीजे च तक्षणि, मे. रथकारस्तु माहिष्यकरणीजे च तक्षणि, वि. रथकारस्तक्षणि स्यात् माहिष्यात् करणीसुते, हे.

रथाङ्ग. रथाङ्गं न द्वयोश्चक्रे ना चक्राङ्गविहङ्गमे, मे. रथाङ्गश्चक्रवाकेऽपि रथाङ्गं चक्र इष्यते, वि. रथाङ्गः कोकपक्षिणि। रथाङ्गं चक्रे, हे. चक्रे रथाङ्गं कोके ना, त्रि.

रथ्या. रथ्या रथौघविशिखावर्त्मनोषु च योषिति। रथवोढरि पुंलिङ्गः, मे. रथ्यो रथोद्वहे। रथ्या रथौघे विशिखावर्त्मनोश्चत्वरेषु च, वि. रथ्यो रथांशे रथवोढरि। रथ्या तु रथसङ्घाते प्रतोल्यां रथचत्वरे, हे.

रद. रदो दन्ते विलेखने, मे, हे रदोऽपि लेखने दन्ते, वि.

रन्तिदेव. रन्तिदेवस्तु नृपते भेदे च गरुड़ध्वजे, मे.

रन्ध्र. रन्ध्रं तु दूषणे च्छिद्रे, मे. V. छिद्र, विवर.

रभस. रभसो हर्षवेगयोः, मे, त्रि. रभसो वेगहर्षयोः, वि, हे.

रम. रमा लक्ष्म्यां रमः कान्ते रक्ताशोकद्रुमे स्मरे, मे. रमः कान्ते रमा लक्ष्म्यां रक्ताशोकद्रुमे स्मरे, वि. रमः कान्ते रक्ताशोके मन्मथे च रमा स्त्रियाम्, हे.

रमण. रमणं पटोलमूले नार्यां स्त्री ना धवे स्मरे, मे. रमणं सत्रात् पटोलस्य मूलेऽपि रमणः प्रिये, वि. रमणं पुनः। पटोलमूले जघने रमणो रासभे प्रिये, हे.

रमति. रमति र्नायके नाके पुंसि सत्रात्, मे. रमति र्नायके स्वर्गे, वि.

रम्भ. रम्भा कदल्यप्सरसो र्ना वेणौ वारणान्तरे, मे. रम्भा कदल्य-प्सरसो रम्भो वैणवदण्डके, वि. रम्भो वैणवदण्डके। रम्भा त्रिदशभामिन्यां कदल्यां च, हे. रम्भा कदल्यप्सरसोः, त्रि. रम्भा देवाङ्गना प्रोक्ता रम्भा तु कदली मता, अने.

रम्य. रम्या रात्रौ चम्पके ना मनोज्ञे त्वभिधेयवत्। नपुंसकं पटोलस्य मूले सूरिभिरिष्यते, मे. रम्यं मनोरमे रम्या रात्रौ रम्यश्च चम्पके, वि. रम्यश्चम्पकहृद्ययोः। रम्या रात्रौ, हे.

रल्लक. रल्लकः कम्बले स्मृतः। तथैव कम्बलमृगे, हे.

रवण. रवणः शब्दने खरे, मे. रवणं रासभे ध्वनौ, वि.

रवि. रविः पर्वतसूर्ययोः, ह.

रश्मि. रश्मिः पुमान् दीधितौ च पक्ष्मप्रग्रहयोरपि, मे. रश्मि-रंशौ प्रग्रहे च, वि. रश्मि र्घृणिप्रग्रहयोः, हे. किरणप्रग्रहौ रश्मी, अ.

रस. रसो गन्धरसे जले। शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रव-रागयोः। देहधातुप्रभेदे च पारदस्वाद्योः पुमान्। स्त्रियां तु रसनापाठा-शल्लकीकङ्गुभूमिषु, मे. रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः। शृङ्गा-

रादौ द्रवे वीर्ये देहधातौ च पारदे। रसा तु शल्लकीपाठाजिह्वाधरणि-कङ्गुषु, वि. रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे। बोले रागे देह-धातौ तिक्तादौ पारदेऽपि च। रसा तु रसनापाठासल्लकीक्षितिकङ्गुषु, हे. शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः, अ. जिह्वा भूः शल्लकी रसा। जले शरीरधातौ च पारदस्वादयो रसः, त्रि. रसो जलं रसो हर्षो रसः शृङ्गारपूर्वकः। रसः सालद्रुनिर्यासः पारदोऽपि रसो विषम्, अने. शृङ्गारा-दिषु नवसु च लवणादिषु षट्सु पारदे रागे। निर्यासवीर्यगुणधातुषु च विषघृतादौ रसः प्रोक्तः, ह.

रसन. रसनं स्वदने ध्वनौ। जिह्वायां तु न पुंसि स्यात् रास्नायां रसना स्त्रियाम्, मे. रसनं स्वादने ध्वाने रसना काञ्चिजिह्वयोः, वि. रसनं ध्वनिते स्वादे रसज्ञारास्नयोरपि, हे. रसनं तु ध्वनौ स्वादे रसज्ञारास्नयोः-स्त्रियाम्, त्रि.

रसायन. रसायनं विषेऽपि स्यात् जराव्याधिजिदौषधे। पुंलिङ्गः पक्षिराजे च विडङ्गाख्यौषधेऽपि च, मे. रसायनं विडङ्गे स्यात् जरा-व्याधिजिदौषधे। रसायनः पक्षिराजे विषेऽपि च रसायनम्, वि. रसायनो विडङ्गके। पक्षीन्द्रे रसायनं तु जराव्याधिभिदौषधे, हे.

रसाल. रसाला रसनादूर्वाविदारीमार्जितासु च। रसालं सिह्लके वोले रसालस्त्वेक्षुचूतयोः, मे. रसाला मार्जितायां स्यात् जिह्वादूर्वाविदारिषु। रसालं सिह्लके वोले रसालस्त्वेक्षुचूतयोः, वि. रसाल इक्षौ चूते च रसालं वोलसिह्लयोः। रसाला दूर्वाविदार्यौ मूर्विकाजिह्वयोरपि, हे. रसाला रसनायां स्यात् मथिते दध्नि पाणिना, श. रसालस्त्विक्षुचूतयोः, त्रि.

रसिक. रसिका स्त्री रसालेक्षुरसयोः सरसे त्रिषु, मे. रसिकापि रसा-लायां काञ्चीरसनयोरपि, वि. रसिका कटिसूत्रके। रसनायां रसालायाम्, हे.

रसित. रसितं पुनः। स्तस्तनितयोः क्लीबं स्वर्णादिखचिते त्रिषु, मे. रसितं तु सुवर्णादिखचिते स्तनिते रुते, वि. रसितं स्वर्णादिलिप्ते रुत-स्तनितयोरपि, हे. स्वर्णाभ्यक्तेऽपि रसितम्, त्रि.

रक्त. रक्तस्त्वक्तचण्डयो:, वि.

रहस्. रहस्तत्त्वे रते गुह्येत्र, मे. रहोऽपि गुह्येत्र सुरते च तत्त्वे, वि. रहो गुह्येत्र रते तत्त्वे, हे. रहो रते च गुह्येत्र च, त्रि.

रहस्य. रहस्या स्त्री नदीभेदे गोपनीयेऽभिधेयवत्, मे. रहस्या निम्नगाभेदे गोपनीये तु वाच्यवत्, वि. रहस्यं गोपनीये स्याद्, रहस्या सरिदन्तरे, हे.

राका. राका नद्यन्तरे कच्छ्वां नवजातरजःस्त्रियाम्। सम्पूर्णेन्दु-तिथौ, मे. राका कच्छ्वां दृष्टरजःकन्यायां सरिदन्तरे। पूर्णेन्दुपूर्णिमायाञ्च, हे. राका तु सरिदन्तरे। कच्छूनवरजःकन्यापूर्णेन्दुपूर्णिमासु च, वि. राका दृष्टरजःकन्या कच्छूः पूर्णेन्दुपूर्णिमा, त्रि.

राचस. राचसो यातुधाने स्यात् चण्डायां राचसी स्मृता, मे. राचसीति च दंष्ट्रायां राचसी रचसः स्त्रियाम्, वि. राचसी कौणपी दंष्ट्रा, हे.

राग. रागस्तु मात्सर्ये लोहितादिषु। क्लेशादावपि रागे च गान्धारादौ नृपेऽपि च, मे. रागः स्याल्लोहितादिषु। गान्धारादौ क्लेशादिकेऽनुरागे मत्सरे नृपे, हे. रागोऽनुरक्तौ मात्सर्ये क्लेशादावहितादिषु। गान्धारादौ नृपे रागः, वि. रागः क्लेशादिके रक्ते मात्सर्ये लोहितादिषु, त्रि.

रागचूर्ण. रागचूर्णः पुमान् दन्तधावने मकरध्वजे, मे. रागचूर्णः स्मरे दन्तधावने रक्तवालुके, वि. रागचूर्णस्तु खदिरे मकरध्वजे, हे.

रागसूत्र. रागसूत्रं तुलासूत्रे पट्टसूत्रे नपुंसकम्, मे. रागसूत्रं तुलासूत्रे पट्टसूत्रेऽपि दृश्यते, वि. रागसूत्रं पट्टसूत्रे तुलासूत्रेऽपि च क्वचित्, हे.

रागिन्. रागी रक्तोऽपि कामुके, मे. रागी रक्ते च कामुके, वि. रागी कामिनि रक्तरि, हे. रक्तः कामी च रागिणौ, त्रि.

राघव. राघवोऽब्धेर्महामीनभेदे च रघुवंशजे, मे. राघवो रघुवंशजे। महामीनप्रभेदेऽपि जलधे राघवः स्मृतः, वि. राघवोऽब्धिमत्स्यान्तरे। रघु-जेऽपि, हे.

राजजम्बू. राजजम्बूस्तु जम्बूभित्पिण्डखर्जूरयोः स्त्रियाम्, मे. राजजम्बूस्तु जम्बूभित्पिण्डखर्जूरयोः स्मृता, वि. राजजम्बूस्तु जम्बूभित्। पिण्डखर्जूरवृक्षस्य, हे.

राजन्. राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ। यक्षे शक्रेऽपि पुंसि स्यात्, मे. राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः, वि. राजा तु पार्थिवे। निशाकरे प्रभौ शक्रे यक्षक्षत्रिययोरपि, हे. राजा मृगाङ्के क्षत्रिये नृपे, अ. यक्षे चन्द्रे च राजा स्यात्, त्रि. राजा चन्द्रो नृपो राजा, अने.

राजबदर. स्याद् राजबदरं रक्तामलके लवणेऽपि च, मे.

राजराज. राजराजः कुवेरेऽपि सार्वभौमे सुधाकरे, मे, वि. राजराजो नृपेशेन्द्वोः कुवेरे, हे.

राजवृक्ष. राजवृक्षः सुवर्णालिपियालयोः, मे. राजवृक्षः प्रियाले स्यात् सुवर्णालुतरावपि, वि. राजवृक्षः पियालके। सुवर्णालुतरौ, हे.

राजहंस. राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे, मे, हे. राजहंसो नृपश्रेष्ठे कादम्बकलहंसयोः, वि. राजहंसो नृपाग्रे च, त्रि.

राजादन. राजादनं क्षीरिकियां पियाले किंशुकेऽपि च, मे, वि. राजादनं प्रियालद्रौ क्षीरिकायां विपल्लके, हे.

राजार्ह. राजार्हं जोङ्गके क्लीवं राजयोग्येऽभिधेयवत्, मे.

राजि. राजिः स्त्री पंक्तिलेखयोः, मे. राजिः स्यात् पंक्तिलेखयोः, वि. राजी रेखायां पंक्तौ च, हे.

राजिका. राजिकापि च केदारे राजसर्षपरेखयोः, मे, वि. राजिका पंक्तौ रेखायां केदारे राजसर्षपे, हे

राजीव. राजीवं नलिने ना तु भेदे हरिणमीनयोः, मे. राजीवाख्या मृगे मत्स्येऽपि पद्मे राजोपजीविनि, वि राजीवो मीनसारङ्गभेदयोः। राजीवमब्जे, हे. राजीवो मृगमीनयोः, त्रि

राज्ञी. राज्ञी राजप्रियायां च भार्यायां भास्करस्य च, मे.

राढ़ा. राढ़ा स्त्री सुह्मशोभयोः, मे. राढ़ा सुह्मेषु शोभायाम्,

वि, हे. राढ़ा सत्राद् दीप्तिदेशयोः, त्रि. राढ़ा देशविशेषश्च राढ़ा शोभा-ऽभिधीयते, अने.

रालक. रालकं पञ्चरात्रे ना वेश्यावेश्माब्दवासिनि, मे. रालकं पञ्चरात्रके। येन वेश्यागृहे नीतो वत्सरस्तत्र रालकः, वि. रालकं पञ्चरात्रके। रालकस्तु पणबधूगृहान्तर्वर्षवासिनि, हे.

राध. राधो मासान्तरे राधा चित्रभेदे च धन्विनाम्। गोपी-विशाखाऽमलकीविष्णुक्रान्तासु विदुत्रति, मे. राधो वैशाखमासि सत्राद् राधा गोप्यां च विद्युति। विष्णुक्रान्तामलक्योश्च चित्रवेधे च धन्विनाम्, वि. राधो वैशाखमासे सत्राद् राधा विद्युद्विशाखयोः। विष्णुक्रान्तामलक्योश्च गोपीवेधविशेषयोः, हे.

राधन. राधनं साधने प्राप्तौ राधना भाषणे स्त्रियाम्, मे. राधनं राधने प्राप्तौ राधनं तोषणेऽपि, वि. राधनं प्राप्तितोषयोः। साधने, हे.

राधरङ्क. राधरङ्कस्तु ना सीरे शीकरे च घनोपले, वि. राध-रङ्कस्तु ना सीरे शीकरे जलदोपले, हे. राधरङ्कः पुमान् सीरे शीकरे च घनोपले, मे.

राम. रामा योषाहिङ्गुलिन्योः क्लीवं वास्तुककुष्ठयोः। ना राघवे च वरुणे रैणुकेये हलायुधे। हरे च पशुभेदे च त्रिषु चारौ सिते-ऽसिते, मे. रामः पशुविशेषे स्यात् जामदग्न्ये हलायुधे। राघवे चासि-तश्वेतमनोज्ञेषु च वाच्यवत्। रामाऽङ्गनाहिङ्गुलिन्यो रामं वास्तुककुष्ठयोः, वि. रामः श्यामे हलायुधे। पशुभेदे सिते चारौ राघवे रेणुकासुते। रामं तु वास्तुके कुष्ठे रामा हिङ्गुलिनिस्त्रियोः, हे. बले रामो नीलचारु-सिते त्रिषु, अ. अथ राघवे। रामः पशौ भार्गवे च, त्रि. रामा स्त्री जामदग्न्यश्च रामो रामौ सितासितौ। रामः पशुविशेषश्च रामो दश-रथात्मजः, अने. शुक्लेऽपि शुचिरामौ, द.

रामिल. रामिलो रमणे कामे, मे, हे. रामिलो रमणे स्मरे, त्रि.

राशि. राशि र्मेषादिपुञ्जयोः, मे, वि, हे, अ.

राष्ट्र. राष्ट्रं स्यादुपवर्तने। उपद्रवे क्लीवपुंसोः, मे. राष्ट्रमुद्दिष्टमुत्पाते तथा स्यादुपवर्तने, वि. राष्ट्रमुत्पातनीदृतोः, हे. अथ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे, अ.

रास. रासः कोलाहले ध्वाने भाषाशृङ्खलकेऽपि च। क्रीडाभेदे गोपानाम्, मे. रासः कोलाहले ध्वनौ। भाषाशृङ्खलके रासः क्रीडायामपि गोदुहाम्, वि. रासः क्रीडासु गोदुहाम्। भाषाशृङ्खलके, हे भाषाशृङ्खलके रासः क्रीडायामपि गोदुहाम्, त्रि.

रासेरस. रासेरसस्तु रासे स्याद् रससिद्धवलावपि। षष्ठीजागरके गोष्ठ्यां शृङ्गारपरिहासयोः, वि. रासेरसस्तु गोष्ठ्यां स्याद् रासशृङ्गारयोरपि। रससिद्धौ रसावासे षष्ठीजागरकेऽपि च, मे. रासेरः रससिद्धवलौ शृङ्गारहासयोः। षष्ठीजागरके रसगोष्ठ्याम्, हे.

रास्ना. रास्ना च स्याद् भुजङ्गाख्याम् एलापर्ण्यामपि स्त्रियाम् मे. रास्ना स्मृता भुजङ्गाख्यामेलापर्ण्यां च कथ्यते, वि. रास्नैलापर्णीसर्पाख्योः, हे.

रिक्त. रिक्तं शून्ये वने, मे. रिक्तं काननशून्ययोः, वि. रिक्तं वनेऽपि, त्रि.

रिष्ट. रिष्टं क्षेमाशुभाभावे पुंसि खड्गे च फेनिले, मे. रिष्ट क्षेमेऽशुभे रिष्टोऽसौ, हे. रिष्टं क्षेमाशुभाभावस्थापापेषु प्रचक्षते, वि. रिष्ट क्षेमाशुभाभावेषु, अ. रिष्टं पापाशुभयोः, रु.

रिष्टि. रिष्टिः खड्गे ना शुभे स्त्री, मे. रिष्टिः खड्गे सखड्गौ च, वि

रीढ़ा. अवज्ञा कथ्यते रीढ़ा रीढ़ा गतिरपीष्यते, अने.

रीति. रीतिः स्त्रियां स्यन्दप्रचारयोः। पित्तले लोहकीट्टे च, मे. रीतिः प्रसारे स्यन्दे च लोहकिट्टारकूटयोः, वि. रीतिस्तु पित्तले। वैदर्भ्यादौ लोहकीट्टे सीमनि स्रवणे गतौ, हे. प्रचारस्यन्दयो रीतिः, अ रीतिस्तु लोहकिट्टारकूटयोः, त्रि.

रुक्म. रुक्मस्तु काञ्चने लोहे, मे, वि. रुक्मं लोहे सुवर्णे च.

हे. रुक्म' लोहसुवर्णयोः, त्रि. रुक्मं हेम विजानीयाद् रुक्मं रजतमुच्यते, अने.

रुच, रूच. रुचस्त्वग्रे स्यान्नरविकाणे, मे, अ. रूचः पादपजातौ स्याद् रूचोऽग्रे स्यान्नरविकाणे, वि. रूचोऽस्निग्धमरुपयोः, हे.

रुच. रुक् स्त्री शोभाद्युतीच्छासु, मे. रुक् शोभाकिरणेच्छासु, हे. रुक् शोभाकिरणेच्छासु चेष्यते, वि.

रुचक. रुचको बीजपूरे च निष्के दन्तकपोतयोः। न द्वयोः सर्जिकाक्षारेऽप्यश्वाभरणमाल्ययोः। सौवर्चलेऽपि माङ्गल्यद्रव्ये चाप्युत्कटेऽपि च, मे. रुचकं मङ्गलद्रव्ये ग्रीवाभरणदन्तयोः। उत्कटे बीजपूरे च सौवर्चलविडङ्गयोः। रोचनायां च रुचकमश्वाभरणमाल्ययोः, वि. रुचकस्तु मातुलुङ्गे निष्के सौवर्चलेऽपि च। रोचनायां विडङ्गे च मङ्गल्यद्रव्यदन्तयोः। अश्वस्याभरणे माल्ये प्रोत्कटेऽपि प्रकीर्तितः, हे.

रुचि. रुचिः स्त्री दीप्तौ शोभायामभिष्वङ्गाभिलाषयोः, मे. रुचिर्द्युतौ। स्पृहाभिष्वङ्गशोभासु, हे. रुचि मयूखे शोभायामभिष्वङ्गाभिलाषयोः, वि. अभिष्वङ्गे स्पृहायाञ्च गभस्तौ च रुचिः स्त्रियाम्, अ. दीप्तिश्चेच्छा तथा रुचिः, अने.

रुजा. रुजा रोगे च भङ्गे, मे. रुजा त्वामयभङ्गयोः, हे. रुजा स्याद् रोगभङ्गयोः, त्रि.

रुण्डिका. रुण्डिका द्वारपिण्ड्यां च दूतिकायां रणक्षितौ, मे, त्रि.

रुदथ. रुदथः शुनि कुक्कुटे, वि. रुदथः कुक्कुटशुनोः, हे.

रुद्र. रुद्रो हयभे, ह.

रुधिर. रुधिरोऽङ्गारके पुंसि क्लीवं तु कुङ्कुमासृजोः, मे. रुधिरोऽङ्गारके प्रोक्तो रुधिरं कुङ्कुमासृजोः, वि. रुधिरं घुसृणे रक्ते रुधिरो धरणीसुते, हे. रुधिरं कुङ्कुमेऽपि च, त्रि, हा. कुङ्कुमं रुधिरं ज्ञेयं रुधिरं क्षतजं स्मृतम्, अने.

रुमा. रुमा सुग्रीवदारेषु विशिष्टलवणाकरे, मे. रुमा सुग्रीव-

दारेषु विशिष्टे लवणाकरे, वि. रुमा स्याल्लवणाकरे। सुग्रीवपत्नग्राम्, हे.

रुरु. रुरु र्ना मृगदैत्ययोः, मे. रुरु र्मृगे दैत्यभेदे, वि. रुरु दैतेत्र मृगे, हे. दैत्यभेदे मृगे रुरुः, त्रि.

रूच. V. रुच.

रूढ़. रूढ़ं जाते प्रसिद्धे च, मे.

रूप. रूपं स्वभावे सौन्दर्ये नाणके पशुशब्दयोः। ग्रन्थावृत्तौ नाटकादौ आकारश्लोकयोरपि, वि, मे. स्याद् रूपं श्लोकशब्दयोः। पशावाकारे सौन्दर्ये नाणके नाटकादिके। ग्रन्थावृत्तौ स्वभावे च, हे. ग्रन्थावृत्तौ पशौ शब्दे स्वभावे नाटकादिषु। रूपमाकारसौन्दर्यनाणकेष्वपि दृश्यते, त्रि. रूपं मूर्त्ते च विद्वसे, अने. रूपं मृगेऽपि विज्ञेयम्, रु.

रूपक. रूपकं नाटके धूर्त्ते काव्यालङ्करणेऽपि च, मे. रूपकं नाटके धूर्त्ते काव्यालङ्करणे विदुः, वि. रूपकं नाटके प्रोक्तं काव्यालङ्कारधूर्त्तयोः, हे.

रूप्य. रूप्यः स्यात् सुन्दरे त्रिषु। आहतस्वर्णरजते रजते च नपुंसकम्, मे. रूप्यं स्यादाहते स्वर्णरजते रजतेऽपि च। रूप्यं प्रशस्तरूपे तु वाचावत् समुदीरितम्, वि. रूप्यमाहतहेमादौ रजते रूपवत्यपि, हे. रूप्यं प्रशस्तरूपेऽपि, श्र. रूप्यं त्रिषु सुरूपके। आहतस्वर्णरजते रजते च नपुंसकम्, त्रि.

रेक रेकः शङ्कानीचविरेचने, मे. रेकः शङ्काविरेकयोः। हीनेऽपि, हे. रेको विरेके शङ्कायां रेकः स्यादधमेऽपि च, वि.

रेखा. रेखा स्यादल्पके छद्मन्याभोगोल्लेखयोरपि, हे, वि.

रेचनी. रेचनी त्रिवृतादन्त्योः, मे. रेचनी त्रिवृतादन्तीगुन्द्रारोचनिकासु च, वि. रेचनी गुन्द्रा दन्ती रोचनिका त्रिवृत्, हे.

रेणु. रेणुः स्त्रीपुंसयो र्धूलौ पुंलिङ्गः पर्पटे पुनः, मे. रेणुः पर्पटके धूल्यामल्पे, वि. रेणु र्धूल्यां पर्पटके, हे.

रेणुका. रेणुकापि हरेण्वां च जामदग्न्यस्य मातरि, मे. - रेणुका

तु हरेण्वां स्यात् जमदग्नेश्च योषिति, हे. रेणुकापि हरेणौ स्यात् जमदग्निस्त्रियामपि, वि.

रेतस्. रेतः शुक्रे पारदे च, मे.

रेत. रेतं रेतसि पीयूषे पटवासेऽपि सूतके, वि, मे. रेतं पीयूषपटवासयोः। रेतःसूतकयोः, हे.

रेप. रेपः स्यान् निन्दिते क्रूरे, मे, वि. रेपः क्रूरे विगर्हिते, हे.

रेपस्. रेपाः स्यादधमे क्रूरे कृपणेऽप्यभिधेयवत्, मे. रेपाः स्यादधमे क्रूरे कृपणेऽपि च कथ्यते, वि.

रेफ. रेफो रवर्णे पुंसि स्यात् कुत्सिते पुनरन्यवत्, मे. रेफो रवर्णे संप्रोक्तः कुत्सिते वाच्यवत् पुनः, त्रि. रेफोऽवद्यरवर्णयोः, हे. रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गकः, अ. त्रिषु स्यात् कुत्सिते रेफो रवर्णे तु पुमानयम्, त्रि.

रेरिहाण. रेरिहाणस्तु पुंसि स्यान् महादेवेऽम्बरेऽपि च, मे. रेरिहाणो हरेऽम्बरे, वि. रेरिहाणोऽम्बरे रुद्रे, हे.

रेवती. रेवती हलिपत्न्यां स्यात् ताराभिन्मातृभेदयोः, मे. रेवती हलिपत्न्यां स्यात् ताराभेदेऽपि मातृषु, वि. रेवती बलभार्यायां नक्षत्रभिदि मातृषु, हे. रेवती हलिपत्न्यां भे स्मरपत्न्यां च रेवती, त्रि.

रेवा. रेवा स्यान् नील्यां रत्यां नदीभिदि, मे. रेवा तरङ्गिणीभेदे रेवा नील्यां स्मरस्त्रियाम्, वि. रेवा मन्मथयोषिति। नील्यां मेकलकन्यायाम्, हे.

रै. राः पुंसि स्वर्णवित्तयोः, मे. राः स्मृतः स्वर्णवित्तयोः, वि. रास्तु सुवर्णे जलदे धने, हे. स्वर्णेऽपि राः, अ.

रैवत. रैवतस्तु सुवर्णाली शैलभेदे च शङ्करे, मे. रैवतस्तु सुवर्णाली शैलभेदेऽपि शूलिनि, वि. रैवतः स्यादुज्जयन्ते सुवर्णाली पिनाकिनि, हे. शैलभेदे सुवर्णाली शङ्करेऽपि च रैवतः, त्रि.

रोक. रोकस्तु क्रयभिद्दीप्त्यो रोकं नावि चले विले, मे. रोकं क्रय-

षभेदे नावि विले चरे। रोकोऽश्मो, हे. रोको दीप्तौ विले रोक' नौकाक्रय-पभेदयोः, वि. विले रोकं रुचौ पुमान्, त्रि.

रोग. रोगः कुष्ठौषधे व्याधौ, मे. रोगः कुष्ठौषधे गदे, वि.

रोचन. रोचनी कर्कशे स्त्रियाम्। रोचना रक्तकह्लारे गोपित्त-वरयोषितोः। रोचनः कूटशाल्मल्यां पुंसि स्याद् रोचके त्रिषु, मे. रोचनो रक्तकह्लारे रोचनः कूटशाल्मलौ। अङ्गल्येऽपि च गोपित्ते रोचना रुचिर-स्त्रियाम्, वि. रोचनः कूटशाल्मलौ। रोचना रक्तकह्लारे गोपित्ते वर-योषिति, हे. गोपित्ते रोचना कूटशाल्मलौ रोचनः पुमान्, त्रि.

रोड़. रोड़ः चोदे भवेत् पुंसि लप्ते तु वाचलिङ्गकः, मे.

रोदन. रोदनं क्रन्दनेऽस्त्रेऽपि दुरालभौषधौ स्त्रियाम्, मे. रोदनं क्रन्दनेऽश्रुणि, वि. रोदनं त्वश्रुणि क्रन्दे, हे.

रोदस्, रोदसी. रोदश्च रोदसीति च। दिवि भूमौ पृथक् च स्यात् सहोक्तावप्रतयोस्तथा, मे. रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्। सहप्रयोगेऽप्यनगो रोदः स्यादपि रोदसी, वि. रोद इव तु रोदसी। दिवि भुवुभयोश्चापि, हे. भूद्यावौ रोदस्यौ रोदसी च ते, अ.

रोध्र. रोध्रो ना गालवे क्लीवमपराधे च किल्बिषे, मे. रोध्रः साव-रके रोध्रमपराधेऽपि किल्बिषे, वि. रोध्रो लोध्रे रोध्रमघागसोः, हे. द्रुघभित्पापयो रोध्रः, त्रि.

रोप. रोपौ रोपणवाणयोः, मे, वि. रोपौ रोपणेषू रोपं रन्ध्रे, हे. शररोपणयो रोपः, त्रि.

रोमन्थ. रोमन्थः स्यात् पशुद्गारो रोमन्थः कीटवर्त्तनम्, अने.

रोमहर्षण. रोमहर्षणं रोमाञ्चे ना सूते च विभीतके, मे. रोमहर्षण-मितेप्रवद् रोमाञ्चेऽपि विभीतके, वि. रोमहर्षणाख्या तु रोमोद्गमे विभीतके, हे.

रोपण. रोपणः पारदे हेमघर्षणोपरयोः पुमान्। क्रोधने वाच्यलिङ्गः स्यात्, मे. रोपणः पारदे हेमकषणोपरयोस्तथा। रोपणेऽपि, वि. रोपणो-ऽमर्षे हेमघर्षे पारद ऊषरे, हे.

रोहक. रोहकः मे तभेदे ना रोढ़रि त्रिषु विश्रुतः, मे.

रोहिणी. रोहिणी कण्ठरुग्भिदि। अभित्कटुम्भरासोमवल्कीषु लोहिताङ्गवोः, मे. रोहिणी कटुरोहिण्यां रोहिणी लोहिताङ्गवोः। कण्ठरोगान्तरे भे च सोमवल्कां च रोहिणी, वि. रोहिणी सोमवल्कां भे कण्ठरोगान्तरे गवि। लोहिताकटुरोहिण्योः, हे. अथ रोहिणी। नक्षत्रे रोहितायां च, त्रि.

रोहित्. रोहिन् स्त्रियां लताभेदे स्त्री नाऽर्के, मे. रोहित् सूर्यलतामिदोः, वि.

रोहित. रोहितं कुङ्कुमे रक्ते ऋजुशक्रशरासने। पुंसि स्यात् मीनमृगयो र्भेदे रोहितकद्रुमे, मे. रोहितं रुधिरे घोर ऋजुशक्रशरासने। रोहितो मीनमृगयो र्भेदे रोहितकद्रुमे, वि. रोहितो लोहिते मीने मृगे रोहितकद्रुमे। रोहितं ऋजुशक्रास्त्रे घोरे, हे. रोहितमृजुशक्रास्त्रे रक्ते ना मृगमीनयोः, त्रि. रोहितं शक्रकोदण्डो रोहितो मत्स्यमुद्गयः। रोहितो लोहितो वर्णो मृगराजस्तु रोहितः, धने.

रोहिताश्व. रोहिताश्वश्चित्रभानौ हरिश्चन्द्रनृपात्मजे, मे. रोहिताश्वो हुताशने। हरिश्चन्द्रनृपात्मजे, वि. रोहिताश्वो हुताशने। हरिश्चन्द्रनृपसुते, हे.

रोहिन्. रोही रोहितकेऽश्वत्थवटपादपयोः पुमान्, मे. रोही रोहितकेऽश्वत्थवटपादपयोरपि, वि. रोही रोहितकेऽश्वत्थे वटे, हे.

(रो) रौहिष. रौहिषं कत्तृणे क्लीवं पुंसि स्याद् हरिणान्तरे, मे. रौहिषं कत्तृणे ज्ञेयं रौहिषो हरिणान्तरे, वि. रौहिषः। मृगकत्तृणमत्स्येषु, हे.

रौद्र. रौद्रो घर्मे रसे चण्डयां स्त्री तीव्रे भीषणे त्रिषु, मे. रौद्रो माध्यरसान्तरे। रौद्रोऽतिभीषणे तीव्रे रौद्री स्कन्दस्य मातरि, वि. रौद्रो भीष्मे रसे तीव्रे रौद्री गौर्याम्, हे.

रौरव. रौरवो नरके घोरे, मे, वि. रौरवो भीषणे नरकान्तरे, हे. रौरवौ घोरनरकौ, त्रि.

रौहिणेय. रौहिणेयोऽन्यवद् वत्से ना बुधे च हलायुधे, मे. रौहिणेयो भवेद् वत्से रेवतीरमणे बुधे, वि. रौहिणेयो वत्से बुधे बले, हे. वत्से बुधे बले रौहिणेयः, त्रि.

रौहिष. v. रोहिष.

ल. लः शक्रे ला तु दाने सप्राट् ग्रहणेऽपि निगद्यते, मे. क्रिया ककुद्गतो मांसं पिनाकी भूर्बलाशुनः। लम्पटः शक्रसंज्ञश्च वाद्यो रान्तो लकारकः, मा. लो दीप्तौ दां लश्च भूमौ भये चाह्लादनेऽपि च। लो वाते लवणे च सप्रात् लो दाने च प्रकीर्तितः, ए.

लक्ष. लक्षा न पुंसि सङ्ख्यायां क्लीवं व्याजशरव्ययोः, मे. लक्षं शरव्ये सङ्ख्यायां लक्षं छद्मनि कथ्यते, वि. लक्षं व्याजशरव्ययोः। सङ्ख्यायामपि, हे. सङ्ख्यायां तु न ना लक्षं क्लीवं व्याजशरव्ययोः, त्रि.

लक्षण. लक्षणं नाम्नि चिह्ने च सारसी लक्षणा क्वचित्, मे. लक्षणं नाम्नि चिह्ने च सौमित्रौ चापि लक्षणः, वि. लक्षणा सारसी, त्रि. लक्षणं नामचिह्नयोः। लक्ष्मणं च लक्षणस्तु सौमित्रौ लक्ष्मणो यथा, हे.

लक्ष्मण. लक्ष्मणा त्वोषधीभेदे सारसस्यामपि योषिति। रामभ्रातरि पुंसि सप्रात् सश्रीके चाभिधेयवत्, मे. लक्ष्मणं लाञ्छने नाम्नि रामभ्रातरि लक्ष्मणः। लक्ष्मणौषधिसारसप्रोः सश्रीके चाभिधेयवत्, वि. लक्ष्मणः श्रीयुते लक्ष्मणौषधौ सारसस्त्रियाम्, हे. दाशरथिः श्रीमांश्च लक्ष्मणः, त्रि. सारसी लक्ष्मणः प्रोक्तो लक्ष्मणो राघवानुजे, अने. v. लक्षण.

लक्ष्मन्. लक्ष्म चिह्ने प्रधाने च, मे, वि. लक्ष्म चिह्नप्रधानयोः, प लक्ष्माख्या कन्दजातिः सप्रात् चिह्नं लक्ष्म च लक्ष्मणम्, अने.

लक्ष्मी. लक्ष्मीः सम्पत्तिशोभयोः। ऋद्ध्यौषधे च पद्मायां वृद्धिनामौषधेऽपि च। स्त्री फलिन्याम्, मे. लक्ष्मीः श्रीरिव सम्पत्तिपद्माशोभाप्रियङ्गुषु, वि. लक्ष्मीः श्रीशोभासम्पत्प्रियङ्गुषु, हे. सम्पत्कमलयो लक्ष्मीः, त्रि. v. विभ्रम.

लक्ष्मीपति. लक्ष्मीपतिः पुमान् वासुदेवे नरपतावपि, मे. लक्ष्मी-

पति वासुदेवे लवङ्गद्रुमपूगयोः, वि. लक्ष्मीपति र्जनार्द्दने। पूगे लवङ्ग-वृक्षे च, हे.

लक्ष्मीपुत्र. लक्ष्मीपुत्रस्तु पुंलिङ्गः कामदेवे तुरङ्गमे, मे. लक्ष्मीपुत्रः स्मरे हये, वि. लक्ष्मीपुत्रो हये कामे, हे. लक्ष्मीपुत्रौ स्मरहयौ, त्रि.

लक्ष्य. लक्ष्यं सव्याजमप्यदेशेऽपि शरवेधेऽपि नपुंसकम्, मे. लक्ष्यं शरवेध सङ्ख्यायां लक्ष्यं छद्मनि सम्मतम्, वि.

लग्न. लग्नं राश्युदये क्लीवं सक्तलज्जितयोस्त्रिषु, मे लग्नं राश्युदये लग्नं सक्तलज्जितयोरपि, वि. लग्नन्तु लज्जिते। राशीनामुदये सक्ते, हे. राशीनामुदयो लग्नं सक्तलज्जितयोस्त्रिषु. त्रि.

लघिष्ठ. लघिष्ठोऽत्यल्पके भेले, मे. लघिष्ठोऽत्यल्पके भेलेऽपि, वि. लघिष्ठो भेलकेऽपि च, हे.

लघु. लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत् क्लीवम्। शीघ्रे च कृष्णागुरुणि पृक्कायामौषधौ तु स्त्री, मे. लघु मनोज्ञनिःसारागुरुषु प्रथितो लघुः। कृष्णागुरुणि शीघ्रे च स्पृक्कायां च स्मृता लघुः, वि. लघुः स्पृक्का लघुसारं कृष्णं चागुरु द्रुतम्, हे. त्रिष्विष्टेऽल्पे लघुः, अ. पृक्कायां स्त्री लघुः क्लीवं शीघ्रे कृष्णागुरुण्यपि, त्रि.

लघ्वी. लघ्वी लाघवयुक्तायां प्रभेदे स्यन्दनस्य च, मे. लघ्वी कृशविवक्षायां प्रभेदे स्यन्दनस्य च, वि, हे.

लङ्का. लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च, मे, वि. लङ्का तु शाखा शाकिनी कुलटा पुरी, हे. नगरीशाखयो र्लङ्का, त्रि.

लङ्ग. लङ्गस्तु सङ्गपिङ्गयोः, मे. लङ्गः सङ्गे च पिङ्गे च, वि.

लङ्घन. लङ्घनं ह्युपवासे स्यात् क्रमणे प्लवनेऽपि च, मे, वि. लङ्घनं भोजनत्यागे प्लवने क्रमणेऽपि च, हे.

लञ्ज. लञ्जः स्यात् पट्टकच्छयोः, वि, हे, श्रा.

लट. लटः प्रमादवचनदोषयोरपुरदाह्नतः, वि.

लड्डा. लड्डा करञ्जभेदे स्यात् फले वाटो खगान्तरे, मे, वि. लड्डा

पत्रिकुसुम्भयोः, हे. करञ्जभित्फले लङ्का वाद्यपत्रिभेदयोः, त्रि. लङ्का शिम्बी खगान्तरे, श.

लता. लता प्रियङ्गुशाखयोः। स्पृक्काज्योतिष्मतीवल्लीलताकस्तूरिकासु च। माधवीदूर्वयोः, मे. लता ज्योतिष्मतीदूर्वाशाखावल्लीप्रियङ्गुषु। स्पृक्कामाधव्योः कस्तूर्यन्नाम्, हे. लता ज्योतिष्मतीस्पृक्काशाखावल्लीप्रियङ्गुषु। लता कस्तूरिकायाञ्च माधवीदूर्वयोरपि, वि. कस्तूरीस्पृक्कयोर्लता, त्रि.

लभ्य. लभ्यं युक्ते च लब्धव्ये, मे, वि लभ्यं लब्धव्ये युक्ते च, हे. युक्ते च लभ्यं सन्नात्, त्रि.

लम्पाक लम्पाको लम्पटे देशे, मे, वि, हे.

लम्बकर्ण. लम्बकर्णः स्मृतोऽङ्कोठपादपे छगलेऽपि च, मे, वि. लम्बकर्णः पुनश्छगे। अङ्कोठे, हे छागेऽपि लम्बकर्णः सन्नात्, त्रि.

लम्बा. लम्बा मह्यालयागौर्य्योस्तिक्ततुम्ब्यामपि स्त्रियाम्, मे. लम्बा श्रीतिक्ततुम्ब्योः, वि.

लम्बोदर. लम्बोदरः सन्नादुद्दाने गणानामधिपेऽपि च, मे. लम्बोदरः सन्नादुध्माने गणानामधिपेऽपि च, वि, त्रि. लम्बोदरः सन्नादाध्माने प्रमथानाञ्च नायके, हे.

लय. लयो विनाशे संश्लेषे साम्ये तौर्य्यत्रिकस्य च, मे, वि. लयस्तौर्यत्रयीसाम्ये संश्लेषणविलासयोः, हे. अथ श्लेषवाद्ययोः। लयः, त्रि.

ललज्जिह्व. ललज्जिह्वोऽन्यवद्‌ हिंस्रे क्रमेलकशुनोः पुमान्, मे. ललज्जिह्वो मतो हिंस्रे क्रमेलकशुनोरपि, वि.

ललना. ललना कामिनीनारीभेदजिह्वासु योषिति, मे. ललना नाड़िकाभेदे जिह्वायां वरयोषिति, वि ललना स्त्री नारी जिह्वा, हे. योषित्‌ जिह्वा च ललना, त्रि

ललाम ललामं लाञ्छने ध्वजे। शृङ्गे प्रधाने भूषायां रम्ये वालधिपुण्ड्रयोः। तुरङ्गे च प्रभावे, मे. ललामं [illegible]

श्र. भूषायां लाङ्गूले प्रधानश्टङ्गप्रभावपुण्ड्रेषु। ध्वजलक्ष्मतुरङ्गेषु नवसु ललाम प्रयुज्यते प्राज्ञैः, ह. v. ललामन्.

ललामन्. ललाम सत्रान् प्रभावे च लाञ्छनध्वजवाजिषु। श्टङ्गे प्रधाने भूषायामपि बालधिपुण्ड्रयोः, मे. ललाम च ललामश्च लाञ्छनध्वज-वाजिषु। श्टङ्गे प्रधाने भूषायां रम्ये बालधिपुण्ड्रयोः। प्रभावे च, वि. ललामवत् ललामाख्ये चिह्ने श्टङ्गपताकयोः। रम्ये प्रधाने भूषायां पुण्ड्रे पुच्छप्रभावयोः, हे. हये पुच्छे ध्वजे पुण्ड्रे शैले पुंसि गुणाधिके। विषे धामनि भूषायां ललामेति बुधैर्मतम्, श्रने.

ललित. ललितं त्रिषु। ललिते चेष्टितेऽपि स्यात् हारभेदे तु न द्वयोः, मे. ललितं हारभेदे सत्रादीप्सिते ललितेऽपि च, वि. ललित-मीप्सिते। ललितो हारभेदे सत्रात्, हे.

लव. लवो लेशे विनाशे च छेदने रामनन्दने, मे, वि. लवः काल-भिदि च्छिदि। विनाशे रामजे लेशे, हे. लवश्छेदनलेशयोः, त्रि.

लवण. लवणं सैन्धवादौ ना सिन्धुरचोभिदो रसे। तद्युक्ते वाच्यलिङ्गः सत्रान् नदीभेदत्रियोः स्त्रियाम्, मे. लवणो रसरचोऽब्धिभेदेषु लवणान्विते, वि. लवणो राचसे बले। अब्धिभेदे लवणा त्विट्, हे.

लाङ्गल. लाङ्गली तोयपिप्पल्यां क्लीवन्तु कुसुमान्तरे। गोदारणे तणराजगृहदारुविशेषयोः, मे. लाङ्गली जलपिप्पल्यां लाङ्गलं कुसुमान्तरे। सीरेऽपि लाङ्गलं तालगृहदारुविशेषयोः, वि. लाङ्गलं तालहलयोः पुष्प-भिद्गृहदारुणोः। लाङ्गली जलपिप्पल्याम्, हे. लाङ्गलं हलमिष्यते, श्रने.

लाङ्गलिन्. लाङ्गली नालिकेरे द्वौ रेवतीरमणे पुमान्, मे. लाङ्गली बलभद्रे सत्रान् नारिकेले च लाङ्गली, वि लाङ्गली बलभद्रे सत्रान् नारि-केले, हे.

लाङ्गु(ङ्गू)ल. लाङ्गुलं पुच्छशेफसोः, मे. लाङ्गूलं मेहने पुच्छे, वि. लाङ्गूलं शिश्नपुच्छयोः, हे.

लाज अथ लाजः सत्रादार्द्रतण्डुले। नपुंसकमुशीरेऽथ स्त्रियां

मुंभूम्नि चाद्यते, मे. लाजाः स्युः भ्रष्टधान्येषु लाजः स्त्रादार्द्रतण्डुले। उशीरे लाजमुद्दिष्टम्, वि. लाजः स्त्रादार्द्रतण्डुले। लाजास्तु भ्रष्टधानाः स्युः लाजं पुनरुशीरके, हे.

लाञ्छन. लाञ्छनं नामचिह्नयोः, मे. लाञ्छनं लक्षणे नाम्नि, वि. लाञ्छनं लक्ष्यसंज्ञयोः, हे.

लाट. लाटो देशान्तरेऽंशुके, मे. लाटौ वस्त्रदेशयोः, हे. लाटो देशांशुकेऽपि च, वि. लाटोऽंशुके च देशे च, त्रि.

लालस. लालसौत्सुक्यतृष्णातिरेकयाञ्चासु च द्वयोः, मे. लालसो लालसाऽपि स्त्राद् याञ्चातृष्णातिरेकयोः। औत्सुक्ये च, वि. लालसो लोलयाञ्चयोः, हे. लालसे प्रार्थनौत्सुक्ये, अ.

लालाटिक. लालाटिकः प्रभो भालदर्शिन्याश्लेषणान्तरे। कार्याक्षमे, मे. लालाटिकः प्रभो भालदर्शिन्याश्लेषणान्तरे। कार्याक्षमेऽपि, वि लालाटिकः स्त्रादाश्लेषे भवेत् कार्याक्षमेऽपि च। प्रभो भालदर्शिनि च, हे. लालाटिकः प्रभो भालदर्शी कार्याक्षमश्च यः, अ.

लासक. लासको लास्यकारिणि। मयूरे लसके च, मे. लासको लसके लास्यकारिण्यपि मयूरके, वि. लासकौ केकिनर्तकौ, हे.

लास्य. लास्यं तौर्यत्रिके मतम्। नृत्ये च, मे. लास्यं तौर्यत्रिके नाट्ये, वि.

लिङ्ग. लिङ्गं चिह्नेऽनुमाने च साङ्ख्योक्तप्रकृतावपि। शिवमूर्तिविशेषेऽपि मेहनेऽपि नपुंसकम्, मे. लिङ्गं मेहनचिह्नयोः। शिवमूर्तावनुमाने साङ्ख्योक्तप्रकृतावपि, हे लिङ्गं चिह्नेऽनुमानेऽपि साङ्ख्योक्तप्रकृतावपि। शिवमूर्तिविशेषेऽपि मेहने च प्रचक्षते, वि. लिङ्गं चिह्नशेफसोः, अ. व्यक्ते साङ्ख्योदिते लिङ्गं स्थाणौ शेफसि लक्षणे। पुंस्त्वादौ, त्रि.

लिप्त. लिप्तं विलिप्तविषदिग्धयोः। भुक्ते, मे. लिप्तं भुक्तविलिप्तयोः। विषाक्ते, हे लिप्तं विषाक्ते भुक्ते च वाच्यवत् स्त्राद् विलेपिते, वि.

ली. लीः श्लेषणे च चपले, मे.

लीला. लीला केलिविलासयोः। शृङ्गारभावचेष्टायाम्, मे. लीलां विदुः केलिविलासखेलाशृङ्गारभावप्रभवक्रियासु, वि. लीला केलि विलासश्च शृङ्गारभावजा क्रिया, हे. लीला विलासक्रिययोः, अ.

लुब्ध. लुब्ध आकाङ्क्षिणि व्याधे, मे, हे. लुब्धो मृगयुकाङ्क्षिणोः, वि.

लूता. लूता तूर्णनाभपिपीलिकागदान्तरे, मे. लूता तु रोगे पिपीलिकोर्णनाभयोः, हे. लूता पिपीलिकायां स्यादूर्णनाभे गदान्तरे, वि.

लूतामर्कटक. लूतामर्कटकः पुत्त्रीनवमालिकयोः कपौ, हे. लूतामर्कटकः पुत्त्रां नवमाल्यां प्लवङ्गमे, वि.

लूनक. लूनको भेदिते पशौ, मे. लूनकः स्यात् पशौ भिन्ने, वि. लूनकस्तु पशौ भिन्ने, हे.

लेख. लेखो लेख्ये सुरे लेखा लिपिराजिकयो मता, मे, वि. लेखो लेख्ये दैवते च लेखा राजयां लिपावपि, हे. लेखो देवेऽपि पंक्तौ, वि.

लेखन. लेखनं छेदने भूर्जे लिपिन्यासे, मे. लेखनं छेदने भूर्जे लिपिन्यासे च लेखनम्, वि. लेखनम्। भूर्जे छेदे लिपिन्यासे, हे. छेदे भूर्जे च लेखनम्, त्रि.

लेखनिक. लेखनिकः कथितो लेखहारके। लेखेषु परहस्तेन स्वहस्तस्य च लेखके, मे. लेखनिकस्तु तत्र यः। स्वहस्तं परहस्तेन लिखितेषु विलेखयेत्। लेखहारे, हे. लेखनिको लेखहारे यः स्वहस्तं विलेखयेत्। लेखेषु परहस्तेन तत्रापेत्रप प्रदर्शितः, वि.

लेप. लेपः प्रलेपने जग्धौ, मे. लेपस्तु सुधालेपनालेपनेषु च, वि. लेपस्तु लेपने। अशने च सुरायां च, हे. लेपौ लेपनजेमने, त्रि.

लोक. लोको जनेऽपि भुवने, मे. लोकस्तु भुवने जने, वि, अ. लोको विश्वे जने, हे.

लोचक. लोचको मांसपिण्डेऽक्षितारकायाश्च कज्जले। ललाटाभरणे स्त्रीणां कदलीनीलवस्त्रयोः। निर्बुद्धौ कर्णपूरे च मौर्व्यां भ्रूलथचर्मणि, मे. लोचको मांसपिण्डे स्यादक्षितारे च कज्जले। ललाटाभरणे स्त्रीणां कदली-

नीलवस्त्रयोः। निर्युङ्क्तौ कर्णपूरे च मौवर्ज्ञौ भल्लूकचर्मणि, वि. लोचको नीलवाससि। कज्जले मांसपिण्डेऽचितारे स्त्रीभालभूषणे। निर्युङ्क्तौ कर्णिका-मोचाजयास्तु भल्लूकचर्मणि, हे. नीलवस्त्रेऽचितारायां लोचको निर्मतौ त्रिषु, त्रि.

लोत. लोतमश्रुणि चौरितेि, वि.

लोमश. लोमशो मुनिमेषयोः। लोमान्विते स्त्रियां काकजङ्घा-मांसीवचासु च। शूकशिम्बिमहामेदाकाशीशे शाकिनीभिदि, मे. लोमशो लोमसंयुते। मेढ्रके चाथ काशीसशृगालीजटिलासु च। लोमशा शूकशिम्बायां मर्कटीकाकजङ्घयोः। महामेदातिबलयोः शाकिनीभिदि चेष्यते, वि. लोमशो लोमयुक्तेऽवौ लोमशा शाकिनीभिदि। महामेदाकाकजङ्घाशृगालीजटिलासु च। काशीशेऽतिबलाशूकशिम्बीमर्कटिकासु च, हे. लोमशो मेढ्रकेऽपि स्यात्, त्रि.

लोल. लोलः स्याद्वाच्यलिङ्गकः। सतृष्णे चञ्चले लोला जिह्वा-कमलयोः स्त्रियाम्, मे. लोलश्चलसतृष्णयोः। लोला जिह्वाकमलयोः, वि. लोलश्चले सतृष्णे च लोला तु रसनाश्रियो., हे. जिह्वाकमलयो र्लोला, त्रि.

लोह. लोहोऽस्त्री शस्त्रके लौहे जोङ्गके सर्वतैजसे, मे. लोहं कालायसे सर्वतैजसे जोङ्गकेऽपि च, हे. लोहस्तु शस्त्रके लोहं जोङ्गके सर्वतैजसे, वि.

लोहल. लोहलः शृङ्खलाधार्ये भवेदव्यक्तवाचि च, वि. लोहलः शृङ्खलाधार्येऽव्यक्तवाचिनि च त्रिषु, मे. लोहलोऽस्फुटवादिनि। शृङ्खलाधार्ये, हे.

लोहित. लोहितं रक्तगोशीर्षे कुङ्कुमे रक्तचन्दने। पुमान् नदान्तरे भौमे वर्णे च त्रिषु तद्वति, मे लोहितं कुङ्कुमे रक्ते गोशीर्षे च कुचन्दने। लोहितः स्यान् नदे भौमे वर्णभेदे च वाच्यवत्, वि. लोहितो मङ्गले नदे। वर्णभेदे लोहितन्तु कुङ्कुमे रक्तचन्दने। गोशीर्षे रुधिरे युद्धे, हे.

लौहित्य. लौहित्यं लोहितत्वे स्यात् क्लीबं पुंसि नदान्तरे, मे. लौहित्यः सागरे व्रीहौ, वि. लौहित्योऽब्धौ नदे व्रीहौ, हे..

व. वं प्रचेतसि जानीयादिवार्थे च तदव्ययम्। वः सान्त्वने च वाते च वरुणे च निगद्यते, मे. वं प्रचेतसि जानीयादिवार्थे च तदव्ययम्, वि. वः पश्चिमदिगीशे स्यादौपम्ये पुनरव्ययम्, हे. वालो वामांसनिलयो मेदो वारिदवाहनौ। उत्कारो जलसंघश्च खङ्गीशोऽपि वकारकः, मा. वः स्त्री ये चाश्रये चैव प्रलये साधनेऽपि वः। मानसे वरुणे चैव वकारः सान्त्वनेऽपि च, ए.

वंश. पुंसि वंशः कुले वेणौ पृष्ठावयववर्गयोः, मे. वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि च, वि. वंशः सङ्घेऽन्वये वेणौ पृष्ठाद्यवयवेऽपि च, हे. द्वौ वंशौ कुलमस्करौ, अ. वंशो वर्गे च पृष्ठांशे, लि. वंशो वेणौ कुलेऽपि च; हा. पृष्ठास्थन्यपि वंशः, रु. मेरौ वृक्षविशेषे च वंशशब्दस्तु कार्मुके, अने. करिपृष्ठे कुले वेणौ वंशाख्या कविभिः स्मृता, अने.

वक्तव्य. वक्तव्यं कुत्सिते हीने वचनार्हे च वाच्यवत्, मे. वक्तव्यो वाच्यवद् गर्ह्ये वचोऽर्हहीनयोरपि, हे. गर्ह्यहीनौ च वक्तव्यौ, अ.

वक्तृ. वक्ता तु पण्डितेऽपि स्याद् वाग्मिन्यप्यन्यलिङ्गकः, मे. वक्ता वाग्मिनि पण्डिते, वि.

वक्त्र. वक्त्रं मुखे वृत्तभेदे, मे. वक्त्रं छन्दोऽन्तरे मुखे, वि. वक्त्रमास्ये च छन्दसि च, हे.

वक्र. वक्रः शनैश्चरे पुंसि पुटभेदे नपुंसकम्। त्रिषु क्रूरे च कुटिले, मे. वक्रः स्यात् कुटिले क्रूरे पुटभेदे शनैश्चरे, वि. वक्रं पुटभेदे वक्रः कुटिले क्रूरभौमयोः, हे. वक्रः शनैश्चरे क्रूरे पुटभेदे तथाऽभ्रजौ, त्रि.

वकनक. वकनकस्तु पिशुने तथैव शुकपक्षिणि, मे. वकनकः शुके खले, वि. वकनकौ खलशुकौ, हे.

वङ्क. वङ्कः पर्याणभागे ना नदीपात्रे च भङ्गुरे, मे. वङ्कः पर्याणभागे स्यात् नदीपात्रे च भङ्गुरे, वि.

वङ्ग. वङ्गं सीसकरङ्गयोः। वार्ताकेऽपि च कार्पासे पुंभूम्नि नीवृदन्तरे, मे. वङ्गं सीसकरङ्गयोः। वङ्गः कार्पासवार्ताकदेशभेदेषु भाषितः, वि.

वङ्गः कार्पासे रुन्ताके वङ्गा जनपदान्तरे। वङ्गं त्रपुणि सीसे च, हे.

वच. वचः कीरे वचौषधौ। शारिकायाञ्च, मे. वचा स्यादुग्रगन्धायां सारिकायां शुके वचः, वि. वचः शुके वचौषधौ। शारिकायाम्, हे. सारिकायाञ्च वचा, लि.

वचक्नु. वचक्नुस्तु पुमान् विप्रे वावदूकेऽभिधेयवत्, मे. वचक्नु-र्वाग्मिविप्रयोः, वि.

वज्र. वज्रं स्याद्वालके धात्र्यां क्लीबं योगान्तरे पुमान्। वज्रा स्नुह्यां गुडूच्याञ्च वज्री स्नुह्यन्तरे स्मृता। दम्भोलौ हीरकेऽप्यस्त्री, मे. वज्रं हीरकदम्भोलिबालकामलकेषु च। वज्रा गुडूचिकायां स्यात्, वि. वज्रं कुलिशहीरयोः। बालके वज्रा त्वमृता, हे. वज्रोऽस्त्री हीरके पवौ, अ.

वज्रिन्. वज्री तु स्नुह्यां देवाधिपे पुमान्, मे.

वञ्चक. वञ्चकस्तु खले धूर्ते गृहबभ्रौ च जम्बुके, मे. अथ वञ्चकः खलधूर्तयोः। जम्बूके गृहबभ्रौ च, वि. वञ्चको जम्बुके गेहनकुले खलधूर्तयोः, हे. वञ्चकौ धूर्तफेरवौ, लि.

वञ्जुल. वञ्जुलः पुंसि तिनिशे वेतसाशोकयोरपि, मे. वञ्जुलो वेतसाशोकतिनिशे, वि. वञ्जुलस्त्वशोके तिनिशद्रुमे। वानीरे, हे.

वट. वटी त्रिषु गुणे पुंसि स्यात् न्यग्रोधकपर्दयोः, मे. वटो गोले गुडे भवेत् वटः साम्यवराटयोः। वटः कपर्दे न्यग्रोधे शुम्बवर्तिकयो र्वटी, वि. वटो गोले गुणे भवेत् वृक्षे साम्यवराटयोः, हे. वटी त्रिषु गुणे पुंसि न्यग्रोधे च कपर्दके, लि.

वठर. वठरोऽम्बष्ठशठयोः, हे. वठरः कुक्कुटे पुंसि शठे च, मे. वठरः शठवेष्टयोः। कक्कटे, वि.

वड़वा. वडवा द्विजयोषिति। अश्वायां कुम्भदास्याञ्च नारीजात्यन्तरेऽपि च, मे. वड़वाऽश्वाकुम्भदास्योः स्त्रीविशेषे द्विजस्त्रियाम्, वि. वड़वाऽश्वायां स्त्रीभेदे कुम्भदास्यां द्विजस्त्रियाम्, हे. वड़वाऽश्वाकुम्भ-दास्योः, लि

वण्ठ. वण्ठः सत्रादस्तोढाहे खर्वे कुन्तायुधेऽपि च, मे, वि. वण्ठः कुन्तायुधे खर्वे भृत्यालसविवाहयोः, हे.

वण्ठर. वण्ठरः स्थगिकारज्जौ लाङ्गूले कुक्कुरस्य च। करीरकोपे तालस्य पल्लवे च पयोधरे, मे. वण्ठरस्तालपल्लवे। करीरकोशेऽपि, वि.

वण्ठाल. वण्ठालो युद्धभेदे च नौकायाश्च खनित्रके, मे. वण्ठालं शूरयो युद्धे नौकायाश्च खनित्रके, वि. वण्ठालः शूरयुन्नौखनित्रयोः, हे.

वण्ड. वण्डा तु पांशुलायां स्त्री त्रिषु हस्तादिवर्जिते, मे. वण्डापि पांशुलायां सत्राद् वण्डो हस्तादिवर्जिते, वि.

वत. वतामन्त्रणसन्तोपखेदानुकोशविस्मये, मे, वि. वतामन्त्रणखेदयोः। हत्याश्चर्यत्रानुकम्पासु, हे. निन्दायां विस्मये वत, ह. खेदानुकम्पासन्तोपविस्मयामन्त्रणे वत, श्र.

वतंस. वतंसस्तु पुमान् कर्णपूरशेखरयोरपि, मे. v. उत्तंस.

वत्स. वत्सः पुत्रादिवर्षयोः। तर्णके नोरसि क्लीवम्, मे. वत्सस्तर्णकपुत्रादिवर्षे वत्सन्तु वक्षसि, वि. वत्सा उरस्तुकृषतर्णकाः, हे. वत्सौ तर्णकवर्षौ द्वौ, श्र. पुत्रादौ तर्णके वर्षे वत्सः क्लीवन्तु वक्षसि, त्रि. वत्सौ तर्णकपुत्रकौ, अने. वत्सः संवत्सरेऽपि निर्दिष्टः, ह.

वदान्य. वदान्यो दानशौण्डे सत्रात् चारुवादिनि वाचवत्, मे. वदान्यो दानशौण्डे सत्राद् वदान्यश्चारुभाषिणि, वि. वदान्यः प्रियवागुदारशीलयोरुभयोरपि, हे. वदान्यो वल्गुवागपि, श्र. वदान्यस्त्यागवान् सुवाक्, त्रि.

वध. वधो हिंसकहिंसयोः, हे.

वधू. वधूः स्त्री शारिवौषधे। स्नुषाशटीनवोढास्त्रीभार्यास्पृक्काङ्गनासु च, मे. वधूः स्नुषानवोढास्त्रीभार्यास्पृक्काङ्गनासु च। शट्यां च शारिवायां सत्रात्, वि. वधूः पत्न्यां स्नुषानार्योः स्पृक्काशारिवयोरपि, हे. वधूर्जाया स्नुषा स्त्री च, श्र. स्पृक्का महिला च वधूः, त्रि. वधूर्नारी वधूर्भार्या वधूः पुत्रवधूरपि, अने.

वन. वनं नपुंसकं नीरे निवासालयकानने, मे. वनं कानन-नीरयोः। प्रवासे निलये चापि वनं प्रस्रवणेऽपि च, वि. वनं प्रस्रवणे गेहे प्रवासेऽम्भसि कानने, हे. वने सलिलकानने, अ. वनं काननमम्बु, च, अने.

वनज. वनजा मुद्गपर्ण्यां ना मुस्तके क्लीबमम्बुजे, मे. वनजो मुस्तके पद्मे वनजं वनजो गजे। वनजा मुद्गपर्ण्यां च, वि. वनजो मुस्तके स्तम्बेरमे वनजमम्बुजे। वनजा तु मुद्गपर्ण्याम्, हे. गुल्मेऽपि च वनजः, त्रि.

वनमालिन्. वनमाली तु गोविन्दे वाराह्यां वनमालिनी, मे, वि.

वनस्वन्. वनश्वा गन्धमार्जारे वृककव्याघ्रयोः पुमान्, मे. वनश्वा गन्धमार्जारे वृककव्याघ्रयोरपि, वि. वनश्वा विप्रतारके। शार्दूले गन्ध-मार्जारे, हे. वनश्वा जम्बुके व्याघ्रे, त्रि.

वनस्पति. वनस्पति र्ना द्रुमात्रे विनापुष्पफलद्रुमे, मे. वनस्पति-र्द्रुममात्रे विनापुष्पफलद्रुमे, वि. वनस्पति र्द्रुमात्रके। विनापुष्पफले द्रौ च, हे. वृक्षमात्रेऽपि वनस्पतिः, त्रि.

वनित. वनिता जातरागस्त्रीस्त्रियोस्त्रिषु च याचिते। सेविते, मे. वनिता जनितात्यर्थानुरागायां च योषिति। वनितं याचितेऽपि स्याद्, वनितं सेवितेऽपि च, वि. वनितं तु स्यात् प्रार्थिते सेवितेऽपि च। वनितोत्पादितात्यर्थरागनार्यपि नार्यपि, हे. वनिता जनितात्यर्थानुरागायाञ्च योषिति, अ.

वन्दनी. वन्दनी नतिजीवातुकटिमाचलकर्मसु, मे.

वन्य. वन्यं त्रिषु वनोद्भूते स्त्री वनाम्बुसमूहयोः, मे. वन्यं वनभवे वन्या वनवारिसमूहयोः, वि.

वपन. वपनं बीजाधाने च मुण्डने, मे, वि. वपनं मुण्डने बीजा-धाने, हे.

वपा. वपा विवरमेदसोः, मे, वि, हे. मेदो विलं वपा, त्रि.

वपुस्. वपुः क्लीवं तनौ प्रशस्ताकृतावपि, मे. वपु र्भव्याकृतौ देहे, वि. वपुः प्रशस्ताकृतौ देहे, हे.

वप्तृ. वप्ता तु जनके पुंसि वापकेऽप्यभिधेयवत्, मे.

वप्र. वप्रस्ताते पुमानस्त्री रेणुक्षेत्रे चये तटे, मे. पितृकेदारयोर्वप्रो वप्रः प्राकाररोधसोः, वि. वप्रः प्राकाररोधसोः। क्षेत्रे ताते चये रेणौ, हे. वप्रस्ताते स्त्रियां क्षेत्रे चये रेणौ च रोधसि, त्रि. तटो वप्रः पिता वप्रो वप्रः केदार इत्यपि, अने. गिरिसानुन्यपि वप्रम्, रु.

वमथु. वमथुः पुंसि वमने गजस्य करशीकरे, मे. वमथु र्वमनेऽपि स्याद् गजस्य करशीकरे, वि. वमथु र्वमने काशे गजस्य करशीकरे, हे.

वमन. वमनं छर्दनेऽर्दने, मे, हे. वमनं छर्दनेऽर्दने। स्यादाहुतौ च, वि.

वमि. वमि र्वान्तौ स्त्रियां पुंसि कृताग्नौ, मे. वमि र्वान्तौ कृताग्ने, वि. वमि र्वान्तेऽनले, हे.

वयःस्थ. वयःस्था तु स्त्रियां ब्राह्मीगुडूच्यामलकीषु च। सूक्ष्मैलायाञ्च काकोल्यां पथ्यायां तरुणे त्रिषु, मे. वयःस्थो वाच्यवद् यूनि वयःस्था शाल्मलीद्रुमे। ब्राह्मीगुडूचीकाकोलीसूक्ष्मैलामलकीषु च, वि. वयःस्थो मध्यमवया वयःस्था शाल्मलीद्रुमे। ब्राह्मीगुडूचीकाकोलीसूक्ष्मैलामलकीषु च, हे. काकोल्यामलकी ब्राह्मी वयःस्था तरुणे त्रिषु, त्रि.

वयस्. वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्, मे. वयः पक्षिणि बाल्यादौ वयो यौवनमात्रके, वि. वयस्तारुण्ये बाल्यादौ खगे, हे. खगबाल्यादिनो र्वयः, अ.

वर. वरो जामातरि वृतौ देवतादेरभीप्सिते। षिङ्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम्। वरी प्रोक्ता शतावर्यां वरा च स्यात् फलत्रिके। मनागिष्टे वरं क्लीवं केचिदाहुस्तदव्ययम्, मे. वरोऽभीष्टे देवतादे र्वरो जामातृषिङ्गयोः। श्रेष्ठेऽन्यवद् वरो वृतौ वरं काश्मीरजे मतम्। त्रिफलायां वरा प्रोक्ता शतावर्यां वरी वरम्। अव्ययन्तु मनागिष्टे, वि. वरो वृतौ।

विटे जामातरि श्रेष्ठे देवतादेरभीप्सिते। वरं तु पुरुषे किञ्चिदिष्टौ वरी शतावरी, हे. देवाद्‌वृते वरः श्रेष्ठे त्रिषु क्लीवं मनाक्प्रिये, अ. वरो जामातरि वृते कुङ्कुमे च नपुंसकम्, त्रि वरी श्रेष्ठजताभनो, अने.

वरचन्दन. वरचन्दनमाख्यातं कालीये देवदारुणि, मे वरचन्दनमाम्नातं कालीये देवदारुणि, वि. वरचन्दनं देवदारुणि। कालेये, हे.

वरट. वरटा द्वयो र्वरव्यां स्त्री हंस्यां च तत्पतौ पुमान्, मे. वरटा हंसयोषायां गन्धोल्यां वरटाऽपि च, वि वरटा हंसयोषिति। गन्धोल्यां च, हे.

वरण. वरणस्तु पुमान् तिक्तशाकप्राकारयोरपि। क्लीवं कन्यादिवरणे वेष्टने स्त्री नदीभिदि, मे. वरणस्तिक्तशाकेऽपि प्राकारे वरणं मतम्, वि. वरणो वरुणद्रुमे। प्राकारे वरणं स्त्रियाम्, हे.

वरण्ड. वरण्डोऽप्यन्तरे वेदौ समूहमुखरोगयोः, मे. वरण्डा सारिका वर्तिशस्त्रभेदे च योषिति, मे. वरण्डोऽप्यन्तरावेदौ सन्दोहमुखरोगयोः, वि. वरण्डा सारिकावर्तिखड्गधेनुषु कथ्यते, वि. वरण्डो वदनामये। अन्तरावेदौ सन्घे च वरण्डा शारिका छुरी। वर्तिः, हे. वरण्डो वदनामये। समूहे चान्तरावेद्याम्, त्रि.

वरण्डक. वरण्डकस्तु मातङ्गवेद्यां यौवनकण्टके। वर्तुले, मे. वरण्डकस्तु मातङ्गवेद्यां यौवनकण्टके। संवर्तुले, वि. वरण्डकस्तु मातङ्गवेद्यां यौवनकण्टके। संवर्तुले च भित्तौ च, हे.

वरत्रा. वरत्रा रज्जुकच्चयोः, मे. वरत्रा वर्तिकच्चयोः, हे.

वरद अथ वरदा स्त्रियाम्। कन्यायां वाच्यलिङ्गस्तु प्रसन्ने च समर्धके, मे. वरदोऽपि प्रसन्ने स्याद्‌ वरदः शान्तचेतसि। वरदापि च कन्यायाम्, वि. वरदः पुनः। प्रसन्ने शान्तचित्ते च वरदा तु कुमारिका, हे.

वरला. वरला वारला चापि गन्धोलीहंसकान्तयोः, मे. वारला वरला चापि गन्धोलीहंसयोषितोः, हे.

वरवर्णिनी वरवर्णिनी तु लाक्षाहरिद्रारोचनासु च। फलिन्या-

कुत्समानारीसाधीयस्यामपि स्त्रियाम्, मे. स्याद् वरवर्णिनी लाक्षाहरिद्रा-रोचनासु च। स्त्रीरत्ने च फलिन्यां च दृश्यते वरवर्णिनी, वि. वरवर्णिन्यङ्गना-लाक्षाप्रियङ्गुषु। रोचनायां हरिद्रायाम्, हे. स्त्रीरत्ने च हरिद्रायां लाक्षायां वरवर्णिनी, हा.

वराक. वराकः सङ्गरे पुंसि शोचनीयेऽभिधेयवत्, मे. वराकः सङ्गरे शोच्ये, वि. वराकः शोच्यरणयोः, हे. वराको मूर्खके भीरौ, अने

वराङ्ग. वराङ्गं योनिमातङ्गमस्तकेषु गुड़त्वचि, मे, वि. वराङ्गं योनौ शीर्षे गुड़त्वचि। कुञ्जरे च, हे. वराङ्गन्तु गुड़त्वचि गजे पुमान्, त्रि. वराङ्गं मूर्धगुह्ययोः, श्र.

वराटक. वराटकः पद्मबीजकोशे रज्जौ कपर्दके, मे. वराटकः स्थूल-रज्जौ पद्मबीजे कपर्दके, वि. वराटकः पद्मबीजकोशे रज्जौ कपर्दके, हे. कप-र्दरज्जुराजीवबीजकोषे वराटकः, त्रि.

वरारोह. वरारोहा कटावपि। वरारोहस्तु कथितो हस्त्यारो-हावरहयोः, वि. वरारोहो गजारोहे वरारोहा कटावपि, हे.

वराह. वराहः शूकरे विष्णौ मानभेदेऽद्रिमुस्तयोः, मे. वराहः शूकरे मेघे मुस्तकेऽपि, त्रि. वराहोऽब्दे किरौ विष्णौ नाणकेऽप्यद्रिमुस्तयोः, वि. वराहो नाणके किरौ। मेघे मुस्ते गिरौ विष्णौ, हे.

वरिष्ठ. वरिष्ठं मरिचेऽपि च। ताम्रे क्लीवं तित्तिरौ ना वरोरुत-मयोस्त्रिषु, मे. वरिष्ठः स्यादुरुतरे प्रवरे तित्तिरावपि। वरिष्ठं मरिचे ताम्रे, वि. वरिष्ठस्तु तित्तिरौ। वरिष्ठं मरिचे ताम्रे वरोरुतमयोरपि, हे. वरिष्ठं मरिचेऽपि च। ताम्रे चोरुतरे च, त्रि.

वरीयस्. वरीयान् योगभिच्छ्रेष्ठवरिष्ठेष्वतियूनि च, मे. वरीया-नतियूनि स्याद् वरिष्ठे श्रेष्ठयोगयोः, वि. वरीयान् श्रेष्ठयोगयोः। अति-यून्यतिविस्तीर्णे, हे. (अतिशये) वरीयांसूरुवरयोः, श्र.

वरुण. वरुणस्तरुभेदेऽप्सु, पश्चिमाशापतावपि, मे. वरुणस्तरुभेदेऽप्सु प्रतीचीपतिसूर्ययोः, वि. वरुणोऽर्केऽप्पतावपि, हे.

वरूथ. वरूथो रथगुप्तौ स्याद् वरूथं चर्मवेश्मनोः, मे, त्रि. वरूथं स्यात् तनुत्राणे रथगोपनवेश्मनोः, हे. वरूथो निजराट्कः, त्रि.

वर्कर. वर्करः परिहासे स्याच्छागे युवपशावपि, मे. वर्करस्तरुणे मेषे, वि. वर्करः पशुनर्मणोः, हे.

वर्कराट. वर्कराटः कटाक्षे स्यात् तरुणादित्यरोचिषि। नारीपयोधरोत्सङ्गकान्तदन्तनखक्षते, मे. वर्कराटः कटाक्षे स्यात् तरुणादित्यरोचिषि। स्त्रीणां पयोधरोत्सङ्गकान्तदन्तनखेऽपि च, वि. वर्कराटस्तु तरुणादित्यरोचिःकटाक्षयोः। स्त्रीणां पयोधरोत्सङ्गकान्तदन्तनखेऽपि च, हे. वर्कराटः कटाक्षे च स्त्रीणां स्तननखक्षते, त्रि.

वर्चस्. वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि। पुंसि चन्द्रस्य तनये, मे. वर्चो दीप्तौ पुरीषे च वर्चो रूपेऽपि च क्वचित्, वि. वर्चस्तु तेजसि। गूथे रूपे, हे. तेजःपुरीषयो र्वर्चः, अ, अने.

वर्जन. अथ वर्जनं हिंसात्यागयोः, मे. वर्जनं त्यागहिंसयोः, वि, हे.

वर्ण. वर्णो द्विजादिशुक्लादियशोगुणकुथासु च। स्तुतौ ना न स्त्रियां भेदरूपाक्षरविलेपने, मे. वर्णः काञ्चनयज्ञयोः। वर्णो द्विजादौ शुक्लादौ स्तुतौ रूपयशोऽक्षरे। विलेपने कुथायाञ्च वर्णः सव्राद्, गुणभेदयोः, वि. वर्णः स्वर्णे मखे स्तुतौ। रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणे। भेदे गीतक्रमे चित्रे यशस्तालविशेषयोः। अङ्गरागे च वर्णन्तु कुङ्कुमे, हे. वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे, अ. अक्षराणि स्मृता वर्णा वर्णाः श्वेतादयो गुणाः। वर्णो नाट्यमुखे गाथा वर्णा ज्ञेया द्विजादयः, अने. वर्णो गुणाक्षरयशःशुक्लादिब्राह्मणादिषु। वर्णः स्तुतौ कुथायाञ्च वर्णः सव्राद्, रूपभेदयोः, श. शुक्लादौ ब्राह्मणादौ च शोभायामक्षरे व्रते। गीतक्रमे स्तुतौ वेषे वर्णशब्दं प्रचक्षते, ह.

वर्णक. वर्णकश्चारणे स्त्री तु चन्दने च विलेपने, मे. वर्णकश्चारणे स्मृतः। विलेपने चन्दने च वर्णकं सव्रात्, वि. अथ वर्णकः। विलेपने मलयजे चारणे, हे. लेखन्यां वर्णिकाऽपि सव्रात्, ह.

वर्णविलोड़क  वर्णविलोड़क एष श्लोकस्तेने च सन्धिचौरे च, मे. वर्णविलोड़कः श्लोकच्छायाहारिणि कुम्भिले, वि. वर्णविलोड़क. काव्यच्छायाहृत्सन्धिचौरयोः, हे.

वर्णाट. वर्णाटो गायने चित्रकरे स्त्रीकृतजीवने, मे, वि. वर्णाटश्चित्रकारिणि। गायने स्त्रीकृताजीवे, हे. वर्णाटौ कामिगायनौ, लि.

वर्णिन्. वर्णी स्याल्लेखके चित्रकरेऽपि ब्रह्मचारिणि, मे, वि. वर्णी पुनश्चित्रकरे लेखके ब्रह्मचारिणि, हे.

वर्तक. वर्तकस्तु खुरेऽश्वस्य विहगे वर्त्तिका द्वयोः, मे. वर्तकोऽश्वखुरे खगे, वि, हे. खुरेऽपत्रश्वस्य वर्तकः, अ.

वर्तन. वर्तनो वामने क्लीवं वृत्तौ स्त्री पेषणाध्वनोः। नपुंसि तूलनालायां तर्कुपिण्डे च जीवने। वर्तिष्णौ त्रिषु, मे. वर्तनी तर्कुपिण्डे स्याद् वर्तनो मलने पथि, वि. वर्तनी पथि। वर्तनं तर्कुपिण्डे च, हे. वर्तनस्तर्कुपीठेऽपि स्त्रियां वर्तनवर्त्मनोः, त्रि.

वर्तूक वर्तूको नदीभेदे काकनीड़े जलावटे, मे, वि वर्तूकः काकनीड़े जलावटे, हे.

वर्ति. वर्ति भेषजनिर्माणे नयनाञ्जनलेखयोः। गात्रानुलेपनीदीपदशादीपेषु योषिति, मे. वर्ति दीपदशादीपगात्रानुलेपनीषु च। वर्ति भेषजनिर्माणे नयनाञ्जनलेखयोः, वि. वर्तिं गात्रानुलेपन्यां दशायां दीपकस्य च। दीपे भेषजनिर्माणे नयनाञ्जनलेखयोः, हे. वर्ति दीपदशास्वपि, त्रि. वर्ति दीपदशा सूत्रं वर्ति नेत्राञ्जनोचितम्, अने

वर्तिका. कठिन्यामपि वर्तिका, धा.

वर्त्मन्. वर्त्म नेत्रच्छदे मार्गे, मे. वर्त्म नेत्रच्छदेऽध्वनि, हे, श अक्षिरोम स्मृतं वर्त्म वर्त्म मार्गः प्रकीर्तितः, अने. नयनच्छदेऽपि वर्त्म, ह वर्त्म नेत्रच्छदाध्वनोः, वि.

वर्धन. वर्धनं वृद्धिवर्धिष्णुच्छेदे वध्यां तु वर्धनो, मे वर्धनं छेदने वृद्धौ वारिधान्यां तु वर्धनी, वि वर्धनं छेदने वृद्धौ वर्धनी तु गल-

न्तिका, हे. छेदे दृद्धौ च वर्द्धनम्, त्रि. वर्धनं छेदने प्रोक्तं वर्धनं दृद्धिवच्यते, अने. वर्धनी च घटी ज्ञेया वर्धनी तृणकूर्च्चिका, अने.

वर्धमान. वर्धमानः प्रश्नभेदे शरावेरण्डविष्णुषु, मे, त्रि, वि. वर्धमानो वीरजिने स्वस्तिकैरण्डविष्णुपु। प्रश्नभेदे शरावे च, हे.

वर्धित. वर्धितं प्रस्रुते छिन्ने पूरिते, मे. वर्धितं प्रस्रुते छिन्ने पूरिते चापि वर्धितम्, वि. वर्धितं छिन्नपूर्णयोः। प्रस्रुते, हे.

वर्घ. वर्घः सीसवरत्रयोः, हे. वर्घं त्रपुवरत्रयोः, मे, वि.

वर्य. वर्या पतिंवरायां स्त्री वरेण्ये त्रिषु ना स्मरे, मे. वर्यः स्मरवरेण्यत्रयोः, वि.

वर्ष. वर्षोऽस्त्री भारताद्दौ च जम्बूद्वीपाब्दवृष्टिषु। प्रावृट्काले स्त्रियां भूम्नि, मे. वर्षं संवत्सरे वृष्टौ जम्बूद्वीपे घने विदुः। प्रावृट्काले तु वर्षाः स्युः, त्रि. वर्षस्तु समाद्वीपांशवृष्टिषु। वर्षधरेऽपि वर्षास्तु प्रावृषि, हे. स्याद् वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम्, अ.

वर्षाभू. वर्षाभूः स्त्री च शोथघ्न्यां भूलतासवयोः पुमान्, मे. वर्षाभूः पुनर्नवायां स्रवे किञ्चुलकेऽपि च, वि. वर्षाभूः पुनर्नवायां संप्राट् गण्डूपद-भेकयोः, हे. पुनर्नवायां वर्षाभूः स्त्री ना किञ्चुलुके स्रवे, त्रि.

वर्ष्मन्. वर्ष्म देहप्रमाणातिसुन्दराकृतिषु स्मृतम्, मे. वर्ष्म देहे प्रमाणातिसुन्दराकारयोरपि, वि. वर्ष्म पुनस्तनौ। प्रमाणे सुन्दराकारे, हे. वर्ष्म देहप्रमाणयोः, अ. वर्ष्म देहप्रमाणे स्याद् वर्ष्म देहश्च कथ्यते, अने.

(ब)वर्हिस्. वर्हिः पुंसि हुताशने। न स्त्री कुशे, मे. वर्हिः कुशहुताशयोः, वि वर्हिः कुशेऽग्नौ, हे. वर्हि नी कुशशुष्मणोः, त्रि. वर्हि दर्भो चलं वर्हिः, अने.

वलय. वलयः कण्ठरोगे ना कङ्कणे पुंनपुंसकम्, मे वलयः कण्ठ-रोगे स्याद् वलयं कङ्कणेऽपि च, वि वलयः कङ्कणं कण्ठरुक्, हे.

वल्क. वल्कं वल्कलशल्कयोः, मे. वल्कं तु वल्कले खण्डे, वि. वल्कं शकले त्वचि शल्कवत्, हे

वल्गु. वल्गुः स्याच्छगले पुंसि सुन्दरे चाभिधेयवत्, मे. वल्गुश्छागे मनोज्ञेऽपि वल्गु भाषितमन्यवत्, वि. वल्गुश्छागमनोज्ञयोः, हे. वल्गुश्छागेऽपि, त्रि.

वल्मीक वल्मीको रोगभेदे च नाकौ च पुंनपुंसकम्, मे. वल्मीको वामलूरे स्यात् मुनिरोगविशेषयोः, वि. वल्मीको नाकुवाल्मीक्यौ रोगभेदे, हे.

वल्लभ. वल्लभो दयितेऽध्यक्षे सल्लक्षणतुरङ्गमे, मे. वल्लभो दयितेऽध्यक्षे कुलीनाश्वे च वल्लभः, वि. वल्लभोऽध्यक्षे कुलीनाश्वे प्रियेऽपि च, हे. त्रिष्वध्यक्षेऽपि वल्लभः, त्र.

वल्लर. वल्लरं शाद्वले प्रोक्तं निर्जनस्थानकुञ्जयोः। वनक्षेत्रे च मञ्जर्यां वल्लरी तु प्रकीर्तिता, वि. वल्लरं कुञ्जमञ्जर्योः क्षेत्रेऽनम्भसि शाद्वले, हे.

वल्लव. वल्लवः सूपकारे स्याद् भीमसेने च गोदुहि, मे. वल्लवः सूपकारे स्याद् भीमसेनेऽपि गोदुहि, वि. वल्लवः स्यात् सूपकारे गोदोग्धरि वृकोदरे, हे. वल्लवः सूदगोपयोः, त्रि. वल्लवौ सूपगोपालौ, अने.

वल्ली. वल्ली स्यादजमोदायां व्रतत्यामपि योषिति, मे. वल्ली स्यादजमोदायां पुष्पभेदेऽपि वीरुधि, वि. वल्ली स्यादजमोदायां लतायां कुसुमान्तरे, हे.

वल्लूर. वल्लूरं स्याद् वनक्षेत्रे गहनोषरयोरपि। वल्लूरा त्रिषु संशुष्कमांसशूकरमांसयोः, मे. वल्लूरं स्याद् वनक्षेत्रे वाहनोषरयोरपि। वल्लूरमाहुः संशुष्कमांसशूकरमांसयोः, वि. वल्लूरन्तु वनक्षेत्रे वाहनोषरयोरपि। शुष्कमांसे कोलमांसे, हे. स्यादूषरे वनक्षेत्रे वल्लूरं गहनेऽपि च। वल्लूरा त्रिषु संशुष्कमांसशूकरमांसयोः, त्रि.

वश. वशा वन्ध्यासुतायोषास्त्रीगवीकरणीषु च। त्रिष्वायत्ते स्त्रीवशमायत्तत्वे चेच्छाप्रभुत्वयोः, मे. वशमायत्ततायां स्याद् वशमिच्छा-

प्रभुत्वयोः। वशा वन्ध्यासुतायोषास्त्रीगवीकरणीषु च, वि. वशो जन्म-स्पृहायत्तेष्वायत्तत्वप्रभुत्वयोः। वशा नार्यां वन्ध्यगव्यां हस्तिन्यां दुहितर्यपि, हे. वशा स्त्री करिणी च स्यात्, अ. आयत्ततामभुत्वेच्छे वशः परवशे त्रिषु, त्रि.

वशिर. वशिरः पुमान्। किणिहीहस्तिपिप्पल्योः क्लीवेऽब्धिलवणे स्मृतः, मे. वशिरं किणिहीसिन्धुलवणेभकणासु च, वि.

वसति. वसतिः स्त्रियात् स्त्रियां वासे यामिन्याञ्च निकेतने, मे. वसतिः स्त्रियादवस्थाने यामिन्याञ्च निकेतने, वि. वसतिः स्यादवस्थाने निशायां सदनेऽपि च, हे. वसती रात्रिवेश्मनोः, अ. वासेऽपि वसतिः, त्रि. वसति जैनाश्रमेऽपि निर्दिष्टा, रु.

वसन. वसनं छादने वस्त्रे, मे, हे. वसनं छादनेंऽशुके, वि.

वसन्तदूत. वसन्तदूतश्चूते स्यात् पिकपञ्चमरागयोः। वसन्तदूती पाटल्यामतिमुक्ते च योषिति, मे. वसन्तदूतश्चूते स्यात् पिकपञ्चमरागयोः। वसन्तदूती पाटल्यां प्रतीताप्यतिमुक्तके, वि. वसन्तदूत आम्रके। पिके पञ्चमरागे वसन्तदूत्यतिमुक्तके। पाटलायाम्, हे.

वसु. वसु ना देवभेदाग्निभायोक्त्रवकराजसु। क्लीवे हृद्धौषधेऽब्धे च रैरत्नमधुरे त्रिषु, मे. वसु मयूखाग्निधनाधिपेषु योक्त्रे वके स्याद् वसु हाटके च। हृद्धौषधाख्यानधनेषु रत्ने वसु स्मृतं स्यान् मधुरेऽन्यवच्च, वि. वसुस्त्वग्नौ देवभेदे रूपे रुचि। योक्त्रे शुष्के वसु स्याद्रौ रत्ने हृद्धौषधे धने, हे. देवभेदेऽनले रश्मौ वसू रत्ने धने वसु, अ. योक्त्रे च वसुराख्याने, त्रि. वसुः सूर्यो वसुर्देवो वसुर्वह्नि र्वसु मेदी। वसु रत्नं वसु द्रव्यं वसवोऽष्टौ ध्रुवादयः, अने. अग्निधनरश्मिरत्नत्रिदशविशेषेषु भवति वसु-शब्दः, रु.

वसुक. वसुकं रोमके पुंसि शिवमल्लार्कपर्णयोः, मे. वसुकः शिव-मल्ल्यां स्यादर्कपर्णे च रोमके, वि वसुकं पुनः। रोमके वसुकस्तु स्याच्छि-वमल्ल्यर्कपर्णयोः, हे

वस्ति. वस्ति र्द्वयो र्निरूहे नाभ्यधो भूम्नि दशासु च, मे.

वस्न. वस्नस्त्ववक्रये पुंसि वेतने स्यान् नपुंसकम्, मे. वस्नं स्याद् वेतने मूल्ये वसनद्रव्ययोरपि, वि. वस्नं वस्ने धने मूल्ये वेतने, हे.

वस्वौकसारा. वस्वौकसारेन्द्रपुरे कुबेरनलिनीपुरोः, मे. वस्वौकसारा शौदस्य शक्रस्य नलिनीपुरोः, वि वस्वौकसारा त्विन्द्रस्य धनदस्य च। नलिनीपुर्यौ, हे

वह. वहः स्याद् वृषभस्कन्धे वाहे गन्धवहेऽपि च, मे. वहः स्याद् वृषभस्कन्धदेशे गन्धवहेऽपि च, वि. वहो वृषस्कन्धदेशे वायौ, हे. वृषस्कन्धेऽनिले वहः, त्रि.

वहति. वहति र्गवि। सचिवे पुंसि, मे. वहतिः सचिवे गवि, वि.

वहतु. वहतुः पथिके वृषभे पुमान्, मे वहतुः पथिके वृषे, वि.

वह्नि. वह्नि र्वैश्वानरेऽपि स्यात् चित्रकाख्यौषधौ पुमान्, मे.

वा. वा स्याद् विकल्पोपमयो र्वितर्के पादपूरणे। समुच्चये च विस्मये नानार्थातीतयोरपि, मे. वा समुच्चय एवार्थे उपमानविकल्पयोः, हे. वा स्याद् विकल्पोपमयोरेवार्थेऽपि समुच्चये, वि. V. वा.

वागर. वागरस्तु गतातङ्के मुमुक्षौ वाडवेऽवृके। विशारदेऽपि शाणेऽपि निर्णये वारकेऽपि च, मे. वागरो वारके शाणे निर्णरे वाडवे वृके। विशारदे मुमुक्षौ च गतातङ्के च वागरः, वि. वागरो वारके शाणे निर्णरे वाडवे वृके। मुमुक्षौ पण्डिते चापि परित्यक्तभयेऽपि च, हे.

वाग्मिन् वाग्मी पटौ सुराचार्ये, मे. वाग्मी वाचस्पतौ पटौ, वि. वाग्मी पटुबृहस्पत्योः, हे.

वाच् (चा). वाग्वाचे भारत्यां वचने स्त्रियौ, मे. वाग् वचने सरस्वत्यां भाषा गौ भारती यथा, वि वाग् भारत्यां वचस्यपि, हे.

वाचट वाचटन्तु कुत्सिते हीने वचनार्हे च वाचरवत्, मे

वाज. वाजो निस्वनपक्षयोः। वेगे पुमानथ क्लीवं घृतयज्ञान्नवारिषु, मे. वाजं घृतेऽपि यज्ञान्ने वाजो निस्वनपक्षयोः। वाजं जले मुनौ

वाज:, वि. वाजं सर्पिषि वारिणि। यज्ञान्ने वाजस्तु पक्षे मुनौ निस्वन-वेगयो:, हे. वाजमन्नं गरुद् वाजो वाजं पीयूषमिष्यते, अने.

वाजिका. वाजिका पक्षिजाति: स्याद् वाजिका नीलमक्षिका, अने.

वाजिन्. वाजी वाणाश्वपक्षिषु, मे, वि. वाजी वाणे हये खगे, हे. वाजिनोऽश्वेषुपक्षिण:, अ.

वाट. वाटो मार्गे वृतिस्थाने स्यात् कुटीवास्तुनो: स्त्रियाम्, मे. वाटो वृतौ च मार्गेऽपि वाटी तु गृहनिष्कुटे, वि. वाट: पथि वृतौ वाटं वरण्डेऽङ्गान्नभेदयो:। वाटी वास्तौ गृहोद्याने, हे. पथि वास्तुनि वाटं स्रग्वत्, त्रि.

वाड़व. वाड़वं करणे स्त्रीणां घोटकौघे नपुंसकम्। पाताले न स्त्रियां पुंसि ब्राह्मणे वड़वानले, मे. वाड़वं करणे स्त्रीणाम् ऊर्वे विप्रेऽपि वाड़व:। वाड़वं वड़वासङ्घे वाड़वो रसमानयो:, वि. वाड़वं करणे स्त्रीणां वड़वौघे रसातले। वाड़वो विप्र आग्नौ च, हे. अश्वौघे वाड़वं न स्त्री पाताले ना द्विजौर्वयो:, त्रि. वाड़वो वह्निविप्रयो:, अने.

वाढ़. वाढं दृढ़प्रतिज्ञयो:, मे. वाढं दृढ़े प्रतिज्ञायाम्, वि. वाढं भृशप्रतिज्ञयो:, हे. भृशप्रतिज्ञयो र्वाढ़म्, अ. अवश्यंभृशयो र्वाढ़म्, रु.

वाण. वाण: स्रग्वद् गोस्तने दैत्यभेदे केवलकाण्डयो:। वाणा तु वाणमूले स्त्री नीलझिण्ट्यां पुन र्द्वयो:, मे. वाण: स्रग्वत् केवले काण्डे काण्डावयवदैत्ययो:। वाणा झिण्ट्यां मता धीरै:, वि. वाणो वृक्षविशेषे स्रग्वत् शरस्रावयवे शरे। बलिपुत्रेऽपि, हे. वाणो बलिसुते शरे, अ. वाणा झिण्ट्यां शरे वाणे, त्रि.

वाणि(णी). वाणी तु योषिति। वूतावपि सरस्वत्याम्, मे. वाणि: स्रग्वद् वूतिभारत्यो र्वाणि र्मूल्ये बलाहके, वि. वाणिरम्बुदे। वूतौ मूल्ये सरस्वत्याम्, हे. वाणी वूतिश्च भारती, त्रि.

वाणिनी. वाणिनी नर्तकीमत्ताविदग्धवनितासु च, मे, वि. स्रग्वद् वाणिनी तु नर्तक्यां छेकमत्तस्त्रियोरपि, हे. मदमत्ताविदग्धस्त्रीन-

र्तकीषु च वाणिनी, द्वा. वाणिन्यौ नर्तकीदूत्यौ, अ. स्त्री विदग्धा च वाणिनी, त्रि.

वातकेलि. वातकेलिः कलालापे पिङ्गदन्तक्षते पुमान्, मे. वातकेलिः कलालापे पिङ्गानां दन्तलेखने, वि, हे.

वातखुड़ा. अथ वातखुडा वात्याराजशोणितयोरपि। पिच्छिलस्फोटिकायाञ्च वामायामपि योषिति, मे. भवेद् वातखुडा वात्यावामयोर्वातशोणिते। पिच्छिलस्फोटिकायाञ्च, वि. वातखुड़ा पुनः। वात्यायां पिच्छिलस्फोटे वामायां शातशोणिते, हे.

वातपुत्र. वातपुत्रो महाधूर्ते भीमसेने हनूमति, मे. वातपुत्रो हनूमति। महाधूर्ते च भीमे च, वि.

वातरायण. वातरायण उन्मत्ते निष्प्रयोजनपूरुषे। काण्डे च करपत्रे च कूटे च शरसंक्रमे, मे, वि. वातरायणः क्रकचे सायके शरसंक्रमे। निष्प्रयोजननरे चापि, हे.

वातरूप. वातरूपस्तु वातूलोत्कोचयोः शक्रकार्मुके, मे, वि. वातरूपः शक्रशरासने। वातूलोत्कोचयोश्चापि, हे.

वातिग. वातिगः पुंसि भण्टाक्यां धातुवादिनि चान्यवत्, मे. वातिगः कथितो भण्डे धातुवादिनि वातिगः, वि

वातूल. वातूलः पुंसि वात्यायां वाच्यवत् मारुतासहे, मे. वातूलो वातसङ्घाते वातले मारुतासहे, वि. वातूलो वातले वातसमूहे मारुतासहे, हे. वातूलः पुंसि वात्यायामपि वातासहे त्रिषु, च.

वादर. v. बादर.

वान. वानं शुष्कफले शुष्के स्यूतिकर्मकटे गतौ, मे वानं शुष्कफले शुष्के कटे सीवनकर्मणि। जलसंस्रववातोर्मिसुरङ्गागतिसौरभे, वि. वानं शुष्कफले शुष्के सीवने गमने कटे। जलसंस्रवातोर्मिसुरङ्गासौरभेषु च, हे. अथ फले शुष्के वानं स्यूते कटे गतौ, त्रि.

वानप्रस्थ. वानप्रस्थो मधूकेऽपि स्यात् तृतीयाश्रमे पुमान्, मे.

शतधृति. भवेच्छतधृतिः पुंसि शक्रे च परमेष्ठिनि, मे. शतधृतिर्धातरीन्द्रे, वि. ब्रह्मशक्रौ शतधृती, त्रि.

शतपत्र. शतपत्रः शिखण्डिनि। दार्वाघाटे सारसे च कमले तु नपुंसकम्, मे. पतपत्रो राजकीरे दार्वाघाटमयूरयोः। राजीवे शतपत्रं तु, वि. शतपत्रो दार्वाघाटे राजकीरमयूरयोः। शतपत्रं तु राजीवे, हे. दार्वाघाटेऽपि शतपत्रम्, च.

शतपर्वा. शतपर्वा तु दूर्वायां तथा भार्गवयोषिति, मे. शतपर्वा तु दूर्वायां भार्गवस्त्र स्त्रियामपि, वि.

शतपर्विका. शतपर्विका तु दूर्वायां वचायामपि योषिति, मे. अथो शतपर्विका। स्याद् वचादूर्वयोः, हे. स्यात् शतपर्विका दूर्वावचयोः, वि. वचाऽपि शतपर्विका, त्रि.

शतह्रदा. शतह्रदा स्त्रियां वज्रे सौदामिन्यां च कीर्तिता, मे. शतह्रदा भवेद् वज्रे सौदामिन्यां च कीर्तिता, वि शतह्रदा तु विद्युति। वज्रेऽपि, हे. v. ऐरावत.

शतानन्द. शतानन्दो मुनेर्भेदे देवकीनन्दनेऽपि च, मे.

शतानीक शतानीकस्तु वृद्धे स्यान् मुनिराजप्रभेदयोः, मे शता-

नीको मुने भेदे दृद्धे च, वि. शतानीको मुनौ दृद्धे, हे.

शतावरी. शतावरी तु शचत्रां स्यादिन्दीवर्यामपि स्त्रियाम्, मे. वरी-शचत्रोः शतावरी, वि.

शद्रि. शद्रि र्नाऽम्भोधरे जिष्णौ, मे. शद्रि र्विष्णौ तडित्यपि, हे. शद्रिरम्भोधरे जिष्णौ, वि.

शनैस्. शनैः स्वैरे शनैश्वरे, मे. शनैः शनैश्वरे स्वैरे, वि.

शफ. शफं मूले तरूणां स्याद् गवादीनां खुरेऽपि च, वि, मे. शफं खुरे गवादीनां मूले विटपिनामपि, हे.

शब्द. शब्दोऽक्षरे यशोगीत्यो र्वाक्ये खे श्रवणे ध्वनौ, हे.

शम्. शं कल्याणे सुखे, मे. शं सुखे शर्मणि प्रोक्तम्, वि. शं कल्याणे सुखेऽपि च, हे.

शमथ. शमथः शान्तिमन्त्रिणोः, मे. शमथः सचिवे शान्तौ, वि. शमथः सचिवे शमे, हे.

शमन. शमनं शान्तिवधयोः। शमनः श्राद्धदैवते, मे, वि. शमनस्तु यमे शमनं शान्तिहिंसयोः, हे. यमे ना शमनं वधे, त्रि.

शमी. शमी सक्तुफलायां च शिम्बिकायां च वाशुजौ, मे. शमी सक्तुफलायां च शिम्बायामपि वल्गुलौ, वि. शमी द्रुभेदे वल्गुल्यां शिम्बत्राम्, हे.

शम्पा. शम्पा विद्युत् पविः शम्पा शम्पा शङ्खध्वनि र्मतः, अने.

शम्पाक. शम्पाकस्तु वियाते स्याद् याचके चतुरङ्गुले, हे. v. सम्पाक.

शम्ब. शम्बः स्यात् मुसलाग्रस्थलौहमण्डलके पवौ। शुभान्विते त्रिषु, मे. शम्बः स्यात् मुसलाग्रस्थलोहमण्डलके पवौ। शुभान्विते च, वि. शम्बः पवौ लोहकाञ्चत्राम्, हे. शम्बस्तु मुसलानने। कल्याणवति यज्ञे च, त्रि

शम्बर. शम्बरं सलिले पुंसि मृगदैत्यविशेषयोः। शम्बरी चाखुपर्णत्रां मत्रात्, मे. शम्बरं सलिले चित्रबौद्धमतविशेषयोः। शम्बरो दे-

हरिणमत्स्यशैलजिनान्तरे॥ औषधौ शम्बरीमाङ्गः, वि. शम्बरं जले। चित्रे बौद्धव्रतभेदे शम्बरो दानवान्तरे। मत्स्यैणगिरिभेदेषु शम्बरी पुनरौषधौ, हे. शम्बरं संयमे जले। शम्बरी दैत्यहरिणौ, त्रि.

शम्बल. शम्बलोऽस्त्री सम्बलवत् कुलपाथेयमत्सरे, मे. शम्बलं कुलपाथेयमत्सरेषु समीरितम्, वि शम्बलं मत्सरे तटे। पाथेये, हे.

शम्बू(म्बु)क शम्बूको गजकुम्भान्ते घोङ्गे च शूद्रतापसे। जलजन्तुविशेषे च शम्बूका न नपुंसकम्, मे. शम्बूको गजकुम्भान्ते दैत्यभेदे च घोङ्कके, वि. शम्बूको दैत्यविशेषे करिकुम्भान्तशङ्खयोः, हे.

शम्भु. शम्भुः पुंसि महादेवे परमेष्ठिनि चार्हति, मे. शम्भु-र्ब्रह्मार्हतो हरे, वि. शम्भु ब्रह्मार्हतोः शिवे, हे. शम्भू ब्रह्मत्रिलोचनौ, ा. शम्भू ब्रह्ममहेश्वरौ, अने.

शयः. शयः शयद्राहिपाणिषु, मे, वि.

शयथ. शयथ, स्यादजगरे निद्रालौ मरणेऽपि च, हे.

शयन. शयनं सुरते निद्राशय्ययोश्च नपुंसकम्, मे. शयनं सुरते ाद्राशय्ययोरपि भाषितम्, वि शयनं स्वापशय्ययोः। रते, हे.

शयालु. शयालुः स्यादजगरे निद्राशीले च कुक्कुरे, मे. शयालुः ादजगरे निद्राशीलेऽपि कुक्कुरे, वि. शयालुस्तु निद्रालौ वाहसे शुनि, हे. यालुः कुक्कुरेऽलसे, त्रि

शय्या. शय्या स्यात् शयनीये च गुम्फनेऽपि च योषिति, मे शय्या ल्पे शब्दगुम्फे, वि, हे. विज्ञेयं शयनं शय्या शय्या गुम्फकसञ्चयः, अने.

शर शर तेजनके बाणे दध्यग्रे ना शरं जले, मे. शरं नीरे शरः ाडे शरतेजनकेऽपि च, वि शरं जले। शरः पुन दधिसरे काण्ड-ानयोरपि, हे v. सर.

शरण शरणं गृहरक्षित्रो र्वधरक्षणयोरपि, मे. शरणं वधरक्षित्रोः णं रक्षणे गृहे, वि शरणं रक्षणे गेहे वधरक्षकयोरपि, हे शरणं गृह-क्षित्रो', च. शरणं मारणेऽपि च, त्रि

शरण्ड. शरण्डस्तु पुमान् धूर्ते शरटे भूषणान्तरे, मे. सरण्डः सरटे धूर्ते सरण्डो भूषणान्तरे, वि. शरण्डः स्यात् कृकलासे भूषणान्तरधूर्तयोः, हे.

शरणुत्र. शरणुत्र वारिदे वाते, वि. V. सरणुत्र.

शरद्. शरद्स्त्री वत्सरेऽप्यृतौ, मे. शरत् संवत्सरे ऋतौ, वि. शरद् वर्षात्यये वर्षे, हे. ऋतौ वत्सरे शरत्, अ. शरत् संवत्सरेऽपि च, हा.

शरभ. शरभस्तु पशौ भिदि। करभे वानरभिदि, मे. शरभ-स्त्वष्टापदे मृगान्तरे, वि.

शरवाणि. शरवाणिः शरमुखे पापिष्ठे शरजीविनि, मे, वि. शरवाणिः शरमुखे पदातौ शरजीविनि, हे.

शरु. शरु र्ना कोपवज्रयोः, मे. शरुः कुलिशकोपयोः, वि. शरुः कोपे शरे वज्रे, हे.

शर्करा. शर्करा खण्डविकृतावुपलाकर्परांशयोः। शर्करान्वितदेशेऽपि रुग्भेदे शकलेऽपि च, मे, वि. शर्करा खण्डविकृतौ कर्परांशे रुगन्तरे। उपलायां शर्करायुग्देशेषु शकलेऽपि च, हे. शर्करा कर्परांशेऽपि, अ.

शर्वरी. शर्वरी यामिनीस्त्रियोः, मे. शर्वरी रात्रियोषितोः। हरिद्रायां च, वि. शर्वरी निशि नार्यां च, हे.

शल. शलस्तु शलले पुंसि भृङ्गिचेलभिदो विधौ, मे. शलं तु शल्यकीलोक्ति शलो भृङ्गिगणे विधौ, वि.

शलाका. शलाका शल्यमदनशारिकाशल्लकीषु च। छत्रादिकाष्ठीशरयोः, मे. शलाका शारिका शल्यं श्वाविद्रालेख्यकूर्चिका, हे. स्याच्छलाकाऽपि मदनशारिकाशल्यरयोः शरे। छत्रपञ्जरकाष्ठयां च, वि.

१ शलि. शलि र्मुखः शलि र्गर्भः शलि र्भृङ्गः शलि र्गदः। शलिः सर्पविशेषश्च शलिः कलिरुदाहृतः, अने.

शल्क. शल्कन्तु शकले वल्के, मे. शल्कं शकलवल्कयोः, वि. हे शल्के शकलवल्कले, अ. शल्कचर्मेऽपि, त्रि. V. वल्क

शल्य. शल्यन्तु न स्त्रियां शङ्कौ क्लीवं क्ष्वेड़ेषु तोमरे। मदनद्रुमा-विशेषो नीं, मे. शल्यं शङ्कौ शरे वंशकश्विकायां च तोमरे। शल्यस्तु कथितः श्वाविन्मदनद्रुमयोरपि, वि. शल्यः स्यात् मदनद्रुमे। नृपभेदे श्वाविधि च सीम्नि शस्त्रशलाकयोः, हे. शलाकायुधयोः शल्यम्, रु.

शल्लकी. शल्लकी पशुद्रुमयोः, मे, वि. श्वाविद्द्रुमौ च शल्लकौ, लि.

शव. शवः स्यात् कुणपे पुमान्। शवं पानीये, मे. शवो मृते शवं नीरे, वि.

शवर. शवरो म्लेच्छभेदे च पानीये शङ्करेऽपि च, मे. शवरो वारि-चण्डालभेदयोः शङ्करेऽपि च, वि. शवरो म्लेच्छभेदेऽपि, हरे, हे. शवरः सलिले शिवे, लि.

शश. शशो बोले लोध्रे मृगपशुभेदयोः, मे. शशो गन्धरसे लोध्रे स्यात् शशी पुरुषान्तरे, वि. शशः एशी बोले लोध्रे नृभेदे च, हे.

शशविन्दु. शशविन्दुः पुमान् वासुदेवे राजान्तरेऽपि च, मे.

शशिलेखा. शशिलेखा कलाभागे गुड़चीवृत्तभेदयोः, मे. शशिलेखा कलाभागे वाकुचीवृत्तभेदयोः, वि. शशिलेखा वृत्तभेदे वाकुचीचन्द्रलेखयोः, हे.

शश्वत् शश्वत् स्यादालमर्थे च मङ्गले। पुराकल्पे सदार्थे च पुनरर्थे च दृश्यते, मे. शश्वत् पुनःसदार्थयोः, वि. शश्वत् सहपुनर्नित्ये, हे. पुनः-सहार्थयोः शश्वत्, अ.

शष्प. शष्पं बालतृणे स्मृतम्। पुंसि स्यात् प्रतिभाहानौ, मे. शष्पं स्यात् प्रतिभाहानौ शष्पं बालतृणेऽपि च, वि. शष्पन्तु प्रतिभाहीनतायां बालतृणेऽपि च, हे. शष्पं बालतृणं प्रोक्तम्, अने

शस्त. शस्तं क्षेमे प्रशस्ते च, मे, वि, हे.

शस्त्र. शस्त्रं लोहास्त्रयोः क्लीवं क्षुरिकायान्तु योषिति, मे. शस्त्रं लोहास्त्रयोः शस्त्री चुरिकायां च विश्रुता, वि शस्त्रमायुधे। लोहे शस्त्री क्षुरिकायाम्, हे. शस्त्रमायुधलोहयोः, अ.

शस्य शस्यं शस्ते फले गुणे, वि

शाक शाको द्वीपान्तरेऽपि च। शकौ द्रुमविशेषे च पुमान् हरितकेऽस्त्रियाम्, मे. शाको द्वीपे नृपे द्रुमे। शक्तौ हरितके चापि, हे. शाको द्वीपान्तरे शक्तौ नृपद्रुमविशेषयोः। शाकं हरितके चापि, वि. V. मोच

शाकट. शाकटं शकटस्ये दन्त्यर्थे तस्य वोढ़रि, मे.

शाखा. शाखा पचान्तरे बाहौ वेदभागद्रुमाङ्गयोः, मे. शाखा द्रुमांशे वेदांशे भुजे पचान्तरेऽन्तिके, हे. शाखा पचान्तरे भुजे। शाखा वेदविभागे च पादपाङ्गेऽन्तिकेऽपि च, वि. शाखा वेदविभागेऽपि, त्रि.

शाखिन् शाखी स्यात् पादपे वेदे तुरुष्काख्यजने पुमान्, मे शाखी स्यात् पादपे वेदे तुरुष्काख्यजनेऽपि च, वि. शाखी तु द्रुमवेदयोः। राजभेदे, हे

शाङ्कर. शाङ्करस्तु बलीवर्दे छन्दोभेदे नपुंसकम्, मे. शाङ्करो वृषभे छन्दोविशेषे शाङ्करं मतम्, अने, V शार्कर.

शाङ्करि. शाङ्करिः पुंसि कार्त्तिकेये गणाधिपे, मे. शाङ्करि र्विप्रे स्कन्दे, वि.

शाण. शाणो माषचतुष्टये। लोहादीनां च निकषे शाणी प्रावरणान्तरे, मे. शाणो माषचतुष्टये। कषणे करपत्रे च शाणी प्रावरणान्तरे, वि. शाणः कषे मानभेदे, हे. कषे माषचतुष्के च शाणः, त्रि.

शाण्डिल्य शाण्डिल्यः पावकान्तरे। मुनिभेदे च मालूरे, मे. शाण्डिल्यो मुनिभेदे स्यात् मालूरे पावकान्तरे, वि. शाण्डिल्यः पावकान्तरे। बिल्वे मुनौ च, हे. शाण्डिल्यौ मुनिमालूरौ, त्रि.

शात शातं शितञ्च दुर्बले। निशिते च, मे दुर्बले निशिते स्यात्तां शितशातौ, वि शितं शातञ्च निशिते छाते। शातं शर्मणि, वि.

शातकुम्भ शातकुम्भं सुवर्णं स्यात् शातकुम्भोऽश्वमारके, मे, वि. शातकुम्भोऽश्वमारके। शातकुम्भन्तु कनके, हे

शात्रव. शात्रवं भावसंहत्योः शत्रूणां शात्रवो रिपि, मे, वि शात्रवं शत्रुसंक्षये। शत्रुत्वे शात्रवः शत्रौ, हे

शाद. शादः स्यात् कर्दमे शष्पे, मे. शादः कर्दमशष्पयोः, वि, हे. शादो जम्बालशष्पयोः, श्र. शादः शष्पे, ह.

शान्त. शान्तोऽभियुक्तरसयोः पुंसि त्रिषु शमान्विते। अत्यर्थ वारणे शान्तम्, मे. शान्तो रसविशेषे स्याद् घातिमुक्तकदान्तयोः, वि. शान्तो दान्ते रसान्तरे, हे.

शान्ति. शान्तिः स्त्री मङ्गले शमे, मे. शान्ति शमे च कल्याणे, वि. शान्तिर्भद्रे शमेऽर्हति, हे. शान्तिः स्यात् मङ्गले शमे, वि.

शाप. शाप आक्रोशदिव्ययोः, मे. शापः शपथ आक्रोशे, वि, हे. आक्रोशे शपथे शापः, वि.

शार. शारः स्याच्छबले वाचवलिङ्गः पुंसि समीरणे। अक्षोपकरणे, मे. शारः शबलवातयोः। द्यूतस्य चोपकरणे, हे. शारो वायौ स तु त्रिषु कर्बुरे, श्र. शारः शबलवातयोः, वि.

शारद. शारदोऽब्दे स्त्रियां तोयपिप्पलीसप्तपर्णयोः। सस्ये क्लीवं शरज्जातनूतनाप्रतिभे त्रिषु, मे. शारदः पीतमुद्गे स्यात् शालीनेऽप्रतिभे नवे। वर्षेऽथ जलपिप्पल्यां सप्तपर्णे च शारदी, वि. शारदो वत्सरे नवे। शरद्भवे पीतमुद्गे शालीनेऽप्यथ शारदी। सप्तपर्णाम्बुपिप्पल्योः, हे. द्वौ तु शारदौ प्रत्यग्राप्रतिभौ, श्र. शारदो जलदेऽपि च। स्त्रियां च शारदी तोयपिप्पली-सप्तपर्णयोः, वि. शारदस्तु शरत्कालः सत्रादष्टस्तु शारदः, अने.

शारि. शारि र्नाऽक्षोपकरणे स्त्रियां शकुनिकान्तरे। युद्धार्थगज-पर्याणे व्यवहारान्तरेऽपि च, मे. शारिः कुञ्जरपर्याणे शकुनौ द्यूतसाधने, हे. पर्याणेऽक्षोपकरणे शारिः शकुनिकान्तरे, त्रि. शारिरक्षोपकरणे नस्था. शकुनिकान्तरे। युद्धार्थगजपर्याणे व्यवहारेऽपि च क्वचित्, वि.

शारीर. शारीरं देहजे वृषे, मे, हे, वि.

शार्कक. शार्ककः सत्राद् दुग्धफेनशर्करापिण्डयोः पुमान्, मे. शार्ककः शर्करापिण्डे दुग्धफेने च शार्ककः, [illegible] : सत्राद् दुग्धफेने शर्करायाश्च

शार्कर. शार्करः सत्राद्, दुग्धफेनशर्करान्वितदेशयोः, मे. शार्करो दुग्धफेनेऽपि शर्करान्वितदेशवत्। शार्करो वृषभे छन्दोविशेषे शार्करं मतम्, वि. शार्करम्। छन्दोभित् शार्करसूचा, हे. V. शाक्कर.

शार्ङ्ग. शार्ङ्गः कार्मुकमात्रेऽपि विष्णोरपि शरासने, मे, वि. शार्ङ्गं विष्णुधनु र्धनुः, हे. शार्ङ्गं धनु विष्णुधनुः, त्रि.

शार्दूल. शार्दूलो राक्षसान्तरे। व्याघ्रे च पशुभेदे च सत्तमे ह्युत्तरस्थितः, मे, वि, हे.

शार्वर. शार्वरस्त्वन्धतमसे घातुके भेद्यलिङ्गकम्, मे, म. शार्वरं त्वन्धतमसे शार्वरो घातुकेऽन्यवत्, वि. शार्वरं घातुके ध्वान्ते, हे.

शाल. शालो हालद्रुपे मत्स्यप्रभेदे सर्जपादपे। शाला गृहे तरुस्कन्धशाखागारैकदेशयोः, वि. शाला द्रुस्कन्धशाखायां गृहगेहैकदेशयोः। ना झषे, मे. शालो हाले मत्स्यभेदे शालीकस्तत्प्रदेशयोः। स्कन्धशाखायाम्, हे. शाला सत्राद्, गृहशाखयोः। तरुजातौ मत्स्यभेदे शालो हाले नृपेऽपि च, त्रि. शाला स्त्राया शिला शाला शाला शाखा च वेश्म च, अने. V. सोच.

शालङ्कायन. शालङ्कायन उद्दिष्टो मुनिभेदे च नन्दिनि, मे. शालङ्कायनशब्दः सत्राद्, ऋषिभेदे च नन्दिनि, वि शालङ्कायनो नन्दृश्यो:, हे.

शालसार. शालसारो द्रुमे हिङ्गौ, वि. V. सालशार.

शालार. शालारं सत्राद्, हस्तिनखे सोपाने पक्षिपञ्जरे, मे, वि. शालारं पक्षिपिञ्जरे। सोपानहस्तिनख्योः, हे.

शालावृक शालावृकः शृगाले सत्रात् सारमेये वलीमुखे, मे. शालावृकः शृगालेऽपि सारमेये वलीमुखे, वि. शालावृको वलीमुखे। सारमेये शृगाले च, हे. शालावृकाः कपिक्रोष्टृश्वानः, म. शालावृकौ कपिश्वानौ, हा.

शालि. शालिस्तु कलमादौ च गन्धमार्जारके पुमान्, मे शालिस्तु गन्धमार्जारे कलमादिषु च स्मृतः, वि. शालिस्तु गन्धोतौ कलमादिषु, हे. शालि र्गन्धमृगे धान्ये, त्रि

शालु. शालुः कषायद्रव्ये सन्नात् चौरकाख्यौषधे पुमान्, मे. शालुः कषायद्रव्ये सन्नात् चौरकाख्यौषधेऽपि च, हे, वि.

शालेय. शालेयः सन्नात् मिसौ पुमान्। त्रिषु शालुद्भवे क्षेत्रे, मे. शालेयं शतपुष्पायामाहुः शालुद्भवोचिते, वि. शालेयं शतपुष्पाख्यौषधे। क्षेत्रे च शालिधान्यस्य, हे.

शाल्मलि(ली). शाल्मलिस्तरुभेदे स्याद् द्वीपभेदेऽपि च द्वयोः, मे. शाल्मली तरुभेदे स्याद् द्वीपभेदे च शाल्मली, वि शाल्मलिः पादपे द्वीपे, हे.

शावर. शावरी शूकशिम्बिर्ना सन्नात् पुंसि पापापराधयोः। रोध्रे च, मे. शावरः पद्यते रोध्रे तथा पापापराधयोः। शावरी शूकशिम्बिर्ना च, वि. शावरो रोध्रपापयोः। अपराधे शावरी तु शूकशिम्बिर्ना च, हे.

शासन. शासनं राजदत्तोर्व्यां लेखाज्ञाशास्त्रशास्तिषु, मे, वि. शासनं नृपदत्तोर्व्यां शास्त्राज्ञालेखशास्तिषु, हे.

शास्तृ. शास्ता समन्तभद्रे ना शासने पुनरन्यवत्, मे. शास्ता जिने शासके च, हे. शास्ता च शासके बुद्धे, वि.

शास्त्र. शास्त्रं न द्वयोरागमाज्ञयोः, मे. शास्त्रं ग्रन्थनिदेशयोः, वि, हे. निदेशग्रन्थयोः शास्त्रम्, अ.

शिखण्ड. शिखण्डो बर्हचूडयोः, मे, वि, हे. शिखण्डौ च शिखा-बर्हौ, त्रि. जटाजूटे शिखण्डोक्तिः कलापेऽपि शिखण्डिनः, अने

शिखण्डिन् शिखण्डिनी यूथिकायां गुञ्जायामपि योषिति। शिखण्डी ना कलापे सन्नाद् गाङ्गेयारिमयूरयोः, मे. शिखण्डी तु मयूरे सन्नाद् बाणच्छत्रियभेदयोः। कलापे चाथ गुञ्जायां यूथिकायां शिखण्डिनी, वि. शिखण्डी कुक्कुटे चित्रमेखले बर्हिबर्हयोः। भीष्मारौ बाणे, हे. मयूरे भीष्मशत्रौ च शिखण्डी, त्रि.

शिखर. शिखरोऽस्त्री द्रुमाग्रादिन्यङ्गे पुलककक्षयोः। पक्वदाडिम-बीजाभमाणिक्यशकलाग्रयोः, मे. शिखरं शैलदृग्वाग्रकक्षापुलककोटिषु। पक्व-

दाड़िमबीजाभमाणिक्यशकलेऽपि च, वि, त्रि. शिखरं पुलकाग्रयोः। पक्व-दाड़िमबीजाभमाणिक्यशकलेऽपि च। वृक्षाग्रे पर्वताग्रे च, हे.

शिखरिणी. अथो शिखरिणी रसालावृत्तभेदयोः। नारीरत्ने मल्लिकायां रोमावल्यामपि स्त्रियाम्, मे. शिखरिणी स्त्राद् रोमाल्यां रसालावृत्त-भेदयोः। स्त्रीरत्ने मल्लिकायां च प्रोक्ता शिखरिणी बुधैः, वि. शिखरिणी वृत्तभेदे रोमालीपेयभेदयोः। स्त्रीरत्ने मल्लिकायां च, हे.

शिखरिन्. शिखरी स्त्रादपामार्गे शैलपादपयोः पुमान्, मे. शिखरी पादपे शैले तथाऽपामार्गकोट्टयोः, वि. शिखरी कोट्टकोयोष्यो द्रुमेऽपामार्ग-शैलयोः हे. तरुशैलौ शिखरिणौ, अ.

शिखा. शिखा शाखावर्हिचूड़ालाङ्गलिक्यग्रमात्रके। चूड़ामात्रे शिफायां च ज्वालायां प्रपदेऽपि च, मे. शिखाऽग्रमात्रे चूड़ायां केकिचूड़ाप्रधा-नयोः। ज्वालायां लाङ्गलिकायां शिफाशाखाष्टपिष्वपि, हे. शिखा शिफायां चूड़ायां ज्वालायामग्रमात्रके। लाङ्गलिक्यां च शाखायां चूड़ायां च शिख-ण्डिनः, वि. वृणिज्वाले अपि शिखे, अ. शिखा चूड़ाग्रयोरपि, त्रि.

शिखिन्. शिखी वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे। मयूरे कुक्कुटे पुंसि शिखावत्यन्यलिङ्गकः, मे. शिखी वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे। केकिकुक्कुटयोश्चापि शिखी चूड़ान्वितेऽन्यवत्, वि. शिखी त्वग्नौ वृक्षे केतु-ग्रहे शरे। चूडावति बलीवर्दे मयूरे कुक्कुटे हये, हे. शिखिनो वह्निवर्हिणौ, अ. चूड़ावान् कुक्कुटश्चापि शिखी, त्रि. शिखिनौ बर्हिपावकौ, अने.

शिग्रु. शिग्रु र्ना शाकमात्रे च शोभाञ्जनमहीरुहे, मे. शिग्रुः शोभाञ्जने शाके, वि, हे.

शिङ्घाण. शिङ्घाणं काचपात्रे च लोहनासिकयोर्मले, मे. सिंहाणं काचपात्रे च लोहनासिकयोर्मले, वि. सिंहाणं तु घ्राणमलेऽयःकिट्टे काच-भाजने, हे.

शित. शितं शान्तौ क्षामे तीक्ष्णे, हे. v. शात.

शिति. शिति र्भूर्जे ना सितासितयोस्त्रिषु, मे शितिः कृष्णे

शिति भूर्ज, वि. शिति भूर्ज सितेऽसिते, हे. शितौ धवलमेचकौ, अ शिति-भूर्जं सिते कृष्णे, लि.

शिपिविष्ट. शिपिविष्टस्तु खलतौ शिवे दुश्चर्मणि स्मृतः, मे, वि. शिपिविष्टस्तु खल्वाटे दुश्चर्मणि पिनाकिनि, हे. शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे, अ. दुश्चर्मण्यपि निर्दिष्टः शिपिविष्टो मनीषिभिः, रु.

शिफा. शिफा जटायां सरिति मांसिकायां च मातरि, मे, वि. शिफा मातरि मांस्यां च जटायां स्यात् सरित्यपि, हे. शिफा शेफालिका ज्ञेया शिफा शाखा शिफा जटा, अने.

शिर. शिरो ना पिप्पलीमूले स्याद् धमन्यां च योषिति, मे. V. सिर.

शिरस् शिरः प्रधाने सेनाग्रे शिखरे मस्तकेऽपि च, मे. शिरः प्रधाने सेनाग्रभागमस्तकयोरपि, वि. शिरो मूर्धप्रधानयोः। सेनाग्रभागे, हे.

शिल. शिलमुञ्छे समाद् गण्डूपद्यां शिलो मता। साम्यनीर्षि शिलाशिल्यौ शिला तु प्रस्तरे मता। तथा मनःशिलायां च द्वाराधःस्थि दारुणि, मे. शिला कुनट्यां दृषदि द्वाराधःस्थितदारुणि। शिलं शि भवेदुञ्छे गण्डूपद्यां यथाक्रमम्, वि. शिलमुञ्छः शिला द्वाराधोदारु कुन दृषत्। शिलो गण्डूपदी, हे.

शिलाटक. शिलाटकः पुमानट्टे विलेपे परिकीर्तितः, मे. शिलाट शिलाट्टयोः, वि, हे. शिलाटको विलेपेऽट्टे, लि.

शिलि. V. शिल

शिलीन्ध्र. शिलीन्ध्रं कदलीपुष्पे कवके ना झषान्तरे। द्रुभेदे तु विहगीभेदे गण्डूपदोऽम्बुदो, मे शिलीन्ध्रं कदलीपुष्पे कवकतिपुटाख्यये शिलीन्ध्रः कथितो धीरैस्तरुमीनप्रभेदयोः॥ गण्डूपदोऽम्बुदि प्रोक्ता शिलीः विहगीभिदि, वि शिलीन्ध्रस्तु तरुमीनप्रभेदयोः। शिलीन्ध्रं कदलीपुष्प कवकतिपुटाख्ययोः। शिलीन्ध्री विहगी गण्डूपदी स्मृतं, हे. छत्रके तृणशालौ च शिलीन्ध्रं कथ्यते बुधैः, रु.

शिलीमुख. शिलीमुखोऽलिकाण्डयोः, मे. शिलीमुखोऽलिवाणयोः, वि. शिलीमुखोऽलौ वाणे च, हे. अलिवाणौ शिलीमुखौ, अ. भृङ्गवाणौ शिलीमुखौ, अने.

शिल्प. शिल्पं स्रुवे क्रियायोगे, मे, वि. शिल्पं स्रुवे क्रियादिके, हे.

शिल्पिन्. शिल्पी तु वाचयवत् कारौ स्त्रियां कोलदलौषधौ, मे. शिल्पी स्याद् वाचयवत् कारौ नखिकायां च शिल्पिनी, वि.

शिव. शिवो मोक्षे महादेवे कीलकग्रहयोगयोः। वालुके गुग्गुलौ वेदे पुण्डरीकद्रुमे पुमान्॥ सुखक्षेमजले क्लीवं शिवा झाटामलौषधौ। अभयामलकीगौरीफेरुसक्तुफलासु च, मे. शिवं मोक्षे शुभे भद्रे सलिलेऽथो शिवो हरे। वेदे योगान्तरे कीले वालुके गुग्गुलेऽपि च। पुण्डरीकद्रुमे चापि शिवा झाटामलौषधौ। अभयाऽमलकीगौरीकोष्ट्रीसक्तुफलासु च, वि. शिवन्तु मोक्षे क्षेमे सुखे जले। शिवो योगान्तरे वेदे गुग्गुलौ वालुके हरे। पुण्डरीकद्रुमे कीले शिवा झाटामलोमयोः। फेरौ शस्यां पथ्याधात्र्योः, हे. शिवा गौरीफेरवयोः, अ. शिवं भद्रं शिवः शम्भुः शिवा गौरी शिवाऽभया। शिवः कीलः शिवः क्रोष्टा भवेदामलकी शिवा, अने.

शिवकीर्तन. शिवकीर्तनस्तु पुंसि भृङ्गरीटे मुरद्विषि, मे. शिवकीर्तननामाऽपि भृङ्गरीटे मुरद्विषि, वि.

शिवि. शिवि भूर्जे नृपे पुमान्, मे. शिवि भूर्जे नृपान्तरे, वि, हे.

शिशिर. शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिषु, मे. शिशिरः स्याद्दतौ भेदे तुषारे शीतलेऽन्यवत्, वि. शिशिरः शीतले हिमे। ऋतुभेदे, हे.

शिशुक. शिशुकः शिशुमारे स्याद् बालकोलूपिनोरपि, मे, वि. शिशुकः पादपे बाले शिशुमारे, हे. शिशुकः शिशुमारेऽपि, त्रि.

शिशुमार. शिशुमारोऽम्बुसम्भूजन्तौ ताराम्रकाशुनते, वि, मे.

शिष्ट. शिष्टः क्रोधे बलात्कृतौ, वि. र. सम.

शीकर. शीकरः श्वले वातस्तवाम्बुकणयोः पुमान्, मे. शीकरं श्वले वातस्तवाम्बुकणयो विंदुः, वि. अथ शीकरः। वातास्तजलेऽम्बुकणे, हे.

शीघ्र. शीघ्रं नलदे चक्राङ्गे क्लीवं द्रुतगतौ त्रिषु, मे. शीघ्रं द्रुतगतौ शीघ्रं चक्राङ्गोशीरयोरपि, वि. शीघ्रं चक्राङ्गतूर्णयोः। उशीरे, हे.

शीत. शीतं हिमगुणे क्लीवं शीतलालसयोस्त्रिषु। वानीरे बङ्कवारे ना, मे. शीतो हिमे च जिह्मे च वानीरबङ्कवारयोः। शीतं गुणे, हे. शीतस्तु वानीरबङ्कवारयोः। शीतं हिमगुणे प्रोक्तं वाच्यवच्छीतलेऽलसे, वि. वेतसेऽपि च शीतो ना, त्रि.

शीतक. शीतकं शीतकाले च सुस्थिते दीर्घसूत्रिणि, मे, वि. अथ शीतकः। शीतकालेऽलसे स्वस्थे, हे.

शीतचम्पक. शीतचम्पक इत्येष स्यादातर्पणदीपयोः, मे. शीतचम्पकशब्दोऽयं सत्रादातर्पणदीपयोः, वि. शीतचम्पकौ दीपतर्पणे, हे.

शीतमयूख. शीतमयूखश्चन्द्रे घनसारे चापि पुंलिङ्गः, मे. शीतमयूखोऽपि शशाङ्कघनसारयो', वि शीतमयूखः कर्पूरे चन्द्रे, हे.

शीतल. शीतलं पुष्पकाशीशे शैलजे मलयोद्भवे। पुमानासनपर्ण्यां स्यात् शिशिरे वाच्यलिङ्गकः, मे. शीतलं पुष्पकाशीशे शैलजे मलयोद्भवे। भवेदासनपर्ण्यां च शीतलः शिशिरेऽन्यवत्, वि. शीतलः शिशिरेऽर्हति। श्रीखण्डे पुष्पकाशीशतालपर्ण्योः शिलोद्भवे, हे. शीतलः शिशिरेऽनिले, त्रि.

शीतशिव अथ शीतशिवं क्लीवं शैलेयमणिमन्थयोः। पुंसि सक्तुफलाख्ये तथा मधुरिकौषधे, मे. विदुः शीतशिवं शस्यां शैलेयशतपुष्पयोः। सैन्धवेऽपि, वि.

शीन शीनो मूर्खे चाजगरे, मे. शीनोऽजगरमूर्खयोः, वि. शीनो मूर्खाजगरयोः, हे.

शीर्ण. शीर्णं तनुविशीर्णयोः, मे, वि.

शीर्षण्य. स्यात् शीर्षण्यन्तु शीर्षके। सुकेशे पुंसि, मे. शीर्षण्यमाङ्विंशदकेशशीर्षकयोरपि, वि. शीर्षण्यं शीर्षरक्षणे। शीर्षण्यो विशदे केशे, हे.

शील. शीलं स्वभावे सद्वृत्ते, मे, वि, अ. शीलं साधुवृत्तस्वभावयोः, हे.

शीवल. शीवलं स्याच्च शैवाले शैलेये च नपुंसकम्, मे. शीवलाख्या तु शैवाले शैलेयेऽपि च शीवलम्, वि.

शुक. शुको व्याससुते कीरे रावणस्य च मन्त्रिणि। शिरीषपादपे पुंसि ग्रन्थिपर्णे नपुंसकम्, मे. शुको व्यासजकीरयोः। रक्षोऽमात्ये शुकं ग्रन्थिपर्णे रेणुशिरीषयोः, हे. शुको व्याससुते कीरे रावणस्य च मन्त्रिणि। ग्रन्थिपर्णे शिरीषे च शुकं स्यात् शोणके क्वचित्, वि. शुकं ग्रन्थिशिरीषयोः। क्लीवं रावणपाले ना, त्रि.

शुक्त. शुक्तं पूताम्लनिष्ठुरे, मे. शुक्तमम्ले पूतीभूते च कर्कशे, हे. शुक्तोऽम्ले परुषे पूते, वि. द्वौ चाम्लपरुषौ शुक्तौ, अ. शुक्तं पूताम्लनिष्ठुरम्, त्रि.

शुक्ति. शुक्तिः कपालशकले शङ्खे शङ्खनखेऽपि च। नक्यश्वावर्तदुर्नामसुक्तास्फोटेषु च स्त्रियाम्, मे. शुक्तिः कपालशकले नक्यश्वावर्तयोरपि। मुक्तास्फोटे च दुर्नामशङ्खशङ्खनखेषु च, वि. शुक्तिः शङ्खनखे शङ्खे कपालखण्डहृद्रुजोः। नक्यश्वावर्तयो र्मुक्तास्फोटदुर्नामयोरपि, हे. शुक्तिर्मुक्तास्फोटाश्वलक्ष्मणोः, त्रि.

शुक्र. शुक्रः सम्राड्भार्गवे ज्यैष्ठमासे वैश्वानरे पुमान्। रेतोऽक्षिरुग्भिदोः क्लीवम्, मे. शुक्रः काव्येऽनले ज्यैष्ठे शुक्रो रेतोऽक्षिरोगयोः। शुक्रम्, वि. शुक्रस्तु शुक्रे ज्यैष्ठमासेऽग्निकाव्ययोः। शुक्रन्तु रेतोऽक्षिरुजोः, हे. शुक्रं रेतोऽक्षिरुक् शुक्रो ना काव्यज्यैष्ठवह्निषु, त्रि. शुक्रं देहवतां बीजं शुक्रमक्षिरुजं विदुः। ज्यैष्ठमासः स्मृतः शुक्रः शुक्रो दैत्यपुरोहितः, अने.

शुक्ल. शुक्लो योगान्तरे सिते। नपुंसकन्तु रजते, मे. शुक्लो योगान्तरे श्वेते शुक्लं च रजते मतम्, वि. शुक्लं रूप्ये शुक्लो योगे श्वेते, हे.

शुङ्ग. शुङ्गो वटाम्रातकयोः पर्कट्यामपि च स्त्रियाम्, मे. शुङ्गो वटाम्रातकयोः पर्कट्यामपि विश्रुता, वि. शुङ्गराम्राते वटे श्वे, हे.

शुचि. शुचि ग्रीष्माग्निश्टङ्गारेष्वाषाढ़े शुद्धमन्त्रिणि। जेष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु, मे. शुचिः शुद्धेऽनुपहतेश्टङ्गाराषाढ़योः सिते। ग्रीष्मे हुतवहेऽपि स्यादुपधाशुद्धमन्त्रिणि, वि. शुचिः शुद्धे सितेऽनले। ग्रीष्माषाढ़ाऽनुपहतेषूपधाशुद्धमन्त्रिणि। श्टङ्गारे, हे. पावके शुचिः। मासमात्रे चातुरपथे पुंसि मेध्ये सिते त्रिषु, ध. ग्रीष्मानलौ शुचौ, त्रि. मासत्राषाढ़े विशुद्धेऽग्नौ शुक्लेऽनुपहते शुचिः, अने. शुक्लेऽपि शुचिरामौ, ह.

शुण्ड. शुण्डा पानगृहे मता। आयम्बुहस्तिनीवेश्याहस्तिहस्तसुरासु च, मे. शुण्डाऽपि जलहस्तिन्यां मदिराकरिहस्तयोः। नलिन्यां वारयोषाय शुण्डस्तु मदनिर्झरे, वि. शुण्डा करिकरः सुरा। जलेभी नलिनी वारस्त्रीं शुण्डो मदनिर्झरे, हे. शुण्डा करिकरः सुरा, त्रि. कुञ्जरकरेऽपि शुण्डा, ह.

शुद्ध. शुद्धं स्यात् त्रिषु केवले। निर्दोषे च पवित्रे च, मे. शुद्धः केवलपूतयोः, हे. शुद्धं त्रिषु पूतकेवलयोः, त्रि.

शुद्धान्त. शुद्धान्तोऽन्तःपुरे स्यादृहःकक्षान्तरेऽपि च, मे. शुद्धान्तोऽन्तःपुरे राज्ञो रहःकक्षान्तरेऽपि च, वि. शुद्धान्तः स्याद्रहःकक्षान्तरे राज्ञोऽवरोधने, हे. कक्षान्तरेऽपि शुद्धान्तो नृपस्यासर्वगोचरे, अ.

शुभ. शुभो योगे शुभं क्षेमे वाच्यवत् क्षेमशालिनि। स्यच्छारिपुरे स्त्री तु, मे. शुभो योगे शुभं क्षेमे, वि, हे. शुभा सुधा शुभा सत्या स्नुहीचोरे शुभा मता। शुभं क्षेमं शुभा शोभा शुभा ख्याता हरीतकी, अने.

शुभ्र. शुभ्रं स्यादभ्रके क्लीवमुद्दीप्तशुक्लयोस्त्रिषु, मे. शुभ्रं मदीप्ते धवलेऽभ्रके च, वि. शुभ्रं दीप्तेऽभ्रके सिते, हे. शुभ्रमुद्दीप्तशुक्लयोः, अ.

शुभ्रदन्ती. शुभ्रदन्ती सुदन्तायां स्यात् पुष्पदन्तभयोषिति, मे, वि.

शुल्क शुल्कं घट्टादिदेये स्याद्वराद्र्थग्रहे स्त्रियाम्, मे. शुल्कं घट्टादिदातव्ये जामातुश्चापि बन्धके, हे. शुल्कं घट्टादिदेये स्याज्जामातुर्बन्धकेऽपि च, वि. शुल्को यौतुकदानयोः, त्रि. शुल्कं नारीधनेऽपि च, हा. पथिदेये स्त्रीधने च शुल्कं स्यात्, ह.

शुल्ल शुल्लं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ, मे, हे.

शुश्रूषा. शुश्रूषा स्त्रयादुपासने। कथने श्रोतुमिच्छायाम्, मे. शुश्रूषा श्रोतुमिच्छायां परिचर्याकथानयोः, वि. शुश्रूषोपासनाश्रवणेच्छयोः, हे. शुश्रूषा परिचर्या च, त्रि.

शुषि. शुषिः शोषे विले स्त्री स्त्रयात्, मे. शुषिः शोषे विलेऽपि च, वि. शुषिः शुषिरशोषयोः, हे.

शुषिर. शुषिरं वंशादिवाद्ये विवरेऽपि नपुंसकम्। मूषिके ना स्त्रियां नल्यौषधौ रन्ध्रान्विते त्रिषु, मे. शुषिरं विवरे वाद्ये सरन्ध्रे शुषिरोऽन्यवत्। शुषिरोऽग्नौ च, वि. शुषिरं वाद्यगर्तयोः। शुषिरोऽग्नौ सरन्ध्रे च, हे. शुषिरं गर्तवाद्ययोः, त्रि.

शुष्म. शुष्मं तेजसि सूर्ये ना, मे. शुष्मं तेजोऽर्कयोरुक्तम्, वि. शुष्ममोजसि सूर्ये च, हे.

शूक. शूकोऽस्त्री शुङ्गदययोः, मे. शूकोऽनुकोशशुङ्गयोः, वि. शूकोऽनुक्रोशकिंशार्वोः शोकेऽभिषवश्ङ्गयोः। शूका च रवे (?), हे. शूकस्तु सत्रादनुक्रोशशुङ्गयोः, त्रि.

शूकल. शूकलः प्रावटेऽपि स्त्रयाद् रसेऽपि परिकीर्तितः, मे. शूकलः प्रावटे रसे, वि, हे.

शून्य. शून्यं स्त्रयान् निर्जने वाच्यलिङ्गं नल्यां तु योषिति, मे. शून्याख्या निर्जने नल्याम्, वि. शून्यं विन्दौ च निर्जने। शून्या तु तूलिका, हे. स्त्री नल्यां निर्जने शून्यम्, त्रि.

शूर. शूरः स्त्रयाद् यादवे भटे, मे. शूरश्चारभटे सूर्ये, हे, वि.

शूल. शूलोऽस्त्री रोग आयुधे। क्रतुप्रकेतनयोगेषु शूला स्त्रयात् पण्ययोषिति, मे. शूलं प्रहरणे घट्यो केतने रोगयोगयोः। शूला दुष्टवधार्थाय कीलके पण्ययोषिति, वि. शूलं रुगस्त्रयोः। योगे शूला तु पण्यस्त्री वधहेतुश्च कीलकः, हे. अस्त्री शूलं रुगायुधम्, अ.

शृगाल. शृगालो वञ्चके दैत्यभेदे ना डमरे स्त्रियाम्, मे. शृगालो जम्बुके दैतेय शृगालीं डमरे विदुः, वि. शृगालो दानवे भेरौ शृगालो

स्यादुपप्लवे, हे. शृगालो जम्बुको भीरुः शृगालो दानवो मतः, अने.

शृगालजम्बू शृगालजम्बूः गोडिम्बे तथा घोण्टाफले स्त्रियाम्, मे. शृगालजम्बू गोडुम्बे क्वापि घोण्टाफलेऽपि च, वि. शृगालजम्बू गोडिम्बे फले च बदरीतरोः, हे.

शृगालिका. शृगालिका शिवायां स्यात् त्रासादपि पलायने, मे, वि.

शृङ्खल. शृङ्खला पुंस्कटीवस्त्रबन्धे च निगडे त्रिषु, मे. शृङ्खला पुंस्कटीवस्त्रबन्धेऽपि निगडेऽपि च, वि. शृङ्खलं पुंस्कटीकाञ्च्यां लोहरज्जौ च बन्धने, हे. निगडे पुंस्कटीमध्यवस्त्रे च शृङ्खलं त्रिषु, त्रि.

शृङ्ग. शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात् कूर्चशीर्षके। स्त्री विषायां स्वर्णमीनभेदयो र्ऋषभौषधौ, मे. शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्मृतः कूर्चशीर्षके। शृङ्गी विषायामृषभे स्वर्णमीनविशेषयोः, वि शृङ्गं चिह्नविषाणयोः। क्रीडाम्बुयन्त्रे शिखरे प्रभुत्वोत्कर्षसानुषु। शृङ्गः कूर्चशीर्षे शृङ्गी स्वर्णमीनविशेषयोः। विषायामृषभौषधाम्, हे. जलोत्सर्पे समुत्सर्गे शृङ्गमुत्कर्षचिह्नयोः, त्रि. शृङ्गं प्राधान्यसान्वोश्च, अ. शृङ्गं प्रधानमिच्छन्ति शृङ्गञ्च शिखरं विदुः। शृङ्गं विषाणमित्याहुः शब्दकोशविचक्षणाः, अने.

शृङ्गाटक. शृङ्गाटकं भवेद् द्वारि कण्टके च चतुष्पथे, मे, वि. शृङ्गाटकं पथां श्लेषे पानीयकण्टकेऽपि च, हे.

शृङ्गार शृङ्गारः सुरते नाट्यरसे च गजमण्डने। नपुंसकं लवङ्गेऽपि नागसम्भवचूर्णयोः, मे शृङ्गारः सुरते नाट्यरसेऽपि गजमण्डने। शृङ्गारं चूर्णे सिन्दूरलवङ्गकुसुमेषु च, वि. शृङ्गारो गजमण्डने। सुरते रसभेदे च शृङ्गारं नागसम्भवे। चूर्णे लवङ्गपुष्पे च, हे.

शृङ्गारिन् शृङ्गारी पूगगजयोः सशृङ्गारसुवेशयोः, मे. शृङ्गारी तु सुवेशे स्यात् क्रमुके च मतङ्गजे, वि. शृङ्गारी सुवेशे क्रमुके द्विपे, हे. शृङ्गारिणौ लिङ्गी। क्रमुकश्च सुवेशश्च, त्रि.

श्रृङ्गिन्. श्रृङ्गी श्रृङ्गयुते नागे द्रुमपर्वतयोरपि, मे. श्रृङ्गी नागद्रुमादिषु, वि.

शेष. शेषः संकर्षणे वधे। अनन्ते ना। प्रसादेन स्वनिर्माल्यार्पणे स्त्रियाम्। उपयुक्तेतरे न स्त्री, मे. शेषः संकर्षणेऽनन्त उपयुक्तेतरे वधे। प्रसादात् निजनिर्माल्यदाने शेषेति कीर्तिता, वि. शेषोऽनन्ते वधे शौरिण्युपयुक्तेतरेऽपि च। शेषा निर्माल्यदाने स्यात्, हे. शेषो नाऽनन्तसीरिणोः, उपयुक्तेतरे त्वस्त्री, त्रि.

शैल. शैलो भूभृति शैलं तु शैलेये तार्क्ष्यशैलके, मे, वि, हे.

शैलाट. शैलाटो देवले सिंहे शुक्लकाचकिरातयोः, मे, वि. शैलाटो देवले शुक्लकाचे सिंहकिरातयोः, हे.

शैलूष. शैलूषो नटविल्वयोः, मे, त्रि. शैलूषः कथितो नटविल्वयोः, वि. शैलूषः स्यात् नटे विल्वे, हे.

शैलेय. शैलेयं तालपर्ण्यां च सैन्धवे। शैलजे ना तु मधुपे शिलातुल्येऽन्यलिङ्गकम्, मे. शैलेयं सिन्धुलवणे तालपर्ण्यां च सिन्धुजे। चञ्चरीके तु शैलेयः, वि. शैलेयं शैलसम्भवे। सिन्धूत्थे तालपर्ण्यां च शैलेयस्तु मधुव्रते, हे.

शैवल. शैवलं पद्मकाष्ठे स्यात् शैवाले च पुमानयम्, मे. शैवलं पद्मकाष्ठे च शैवलं च जलाञ्चले, वि.

शोठ. शोठो मूर्खेऽलसेऽपि च, मे, वि शोठोऽलसे च मूर्खे च, त्रि.

शोण. शोणः कृशानौ श्योनाके लोहिताख्ये नदे पुमान्। त्रिषु कोकनदच्छाये, मे. शोणः शोणाकनदयोः शोणः कोकनदाकृतौ, वि. शोणो नदे रक्तवर्णे स्योनाकेऽग्नौ हयान्तरे, हे. शोणो नदेऽरुणे, त्रि. पद्मपद्मारुणौ शोणौ, अने.

शोभन. शोभनो योगभेदे ना सुन्दरे वाच्यलिङ्गकः, मे. शोभनो ग्रहयोगे स्यात् शोभनं सुन्दरेऽन्यवत्, वि. शोभनः सुन्दरे योगे, हे.

शोभा. शोभा कान्तीच्छयो मता, मे, हे. शोभा कान्तीच्छयोरुक्ता, वि.

शोष. शोषो यक्ष्मणि शोषणे, मे. शोषस्तु शोषणे राजयक्ष्मण्यपि निगद्यते, वि. शोष: शोषणयक्ष्मणो:, हे.

शौक. शौकं शुकगणे स्त्रीणां करणे, मे. शौकं शुकानां समूहे स्त्रीणां च करणान्तरे, हे. शौकं शुकसमूहे च स्त्रीणां च करणान्तरे, वि.

शौण्ड. शौण्डो मत्ते च विख्याते पिप्पल्यां च भवेत् स्त्रियाम्, मे. शौण्डो मत्ते च विख्याते शौण्डी पिप्पलिचव्ययो:, वि. ,शौण्डी चविकपिप्पल्यो: शौण्डो विख्यातमत्तयो:, हे.

शौर्य. शौर्यमारभटीशक्त्यो:, मे. शौर्यं चारभटीशक्त्यो:, वि. शौर्यं चारभट्यां बलेऽपि च, हे, शौर्यं चारभटी बलम्, त्रि.

शौष्कल. शौष्कल: शुष्कमांसस्य पणिके पिशिताशिनि, मे, वि, हे.

श्याम. श्यामो वटे प्रयागस्य वारिदे वृद्धदारके। पिके च कृष्णहरितो: पुंसि स्यात् तद्वति त्रिषु। मरिचे सिन्धुलवणे क्लीवं स्त्री शारिवौषधौ। अमृतास्नायां च प्रियङ्गावपि वागुजौ। यमुनायां त्रियामायां कृष्णत्रिवृतिकौषधौ। नीलिकायाम्, मे. श्याम: स्यान् मेचके वृद्धदारके हरिते घने। वटद्रुमे प्रयागस्य श्याम: श्यामा तु वल्गुली। अमृतास्नायां च तथा सोमलतौषधौ। त्रिवृताशारिवागुन्द्रानिशाकृष्णाप्रियङ्गुषु। श्यामा नील्यां पिके श्यामं मरीचे लवणान्तरे। श्यामो दमनके गन्धतृणे श्यामेऽभिधेयवत्, वि. श्यामोऽम्बुदे शितौ। हरिते प्रयागवटे कोकिले वृद्धदारके। श्यामं सैन्धवे मरिचे श्यामा सोमलतानिशो:। शारिवावागुजीगुन्द्रात्रिवृत्कृष्णाप्रियङ्गुषु। अमृतास्त्रियां, नील्याम्, हे. त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिवा निशा, अ. श्यामा गुन्द्रा कोकिला च, त्रि. श्यामा रात्रि ईषत् श्यामा श्यामा स्त्री मुग्धयौवना। श्यामा प्रियङ्गुराख्याता श्यामा सत्राद् वृद्धदारिका, धने.

श्यामल. श्यामल: पिप्पले कृष्णे, मे. श्यामलो मेचकेऽश्वत्थे, वि. श्यामल: पिप्पले श्यामे, हे.

श्येन. श्येनः पक्षिणि पाण्डुरे, मे. श्येनः सिते खगे, वि. श्येनः शुक्ले पतत्रिणि, हे. श्येनः शुक्ले पक्षिभेदे, त्रि.

श्रद्धा. श्रद्धादरे च काङ्क्षायाम्, मे. श्रद्धा आस्तिक्यकाङ्क्षयोः, वि. श्रद्धास्तिक्ये ऽभिलाषे च, हे. श्रद्धा संप्रत्ययः स्पृहा, अ.

श्रद्धालु. श्रद्धालु दौहृदिन्यां स्त्री श्रद्धायुक्ते तु वाच्यवत्, मे. श्रद्धालु-दौहृदिन्यां च श्रद्धायुक्ते तु वाच्यवत्, वि.

श्रम. श्रमः खेदः श्रमः क्रिया, अने.

श्रमण. श्रमणो यतिभेदे ना निन्द्यजीविनि तु त्रिषु। स्त्रियां सुदर्शनामांस्यो मुंडीरीशबरीभिदोः, मे. श्रमणो यतिभेदेऽपि श्रमणो निन्द्यजीविनि। सुदर्शना मुण्डितिकामांसीषु श्रमणां विदुः, वि. श्रमणस्तु निर्ग्रन्थे निन्द्यजीविनि, हे. श्रमणा भिक्षुक्यां मुण्डीर्यां च दृश्यते, त्रि.

श्रवण. श्रवणं च श्रुतौ कर्णे नक्षत्रे न नपुंसकम्, मे. श्रवणः स्याद् ऋक्षभेदे श्रवणं श्रुतिकर्णयोः, वि. श्रवणो नक्षत्रभेदे श्रवणं श्रवसि श्रुतौ, हे. कर्णे श्रुतौ च श्रवणम्, त्रि.

श्राण. श्राणं पक्वे यवाग्वां स्त्री, मे. श्राणा यवाग्वां पक्वे तु श्राणम्, वि. पक्वे श्राणं यवाग्वां स्त्री, त्रि.

श्राद्ध. श्राद्धं श्रद्धान्विते त्रिषु। हव्यकव्यविधौ क्लीबम्, मे. श्राद्धं श्रद्धासमन्विते। हव्यकव्यविधाने च, हे. श्राद्धं निवापे श्रद्धालौ, त्रि.

श्राम. अथ श्रामो मासे मण्डपकालयोः, मे. श्रामो मण्डप-कालयोः, हे, त्रि.

श्रावण. श्रावणो मासि पाषण्डे दृथाल्यां श्रावणा स्त्रियाम्, मे. श्रावणो मासि पाषण्डे दृथाल्यां श्रावणी मता, वि.

श्री. श्रीर्वेशरचनाशोभाभारतीसरलद्रुमे। लक्ष्म्यां त्रिवर्गसम्पत्ति-विधोपकरणेषु च। विभूतौ च मतौ च स्त्री, मे. श्रीर्वेशरचना-शोभाभारतीसरलद्रुमे। लक्ष्म्यां त्रिवर्गसम्पत्तौ वेषोपकरणे मता, वि. श्री-र्लक्ष्म्यां सरलद्रुमे। वेषोपकरणे वेषरचनायां मतौ गिरि। शोभाति-

वर्गसम्पत्तयोः, हे. श्री लक्ष्मीवेशसम्पत्सु भारतीशोभयोरपि, त्रि. V. विभ्रम.

श्रीकण्ठ. श्रीकण्ठो देशभिद्रुग्ये, मे. श्रीकण्ठः खण्डपरशौ श्रीकण्ठः कुरुजाङ्गले, वि. श्रीकण्ठः कुरुजाङ्गले। शङ्करे च, हे. श्रीकण्ठः स्थावरं स्थाणुः, अने.

श्रीपति. श्रीपतिः पुंसि पृथिवीनाथे च मधुसूदने, मे. श्रीपतिः क्ष्मापतौ हरौ, वि. श्रीपति विष्णुभूपयोः, हे.

श्रीपर्ण. श्रीपर्णी काश्मरीकुम्भ्योः क्लीवं पद्माग्निमन्थयोः, मे. श्रीपर्णमग्निमन्थेऽब्जे श्रीपर्णी शाल्मली द्रुते, वि, हे. श्रीपर्णं कमलेऽपि च, अ. श्रीपर्णं गणिकारिका। पद्मं च, त्रि.

श्रीफल. श्रीफलः पुंसि मालूरे धात्रीनीलिकयोः स्त्रियाम्, मे. श्रीफली नीलिकाधात्र्योर्मालूरे श्रीफलः स्मृतः, वि.

श्रीमत्. श्रीमांस्तिलकवृक्षे ना मनोज्ञे धनिके त्रिषु, मे. श्रीमांस्तिलकवृक्षे स्यान् मनोज्ञे धनिकेऽपि च, वि. श्रीमान् मनोज्ञ-तिलकपादपे धनवत्यपि, हे. श्रीमन्तौ तिलकेश्वरौ, त्रि.

श्रीवास. श्रीवासो वृकधूपेऽपि पङ्कजे मधुसूदने, मे. श्रीवासो वृकधूपे स्यात् पङ्कजे पीतवाससि, वि. श्रीवासः स्याद् वृकधूपे कमले मधुसूदने, हे. श्रीवासो विष्णुधूपयोः, त्रि.

श्रुत. श्रुतमाकर्णिते शास्त्रे, मे, हे. श्रुतं शास्त्रावधृतयोः, वि, अ.

श्रुति. श्रुतिः श्रोत्रे च तत्कर्मण्याम्नायवार्तयोः स्त्रियाम्, मे. श्रुतिः श्रोत्रे तथाम्नाये वार्तायां श्रोत्रकर्मणि, वि. श्रुतिराम्नायवार्तयोः। षड्जाद्यारम्भिकायां च कर्णाकर्णनयोरपि, हे. (वेदे श्रवसि च श्रुतिः, अ) वार्तायां श्रवणे श्रुतिः, त्रि.

श्रुतिकट. अथ श्रुतिकटः प्रायश्चित्तेऽहौ पापशोधने, मे. श्रुतिकटः प्रायलोहे प्रायश्चित्तभुजङ्गयोः, वि. प्रायलोहे श्रुतिकटः प्रायश्चित्तभुजङ्गयोः, त्रि श्रुतिकटः प्रायश्चित्ते प्रायलोहभुजङ्गयोः, हे. प्रायलोहे श्रुतिकटः प्रायश्चित्ते सरीसृपे, श.

श्रेणि(णी). श्रेणिः स्त्रीपुंसयोः पंक्तौ समानशिल्पिसंहतौ, मे. श्रेणिः पंक्तौ सेकपात्रे श्रेणिः स्त्रयात् कारुसंहतौ, वि. श्रेण्याल्यां कारुसंहतौ, हे. श्रेणिः पंक्तौ सेकपात्रे न क्लीवं कारुसंहतौ, त्रि.

श्रेयस्. श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत्। श्रेयसी करिपिप्पल्यामभयापाठयोरपि, मे. श्रेयस्तु मङ्गले धर्मे श्रेयान् शस्ते तु वाच्यवत्। श्रेयसी करिपिप्पल्यामभयारास्नयोरपि, वि. श्रेयस्तु मङ्गले धर्मप्रमायोः। श्रेयसी गजपिप्पल्यामभयारास्नयोरपि, हे.

श्रेष्ठ श्रेष्ठो वरे कुवेरे च, मे. श्रेष्ठोऽग्रे च धनदे, हे.

श्लाघा. श्लाघा स्त्रियां प्रशंसायां परिचर्याभिलाषयोः, मे, वि. श्लाघोऽपांस्तोच्छ्रयोः स्तोत्रे, हे.

श्लेष्मघना. श्लेष्मघना मल्लत्रां केतक्यामपि योषिति, मे. श्लेष्मघना मल्लिकायां केतक्यामपि कथ्यते, वि. श्लेष्मघना तु केतक्यां मल्लत्राम्, हे.

श्लेष्मघ्नी. श्लेष्मघ्नी मल्लिकायां च जत्रोतिष्मत्यां च योषिति, मे. श्लेष्मघ्नी कथिता मल्लत्रां कम्पिल्लकफणिज्जयोः, वि. श्लेष्मघ्नी स्यात् मल्लिकायां कम्पिल्लकफणिज्जयोः, हे.

श्लोक. श्लोकः पद्ये यशस्यपि, मे. श्लोकः पद्यबन्धे यशस्यपि, हे. श्लोको यशसि पद्ये च, वि. पद्ये यशसि च श्लोकः, अ.

श्वन्. श्वा पुमान् कुक्कुरे ख्यातः श्वानभेदे च वास्तुनः, मे.

श्वशुर. श्वशुरः पुंजेत्र स्त्री प्राज्ञ्राम्, मे.

श्वशुर्य. श्वशुर्यो देवरे श्याले, मे, वि, हे. श्वशुर्यौ देवरश्यालौ, अ. श्वशुर्यौ श्यालदेवरौ, र.

श्वःश्रेयस. श्वःश्रेयसं च कल्याणे परमात्मनि शर्मणि, मे श्वःश्रेयसं च भद्रे स्यात् परानन्दे च शर्मणि, वि. श्वःश्रेयसं सुखे। परानन्दे च भद्रे च, हे.

श्वसन. श्वसनं श्वसिते पुंसि मारुते मदनद्रुमे, मे. श्वसनो मारुते श्वासे श्वसनो मदनद्रुमे, वि श्वसनं श्वासे श्वसनः पवने मदनद्रुमे, हे.

श्वेत. श्वेतो द्वीपाद्रिभेदयोः। श्वेता वराटिकाकाष्ठपाटलाशङ्खिनीषु च। क्लीबं रूप्येऽन्यवत् शुक्ले, मे. श्वेतं रूप्ये श्वेतो द्वीपे वर्णे शैले कपर्दके। श्वेता तु शङ्खिनीकाष्ठपाटल्योः स्यात्, हे. श्वेतं रूप्येऽन्यवत् शुक्ले श्वेतो द्वीपाद्रिभेदयोः। श्वेता वराटिकाकाष्ठपाटलाशङ्खिनीषु च, वि. श्वेतं रूप्येऽपि, अ. श्वेतं रजतेऽपि, ह.

श्वेतधामन्. श्वेतधामा पुमानिन्दौ घनसाराब्धिफेनयोः, मे. श्वेतधामा कलानाथे घनसाराब्धिफेनयोः, वि. श्वेतधामा घनसारे कलानाथाब्धिफेनयोः, हे.

श्वेतवाहन. श्वेतवाहन इत्येष सुधाधाम्नि धनञ्जये, मे. श्वेतवाहन इत्याख्या सुधाधाम्नि धनञ्जये, वि. श्वेतवाहनः शशी। पार्थे, हे. पार्थेन्द्वोः श्वेतवाहनः, त्रि.

ष. षं कचे पुंसि विघ्ने च श्रेष्ठे स्यादभिधेयवत्, मे. इषः श्वेतेश्वरः पीतो मज्जा क्षुद् वामबाहुगः। षडाननः षडाकारः षकारः कीर्तितो बुधैः, मा. षः कीर्तितो बुधे श्रेष्ठे षश्च गम्भीरलोचने। उपसर्गे परोक्षे च षकारः परिकीर्तितः, ए.

षड. षडः पेयान्तरे भेदे, हे. षडः पेयान्तरे भिदि, वि. v. खड.

षड्ग्रन्थ. षड्ग्रन्था तु वचायां स्त्री स्यात् करञ्जान्तरे पुमान्, मे. षड्ग्रन्थाऽपि वचाशट्योः षड्ग्रन्थस्तु करञ्जके, वि. षड्ग्रन्थः करञ्जभेदे षड्ग्रन्था तु वचा शटी, हे. षड्ग्रन्थः करञ्जवचयोः, त्रि.

षड्बिन्दु. षड्बिन्दुः सम्राट् कीटभेदपुण्डरीकाक्षयोः पुमान्, मे.

षण्ड. षण्डं पद्मादिसंघाते न स्त्री सम्राड् गोपतौ पुमान्, मे. षण्डं पद्मादिसंघाते षण्डः सम्राड् गोपतावपि, वि. षण्डः कानन इष्टरे, हे. षण्डकञ्चुकिनौ षण्डौ, त्रि. (संघातेऽपि) षण्डश्च पादपानाम्, ह.

षण्डाली. षण्डाली तैलमाने च सरसीकामुकस्त्रियोः, मे. षण्डाली सरसीतैलमानयोः कामुकस्त्रियाम्, हे. षण्डाली तैलमाने सम्राट् सरसीकामुकस्त्रियोः, वि.

पण्ढ. पण्ढः सत्रात् पुंसि गोपतौ॥, आखण्डखण्डे वर्षवरे तृतीयप्रकृतावपि, मे. v. षण्ढः

पष्टिहायन. सत्रात् पष्टिहायनो धान्यविशेषे कुञ्जरे पुमान्, मे. सत्रात् पष्टिहायनो धान्यविशेषेऽपि मतङ्गजे, वि. धान्यभेदे पुमान् पष्टिहायनः कुञ्जरेऽपि च, त्रि.

षष्ठ. षष्ठी कात्यायनीतिथ्योस्त्रिषु, षण्णां च पूरणे, मे. षष्ठी षण्णां च पूरण्यां कात्यायन्यामपीष्यते, वि. षष्ठी गौरी षण्णां च पूरणी, हे.

स. भगः श्वेतस्तथा हंसो हृद्गो दक्षिणपादगः। समयः सामगः शुक्रं संगतिः सार्थकः शमी, मा. सः कोपे वरणे सः सत्रात् तथा त्रिलिङ्गि कीर्तितः। सा च लक्ष्मी बुधैः प्रोक्ता गौरी सा च स ईश्वरः, ए.

संयमन. संयमनी यमपुर्यां संयमनं बन्धने, व्रतेऽपि सत्रात्, मे. संयमनौ व्रते पुर्यां संयमनी यमसत्र च, वि. संयमनं व्रते बन्धे संयमनी यमसत्र पूः, हे.

संरूढ. संरूढः प्रौढे चाङ्कुरिते त्रिषु, मे. संरूढोऽङ्कुरिते प्रौढे, वि, हे.

संरोध. संरोधो रोधने क्षेपे, वि. संरोधः क्षेपरोधयोः, हे.

संवद(ण)न. सत्रात् संवदनमालोचे वशीकारे नपुंसकम्, मे. संवदनं समालोचे वशीकारे प्रकीर्तितम्, वि. संवदनन्तु संवादे समालोचे वशीकृतौ, हे.

संवर्त. संवर्तः प्रलये मुन्यन्तरे कर्षफलेऽपि च, मे. संवर्तः प्रलये प्रोक्तो विभीतकतरावपि, वि. संवर्तः प्रलयेऽब्द्रौ, हे. v. परिवर्त.

संवाहन. संवाहनं वाहने स्याद् भारादेरङ्गमर्दने, मे. संवाहनं वाहनेऽपि भारादेरङ्गमर्दने, वि. संवाहनं पुनः। वाहनेऽङ्गमर्दने च, हे.

संवित्ति. संवित्तिः प्रतिपत्तौ स्यादविवादे जनस्य च, मे, वि. संवित्तिः प्रतिपत्त्यविवादयोः, हे. सम्बन्धेऽपि च संवित्तिः, त्रि.

संविद्. संवित् स्त्रियां प्रतिज्ञायामाचारस्थानसङ्गरे। सम्भाषणे

क्रियाकारे सङ्केते नाम्नि तोषणे, मे. संविज्ज्ञाने प्रतिज्ञायां सङ्केताचार-नामसु। सम्भाषणे तोषणेऽपि क्रियाकारे च सङ्गरे, वि. संवित् सम्भाषणे ज्ञाने संयमे नाम्नि तोषणे। क्रियाकारे प्रतिज्ञायां सङ्केताचारयोरपि, हे. स्त्री संविज् ज्ञानसम्भाषक्रियाकाराजिनामसु, अ. संवित् सङ्केतकेऽपि स्यात्, त्रि.

संवेश. संवेशः स्वापस्त्रीरतबन्धयोः, मे. संवेशः शयने चासनेऽपि च, वि. संवेशः शयने पीठे, हे.

संव्यान. संव्यानं छादनेंऽशुके, मे, वि. संव्यानं छादने वस्त्रे, हे.

संसरण. अथ संसरणं क्लीवमसम्बाधचमूगतौ। घण्टापथे च संसारे रणारम्भे च कुत्रचित्, मे. संसरणं रणारम्भे पुरनिर्गमगोपुरे। घण्टापथे च संसारेऽप्यसम्बाधचमूगतौ, वि. संसरणं त्वसम्बाधचमूगतौ। संसारे च समारम्भे नगरस्योपनिर्गमे, हे. प्राग्दुत्वाद्रे संसरणमसम्बाधचमूगतौ। घण्टापथे, अ.

संसिद्धि. संसिद्धिः प्रकृतौ सिद्धौ मदोग्रायामपि स्त्रियाम्, मे. संसिद्धिः सहजे सिद्धौ मदोग्रायामपि स्मृता, वि. संसिद्धिः सम्यक्सिद्धि-स्वभावयोः, हे.

संहति. प्रवाहेऽपि च संहतिः, त्रि.

संसृष्ट. संसृष्टं त्रिषु सङ्गते संशुद्धे वमनादिना, मे. संसृष्टं तु सङ्गते स्यात्शुद्धे च वमनादिना, हे. संसृष्टं संगते विद्यात् संशुद्धे वमनादिना, वि.

संस्कार. संस्कारः प्रतियत्नेऽनुभवे मानसकर्मणि, मे. संस्कारः प्रतियत्ने स्यात् सङ्कल्पेऽनुभवेऽपि च, वि संस्कारः प्रतियत्नेऽनुभवे मानस-कर्मणि। गुणभेदे, हे.

संस्कृत. संस्कृतः कृत्रिमे शस्ते भूषितेऽप्यन्यलिङ्गकः। क्लीवन्तु लक्षणोपेते, मे. संस्कृतः कृत्रिमे शस्ते भूषिते भेद्यवन् मतः। संस्कृत. लक्ष-

णोपेते, वि. संस्कृतं लक्षणान्विते। भूषिते कृत्रिमे शस्ते, हे. अथ संस्कृतम्। कृत्रिमे लक्षणोपेते, श.

संस्तर. संस्तरः प्रस्तरे यज्ञे, मे. संस्तरप्रस्तरावेतौ प्रस्तराध्वरयरपि। मणिपाषाणयोश्चापि यथाक्रममुदीरितौ, वि. संस्तरः प्रस्तरेऽध्वरे, हे. संस्तरौ प्रस्तराध्वरौ, श. संस्तरः प्रस्तरेऽप्युक्तः, रु.

संस्त्राय. संस्त्रायः सन्निवेशे च संस्थाने विस्तृतावपि, मे, वि संस्त्रायो विस्तृतो गृहे। सन्निवेशे, हे. सङ्घाते सन्निवेशे च संस्त्रायः, श.

संस्थ. संस्थश्चरेऽवस्थिते स्त्री स्थितौ सादृश्यनाशयोः, मे. संस्था स्थितौ चरे नाशे व्यक्तिसादृश्ययोरपि, वि. संस्था नाशे व्यवस्थायां व्यक्तिसादृश्ययोः स्थितौ। क्रतुभेदे समाप्तौ च चरे च निजराष्ट्रके, हे. संस्थाऽधारे स्थितौ कृतौ, श. संस्था स्थितिविनाशयोः। संस्थासमाप्तिक्रतुषु, त्रि. व्यवस्थायाञ्च संस्था स्यात्, रु.

संस्थान. संस्थानमाकृतौ वृत्यौ सन्निवेशे चतुष्पथे, मे, वि. संस्थानं त्वाकृतौ वृतौ। चतुष्पथे सन्निवेशे, हे. अथ चतुष्पथे सन्निवेशे च संस्थानम्, श. संस्थानं वृत्तरूपयोः, त्रि.

संहत. संहतं सङ्गते दृढ़े, मे, वि. संहतं मिलिते दृढ़े, हे.

संहर्ष. संहर्षमाहुः स्पर्धायां प्रमोदेऽपि प्रभञ्जने, वि. संहर्षः पवने मुदि। स्पर्धायां च, हे. संहर्षस्तु पुमान् हृष्टौ स्पर्धायां च प्रभञ्जने, मे. संहर्षः स्पर्धने मुदि, त्रि.

संहिता. संहिता वर्णसंयोगे शास्त्रवेदैकदेशयोः, हे.

सकटाक्ष. सकटाक्षो बराक्षे ना कटाक्षसहिते त्रिषु, मे. सकटाक्षो धवद्रो स्यात् कटाक्षसहिते त्रिषु, वि. सकटाक्षस्तु कटाक्षिणि धवद्रुमे, हे.

सकृत्. सकृत् सहैकवारे स्यात्, मे, वि. सकृत् सहैकवारयोः, हे. सकृत् सहैकवारे च, श.

सकृत्प्रज. सकृत्प्रजो द्विके सिंहे, हे.

सखि. सखा मित्रे सहाये ना वयस्यायां सखी मता, मे. सखा

सहाये मिले च, हे. सखा मिले सहाये च, वि. सखा मित्रसहाययोः, त्रि.

सङ्कार. सङ्कारोऽग्निचटत्कारे सम्मार्जन्यवमुज्झिते। नवदूषितकन्यायां सङ्कारी पुनरुचत्रते, मे, वि. सङ्कारोऽवकरेऽग्निचटत्कृतौ। सङ्कारी भुक्तकन्यायाम्, हे. सङ्कारोऽग्निचटत्कारे सम्मार्जन्यपसारिते, त्रा.

सङ्काश. सङ्काशः सदृशेऽन्तिके, वि, हे.

सङ्कीर्ण. सङ्कीर्णं निचितेऽपि स्यादशुद्धे चापि भेद्यवत्, मे. सङ्कीर्णं निचिते प्रोक्तमशुद्धे चापि भेद्यवत्, वि. सङ्कीर्णौ निचिताशुद्धौ, हे, त्र.

सङ्कुल. सङ्कुलं त्रिषु विस्पष्टवाचि व्याप्ते, मे. सङ्कुलं वाच्यवद् व्याप्तेऽविस्पष्टार्थवचस्यपि, वि. सङ्कुलोऽस्पष्टवचने व्याप्ते च, हे.

सङ्कोच. सङ्कोचो मीनभेदे स्याद् बन्धे क्लीवन्तु कुङ्कुमे, मे. सङ्कोचमपि काश्मीरे सङ्कोचो मीनबन्धयोः, वि.

सङ्क्रम. सङ्क्रमः क्रमणे पुंसि न स्त्री स्याद् दुर्गसञ्चरे, मे. सङ्क्रमः क्रमणे सम्पद् वारिसञ्चारयन्त्रके, वि.

सङ्ख्य. सङ्ख्यं समिति सङ्ख्या स्यादेकत्वादिविचारयोः, मे, वि. सङ्ख्यमाहवे। सङ्ख्यैकादौ विचारे च, हे. एकत्वादौ विचारे च सङ्ख्या क्लीबे च संयुगे, त्रि.

सङ्ख्यावत्. सङ्ख्यावान् पण्डिते पुमान्। सङ्ख्यायुक्तोऽन्यलिङ्गः, मे. सङ्ख्यावान् पण्डिते मिते, वि. सङ्ख्यावान् मितसुधियोः, हे.

सङ्गति. सङ्गतिः सङ्गमे ज्ञाने (स्त्रियाम्), मे. सङ्गति ज्ञानसङ्गयोः, हे. संगतिः सङ्गमे ज्ञाने, वि.

सङ्गर. सङ्गरो युधि चापदि। क्रियाकारे विषे चाङ्गीकारे क्लीवं शमीफले, मे. सङ्गरोऽङ्गीकृतौ युधि। विषापदोः क्रियाकारे सङ्गरं तु शमीफले, वि. सङ्गरोऽङ्गीकृते युद्धे क्रियाकारे विषापदोः। सङ्गरन्तु फले शम्याः, हे. अथ प्रतिज्ञाजिसंविदापत्सु सङ्गरः, अ. प्रतिज्ञा सङ्गरो ज्ञेयः सङ्ग्रामः सङ्गरो मतः, अने.

सङ्ग्रह. सङ्ग्रहो दृढदुद्रङ्गे ग्रहसंक्षेपयोरपि, मे, हे. संक्षेपेऽपि सङ्ग्रहः स्यात्, त्रि. संग्रहो दृढदुद्रङ्गे मुष्टिसंक्षेपयोरपि, वि.

सङ्घाटिका. सङ्घाटिका स्त्रियां युग्मे कुट्टिन्यां जलकण्टके, मे. सङ्घाटिका तु युग्मे स्यात् कुट्टनीघ्राणयोरपि, वि. सङ्घाटिका तु कुट्टिन्यां घ्राणे युग्मेऽम्बुकण्टके, हे. सङ्घाटिकां विदु युग्मे कुट्टन्यां जलकण्टके, शा. युग्मे संघाटिका कुट्टन्यां च, त्रि.

सङ्घात. सङ्घातः पुंसि घाते च संहतौ नरकान्तरे, मे. सङ्घातः संहतौ घाते सङ्घातो नरकान्तरे, वि. सङ्घातो घातसङ्घयोः, हे. सङ्घातो नरके चये, त्रि.

सचिव. सचिवो मन्त्रिचेटयोः। सहाये, मे. सचिवः सहाये मन्त्रिणि स्मृतः, वि. सचिवः सहायेऽमात्ये, हे. मन्त्री सहायः सचिवौ, श.

सज्ज. अथ सज्जः स्यात् सन्नद्धे सम्भृते त्रिषु, मे. सज्जः स्यात् सन्नद्धे सम्भृतेऽपि च, वि. सज्जो [illegible] सन्नद्धसम्भृतौ सज्जौ, त्रि.

सज्जन. सज्जनन्तु भवेत् क्लीबमुपरक्षणघट्टयोः। वाच्यलिङ्गं कुलीने स्यात् कल्पनायान्तु योषिति, मे. सज्जनो वाच्यवत् साधौ सज्जनं घट्टगुल्मके। सज्जना कल्पनायान्तु, वि. सज्जनं घट्टगुल्मके। सज्जनस्तु कुलीने स्यात् सज्जनाऽपि च कल्पना, हे. ना साधौ सज्जनं क्लृप्तौ, त्रि.

सञ्चारिका. सञ्चारिका तु युगले कुट्टनीघ्राणयोरपि, मे.

संज्ञा. संज्ञा नामनि गायत्र्यां चेतनारवियोषितोः। अर्थस्य सूचनायाञ्च हस्ताद्यैरपि योषिति, मे. संज्ञा नामनि गायत्र्यां हस्ताद्यैरर्थसूचने। चेतनार्कस्त्रियोः, हे. संज्ञा नामनि गायत्र्यां चेतनायां रविस्त्रियाम्। अर्थसूचनिकायाञ्च हस्ताद्यैरपि कथ्यते, वि. संज्ञा चनाच्चेतना नाम हस्ताद्यैश्चार्थसूचना, च संज्ञा सूर्यप्रियायाञ्च, त्रि. संज्ञा चित्ताश्च नाम च, अने. संज्ञास्ते नामचेतने, अने. संकेते चैतन्ये सूरिभिः कथ्यते तथा संज्ञा, श

सटा. सटा जटाकेशरयोः, मे, वि, हे.

सत्. सत् साधौ धीरशस्तयोः। मान्ये सत्ये विद्यमाने त्रिषु साध्व्र-मयोः स्त्रियाम्, मे. सद् विद्यमाने सत्ये च प्रशस्तार्चितसाधुषु। सती पुनः कात्यायन्याञ्च साध्व्याञ्च, हे. सत् प्रशस्ते विद्यमाने सत्याभिहितसाधुषु। सती पतिव्रतागौर्योः, वि. सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्, श्र. साधुसत्ताप्रशस्तेषु श्रेष्ठे सदिति च ध्वनिः, श्रने. सती दाचायणी देवी सुचरित्राऽबला सती, श्रने. सती कात्यायनीसाध्व्रोः, त्रि.

सत्तम. सत्तमः सत्रात् पूज्यतमे साधीयस्युत्तमे त्रिषु, मे. सत्तम-श्चान्यवत् पूज्ये श्रेष्ठसाधीयसोरपि, वि. सत्तमः श्रेष्ठपूज्ययोः। साधिष्ठे, हे.

सत्य. सत्यं कृते च शपथे तथ्ये त्रिषु तु तद्वति, मे. सत्यश्च शपथे तथ्ये कृते तद्वति वाच्यवत्। तपोलोकात् परः सत्यः, वि. सत्यन्तु शपथे कृते। तथ्ये तद्वति सत्यस्तु लोकभित्, हे. सत्यं शपथतथ्ययोः, श्र.

सत्यम्. सत्यम् प्रश्नेऽभ्युपगमे, मे.

सत्यवत्. सत्यवती व्यासस्य मातरि। नारदर्चीकयोः पत्न्यां स्त्रियां पुंसि नृपान्तरे, मे.

सत्र. सत्रं यज्ञे सदादानाच्छादनारण्यकैतवे, मे. सत्रमाच्छादने यज्ञे सदादाने च कैतवे, वि. सत्रमाच्छादने क्रतौ। सदादाने वने दम्भे, हे. सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च, श्र. सत्रं सत्रात् कैतवे वने, त्रि. सत्रं गृहं वनं सत्रं सत्रं सच्चरितं मतम्। सत्रं नामायुधं प्रोक्तं सत्रं दानं समीरितम्, श्रने.

सत्व. सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः। श्रात्मत्वे व्यवसा-यासुचित्तेष्वस्त्री तु जन्तुषु, मे. सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः। श्रात्मत्वे व्यवसाये च चित्ते प्राणेषु जन्तुषु, वि सत्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः। पिशाचादावात्मभावे बले प्राणेषु जन्तुषु, हे. द्रव्या-सुव्यवसायेषु सत्वमस्त्री तु जन्तुषु, श्र. प्रकृतिगुणसत्तायां स्यात्रि भने च सत्वं सत्रात्, ए.

सदन. सदनं मन्दिरे तोये, मे. सदनं मन्दिरे जले, वि. सदनं जलसद्मनोः, हे. अङ्गसादेऽपि सदनम्, द्वा.

सदागति. सदागति र्नाऽर्कवातनिर्वाणेषु सदीश्वरे, मे. सदागतिः सम्रात् पवने निर्वाणे च सदीश्वरे, वि. सदागतिः सदीश्वरे। निर्वाणे पवमाने च, हे.

सदादान. सदादानोऽभ्रमातङ्गे हेरम्बे गन्धहस्तिनि, मे, वि. सदादानो गन्धगजे हेरम्बेऽभ्रमतङ्गजे, हे.

सदाफल. सदाफलः स्कन्धफले नारिकेलेऽप्युदुम्बरे, मे, वि. सदाफलमुदुम्बरे। नालिकेरे स्कन्धफले, हे.

सदृश. सदृशं समे। उचिते च, मे. सदृशं तूचिते समे, वि, त्रि.

सदेश. सदेशोऽभ्यर्णदेश्ययोः, वि.

सद्मन्. सद्म सम्रान् मन्दिरे नीरे, मे, वि.

सनातन. सनातनः शाश्वतेऽजे पितृतिथ्यन्तरे हरे, मे. सनातनः शाश्वतकंसवैरिणोः। स्थिरे पितॄणामतिथौ सुनिश्चले, वि. सनातनोऽच्युते। पितॄणामतिथौ रुद्रवेधसोः शाश्वते स्थिरे, हे. शाश्वताजौ सनातनौ, त्रि.

सनाभि. सनाभि र्ज्ञातितुल्ययोः, मे. सनाभिः सदृशे ज्ञातौ, वि. सनाभि र्ज्ञातिसदृशे, हे.

सनीड़. v. नीड़.

सन्तति. सन्ततिः सम्रात् पंक्तौ गोत्रे पारम्पर्ये पुत्रपौत्राणाम् (स्त्रियाम्), मे. सन्ततिः पंक्तिविस्तारगोत्रेषु कविभिः स्मृता। परम्पराभवेऽपि सम्रात् सन्ततिः पुत्रकन्ययोः, वि. सन्ततिस्तु तनये दुहितर्यपि। परम्पराभवे पंक्तौ गोत्रविस्तारयोरपि, हे.

सन्तान. सन्तानः सन्ततौ गोत्रे स्यादपत्ये सुरद्रुमे, वि, मे. सन्तानोऽपत्यगोत्रयोः। सन्ततौ देववृक्षेषु, हे. सन्तानः सन्ततौ देववृक्षे चापत्यगोत्रयोः, त्रि.

सन्तानिका. सन्तानिकाऽपि चौरादिसारे मर्कटजालके, मे, वि. सन्तानिका चौरसारे मर्कटस्य च जालके, हे. सन्तानिका चौरसरे तथा मर्कटजालके, हा.

सन्दंशिका. सन्दंशिकाऽपि सुचुटीलोहयन्त्रविशेषयोः, मे, वि.

सन्धा. सन्धा स्थितिप्रतिज्ञयोः, मे, हे. सन्धा स्थितौ प्रतिज्ञायाम्, वि. सन्धा प्रतिज्ञा मर्यादा, अ. सन्धा स्यादवधावपि, ह. सन्धाऽवधिप्रतिज्ञयोः, अने.

सन्धान. सन्धानं स्यादभिषवे तथा सङ्घटनेऽपि च, मे, वि. सन्धानन्तु सङ्घटितेऽभिषवे, हे.

सन्धि. सन्धिः पुमान् सुरुङ्गायां भगे सङ्घट्टनेऽपि च। रूपकाणां मुखाद्यङ्गे सावकाशेऽपि कीर्तितः, मे. सन्धि र्भेदे सुरुङ्गायां भगे सङ्घट्टनेऽपि च, वि. सन्धि र्योनौ सुरुङ्गायां नाट्याङ्गे श्लेषभेदयोः, हे. सन्धिः पुमान् सुरुङ्गायां भेदे सङ्घट्टने भगे, त्रि. सन्धिः संश्लेषसन्धानयोः, ह.

सन्धिनी. सन्धिनी वृषभाक्रान्ताकालदुग्धगोद्वयोः स्त्रियाम्, मे. सन्धिनी तु वृषाक्रान्ताकालदुग्धगवोः स्मृता, वि. सन्धिनी तु गौः। वृषाक्रान्ता कालदुग्धा, हे.

सन्धिला. सन्धिला तु सुरुङ्गायां नदीमन्दिरयोः स्त्रियाम्, मे. सन्धिला तु सुरुङ्गायां नदीमन्दिरयोरपि, वि. सन्धिलौकःसुरङ्गयोः। नद्याम्, हे.

सन्ध्या. सन्ध्या पितृप्रसूनदान्तरयो र्युगसन्धिषु, मे. सन्ध्या नदीकालभिदोश्चिन्तामर्यादयोरपि। प्रतिज्ञायां च सन्धाने सन्ध्या च कुसुमान्तरे, वि. सन्ध्या कालनदीभिदोः। चिन्तायां संश्रवे सीम्नि सन्धाने कुसुमान्तरे, हे.

सन्नति. सन्नतिः प्रणतौ ध्वनौ, मे, वि. सन्नतिः प्रणतिध्वन्योः, हे.

सन्नद्ध. सन्नद्धो वर्मिते व्यूढे, मे, हे. सन्नद्धो वर्मितव्यूढयोरपि, वि.

सन्नय. सन्नयः समवायेऽपि पृष्ठस्थायिबले पुमान्, मे. सन्नयः समवायेऽपि पृष्ठस्थायिबलेऽपि च, वि. सन्नयस्तु समवायानुसैन्ययोः, हे. पश्चाद्‌वस्थायिबलं समवायश्च सन्नयौ, श्र.

सन्निधि. सन्निधिः सन्निधानेऽपि पुमानिन्द्रियगोचरे, मे. सन्निधिः सन्निधानेऽपि भवेदिन्द्रियगोचरे, वि. सन्निधिरन्तिके। प्रत्यक्षे च, हे.

सप्तला. अथ सप्तला। नवमालीचर्मकषागुञ्जासु पाटलौ स्त्रियाम्, मे. सप्तला पाटलौ गुञ्जानवमालिकयोरपि। भवेच्चर्मकषायाञ्च, वि. सप्तला नवमालिका। सातला पाटला गुञ्जा, हे.

सप्तार्चिस् सप्तार्चिः पावके पुंसि क्रूरचक्षुषि च स्त्रियाम्, मे. सप्तार्चिः पावके प्रोक्तः सप्तार्चिः क्रूरलोचने, वि. सप्तार्चिः क्रूरनेत्रेऽग्नौ, हे.

सभा. सभा सामाजिके गोष्ठ्यां द्यूतमन्दिरयोरपि, मे. सभा सामाजिके द्यूते गोष्ठीमन्दिरयोरपि, वि. सभा द्यूतसमूहयोः। गोष्ठ्यां सभ्येषु शालायाम्, हे. सभा संसदि सभ्ये च, श्र.

सम्. सं तु शोभनार्यसमर्थयोः। सङ्गार्थे च प्रकृष्टार्थे, मे. सं सङ्गार्थे प्रकृष्टार्थे शोभनार्थसमर्थयोः, वि. सं सङ्गार्थे प्रकृष्टार्थे शोभनार्थसमुच्चये, हे.

सम. समा संवत्सरे स्त्रियाम्। सर्वसाधुसमानेषु समं स्यादभिधेयवत्, मे. समं साध्वखिलं सदृक्, हे. समा वर्षे समं तुल्ये साधौ च सदृशेऽन्यवत्, वि.

समज. समजः पशुवृन्दे ना विपिने तु नपुंसकम्, मे.

समभिहार भवेत् समभिहारस्तु पौनःपुन्यभृशार्थयो, मे. समभिहारो भृशत्वे पौनःपुन्येऽपि कथ्यते, वि. समभिहारस्त्वाभीक्ष्ण्ये भृशार्थे, हे.

समय. समयः शपथाचारसिद्धान्तेषु तथा धियि। क्रियाकारे च निर्देशे सङ्केते कालभाषयोः, मे. समयः शपथे भाषासम्पदोः कालसंविदोः। सिद्धान्ताचारसङ्केतनियमावसरेषु च। क्रियाकारे निर्देशे च, हे. समयाः शपथाचारकालसिद्धान्तसंविदः, श्र.

समया. समयाऽन्तिकमध्ययो:, मे, वि, अ. समया निकषा चान्तर्निकटे, हे.

समर. समरो युद्धसङ्घयो:, अने.

समर्थ. समर्थस्तु हिते शक्ते सम्बद्धेऽप्यन्यलिङ्गकम्, मे. समर्थोऽपि हिते शक्ते सम्बद्धार्थेऽपि सम्मत:, वि. समर्थ: शक्तिसम्पन्ने सम्बद्धार्थे हितेऽपि च, हे. समर्थस्त्रिषु शक्तिस्थे सम्बद्धार्थे हितेऽपि च, अ.

समर्याद. समर्याद: समीपे ना मर्यादासहिते त्रिषु, मे. समर्याद: समीपे स्यान् मर्यादासहितेऽपि च, वि. समर्यादं मर्यादासहितेऽपि च, हे. समर्यादोऽन्तिके स्थिरे, त्रि.

समाघात. समाघातो वधे युद्धे, मे, वि. समाघातस्त्वाहवे घातनेऽपि च, हे.

समादान. समादानं समीचीनग्रहणे सौगताह्निके, मे. समादानं समीचीनग्रहणे नित्यकर्मणि, वि, हे.

समाधि. समाधि र्ना समर्थने। ध्याननीवाकनियमे काव्यस्य च गुणान्तरे, मे. समाधि र्नियमे ध्याने नीवाके च समर्थने, वि. समाधि: स्यात् समर्थने। चित्तैकाग्रनियमयो र्मौने, हे. स्त्र: समर्थननीवाकनियमाश्च समाधय:, अ.

समान. समान: सत्समैकेषु त्रिषु ना नाभिमारुते, मे. समानं सत्समैकेषु समानो नाभिमारुते, वि. समानो देहमारुते। वर्णभित्सत्समैकेषु, हे. समाना: सत्समैके स्त्र:, अ. समानो देहवायौ च, त्रि.

समापन. समापनं परिच्छेदे समाप्तिवधयोरपि, मे. समापनम्। परिच्छेदे समाप्तौ च समाधाने समापणे, वि. समापनम्। परिच्छेदे समाधाने समाप्तिवधयोरपि, हे. मरणेऽपि समापनम्, त्रि.

समापन्न. समापन्नं समाप्ते स्यात् प्राप्ते क्लिष्टे वधेऽपि च, मे, वि. समापन्नं वधे क्लिष्टे समाप्तप्राप्तयोरपि, हे.

समाप्ति. समाप्तिरवसाने स्यात् समर्थने (स्त्रियाम्), मे. समाप्तिरवसाने स्यात् समाप्तिश्च समर्थने, वि.

समायोग. समायोगस्तु संयोगे समवाये प्रयोजने, मे, वि, हे.

समास. सत्रात् समासस्तु पुंलिङ्गः संक्षेपे च समर्थने, मे. समासस्तु सङ्क्षेपे च समर्थने, वि. समासः समर्थनायां सत्रात् संक्षेपैकपदयोः, हे.

समाहार. समाहारस्तु संक्षेपे एकत्वकरणेऽपि च, हे.

समाहित. समाहितः समाधिस्थेऽप्युक्तसिद्धान्त आहिते। निर्विवादीकृतेऽपि सत्रात् प्रतिज्ञाते च वाचस्रवत्, मे. समाहितः प्रतिज्ञाते समाधिस्थे यतात्मनि। वाचस्रवत् निहिते सिद्धे समाधाने समाहितम्, वि. समाहितः समाधिस्थे संश्रुते, हे.

समाह्वय. समाह्वयस्तु पशुभिः खगै र्द्यूते च सङ्गरे, मे. समाह्वयः सत्रात् संग्रामे द्यूते च पशुपक्षिभिः, वि. सत्रात् समाह्वय आहवे। पशुभिः पक्षिभि र्द्यूते, हे. संज्ञायाश्च समाह्वयः, रु.

समिति. समितिः सम्पराये सत्रात् सभायां सङ्गमेऽपि च (स्त्रियाम्), मे. समितिः सङ्गरे साम्ये सभायामपि सङ्गमे, वि. समिति र्युधि सङ्गमे। साम्ये सभायाम्, हे. अथ सङ्गरे। सङ्गे सभायां समितिः, धा. रणे सभायां समितिः, त्रि. सभा समितिरित्युक्ता समितिः संयुगाभिधा। समितिः समयो ज्ञेयः सङ्गमः समिति र्मतः, अने. समितिः सङ्गतिसमयोः, रु.

समीक्षा. समीक्षा तु स्त्रियां तत्त्वबुद्धावपि निभालने, मे. समीक्षा ग्रन्थभेदे स्यात् तत्त्वबुद्धौ निभालने, वि. समीक्षा तु ग्रन्थभेदे समीक्षणे, हे.

समीरण. समीरणः सत्रात् पवने पथिके च फणिज्झके, मे, वि. समीरणः फणिज्झके। पान्थे वायौ, हे.

समुच्छ्रय. समुच्छ्रयः पुमान् विरोधोत्सेधयोः, मे. समुच्छ्रयः समुत्सेधे विरोधेऽपि समुच्छ्रयः, वि. समुच्छ्रयो वैरोन्नत्योः, हे. विरोधेऽपि समुच्छ्रयः, त्रा.

समुत्थान. समुत्थानं समुद्योगे व्याधीनां निर्णयेऽपि च, मे. समुत्थानमुद्यमे रोगनिर्णये, वि. समुत्थानं निदानेऽभियोगे, हे.

समुदय. भवेत् समुदयः सङ्घे संयुगे च समुद्गमे, मे. स्मृतः समुदयो द्वन्द्वे संयुगे समुपक्रमे, वि

समुदाय. समुदायः समूहे स्याद् युद्धे, मे. समुदायो गणे युधि, वि. समुदायो गणे रणे। समुदायस्तूद्गमेऽपि, हे.

समुद्धत. समुद्धतं समुत्कीर्णेऽप्यविनीते च वाच्यवत्, मे. समुद्धतः समुद्गीर्णेऽप्यविनीते समुद्धतः, वि. समुद्धतः। अविनीते समुद्गीर्णे, हे.

समुद्रनवनीत. समुद्रनवनीतं सग्रात् क्लीवं पीयूषचन्द्रयोः, मे. समुद्रनवनीताख्या पीयूषामृतरोचिषोः, वि.

समुद्रान्ता. समुद्रान्ता तु कार्पासीदृक्कादुरालभासु च, मे, वि. समुद्रान्ता दुरालभा। कार्पासिका च स्पृक्का च, हे.

समुद्रार. समुद्रारः पुमान् ग्राहे सेतुबन्धे तिमिङ्गिले, मे. समुद्रारः स्मृतो ग्राहे सेतुबन्धे तिमिङ्गिले, वि. समुद्रार ग्राहभेदे सेतुबन्धे तिमिङ्गिले, हे.

समुन्नद्ध. समुन्नद्धः समुद्भूते पण्डितंमन्यगर्विते, मे. समुन्नद्धः समुद्भूते पण्डितंमन्यदृप्तयोः, वि. समुन्नद्धस्तूर्ध्वबद्धे पण्डितंमन्य-दृप्तयोः, हे. समुन्नद्धौ पण्डितंमन्यगर्वितौ, अ.

समूढ़. समूढ़ पुञ्जिते भुग्ने सद्योजातेऽनुपप्लुते, मे, वि. समूढः पुञ्जिते सद्योजाते भुग्नेऽनुपप्लवे, हे. समूढः पुञ्जिते नवे। भुग्नेऽनुपप्लुते-ऽप्येष वाच्यलिङ्ग उदीर्यते, लि.

सम्पद्. सम्पद् भूतौ गुणोत्कर्षे हारभेदेऽपि दृश्यते, वि. सम्पद् भूतौ गुणोत्कर्षे हारभेदेऽपि च स्त्रियाम्, मे. सम्पद् वृद्धौ गुणोत्कर्षे हारे, हे.

सम्पन्न. सम्पन्नं साधितेऽपि सग्रात् सम्पत्तिसहिते त्रिषु, मे. सम्पन्नं साधिते प्रोक्तं सम्पत्तिसहितेऽन्यवत्, वि.

सम्पराय. सम्परायः समीके स्यादापदुत्तरकालयोः, मे, वि. सम्परायस्तु संयुगे। आपदुत्तरकाले च, हे. प्रयापदि युद्धायत्योः सम्परायः, अ.

सम्पर्क. सम्पर्को मेलके रतौ, मे. सम्पर्कः सुरते एकौ, वि, हे.

सम्पाक. सम्पाकस्तर्कके छटे लिपु ना चतुरङ्गुले, मे, वि. v. शम्पाक.

संप्रयोग. संप्रयोगो रतेऽपि स्यादन्वितौ कार्मणेऽपि च, मे. संप्रयोगं रते विद्यादन्वितौ कार्मणेऽपि च, वि. संप्रयोगो निधुवने सम्बन्धे कार्मणेऽपि च, हे.

संप्रयोगिन्. संप्रयोगी कलाकेलौ कामुके संप्रयोजके, मे. संप्रयोगी कलाकेलौ कामुके सुप्रयोजके, वि. संप्रयोगी तु कामुके। कलाकेलौ सुप्रयोगे, हे.

संप्रहार. संप्रहारो गतौ युद्धे, मे. संप्रहारो रणे गतौ, वि. संप्रहारो गतौ रणे, हे.

सम्बर. सम्बरो दैत्यहरिणमत्स्यशैलजिनान्तरे। नपुंसकन्तु सलिलबौद्धव्रतविशेषयोः, मे. मृगपर्वतदैत्येषु निकृष्टेऽपि च सम्बर, धने. v. शम्बर.

सम्बल. v. शम्बल.

सम्बाध. सम्बाधः सङ्कटे भगे, मे, वि. सम्बाधः सङ्कटे योनौ, हे. सम्बाधः सङ्कटे भगेऽप्युक्तः, च.

सम्बाधन. सम्बाधनं द्वाःसदने शूलाग्रद्वारपालयोः, मे.

सम्बोध. सम्बोधो बोधने घेसे, मे.

सम्भव. सम्भवो हेतावुत्पत्तौ मेलकेऽपि च। आधारानतिरिक्तत्वेऽप्याधेयस्य निगद्यते, मे. सम्भवः कथितो हेतावुत्पत्तौ मेलकेऽपि च। आधारानतिरिक्तत्व आधेयस्य च सम्भवः, वि. सम्भवः कारणे जनौ। आधेयस्य चाधारानतिरिक्तत्वे जिनेऽपि च, हे. आधेयधारणे सत्वे मेलकेऽपि च सम्भवः, ति.

सम्भार. सम्भारः सम्भृतौ सङ्घे, मे. सम्भारः सम्भृतौ गणे, वि, हे.

सम्भेद. सम्भेदः स्फुटने सङ्गे, मे. सम्भेदः स्फुटने सिन्धुसङ्गमे, वि.

सम्भोग. सम्भोगस्तु पुमान् भोगे सुरते जिनशासने, मे. सम्भोगो

भोगरतयोः भुशुण्डायाम्, हे. सम्भोगः सुरते भोगे सम्भोगो जिनशासने, वि. सम्भोगो रतभोगयोः, त्रि. रतिभुक्तयोः सम्भोगः, ह.

संभ्रम. संभ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि, वि, मे. संभ्रमो भीतौ संवेगादरयोरपि, हे. संभ्रमौ साध्वसादरौ, त्रि.

सम्मति. अथ सम्मतिः। अभिलाषेऽप्यनुज्ञायां संवित्त्याद्यासु योषिति, मे. सम्मतिः स्यादनुज्ञानेऽप्यभिलाषेऽपि सम्मतिः, वि. सम्मतिर्वाञ्छानुमत्योः, हे.

संमूर्छन. संमूर्छनमभिव्याप्तावुच्छ्रायमोहयोरपि, मे. संमूर्छनमभिव्याप्तौ संमूर्छामोहयोरपि, वि. संमूर्छनमभिव्याप्तौ मोहे, हे.

सम्यच्(ञ्). सम्यग् दृढप्रशंसयोः, मे. सम्यग् बाढप्रशंसयोः, वि. सम्यग् वादे स्तुतावपि, हे. सम्यक् सम्राट् वाच्यलिङ्गन्तु मनोज्ञे सङ्गतेऽपि च, मे. सम्यक् सम्मतछद्मयोः, वि.

सर. सरो दध्यग्रगत्यो र्ना, मे. सरो दध्यग्रवाणयोः, वि. सरौ दध्यग्रसायकौ, हे. v. शर.

सरक. सरकोऽस्त्री सीधुपाने शीधुपात्रेक्षुसीधुनोः। अच्छिन्नाध्वगपंक्तौ च, मे. सरकः सीधुभाजने। अच्छिन्नाध्वगपंक्तौ च सीधुपाने च सीधुनि, वि. सरको मदिरापात्रे मदिरापानमद्ययोः, हे. शीधौ च शीधुपाने च सरकोऽस्त्री, त्रि.

सरणि. सरणिः पंक्तौ मार्गे च, मे. सरणिः पंक्तिवर्त्मनोः, वि. सरणिः श्रेणिमार्गयोः, हे.

सरण्यु. सरण्युस्तु पुमान् वारिवाहे स्यान् मातरिश्वनि, मे. v. शरण्यु.

सरमा. सरमा कुक्कुरीदेवशुन्योः स्याद् राक्षसीभिदि, मे.

सरल. सरलः पूतिकाष्ठे नाऽथोदारावक्रयोस्त्रिषु, मे. सरलः पूतिकाष्ठे स्यादुदारावक्रयोरपि, वि. सरलस्तृणौ। उदारे पूतिकाष्ठे च, हे. चरणौ दधे च सरलः, त्रि. v. मोच.

सरस्. सरसी विस्तकासारे सरो नीरतड़ागयो:, मे. सरस्तोय-तड़ागयो:, वि. सरो नीरतड़ागयो:, त्रि.

सरस्वत्. सरस्वांश्च नदे चाब्धौ नान्यवद् रसिके स्त्रियाम्। वाणी-स्त्रीरत्नवाग्देवीगोनदीषु नदीभिदि। मनुपत्न्यामपि, मे. सरस्वती सरिद्भेदे गोवाग्देवतयो र्गिरि। स्त्रीरत्ने चापगायाञ्च सरस्वान् सिन्धु-केऽम्बुधौ, वि. सरस्वानुदधौ नदे सरस्वती सरिद्भिदि। वाचप्रायगायां स्त्रीरत्ने गोवाग्देवतयोरपि, हे. सरस्वन्तौ नदार्णवौ, श्र. अयो वचः। सरस्वती सरिद् गौश्च, त्रि.

सरोजिनी. सरोजिनी तु कमलाकरे पद्मे च योषिति, मे. सरो-जिनी स्मृतात् कासारे पद्मिनीपद्मयोस्तथा, वि. सरोजिनी सरोरुहे। सरो-रुहिण्यां कासारे, हे.

सर्ग. सर्गस्तु निश्चयाध्यायमोक्षोत्साहात्मसृष्टिषु, मे, वि. सर्ग-स्त्यागस्वभावयो:। उत्साहे निश्चयेऽध्याये मोहानुमतिसृष्टिषु, हे.

सर्जरस. अथ सर्जरसो वाद्यभाण्डभेदे च धूपके, मे. वीणाभेदे सर्ज-रसो धूपकेऽपि, त्रि. V. सर्वरस.

सर्जू. सर्जूर्वणिजि विद्युति (स्त्रियाम्), मे. सर्जूर्वणिजि विद्युति, वि.

सर्वंसह. सर्वंसहः सहिष्णौ स्यात् सर्वंसहा पुनः क्षितौ, हे.

सर्वग. सर्वगं सलिले क्लीवं सर्वगः शङ्करे विभौ, मे. सर्वगं जले। सर्वगस्तु विभौ रुद्रे, हे. सर्वगं सलिले ख्यातं सर्वगः शङ्करे विभौ, वि.

सर्वज्ञ. सर्वज्ञः शिवबुद्धयो:, मे. सर्वज्ञः शङ्करे बुद्धे, वि. सर्वज्ञस्तु जिनेन्द्रे स्यात् सुगते शङ्करेऽपि च, हे. सर्वज्ञः शङ्करे जिने, त्रि.

सर्वतोभद्र. सर्वतोभद्र इतुरकः काव्यचित्रे गृहान्तरे। निम्बे ना सर्वतोभद्रा गम्भारीनटयोषितो:, मे. सर्वतोभद्रश्लोकभिद्काव्य-चित्रयो:। निम्बेऽथ सर्वतोभद्रा गम्भार्यां नटयोषिति, हे. सर्वतोभद्र

इसुत्रकः कार्य्यचिते गृहान्तरे। निम्बेऽपि सर्वतोभद्रा गम्भारीनट-योषितोः, वि.

सर्वतोमुख. सर्वतोमुख उग्रे च चेतन्नब्रह्मणोः पुमान्। नपुंसकन्तु पानीये सुरवत्मन्यपि स्मृतम्, मे. अथ सर्वतोमुखः। विधावात्मनि भट्टे च सर्वतोमुखमम्बु, खम्, हे. सर्वतोमुखमाख्यातमन्तरिचे च पायसि। विधिघेतन्नरुद्रेषु कथितः सर्वतोमुख., वि.

सर्वथा. सर्वथा हेतुवाढ़योः, मे, वि.

सर्वरस. सर्वरसः स्मृतो वाद्यभाण्डभेदे च धूणके,, वि. सर्वरसस्तु धूणके। वाद्यभेदे, हे. V. सर्जरस.

सर्वसन्नाह. सर्वात्मनि सर्वसन्नाहः, ह.

सर्वौघ. सर्वौघो गुरुवेगे च सर्वसन्नहने पुमान्, मे. सर्वौघो गुरुवेगार्थसर्वसन्नहनार्थयोः, वि.

सव. सवो यज्ञे च सन्धाने, मे. सवः सन्धानयज्ञयोः, वि.

सवन. सवनन्त्वध्वरे स्नाने सोमनिर्दलनेऽपि च, मे. सवनं यज्ञियस्नाने सोमनिर्दलनेऽपि च, वि. सवनं स्नानयागयोः। सोमनिर्दलने चापि, हे. क्रतौ स्नाने च सवनम्, त्रि.

सव्य. सव्यं वामे प्रतीपे स्यात्, मे. सव्यं तु दक्षिणे। वामे च प्रतिकूले च, हे. सव्यं वामप्रतीपयोः, वि.

सस्यक. सस्यको मणिभेदेऽस्त्री, मे. सस्यकः स्यान् मणौ खड्गे नारिकेलस्य चान्तरे, वि. सस्यको नालिकेरान्तःसस्याभमणिखड्गयोः, हे. मणौ खड्गे च सस्यकः, त्रि.

सह. सहो बले न स्त्रियां स्यात् स्त्रियान्तु नखभेषजे। दण्डोत्पलामुद्गपर्णीकुमारीष्टयिवीषु च, मे. सहः क्षेमे बलेऽपि च। सहोर्व्यां सहदेवायां कुमार्य्यां नखभेषजे। मुद्गपर्ण्यांश्च, हे. सहो बले सहा मुद्गपर्ण्याञ्च नखभेषजे। सहदेवाकुमार्योश्च सहः क्षान्तो सहा भुवि, वि. सह साकल्य दृश्यते। विद्यमाने च साहाय्ययौगपद्यसमृद्धिषु। सम्बन्धे

च, मे. सह सम्बन्धसादृश्ययौगपद्यसमृद्धिषु। साकल्ये विद्यमाने च, हे. सह साकल्यसादृश्ययौगपद्यसमृद्धिषु।. विद्यमाने च सम्बन्धे सहशब्दः प्रकीर्तितः, वि.

सहचर. भवेत् सहचरो झिण्ट्यां द्वयोरनुचरे त्रिषु, मे. भवेत् सहचरो झिण्ट्यां वयस्ये प्रतिबन्धके, वि. सहचरः पुन र्झिण्ट्यां वयस्ये प्रतिबन्धके, हे.

सहज. सहजस्तु निसर्गे ना सहोत्थे पुनरन्यवत्, मे. सहजस्तु निसर्गे स्यात् सहोत्थे पुनरन्यवत्, वि. सहजः सहसम्भवे। निसर्गे च, हे. निसर्गे सहजः पुंसि सहोत्थे वाच्यलिङ्गकः, त्रि.

सहदेव. सहदेवा वलादण्डोत्पलयोः सारिवौषधौ। सहदेवी तु सर्पाक्ष्यां पुंसि स्यात् पाण्डवे पुनः, मे. सहदेवा बलादण्डोत्पलासारिवभेषजे। सहदेवी तु सर्पाक्ष्यां सहदेवश्च पाण्डवे, वि. सहदेवस्तु पाण्डवे। सहदेवा बलादण्डोत्पलयोः शारिवौषधे। सहदेवी तु सर्पाक्ष्याम्, हे.

सहस्. सहो बले ज्योतिषि च पुंसि हेमन्तमार्गयोः, मे. सहो बले ज्योतिषि मार्गशीर्षहेमन्तयोश्चापि सहाः प्रदिष्टः, वि. सहो बले ज्योतिषि च सहा हेमन्तमासयोः, हे. सहो बलं सहा मार्गः, अ.

सहसा. आकस्मिकार्थे सहसा तत्काले च निगद्यते, रु.

सहस्रपाद्. सहस्रपाद्: कारण्डे मार्तण्डे यज्ञपूरुषे, मे, वि. सहस्रपादो यज्ञपूरुषे। कारण्डसूर्ययोः, हे.

सहस्रवेधिन्. सहस्रवेधि क्लीबं स्यात्द् रामठे नाऽम्लवेतसे, मे. सहस्रवेधी स्यादम्लवेतसे रामठेऽपि च,वि. सहस्रवेधी चुके सहस्रवेधि तु हिङ्गौ, हे.

सह्य. सह्यः शैलान्तरे पुमान्। सोढव्ये वाच्यलिङ्गः स्यादारोग्ये तु नपुंसकम्, मे. सह्यं शैलान्तरारोग्यसोढव्येषु प्रचक्षते, वि. सह्यमारोग्ये सोढव्ये शैले, हे. ना शैले सह्यमारोग्यम्, त्रि.

साक्षात्. साक्षात् प्रत्यक्षतुल्ययोः, मे, वि, हे, अ. प्रत्यक्षसदृशोः साक्षात्, रु

साति. साति दानेऽवसाने स्त्री, मे. साति दानेऽवसाने च, वि. साति दानावसानयोः, हे, अ.

सादिन्. सादी तुरङ्गमातङ्गरथारोहेषु दृश्यते, मे. सादी तुरङ्गमारोहे निषादिरथिनोरपि, हे. अथ सादिनौ द्वौ सारथिहयारोहौ, अ. सादी तुरङ्गमातङ्गरथारोहेषु कथ्यते, वि.

साधन. साधनं मृतसंस्कारे सैन्ये सिद्धे वधे गतौ। निर्वर्तनोपायमेढ्रे दापनेऽनुगमे धने, मे. साधनं निर्वृतौ मेढ्रे सैन्ये सिद्धे वधे गतौ। उपाये मृतसंस्कारे दापनेऽनुगमे धने, वि. साधनं सिद्धिसैन्ययोः। उपायेऽनुगमे मेढ्रे निवृत्तौ कारके वधे। दापने मृतसंस्कारे प्रमाणे गमने धने, हे. मारणे मृतसंस्कारे गतौ द्रव्येऽर्थदापने। निर्वर्तनोपकरणानुव्रज्यासु च साधनम्, अ. साधनं सिद्धमेढ्रयोः, त्रि. उपकरणे करणे च द्रविणे लिङ्गे च यातनायाञ्च। सेनाङ्गे संसिद्धौ साधनशब्दप्रयोगः स्यात्, रु.

साधिष्ठ. साधिष्ठोऽतिदृढार्थयोः, मे, वि. अथ साधिष्ठोऽत्यार्य्ये दृढतमेऽपि च, हे.

साधीयस्. साधीयानतिबाढे स्यादतिसाधौ च वाच्यवत्, मे. साधीयानतिबाढे स्यादतिसाधौ तु वाच्यवत्, वि. साधीयानतिशोभने। अतिबाढे, हे. (अतिशये) साधीयान् साधुबाढयोः, अ.

साधु. साधु वार्धुषिके चारौ सज्जने चाभिधेयवत्, मे, वि. साधुर्जिने मुनौ वार्धुषिके सज्जनरम्ययोः, हे. साधू रम्येऽपि च त्रिषु, अ. त्रिषु साधु र्धनिन्यपि, त्रि.

साध्य. साध्यो योगान्तरे स्मरे। गणदेवविशेषे च साधनीये तु वाच्यवत्, मे. साध्याभिख्या साधनीये गणदैवतयोगयोः, वि. साध्यो योगे साधनीये गणदैवतभिदपि, हे. साध्या देवाः फले साध्यम्, त्रि.

सानु. सानुरस्त्री वने प्रस्थे वात्यामार्गाग्रकोविदे, मे. सानुः स्नुङ्गे बुधे मार्गे वात्यायां पल्लवे वने, वि.

सान्त्व. सान्त्वं दाक्षिण्यसामनोः, मे. सान्त्वं सामनि दाक्षिण्ये, वि, हे.

सान्द्र. सान्द्रं वने घने स्ट्दौ, मे. सान्द्रो घनकाननयो र्म्ट दौ, वि.

सामज. समाजस्तु गजे पुंसि सामोत्थे पुनरन्यवत्, मे. सामजस्तु गजे प्रोक्तः सामोत्थे पुनरन्यवत्, वि. सामजस्तु सामोत्थे कुञ्जरेऽपि च, हे. सामजः कुञ्जरो ज्ञेयः सामजः सामजो मतः, अने.

सामन्. साम क्लीवमुपायस्य भेदे वेदान्तरेऽपि च, मे.

सामयोनि. सामयोनिस्तु सामोत्थे ब्रह्मकुञ्जरयोरपि, मे. सामयोनिस्तु सामोत्थे सामयोनि गजे विधौ, वि. सामयोनिस्तु सामोत्थे द्रुहिणे गजे, हे.

सामर्थ्य. सामर्थ्य योग्यतायां स्यात् शक्तावपि नपुंसकम्, मे. सामर्थ्य योग्यताशक्तौ, वि. सामर्थ्य योग्यताशक्त्योः, हे.

सामि. सामि निन्दार्धयो र्मतम्, मे, वि. सामि त्वर्धे जुगुप्सिते, अ.

सामिधेनी. सामिधेनी तु धाय्यायां समिध्यपि च योषिति, मे. सामिधेनी ऋचि प्रोक्ता सामिधेनी समिध्यपि, वि. सामिधेनी समिदृचोः, हे.

सामुद्र. सामुद्रं देहलक्षणे। समुद्रजेऽन्यलिङ्गः, मे. सामुद्रं देहलक्षणे। सामुद्रश्च समुद्रीयलवणादिषु भेद्यवत्, वि. सामुद्रं लवणान्तरे। लक्षणे च शरीरस्य, हे.

साम्प्रतम्. साम्प्रतञ्चाधुनार्थे स्यादुचितार्थे च दृश्यते, मे. साम्प्रतञ्चाधुनार्थे स्याद् युक्तार्थेऽपि च साम्प्रतम्, वि. साम्प्रतं त्वचितेऽधुना, हे. युक्तार्थे साधनार्थे च साम्प्रतं तद्विदो विदुः, त्रि. वर्तमाने च युक्ते च साम्प्रतं संप्रचक्षते, रु.

साय. सायः काण्डे दिनान्ते च, मे. सायः काण्डापराह्णयोः, वि. सायः शरेऽपराह्णे च, हे.

सायक. सायकः शरखड्गयोः, मे, वि. सायकः खड्गबाणयोः, हे. शरे खड्गे च सायकः, ध. सायकौ बाणमार्गणौ, श.

सार. सारो बले स्थिरांशे च मज्ज्ञि पुंसि जले धने। न्याय्ये च क्लीवं त्रिषु वरे, मे. सारो बले मज्जनि च स्थिरांशे न्याय्ये च नीरे च धने च सारम्। वरेऽन्यवत् सारमुदाहरन्ति, वि. सारो मज्जस्थिरांशयोः।

बले श्रेष्ठे च सारन्तु द्रविणन्यायत्रवारिषु, हे. सारो बले स्थिरांशे च न्यायेत्र क्लीवं वरे त्रिषु, श्र. श्रेष्ठे स्वाम्नि धने शुक्रे मज्ञि सार उदाहृतः, इं.

सारङ्ग. सारङ्गः पुंसि हरिणे चातके च मतङ्गजे। शवले त्रिषु, मे. सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे। पक्षिभेदे च सारङ्गः सारङ्गः शवलेऽन्यवत्, वि. सारङ्गो विहगान्तरे। चातके चञ्चरीके च द्विपेणशवलेषु च, हे. चातके हरिणे पुंसि सारङ्गः शवले त्रिषु, श्र. सारङ्गश्चातके ख्यातः सारङ्गः कुञ्जरो मतः। सारङ्गो भ्रमरो ज्ञेयः सारङ्गो हरिणो मतः, श्रने.

सारण. सारणो राक्षसान्तरे। रुग्भेदे ना प्रसारण्यां स्वल्पनद्याञ्च सारणी, मे. सारणी स्वल्पसरिति प्रसारण्याञ्च सारणी। सारणः स्यादतीसारे सचिवे रावणस्य च, वि. सारणः स्यादतीसारे दशकन्धरमन्त्रिणि, हे.

सारस. सारसः पक्षिभेदेन्द्वोः क्लीवन्तु सरसीरुहे, मे. सारसः पक्षिभेदे स्यात् सारसं सरसीरुहे, वि. सारसं सरसीरुहि। सारसः पुष्कराख्येन्द्वोः, हे. श्रथ सारसम्। पद्मे ना पक्षिणीन्द्वौ च, त्रि.

सारसन सारसनमधुरस्त्रे तनुत्राणां मेखलायाञ्च, मे. सारसनं मेखलायामुरस्त्रे च तनुत्राणाम्, वि. सारसनमुरश्छदे। काञ्च्याञ्च, हे.

सार्थ. सार्थो वणिक्समूहे स्यादपि सङ्घातमात्रके, मे, वि. सार्थो वणिग्गणे द्वन्द्वे धनेन सहितेऽपि च, हे.

सार्वभौम. सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपतावपि, मे, वि सार्वभौमस्तु दिग्गजे चक्रवर्तिनि, हे. सार्वभौमो गजे राज्ञि, त्रि.

साल. सालः पादपमात्रे स्यात् प्राकारे सर्जपादपे, मे. सालः पादपमात्रे स्यात् प्राकारे शङ्कुकद्रुमे, वि. सालः सर्जतरौ वृक्षमात्रप्राकारयोरपि, हे. सालो वरणसर्जयोः, त्रि. सालः प्राकारवृक्षयोः, श्रने.

सालसार. सालसारसरौ हिङ्गौ, हे. v. शालसार.

सावन. सावनो यज्ञकर्मान्ते यजमानप्रचेतसोः, मे. त्रि. हे.

सावित्र. सावित्रः शङ्करे वसौ। सावित्री सत्यवत्पत्न्यां ब्रह्मपत्नुग्रमयोरपि, मे. सावित्रः शङ्करे प्रोक्तः सावित्री देवतान्तरे, वि. सावित्रस्तु महेश्वरः। सावित्री देवताभेदे, हे.

साहस. साहसन्तु वलात्कारकृतकार्ये दमेऽपि च, मे, वि. साहसन्तु दमे दुष्कृतकर्मणि। अविमृश्यकृतौ धार्ष्ट्ये, हे.

सिंह. सिंहः कण्ठीरवे राशौ सत्तमे चोत्तरस्थितः। सिंही तु कण्टकार्यां स्याद् वार्ताकौ वासकेऽपि च, मे. सिंहः कण्ठीरवे राशौ सत्तमे चोत्तरस्थितः। सिंही क्षुद्राहत्योः स्याद् वासके राहुमातरि, वि. सिंहस्तु राशिभेदे मृगाधिपे। श्रेष्ठे स्यादुत्तरस्थश्च सिंही स्वर्भानुमातरि। वासाबृहत्योः क्षुद्रायाम्, हे. सिंह्यौ वार्ताकुवासकौ। राशिभेदे हरौ सिंहः श्रेष्ठार्थे चोत्तरे स्थितः, त्रि

सिंहाण. V शिङ्घाण.

सिकता. सितका स्त्री सिकतिले वालुकायान्तु भूमनि, मे. सिकता वालुकायां स्त्रः सिकताऽप्यामयान्तरे। सिकतान्वितदेशे च शर्करायाञ्च कीर्तिता, वि. सिकताः स्त्र वालुकायां सिकता सैकते रुजि, हे. सिकताः स्त्र वालुकापि, अ.

सिक्थ. सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्, मे, त्रि. सिक्थं नील्यां मधूच्छिष्टे सिक्थो भक्तपुलाकके, हे. सिक्थं नील्यां मधूच्छिष्टे सिक्थ ओदनसम्भवे, वि.

सित. सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्री, मे. सितस्त्ववसिते बद्धे वर्णे सिता तु शर्करा, हे सितः समाप्ते धवले निबद्धज्ञातयोरपि, वि. बद्धार्जुनौ सितौ, अ. शर्करापि सिता, त्रि. सितो बद्धः सितः शुक्ल. सितं रजतमुच्यते। सायकोऽपि सितो ज्ञेयः सितो दैत्यपुरोहितः, अने

सिद्ध. सिद्धो ना व्यासादौ भेदे योगस्य देवयोनेश्च। त्रिषु निष्पन्ने, मे. सिद्धो व्यासादिषु व्यासः सिद्धाः स्त्र देवयोनिषु। नित्ये प्रसिद्धे निष्पन्ने,

वि. सिद्धो व्यासादिके देवयोनौ निष्पन्नमुक्तयोः। नित्ये प्रसिद्धे, हे. सिद्धस्तु नित्यनिष्पन्नदादिषु, त्रि.

सिद्धरस. सिद्धरसो रसे पुंसि व्याडिमम्रतिषु त्रिषु, मे. सिद्धरसो रसे व्याडिमधतिषु च दृश्यते, वि.

सिद्धार्थ. सिद्धार्थस्तु पुमान् शाक्यसिंहे च सितसर्षपे, मे. सिद्धार्थः शाक्यसिंहे स्यात् सिद्धार्थः सितसर्षपे, वि. सिद्धार्थः सर्षपे शाक्यसिंहेऽपि जिननप्तरि, हे. सिद्धार्थः सर्षपे इन्द्रे, त्रि.

सिद्धि. सिद्धिः स्त्री योगनिष्पत्तिपादुकान्तर्धिवृद्धिषु, मे. सिद्धिर्निष्पत्तियोगयोः, वि. सिद्धिस्तु मोक्षे निष्पत्तियोगयोः, हे.

सिध्मल. सिध्मला मत्स्यविकृतौ वाच्यवत् तु किलासिनि, मे. सिध्मलः किलासी सिध्मला मत्स्यचूर्णके, हे. सिध्मला मत्स्यचूर्णे स्यात् सिध्मलश्च किलासिनि, वि. सिध्मला शुष्कमीने स्त्री त्रिलिङ्गस्तु किलासिनि, त्रि.

सिनीवाली. सिनीवाली तु दृष्टेन्दुकलामादुर्गयोः स्त्रियाम्, मे.

सिन्दूर. सिन्दूरस्तरुभेदे स्यात् सिन्दूरं रक्तचूर्णके। सिन्दूरी रोचनीरक्तचेलिकाधातकीषु च, मे, वि. सिन्दूरं नागसम्भवे। सिन्दूरस्तु वृक्षभेदे सिन्दूरी रक्तचेलिका। रोचनी धातकी, हे.

सिन्दूरतिलक. सिन्दूरतिलक उक्तो मतङ्गजे स्त्री तु कामिन्याम्, मे. सिन्दूरतिलको नागे सिन्दूरतिलका स्त्रियाम्, वि. सिन्दूरतिलको हस्ती सिन्दूरतिलकाऽङ्गना, हे.

सिन्धु. सिन्धुर्वमथुदेशाब्धिनदे ना सरिति स्त्रियाम्, मे. सिन्धुः समुद्रे नद्याश्च नदे देशेभदानयोः, वि. सिन्धुर्नदी गजमदेऽब्धौ देशनदभेदयोः, हे. देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्, श सरित्समुद्रयोः सिन्धुः, अने सिन्धुः समुद्रनद्योः, ह.

सिप्र सिप्रो निदाघसलिले सिप्रा तु सरिदन्तरे, मे. सिप्रः स्वेदे सिप्रा नद्याम्, हे.

सिर. सिरा नाड्यम्बुवाहिनी। सिरस्तु पिप्पलीमूलम्, हे. V. शिर.

सीता. सीता लाङ्गलपद्धतिर्वैदेहीस्वर्गगङ्गासु, मे. सीता जनकजा-गङ्गाभेदयोर्हलपद्धतौ, हे. सीता रामकलत्रे स्यात् तथा लाङ्गलपद्धतौ। नभोनद्याञ्च, वि. सीता लाङ्गलरेखा स्यात् व्योमगङ्गा च जानकी, त्रि. सीता लक्ष्मीरुमा सीता सीता सस्याधिदेवता। सीता सीरध्वजापत्यं सीता मन्दाकिनी मता, अने.

सीमन्. सीमा घाटस्थितिक्षेत्रेष्वण्डकोषेऽपि च स्त्रियाम्, मे. सीमा वाटे स्थितौ क्षेत्रे, त्रि.

सीमा. सीमा घाटस्थितिक्षेत्रेष्वण्डकोषेऽपि च स्त्रियाम्, मे. सीमा घाटे स्थितौ क्षेत्रे मर्यादावेलयोरपि, वि. सीमा घाटे स्थितौ क्षेत्रे, हे.

सीर. सीरोऽर्कहलयोः पुंसि, मे. सीरस्तिग्मकरे हले, वि. सीरः स्यादंशुमालिनि। लाङ्गले, हे. हलतिग्मकरौ सीरौ, त्रि.

सु. सु पूजायां भृशार्थानुमतिकृच्छ्रसमृद्धिषु, वि, मे.

सुकर्मन्. सुकर्मा तु पुमान् योगभेदे स्यात् देवशिल्पिनि,मे. सुकर्मा ग्रहयोगे स्यात् सुकर्मा देवशिल्पिनि, वि. सुकर्मा योगभेदे स्यात् सुक्रिये देवशिल्पिनि, हे.

सुकुमार. सुकुमारो म्रदौ त्रिषु। पुंसि पुण्ड्राभिधानेक्षौ, मे. सुकुमारश्च पुण्ड्रेक्षौ कोमले त्वभिधेयवत्, वि. सुकुमारश्च कोमले। पुण्ड्रेक्षौ, हे.

सुकृत. सुकृतन्तु शुभे पुण्ये क्लीवं सुविहिते त्रिषु, मे. सुकृतन्तु शुभे पुण्ये सुविधाने च वाच्यवत्, वि. सुकृतन्तु शुभे पुण्ये सुविधाने, हे.

सुख. सुखं शर्मणि नाके च सुखा पुर्यां प्रचेतसः, मे, वि. सुखं त्रिदिवशर्मणोः। सुखा प्रचेतसः पुर्याम्, हे.

सुखाश. सुखाशो वरुणे राजतिनिशे सुखभोजने, मे. सुखाशो राज-तिनिशे शोभनाशप्रचेतसोः, वि. सुखाशस्तु प्रचेतसि। शुभाशे राज-तिनिशे, हे

सुगन्धि. सुगन्धिः सत्राद्दिष्टगन्धे त्रिषु क्लीवन्तु बालुके, मे. सुगन्धिः सत्राद्दिष्टगन्धे सुगन्धि ह्रिवालुके, वि.

सुगम. सुगमः कोमले काव्ये, अने.

सुग्रीव. सुग्रीवो वासुदेवस्य हये शाखाहृगेश्वरे, मे. सुग्रीवः शोभनग्रीवे सुग्रीवो वानराधिपे, वि.

सुत. सुतस्तु पार्थिवे पुत्रे स्त्र्यपत्ये तु सुता स्मृता, मे. सुतः पार्थिवपुत्रयोः, वि. सुतः पुत्रे नृपे, हे. पार्थिवे तनये सुतः, अ.

सुतल. सुतलोऽट्टालिकाबन्धनागलोकप्रभेदयोः, मे. सुतलप्रतलौ चेति पातालभुवनद्वये। सत्रातामट्टालिकाबन्धे तताङ्गुलिकरे क्रमात्, वि. सुतलोऽट्टालिकाबन्धे पातालभुवनान्तरे, हे.

सुदर्शन. सुदर्शनो हरेश्चक्रे मेरुजम्बूद्रुमे पुमान्। न द्वयोः शक्रनगरे भ्राह्मोषधिभिदोः स्त्रियाम्, मे. सुदर्शनो हरेश्चक्रेऽमरावत्यां सुदर्शना। भ्राह्मायामोषधीभेदे मेरुजम्ब्वां सुदर्शना, वि. सुदर्शनः। विष्णोश्चक्रे सुदर्शन्यमरावत्यां सुदर्शना। भ्राह्मायामौषधीभेदे मेरुजम्ब्वां सुराभिदि, हे.

सुदामन् सुदामा तु पुमान् वारिधरपर्वतभेदयोः, मे. सुदामा भूधरे मेघे, वि. सुदामा पर्वते मेघे, हे.

सुधन्वन् सुधन्वा मौढ़धानुष्के त्रिषु ना विश्वकर्मणि, मे सुधन्वा मैढ़धानुष्के सुधन्वा विश्वकर्मणि, वि सुधन्वा त्वष्टृधन्विनोः, हे.

सुधा. सुधा स्त्री लेपने मूर्वास्नुह्योगङ्गेष्टिकामृते, मे. सुधाऽमृते स्नुहीमूर्वालेपगाङ्गेष्टिकासु च, वि. सुधा गङ्गेष्टिकास्नुह्यो मूर्वालेपामृतेषु च, हे. सुधा लेपोऽमृतं स्नुही, अ सुधा प्रासादभाग् द्रव्यं सुधा विद्युत् सुधाऽमृतम्। सुधैकभोजनं ज्ञेयं सुधा धात्री सुधा स्नुही, अने.

सुधासूति. सुधासूतिः पुमान् मखे। चन्द्रे, मे. सुधासूति मखे विधौ, वि.

सुनन्दा. सुनन्दा रोचनोमयोः, मे. सुनन्दा रोचनानार्योः, वि. सुनन्दा रोचनाऽङ्गना। जमनीवाङ्कवलिनोः, हे

सुनार. सुनारस्तु शुनीस्तन्ये सर्पाण्डकलविङ्कयोः, मे, वि. सुनारस्तु शुनीस्तन्ये सर्पाण्डे चटकेऽपि च, हे.

सुनीति. सुनीतिः शोभननये ध्रुवमातरि योषिति, मे. सुनीतिः शोभननये सुनीति ध्रुवमातरि, वि. सुनीति ध्रुवमाता स्यात् सुनयोऽपि, हे.

सुन्दर. सुन्दरी तरुभिन्नारीभिदोः स्त्री रुचिरेऽन्यवत्, मे. सुन्दरी स्त्रीतरुभिदोः, वि. सुन्दर्यङ्गनायां द्रुमान्तरे, हे.

सुपर्ण. सुपर्णः स्वर्णचूड़े च गरुड़े कृतमालके। सुपर्णी कमलिन्याञ्च वैनतेयस्य मातरि, मे. सुपर्णस्ताम्रचूड़े स्यात् गरुड़े कृतमालके। सुपर्णी कमलिन्याञ्च सुपर्णी तार्क्ष्यमातरि, वि. सुपर्णः कृतमालके। गरुड़े स्वर्णचूड़े च सुपर्णी विनताऽब्जिनी, हे.

सुपर्वन्. सुपर्वा ना शरे वंशे पर्वधूमसुरेषु च, मे. सुपर्वा त्रिदशे वंशे शरे धूमेऽपि पर्वणि, वि. सुपर्वा पर्वणि शरे त्रिदशे वंशधूमयोः, हे. धूमवंशशराऽमर्त्याः सुपर्वाणः प्रकीर्तिताः, त्रि.

सुप्ति. सुप्तिः स्पर्शाज्ञतानिद्राविश्रम्भे शयने स्त्रियाम्, मे. सुप्तिः स्पर्शाज्ञतायाञ्च स्वापे विश्रम्भवार्त्तिनि, वि. सुप्तिः स्वापे स्पर्शाज्ञतारुजि, हे.

सुप्रतीक. सुप्रतीकः शोभनाङ्गे भवेदीशानदिग्गजे, मे, वि. सुप्रतीकः स्यादीशानदिग्गजे शोभनाङ्गके, हे.

सुभाषित. सुभाषितो बुद्धे पुमान् सूक्ते नपुंसकम्, मे.

सुमनस्. सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोः, मे, त्रि. सुमनाः पुष्पमालत्योस्त्रिदशे कोविदेऽपि च, वि. सुमनाः प्राज्ञदेवयोः। जात्यां पुष्पे, हे. ज्ञेयाः सुमनसो देवाः कुसुमानि च सज्जनाः, धने.

सुमुख. सुमुखस्तार्क्ष्यतनये सूरिनागप्रभेदयोः, मे. सुमुखस्तार्क्ष्य-तनये फणिभेदे च पण्डिते, वि. सुमुखो गरुड़ात्मजे। पण्डिते फणिभेदे स्यात्, हे. सुमुखस्तार्क्ष्यपुत्रे, त्रि.

सुमेधस्. सुमेधास्तु स्त्रियां ज्योतिष्मत्यां त्रिषु सुबुद्धिनि, मे. सुमेधास्तु सुबुद्धौ स्यात् ज्योतिष्मत्यामपीष्यते, वि. सुमेधास्तु ज्योतिष्मत्यां विदुष्यपि, हे.

सुयामुन. सुयामुनो वत्सराजे प्रासादेऽद्र्यन्तरेऽच्युते, मे, वि. सुयामुनो जनार्दने। वत्सराजे प्रासादेऽद्रिभेदे, हे.

सुर. सुरा चषकमद्ययोः। पुंलिङ्गस्त्रिदिवेशे स्यात्, मे. सुरो देवे सुरा मद्ये चषकेऽपि सुरा क्वचित्, वि. सुरो देवे सुरा चषकमद्ययोः, हे.

सुरत. सुरतं स्यान् निधुवने देवत्वे सुरता स्मृता, मे. सुरतं स्यान् निधुवने देवत्वे सुरता मता, वि.

सुरतताली. भवेत् सुरतताली तु दूतिकायां शिरःस्रजि, मे, वि. सुरतताली शिरःस्रग्दूत्योः, हे.

सुरभि. सुरभिः शल्लकीमातृभिन्मुरागोषु योषिति। चम्पके च वसन्ते च तथा जातीफले पुमान्। स्वर्णे गन्धोपले क्लीवं सुगन्धिकान्तयोस्त्रिषु। विख्याते सचिवे धीरे चैत्रेऽपि च पुमानयम्, मे. सुरभिश्चम्पके स्वर्णे जातीफलवसन्तयोः। गन्धोपले सौरभेय्यां शल्लकीमातृभेदयोः। सुगन्धे च मनोज्ञे च वाच्यवत् सुरभिः स्मृतः, वि. सुरभि हेम्नि चम्पके। जातीफले मातृभेदे रम्ये चैत्रवसन्तयोः। सुगन्धौ गवि शल्लक्याम्, हे. सुरभि र्गवि च स्त्रियाम्, श्चा. सुरभिः स्याद् वसन्तेऽपि सभादूत्रतालयेऽपि च, त्रि. श्रेष्ठेऽपि निगद्यते सुरभिः, ह.

सुरस. सुरसस्तु त्रिषु स्वादौ पर्णासे तु नपुंसकम्। स्त्रीरास्नानागमात्रोश्च, मे. सुरसः स्यात् सुमधुरे पर्णासे सुरसाऽपि च, वि. सुरसः स्वादौ पर्णासे, हे.

सुरूप. सुरूपस्तु बुधे रम्ये प्राप्तरूपाभिरूपवत्, हे. V. प्राप्तरूप.

सुवर्ण. सुवर्णो ना स्वर्णकर्षे सुवर्णालुमद्यान्तरे। स्त्री कृष्णागुरुणि क्लीबे काञ्चने हरिचन्दने, मे. सुवर्णं स्वर्णमात्रे स्यात् सुवर्णं कर्षविल्वयोः।

सुवर्ण्च सुवर्णालुकृष्णागुरुमखान्तरे, वि. सुवर्णं काञ्चने कर्षे सुवर्णालौ मखान्तरे। कृष्णागुरुणि वित्ते च, हे. सुवर्णं मानभेदेऽपि, त्रि.

सुवसन्तक. सुवसन्तक उद्दिष्टो वासन्त्यां मदनोत्सवे, मे. सुवसन्तक इत्येष वासन्त्यां मदनोत्सवे, वि.

सुवह. सुवहा शल्लकीलापर्णीगोधापदीषु वीणायाम्। रास्नाश्रेफालिकयोः स्त्री सुखवाह्येऽन्यलिङ्ग, स्यात्, मे. सुवहा सल्लकीगोधापदीशेफालिकासु च। एलापर्ण्यां च सुवहा वल्लकीरास्नायोरपि। सम्यग्वाहे तु सुवहो वाचप्रवत् समुदाहृतः, वि. सुवहस्तु सम्यग्वहे सुवहा शल्लकीद्रुमे। रास्नाशेफालिकागोधापद्येलापर्णिकासु च, हे.

सुवेल. सुवेलः प्रणते शान्ते त्रिषु ना पर्वतान्तरे, मे. सुवेलः प्रणते शान्ते सुवेलः पर्वतान्तरे, वि. सुवेलः प्रणते शान्ते गिरिभेदे, हे.

सुव्रत. सुव्रता सुखसन्दोह्या शोभनव्रतयोरपि, मे. सुव्रता सुखसन्दोह्यसुरभ्यां शुभव्रते। वाचप्रवत्, वि. सुव्रता। सुखदोह्यसौरभेय्यां सुव्रतोऽर्हति सद्‌व्रते, हे. सुदोह्यो गौश्च सुव्रता, त्रि.

सुषम. सुषमाऽनन्तशोभायां स्त्री चारौ च समे त्रिषु, मे. सुषमं चारुसमयोः सुषमा परमद्युतौ, वि सुषमं रुचिरे समे। सुषमा तु स्यात् परमशोभायां कालभिद्यपि, हे.

सुषवी. सुषवी कारवेल्ले स्यात् कृष्णजीरकजीरयोः, मे, वि. सुषवी कृष्णजीरके। जीरके कारवेल्ले च, हे.

सुषीम. सुषीमः शीतले चारौ त्रिषु ना पन्नगान्तरे, मे. सुषीमः शिशिरे चारौ सुषीमः पन्नगान्तरे, वि. सुषीमः शिशिरे रम्ये, हे.

सुषेण. सुषेणः करमर्दे स्याद्, विष्णुसुग्रीववैद्ययोः, मे. सुषेणः करमर्देऽपि विष्णुसुग्रीववैद्ययोः, वि. सुषेणो विष्णुसुग्रीववैद्ययोः करमर्दके, हे. विष्णौ सुषेणः करमर्दके। कपिवैद्ये च, त्रि.

सुष्ठु. सुष्ठु प्रशंसनेऽपि स्यात्सत्यर्थे च निगद्यते, मे. सुष्ठु प्रशंसनेऽपि स्यादत्यर्थेऽपि च कथ्यते, वि. सुष्ठु त्यर्थप्रशंसयोः, त्रि.

सूक. सूक इत्यपि। वाणवातोत्पले, मे. सूका वाणोत्पलवाताः, हे सूको वाणानिलोत्पले, वि

सूक्ष्म सूक्ष्मं सत्रात् कतकेऽध्यात्मे पुंसत्रणौ त्रिषु चाल्पके, मे. सूक्ष्मं सत्रात् कतकेऽध्यात्मेऽप्यणौ सूक्ष्मोऽल्पकेऽन्यवत्, वि सूक्ष्मोऽणौ सूक्ष्मअल्पके। अध्यात्मे कतके, हे सूक्ष्ममध्यात्ममपि, अ.

सूचक. सूचकः सीवनद्रव्ये बोधके पिशुने शुनि। ओतौ काके, मे. सूचकः सीवनद्रव्ये बोधके दृष्दंशके। पिशुने शुनि काके च, वि. सूचकः शुनि दुर्जने। कथके सीवनद्रव्ये मार्जारे वायसेऽपि च, हे सूचकौ खलकुक्कुरौ, त्रि.

सूचना. सूचना व्यधने दृष्टौ गन्धनेऽभिनयेऽपि च, मे, वि सूचना सत्रादभिनये गन्धने व्यधने दृशि, हे.

सूची. सूची तु सीवनद्रव्येऽप्याङ्गिकाभिनयान्तरे, मे सूची करादभिनये नारीणां करणान्तरे। सूची च सीवनद्रव्ये, वि सूचाभिनये व्यधने करणे स्त्रियाम्, हे. सूची वृत्यप्रभेदे च व्यधनीशिखयोरपि, त्रि.

सूत. सूतस्तु सारथौ तक्ष्णि क्षत्रियाद् ब्राह्मणीसुते। वन्दिपारदयो पुंसि प्रसूते प्रेरिते त्रिषु, मे. सूतः पारदसारथ्योः प्रसूतेरितवन्दिषु। ब्राह्मण्यां क्षत्रियाज्जाते तक्ष्णि, हे. सूतस्तु सारथौ तक्ष्णि प्रसूते प्रेरितेऽपि च। क्षत्रियाद् ब्राह्मणीजेऽपि सूतः पारदवन्दिनोः, वि. सूतस्त्वष्टरि सारथौ, अ. सूतो वन्दिनि पारदे, त्रि सूतो भास्कर इत्युक्तः सूतः सारथिरुच्यते, अने

सूतक सूतकोऽस्त्री पारदे न द्वयो जैनौ, मे. सूतकं रसजन्मनोः, वि सूतकं जन्मनि रसे, हे, अथ जन्मनि। सूतकं पारदेऽप्यस्त्री, त्रि.

सूत्र. सूत्रं तन्तुव्यवस्थयोः। शास्त्रादिसूचनाग्रन्थे, मे. सूत्रन्तु रचनायां स्यात् सूत्रं तन्तुव्यवस्थयोः, वि. सूत्रन्तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः, हे. तन्त्वादग्रन्थयोः सूत्रं कारणेऽपि च,

सूलकण्ठ सूलकण्ठः पुमान् विप्रे खञ्जरीटकपोतयोः, मे सूलकण्ठो द्विजे प्रोक्तः खञ्जरीटकपोतयोः, वि सूलकण्ठः खञ्जरीटे द्विजन्मनि कपोतके, हे सूलकण्ठो द्विजेऽपि च, श सूलकण्ठो द्विजन्मनि। कपोतविहगेऽपि स्यात्, त्रि

सूलधार सूलधार प्रचीपतौ। नान्द्यन्तरसुसञ्चारिपात्रशिल्पिप्रभेदयोः, मे सूलधारः प्रचीपतौ। नान्द्यनन्तरसञ्चारिपात्रशिल्पिप्रभेदयोः, वि सूलधारस्तु शिल्पिभेदे नटेन्द्रयोः, हे

सूद सूदस्तु कथित सूपकारे च व्यञ्जनान्तरे, मे सूदस्तु सूपवत् सूपकारे च व्यञ्जनेऽपि च, वि सूदः सूपकारे व्यञ्जनेऽपि च सूपवत्, हे सूद स्याद् व्यञ्जनेऽपि च, अ व्यञ्जने सूपकारे च सूद सूपवदिष्यते, त्रि सूदः स्यात् सूपकारश्च सूदो ज्ञेयः कुटुम्बिकः, अने

सून सून प्रसवपुष्पयो। सूना पुत्रा वधस्थानगलशुण्डिकयो स्त्रियाम्, मे सून वाचयवदुच्छूने सूनं प्रसवपुष्पयोः। सूना पुत्रा वधस्थानगलशुण्डिकयोरपि, वि सूनं पुष्पे सूना पुनः सुता। अधोजिह्वा वधस्थानम्, हे सूनाऽधोजिह्विकाऽपि च, न सूनं पुष्पे फलेऽपि च, त्रि

सूनु सूनुः पुत्रेऽनुजेऽर्कें ना, मे सूनु पुत्रेऽनुजे रवौ, वि, हे पुत्रे रवौ च सूनु स्याद् भ्रातर्यपि कनीयसि, त्रि सूनुः पुत्र तयाऽनुजे, अने

सूनृत सूनृत मङ्गलेऽपि स्यात् प्रियसत्ये वचस्यपि, मे सूनृत मङ्गले सत्यप्रियवाचि च सूनृतम्, वि सूनृतः शिक्षितो मर्त्यः सूनृतं सत्यवद् वचः, अने सूनृतम्। मङ्गले प्रियसत्योक्तौ, हे सूनृतं कुशले सत्ये, त्रि

सूप सूपो व्यञ्जनसूदयोः, मे सूपो व्यञ्जनभेदे स्यात् सूपकारे च कीर्तितः वि १ सूद

सूम सूमं क्षीरे च नभसि, मे सूमं क्षीरे नभस्यपि, वि

सूर. सूरः सूर्यनरेश्वरौ, अने. V. सूरः

सूर्य. सूर्योऽर्कपर्णे तपने स्त्री तद्भार्यौषधीभिदोः, मे. सूर्यः सूरे तत्प्रियायां सूर्या स्यादोषधावपि, वि.

सूर्यभक्त. सूर्यभक्तस्तु बन्धूके पुंसि त्रिष्वर्कपूजके, मे. सूर्यभक्तो बन्धुजीवे तथा भास्करपूजके, वि. सूर्यभक्तो बन्धुजीवे भास्करस्य च पूजके, हे.

सृति. सृतिः स्त्री गमने मार्गे, मे. सृति र्गतौ पथि, हे. सृतिर्गमनमार्गयोः, वि.

सृदाकु. सृदाकु र्नाऽनिले वज्रे ज्वलने प्रतिसूर्यके, मे. सृदाकुरनिले वज्रे दावाग्नौ प्रतिसूर्यके, वि. सृदाकु र्वज्रे दावाग्नौ प्रतिसूर्ये समीरणे, हे.

सृष्ट. सृष्टस्तु निर्मिते। युक्तनिश्चितयोः प्राज्ये त्रिषु, मे. सृष्टं निश्चितयुक्तयोः। प्रचुरे निर्मिते च, हे. सृष्टन्तु निर्मिते। युक्तनिश्चितयोः प्राज्ये, वि. सृष्टं निश्चिते बहुनि त्रिषु, अ.

सृष्टि. सृष्टिस्तु निर्मितौ। स्वभावे चापि कथिता, मे. सृष्टिः स्वभावे निर्माणे, वि, हे.

सेचक. सेचकः स्यात् पुमान् मेघे वाचत्रलिङ्गस्तु सेक्तरि, मे. सेचकः सेक्तृमेघयोः, हे, वि.

सेचन. सेचनं रचणे सेके नौकायाः सेकभाजने, मे. सेचनं रचणे सेके नौकासेचनभाजने, वि.

सेतु. सेतु र्नालौ कुमारके, मे. सेतुस्तु सम्वरे। नदीसङ्क्रमे, हे. सेतुरालौ च वरुणे, वि.

सेनानी. सेनानीः स्यात् पुमान् कार्त्तिकेये सेनापतावपि, मे. सेनानीः कार्त्तिकेये स्यात् तथा सेनापतावपि, वि. सेनानीः सैन्यपे गुहे, हे.

सेनापति. सेनापतिः कार्त्तिकेयेऽप्यनीकाधिपतौ पुमान्, मे. सेनापतिः कार्त्तिकेयेऽप्यनीकाधिपतेऽपि च, वि

सेवक. सेवकस्तु प्रसेवे ना वाच्यलिङ्गोऽनुजीविनि, मे. सेवकस्तु प्रसेवे स्यादनुजीविनि चान्यवत्, वि. सेवकोऽनुगे प्रसेवे, हे.

सेवन. सेवनं सीवनोपास्त्योः, मे, वि, त्रि, हे.

सेव्य. सेव्यं क्लीवमुशीरे स्यात् सेवार्हे पुनरन्यवत्, मे. सेव्यं भोक्तमुशीरे च सेवार्हे पुनरन्यवत्, वि. सेव्यमुशीरे सेवार्हे, हे.

सैकतिक. अथ सैकतिकं मात्रयात्रामङ्गलसूत्रके। ना सन्न्यस्ते क्षपणके त्रिषु सन्देहजीविनि, मे. भवेत् सैकतिकं मात्रयात्रामङ्गलसूत्रयोः। तथा सन्न्यस्तसन्देहजीवक्षपणकेष्वपि, वि. सैकतिकं पुन र्मात्रयात्रामङ्गलसूत्रयोः। सैकतिकः क्षपणके सन्न्यस्ते भ्रान्तिजीविनि, हे.

सैनिक. सैनिकः सैन्यरक्षे च स्यात् सेनासमवेतके, मे.

सैन्धव. सैन्धवोऽस्त्री माणिमन्थे नाऽश्वे सिन्धुभवे त्रिषु, मे. सैन्धवो माणिमन्थेऽपि सिन्धुदेशोद्भवाश्वयोः, वि. सैन्धवः सिन्धुदेशजे। सिन्धूत्थे सप्तात्, हे. सैन्धवो लवणाश्वयोः, त्रि.

सैन्य. सैन्यं क्लीवं बले सेनासमवेते तु वाच्यवत्, मे. सैन्यं सैनिकसैन्ययोः, हे.

सैरिन्ध्री. सैरिन्ध्री परवेश्मस्थाशिल्पकृत्स्ववशस्त्रियाम्। वर्णसङ्करसम्भूतस्त्रीमहल्लिकयोरपि, मे, वि, हे.

सोढृ. सोढा मर्षणशक्तयोः, वि, हे. सोढा तितिक्षासंयुक्ते शक्ते चाप्यभिधेयवत्, मे.

सोम. सोमस्तु हिमदीधितौ। वानरे च कुवेरे च पितृदेवे समीरणे। वसुभेदे कर्पूरे नीरे सोमलतौषधौ, मे. सोमः कुवेरे पितृदेवतायां वसुप्रभेदे च सुधाकरे च। दिव्यौषधीसोमलतासमीरकर्पूरनीरेषु च वानरे च, वि. सोमस्त्वोषधीतद्रसेन्दुषु। दिव्यौषधौ घनसारे समीरे पितृदेवते। वसुभेदे सलिले वानरे किन्नरेश्वरे, हे.

सोमवल्क. सोमवल्कस्तु धवलखदिरे कट्फलेऽपि च, मे, वि. सोमवल्कः कट्फले स्यात्, धवलखदिरद्रुमे, हे. अथ कट्फले।

सिते च खदिरे सोमवल्कः सप्रात्, अ.

सौकर्य. सौकर्यं सत्रादनायासे क्रियायां सूकरसत्र च, वि.

सौगन्धिक. सौगन्धिकन्तु कह्लारे पद्मरागेऽपि कत्तृणे। पुंलिङ्गो गन्धपाषाणे सुगन्धव्यवहारिणि, मे. सौगन्धिको गन्धवणिक् सौगन्धिकन्तु कत्तृणे। गन्धोपले पद्मरागे कह्लारे, हे. सौगन्धिकन्तु कह्लारे पद्मरागे च कत्तृणे। गन्धोपले गान्धिके च सौगन्धिक इति ध्वनि., वि.

सौदाम(मि)नी. सौदामन्यप्सरोभेदे तड़ित्तद्भेदयोः स्त्रियाम्, मे. सौदामिन्यप्सरोभेदे तड़ित्तद्भेदयोरपि, वि. सौदामिनी तड़िद्भेद-तड़ितोरप्सरोभिदि, हे.

सौभाग्य. सौभाग्यं सुभगत्वे स्याद् योगभेदे नपुंसकम्, मे.

सौम्य. सौम्यो ज्ञे ना त्रिष्वनुग्रे मनोज्ञे सोमदैवते, मे. सौम्यो बुधे मनोज्ञे स्याद् अनुग्रे सोमदैवते। इल्वलासु च सौम्याः स्यु-र्नौषे बोधे च वाचप्रवत्, वि. सौम्यः सोमात्मजेऽनुग्रे मनोज्ञे सोम-दैवते। सौम्या पुन र्मृगशिरःशिरःस्थाः पञ्च तारकाः, हे. सौम्यस्तु सुन्दरे सोमदैवते, अ.

सौरभ्य. सौरभ्यन्तु मनोज्ञत्वे सौगन्ध्ये गुणगौरवे, मे. सौरभ्यमाङ्कः सौगन्ध्ये चारुत्वे गुणगौरवे, वि. सौरभ्यं चारुताऽपि च, त्रि.

सौवर्चल. अथ सौवर्चलं सर्जक्षारे च लवणान्तरे, मे.

सौवर्चस्. सौवर्चो भक्तरक्तयोः, अने.

सौवीर. सौवीरं काञ्जिके स्रोतोऽञ्जने च बदरीफले, मे. सौवीरं बदरे स्रोतोऽञ्जने देशे च काञ्जिके, वि. सौवीरं काञ्जिकास्रोतोऽञ्जनयो-र्बदरीफले, हे. स्रोतोऽञ्जने च सौवीरं काञ्जिके बदरेऽपि च, वि. सौवीरो-ऽञ्जविशेषः स्यात् सौवीरं काञ्जिकं मतम्, अने.

स्कन्ध. स्कन्धः स्यान् नृपतावंसे सम्परायसमूहयोः। काये तरुप्रकाण्डे च भद्रादौ छन्दसो भिदि, मे. स्कन्धः प्रकाण्डे सैन्यांशे बाहुमूलसमूहयोः। समीशाद्रयोश्चापि, वि. स्कन्धः प्रकाण्डे कायांशे विज्ञानादिषु पञ्चसु।

द्वेपे समूहे व्यूहे च, हे. स्कन्धः समुदयेऽपि च, अ. स्कन्धः सन्धेऽपि, ति. ( संघातेऽपि ) स्कन्धः करिनरतुरङ्गाणाम्, रु.

स्खलित. स्खलितं छलिते भ्रंशे, हे, वि, मे.

स्तनन. स्तननं ध्वनिमात्रे स्यान् मेघशब्दे च कुन्थिते, मे. स्तननं ध्वनिमात्रे स्यात् कुन्थने घनगर्जिते, वि. स्तननं कुन्थने मेघगर्जितध्वनिमात्रयोः, हे.

स्तनयित्नु. स्तनयित्नुः पुमान् वारिधरेऽपि स्तनितेऽपि च, मे. स्तनयित्नुः पयोवाहे तद्‌ध्वनौ मृत्युरोगयोः, वि. स्तनयित्नुः पयोमुचि। मृतौ स्तनिते रोगे च, हे

स्तम्ब. स्तम्बोऽप्रकाण्डद्रुमगुच्छयोः, मे. स्तम्बो गुल्मे तृणादीनामप्रकाण्डद्रुमेऽपि च, वि. स्तम्ब आलानगुल्मयोः। व्रीह्यादीनां प्रकाण्डे च, हे.

स्तम्भ. स्तम्भः स्थूणाजड़त्वयोः, मे, वि. स्तम्भोऽङ्गजाड्ये स्थूणायाम्, हे. स्तम्भौ स्थूणाजडीभावौ, अ. स्थूणास्तम्भत्वयोः स्तम्भः, रु.

स्तवक. ( स्तवकः गुच्छगुच्छयोः, वि.)

स्तिमित. स्तिमितोऽचञ्चलार्द्रयोः, मे. स्तिमितोऽचञ्चले क्लिन्ने, वि. स्तिमितौ क्लिन्ननिश्चलौ, हे, ति.

स्तोक. स्तोकस्त्रिष्वल्पे चातके पुमान्, मे. स्तोकः स्यात् चातकाल्पयोः, हे. स्तोकोऽल्पे चातके, वि. चातकाल्पयोः स्तोकम्, अने.

स्तोभ. स्तोभः स्यात् सामविच्छेदे हेलने स्तम्भनेऽपि च, हे.

स्तोम. स्तोमः स्तोत्रेऽध्वरे वृन्दे, अ.

स्त्यान. स्त्यानं स्निग्धे प्रतिध्वाने घनत्वालस्ययोरपि, मे, वि. स्त्यानं स्यात् स्निग्ध आलस्ये प्रतिध्वानघनत्वयोः, हे.

स्थपति. स्थपतिः कञ्चुकिन्यपि। जीवेष्टियाजके शिल्पिभेदे ना सत्तमे त्रिषु, मे. स्थपतिः शिल्पिभेदेऽपि कञ्चुकिन्यपि। जीवेष्टियाजके सूते, वि. स्थपतिः गौविदेऽधीशे वृहस्पतीष्टियज्वनोः। कारुके च, हे.

स्थपतिः कारुभेदेऽपि, श्र स्थपतिः कञ्चुकी कारुभेदे गीष्पतियागकृत्, त्रि.

स्थाणु. स्थाणुः कीले हरे पुमान्। अस्त्री ध्रुवे, मे. स्थाणुः कीले स्थिरे हरे, वि. स्थाणुः कीले हरे, हे. स्थाणुः शर्वोऽपि, श्र. स्थाणू भङ्क्-शिवौ, त्रि. स्थाणुः कीलेऽपि, रु.

स्थान. स्थानं साहश्येऽवकाशे स्थितौ हृद्धिचयेतरे, मे. स्थानं स्थितौ च साहश्ये सन्निवेशावकाशयोः। युक्तार्थे कारणार्थे च स्थाने सप्रादव्ययं पुनः, वि. स्थानं स्थित्यवकाशयोः। साहश्ये सन्निवेशे च, हे. अवकाशे स्थितौ स्थानम्, श्र.

स्थाने. स्थाने तु कारणार्थे सप्राद् युक्तसाहश्ययोरपि, मे. स्थाने तु कारणे। युक्ते साम्येऽपि, हे. स्थाने तु कारणार्थे च युक्तसाहश्ययोरपि, वि.

स्थापन. स्थापनं रोपणे पुंसवने पाठौपधौ स्त्रियाम्, मे. स्थापनं सप्रात् पुंसवने समाधौ रोपणेऽपि च, वि. स्थापनन्तु निवेशने। पुंसवने समाधौ च, हे.

स्थापित. स्थापितं निश्चिते न्यस्ते, मे, हे. स्थापितं निश्चिते न्यस्ते च, वि.

स्थाल. स्थालं भाजनभेदेऽपि स्थाली सप्रात् पाटलोखयोः, मे, वि. स्थालं भाजनभेदे सप्रात् स्थाली तु पाटलोखयोः, हे.

स्थासक. स्थासकः पुंसि चार्चिक्ये जलादेरपि बुद्बुदे, मे. स्थासकाख्या च चार्चिक्ये जलादेरपि बुद्बुदे, वि. स्थासको हस्तबिम्बे सप्रात् सरकादेच बुद्बुदे, हे.

स्थित. स्थित ऊर्ध्वे सप्रतिज्ञे, हे स्थितं प्रतिज्ञातवति चोर्ध्वनिश्चलयोस्त्रिषु, मे. स्थितं भवेद् गत्यभावे सुप्रतिज्ञे सुनिश्चिते, वि. च्यधोर्ध्वे सत्प्रतिज्ञेऽपि च स्थितः, त्रि.

स्थिति. स्थितिः स्त्रियामवस्थाने मर्यादायाञ्च सीमनि, मे. स्थितिः

स्थाने च सीम्नि च, हे. मर्यादायामपि स्थितिः, त्रि. स्थितिः स्थानव्यवस्थयोः, ह.

स्थिर. स्थिरा भूशालपर्ण्यो ना शनौ मोक्षे चले त्रिषु, मे. स्थिरा भूमौ शालपर्ण्यां स्थिरो निश्चलमोक्षयोः, वि. स्थिरो मोक्षे निश्चले च स्थिरा भूः शालपर्ण्यपि, हे. स्थिरा महीशालपर्ण्योः, त्रि.

स्थिरदंष्ट्र. स्थिरदंष्ट्रो भुजङ्गमे। वराहाकृतिविष्णौ च, मे, वि.

स्थूणा. अथ स्थूणा स्त्रियाम् सूर्म्यां स्तम्भे गृहस्य च, मे. स्थूणायसः स्मृता। प्रतिमायां गृहस्तम्भे, वि. स्थूणा सूर्म्यां रुगन्तरे, हे. स्थूणा स्तम्भेऽपि वेश्मनः, अ. स्थूणा सूर्मी च दारु च, त्रि.

स्थूल. स्थूलं कूटेऽथ निष्प्रज्ञे पीवरेऽप्यन्यलिङ्गकः, मे. स्थूलं स्त्रियाम् पीवरे कूटे निष्प्रज्ञे पुनरन्यवत्, वि. स्थूलः पीने जड़े, हे. त्रिषु स्थूलं जड़ेऽपि च, अ.

स्थूलोच्चय. स्थूलोच्चयो वरण्डके। गजानां मध्यमगते गण्डाश्माकार्त्स्न्ययोरपि, हे. स्थूलोच्चयो गण्डोपलेऽपि च। गजानां मध्यमगतेऽप्यसाकल्यवरण्डयोः, मे. स्थूलोच्चयस्त्वसाकल्ये गण्डोपलवरण्डयोः। गजानां मध्यमगतौ स्थूलोच्चय उदाहृतः, वि.

स्थेय. स्थेयो विवादपदस्य निर्णेतरि पुरोहिते, मे. स्थेयो विवादस्य पदनिर्णेतरि पुरोहिते, वि. स्थेयोऽक्षदृक्पुरोधसोः, हे. स्थेयौ नेतृपुरोहितौ, त्रि.

स्नान. स्नानं स्नानीयेऽभिषवे, मे. स्नानं स्नानीय आप्लवे, हे.

स्निग्ध. स्निग्धं स्नेहयुते चिक्कणेऽपि स्त्रियाम्, मे.

स्नेह. स्नेहः स्त्रियाम् पुंसि तैलादिरसद्रव्ये च सौहृदे, मे. स्नेहतैलादिकरसद्रव्ये स्त्रियाम् सौहृदेऽपि च, वि. स्नेहः प्रेम्णि घृतादिके, हे. सौहृदे घृततैलादौ स्त्रियाम् स्नेहः, त्रि.

स्पर्धा. स्पर्धा संघर्षणेऽपि स्त्रियाम् साम्ये क्रमसमुन्नतौ, मे. स्पर्धा संघर्षणे साम्ये स्पर्धा क्रमसमुन्नतौ, त्रि

स्पर्श. स्पर्शो रुजायां दाने च स्पर्शने स्पर्शकेऽपि च, मे, वि. स्पर्शो वर्गाचरे दाने स्पर्शने स्पर्शके रुजि, हे. दाने रोगेऽपि च स्पर्शः, त्रि.

स्पर्शन. स्पर्शनो मारुते पुंसि दाने स्पर्शं नपुंसकम्, मे. स्पर्शनो मारुते स्पर्शदानयोः स्पर्शनं मतम्, वि. स्पर्शनं हृषीके दाने स्पर्शे च स्पर्शनोऽनिले, हे. अथ स्पर्शदानयोः। स्पर्शनं स्पर्शनो वातः, त्रि.

स्पश. स्पशः सप्रात् सम्पराये च प्रणिधावपि पुंस्त्रयम्, मे. स्पशः प्रणिधियुद्धयोः, वि. स्पशो हेरिकयुद्धयोः, हे. द्वौ चरागिमरौ स्पशौ, अ. रणे स्पशः, श.

स्फार. स्फारः सप्रात् पुंसि विकटे करकादेश बुद्बुदे, मे, स्फारः सप्राद् विकटे स्फारः सरकादेश बुद्बुदे, वि. स्फारस्तु सरकादीनां बुद्बुदे विपुलेऽपि च, हे.

स्फुट. स्फुटो व्यक्तमफुल्लयोः। व्याप्ते त्रिषु, मे. स्फुटो व्यक्तमफुल्लयोः। सिते व्याप्ते, हे. स्फुटो व्यक्ते मफुल्ले च व्याप्ते च कलिनेऽन्यवत्, वि.

स्फुटि. स्फुटि र्योषित् पादस्फोटामयेऽपि च। निर्भिन्नकर्कटीशस्येऽपि स्यात्, मे. स्फुटिस्त्वङ्घ्रिस्फोटे निर्भिन्नचिर्भिटे, हे. निर्भिन्नकर्कटीशस्ये पादस्फोटे स्फुटि र्मता, वि. स्फुटिः स्फोटे च कर्कट्याम्, त्रि.

स्म स्मातीते पादपूरणे। स्यान् मङ्गले पत्स्यते, मे. स्म पादपूरणेऽतीते, वि. स्मातीते पादपूर्त्तौ, हे. स्म स्यात् संस्मरणादिषु, श.

स्मय. स्मयो नाऽद्भुतगर्वयोः, मे. स्मयो गर्वेऽद्भुते, वि.

स्मृति. स्मृति र्धर्मशास्त्रस्मरणयोः स्त्रियाम्, मे. स्मृतिरिच्छाधियो र्धर्मसंहितायामपि स्मृतिः, वि. स्मृतिः स्मरणधीच्छासु शास्त्रे, हे. स्मृतिः स्याद् धर्मशास्त्रेऽपि, त्रि.

स्यन्दन. स्यन्दनस्तु स्रुतौ नीरे तिनिशे ना रथेऽस्त्रियाम्, मे. स्यन्दनस्तु स्रुतौ नीरे स्यन्दनस्तिनिशे रथे, वि. स्यन्दनं स्रवणे तोये स्यन्दनस्तिनिशे रथे, हे. स्यन्दनं स्रवणे ना तु रथे तिनिशपादपे, त्रि. स्यन्दनाख्या द्रुमे स्यान्ते स्यन्दनो रथ उच्यते, अने. ४. शोच

स्मीक. स्रमीका नीलिकायां स्त्री स्रमीको नाकुटचयोः, मे. स्रमीकः पादपे नाकौ स्रात् स्रमीका तु नीलिका, हे. स्रमीका नीलिकायाञ्च स्रमीको नाकुटचयोः, वि.

स्रत. स्रतः प्रसेवके। ना त्रिपूते, मे. स्रतम् तप्रसेवयोः, वि.

स्रति. स्रतिः सीवनसन्तत्योः स्त्रियाम्, मे. स्रतिः सीवन-सन्तत्योः, वि.

स्रन. स्रनः किरणसूर्ययोः, मे, वि.

स्रवन्ती. स्रवन्ती च द्रवन्ती च सरिदोषधिभेदयोः, वि. स्रवन्ती तु तरङ्गिण्यां गुल्मस्थानौषधीभिदोः, मे. v. द्रवन्ती.

स्रुव. स्रुवा द्वयो र्होमपात्रे शल्लकीमूर्वयोः स्त्रियाम्, मे. स्रुवा मूर्वा स्रुवः स्रुचि, हे. स्रुवाख्या शल्लकीमूर्वास्रुग्भेदेषु च विश्रुता, वि.

स्रू. स्रूः स्त्रियां निर्भरे स्रवे, मे. स्रूः स्रवे निर्भरे चापि, वि, स्रूः स्रुवे निर्भरेऽपि च, हे.

स्रोतस्. स्रोतः प्रवाहेन्द्रिययोः, हे. स्रोतोऽम्बुवेगेन्द्रिययोः, वि. स्रोतोऽम्बुवेग इन्द्रिये, मे. स्रोत इन्द्रिये निम्नगारये, अने.

स्व. स्वः स्रात् पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धनेऽस्त्रियाम्, मे. स्वं ज्ञातावात्मधनयोरात्मीये च प्रचक्षते, वि. स्वो ज्ञात्यात्मनोः स्वं निजे धने, हे. स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने, अ. ज्ञातावात्मनि चात्मीये धने स्वाख्या प्रवर्तते, अने.

स्वज. स्वजः प्रस्वेदसुतयोः। क्लीवं रक्ते, मे. स्वजं रक्ते स्वजः प्रस्वेद-सुतयोः, वि. स्वेदरक्तात्मजाः सृजाः, त्रि.

स्वञ्ज. स्वञ्जो विधौ रुद्रे, मे स्वञ्जः प्रजापतौ रुद्रे, वि. स्वञ्जौ ब्रह्मशिवौ, हे.

स्वप्न. स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान्, मे. स्वप्नः सुप्तस्य विज्ञाने स्वप्नः स्वापे च दर्शने, वि. स्वप्नः स्वापे सुप्तज्ञाने, हे. सुप्तज्ञाने च शयने स्वप्नः, त्रि.

स्वभू. स्वभूर्ना ब्राह्मणि हरौ, मे. स्वभूर्वेधसि शार्ङ्गिणि, वि. स्वभूर्विधौ विधावपि, हे.

स्वर्. स्वः प्रेत्यव्योम्नि नाके च, मे. स्वः स्वर्गपरलोकयोः, वि. स्वः स्वर्गे परलोके स्यात्, अने.

स्वर. स्वरो नासासमीरणे। उदात्तादावकारादौ षड्जादौ च ध्वनौ पुमान्, मे. स्वरोऽकारादिमात्रासु मध्यमादिषु च ध्वनौ। उदात्तादिष्वपि प्रोक्तः स्वरो नासासमीरणे, वि स्वरः शब्देऽपि षड्जादौ, हे. अकारादिषु वर्णेषु षड्जादिषु च सप्तसु। उदात्तादिषु विज्ञेयः प्राणिनाञ्च स्वने स्वरः, र.

स्वरु. स्वरुः पुमान् यूपखण्डे भिदुरेऽप्यध्वरे शरे, मे. स्वरुर्वज्रेऽध्वरे वाणे यूपखण्डेऽपि च स्वरुः, वि. स्वरुः स्याद् यूपखण्डके। अध्वरे कुलिशे वाणे, हे. मखेषुयूपखण्डेऽपि स्वरुः, अ.

स्वरूप. v. आत्मरूप.

स्वस्ति. स्वस्ति स्यात् मङ्गले पुण्ये प्रशंसायामपि क्वचित्, मे. स्वस्त्याशीःक्षेमपुण्यादौ, वि, हे, अ. स्वस्ति स्यात् मङ्गलादिषु, र.

स्वस्तिक. स्वस्तिको मङ्गलद्रव्ये चतुष्कगृहभेदयोः, मे. स्वस्तिको मङ्गलद्रव्ये चतुष्कगृहभेदयोः। पिष्टकस्य विकारे च स्वस्तिको रततालिके, वि. स्वस्तिको मङ्गलद्रव्ये गृहभेदचतुष्कयोः, हे.

स्वस्तिमुख भवेत् स्वस्तिमुखो लेखे ब्राह्मणे वन्दिनि त्रिषु, मे.

स्वादु. स्वादु मिष्टमनोज्ञयोः, मे स्वादु मनोज्ञे मिष्टे च, वि. स्वादुस्तु सुन्दरे मिष्टे, हे. त्रिष्विष्टमधुरौ स्वादू, अ.

स्वान्त. स्वान्तं चेतसि गह्वरे, मे.

स्वाप. स्वापः शयननिद्रयोः। सर्वाङ्गतायामज्ञाने, मे. स्वापः स्पर्शाज्ञतानिद्राशयनाज्ञानमात्रके, वि स्वापो निद्रायां रुग्भेदे शयनाज्ञानमात्रयोः, हे. स्वापः शयननिद्रयोः, त्रि

स्वामिन् स्वामी प्रभुविशाखयोः, मे स्वामी प्रभौ विशाखे

च, वि. स्वामी प्रभौ सुहृदे, हे. स्वामी भर्त्तरि - पयसुहृदे, त्रि.

स्वित्. स्वित् प्रश्ने च वितर्के च तथैव पदपूरणे, मे. स्वित् प्रश्न-वितर्कयोः, हे. स्वित् प्रश्ने च वितर्के च, श्र.

स्वेद. स्वेदस्तु स्वेदने घर्मे, मे, वि. स्वेदो घर्मे स्वेदने च, हे. घर्म-स्वेदनयोः स्वेदः, वि.

स्वैर. स्वैरः स्वच्छन्दमन्दयोः, मे, वि. स्वैरो मन्दे स्वतन्त्रे च, हे. मन्दस्वच्छन्दयोः स्वैरः, श्र. मन्दस्वच्छन्दयोः स्वैरम्, ह.

ह. हः शिवे सलिले शून्ये धारणे मङ्गलेऽपि च। गगने नकुलीशे च रक्ते नाके च पर्वते, मे. नभो वराहो नकुली द्वन्द्वो वामपदस्थितः। सदाशिवोऽरुणः प्राणो हकारश्च षडाननः, मा. ह स्यात् सम्बोधने पादपूरणे च विनिग्रहे। नियोगे च चिपायां स्यात् कुत्सायामपि दृश्यते, मे. ह स्यात् सम्बोधने पादपूरणेऽनव्ययं शिवे, वि.

हंस. हंसः स्यात् मानसौकसि। निर्लोभनृपविष्ण्वर्के परमात्मनि मत्सरे। योगिभेदे मन्त्रभेदे शरीरमरुदन्तरे। तुरङ्गमप्रभेदेऽपि, मे. हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे। योगिमन्त्रादिभेदेषु परमात्मनि मत्सरे। निर्लोभनृपतौ हंसः शारीरमरुदन्तरे, वि. हंसोऽर्के मत्सरेऽच्युते। खगाश्व-योगिमन्त्रादिभेदेषु परमात्मनि। निर्लोभनृपतौ प्राणवाते श्रेष्ठेऽग्रतः स्थिते, हे. रविश्वेतच्छदौ हंसौ, श्र हंसस्तु खगसूर्ययोः। निर्लोभे नृपतौ विष्णौ अन्तरात्मनि चेष्यते, त्रि. जीवे राज्ञि विधौ धर्मे तपस्विनि तुरङ्गमे। सिते पचिविशेषे च हंसशब्दो हरेऽपि च, अने.

हठ. हठः स्यात् प्रसभे ध्वत्राम्, मे. हठो वारिपर्ण्यां स्यात् प्रसभेऽपि च, वि. हठोऽम्बुपर्ण्यां प्रसभे, हे. ध्वत्रां च प्रसभे हठः, त्रि.

हताश. हताशो निर्दये चाशारहिते पिशुनेऽपि च, मे. हताशो निर्दये खले, वि. हताशो निष्कृपे खले, हे.

हनु. हनु हट्टविलासिन्यां कृत्यावस्त्रे गदे पुमान। द्वयोः कपोला-

वयवे, मे. हनुः प्रहरणे स्त्रयौ कपोलावयवे गद्दे । हनु हट्टविलासिन्याम्, वि. हनुः कपोलावयवे मरणामययोरपि । हरिद्रायामायुधे च, हे. हनु-र्हट्टविलासिन्यां कपोलावयवेऽपि च, त्रि.

हन्त. हन्त वाक्यारम्भखेदविषादहर्षसम्भ्रमे, मे. हन्त हर्षे विषादे च वाक्यारम्भविषादयोः, वि. हन्त दानेऽनुकम्पायां वाक्यारम्भविषादयोः । निश्चये च प्रमादे च, हे. शोचने संप्रहर्षे च हन्तशब्दः प्रयुज्यते, ह. हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः, अ.

हम्. हं रुषोक्तावनुनये, मे. हं रुषोक्त्यनुनीतिषु, वि हं रोषभाषणेऽनुनयेऽपि च, हे.

हम्मित. हम्मितं चित्तदग्धयोः, मे, वि.

हर. हरो नाशकरुद्रयोः । वैश्वानरे, हे. हरौ वज्रमहेश्वरौ, अने.

हरण. हरणं यौतुकादीनां द्रव्ये भुजे हृतावपि, मे. हरणं यौतुकद्रव्य भुजेऽपि हरणं हृतौ, वि. हरणं च हृतौ दोष्णि यौतुकादिधनेऽपि च, हे. अथ हृतौ हरणं यौतुकेऽपि च, त्रि.

हरि. हरिश्चन्द्रार्कवाताश्वशुकभेकयमाहिषु । कपौ सिंहे हरेऽजेंऽशौ शक्रे लोकान्तरे पुमान् । वाच्यवत् पिङ्गहरितोः, मे. हरि र्दिवाकरसमीरयोः । यमवासवसिंहांशुशशाङ्ककपिवाजिषु । पिङ्गवर्णे हरिद्वर्णे भेकोपेन्द्रशुकाहिषु । लोकान्तरे च, हे. हरि र्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु । सिंहाश्वकपिभेकाहिशुकलोकान्तरेषु च । हरि र्वाच्यवदाख्यातो हरितकपिलवर्णयोः, वि. यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरि र्ना कपिले त्रिषु, अ. हरिरिन्द्रो हरि र्भानु र्हरि-र्विष्णु र्हरि र्मरुत् । हरिः सिंहो हरि र्भेको हरि र्वाजी हरिः कपिः । हरि-रंशु र्हरि र्भीरु र्हरिः सोमो हरि र्यमः । हरिः शुको हरिः सर्पः सुवर्णवर्णौ हरिः स्मृतः, अने. अर्कमर्कटमण्डूकविष्णुवासववायवः । तुरङ्गसिंहसितांशुयमाश्च हरयो दश, ए.

हरिचन्दन. हरिचन्दनमस्त्री स्यात् त्रिदशानां महीरुहे । नपुंसकं

तु गोशीर्षे जप्रोत्थ्कुङ्कमयोरपि, मे. हरिचन्द्रनमाख्यातं गोशीर्षे सुरपादपे। जप्रोत्थायां कुङ्कमे च, वि. चन्द्रिकायामवजधूली रक्ताङ्गे हरिचन्दनम्, हा.

हरिण. हरिणः पुंसि सारङ्गे विशदे त्वभिधेयवत्। हरिणी हरितायां च नारीभिद्वृत्तभेदयोः। सुवर्णप्रतिमायां च, मे. हरिणः स्मृतात् कुरङ्गेऽपि हरिणः पाण्डुरेऽन्यवत्। हरिणी हरितायां च चारुस्त्रीवृत्त-भेदयोः, वि. हरिणौ पाण्डुसारङ्गौ हरिणी चारुयोषिति। सुवर्णप्रतिमायां च हरितावृत्तभेदयोः, हे. हरिणी स्मृता स्रगी हेमप्रतिमा हरिता च या। त्रिषु पाण्डौ च हरिणः, श्र. हरिणः पाण्डुरो वर्णः शारङ्गो हरिणो मतः, अने.

हरित्. हरिद् दिशि स्त्रियां पुंसि हयवर्णविशेषयोः। अस्त्रियां स्मृतात् तृणे च, मे. हरित् ककुभि वर्णे च तृणवाजिविशेषयोः, वि. हरिद् दिशि तृणान्तरे। वर्णभेदेऽश्वभेदे च, हे. स्त्री हरिद् दिशि वर्णे ना, त्रि.

हरित. हरिता स्त्री च दूर्वायां हरिद्वर्णयुतेऽन्यवत्, मे. हरि-तेति च दूर्वायां हरिद्वर्णयुतेऽन्यवत्, वि. दूर्वाऽपि हरिता मता, त्रि.

हरिताल. हरितालं धातुभेदे स्त्री दूर्वाऽकाशरेखयोः, मे. हरितालो नभोरेखादूर्वाखड्गलतासु च, वि. हरिताली तु दूर्वागगनरेखयोः। कृपाण-लतिकायां च, हे. छायापथे च दूर्वायां हरितालीध्वनि मतः, हा.

हरिवाहन. हरिवाहनस्तु पुंसि शचीपतिविवस्वतोः, मे. हरिवाहन इत्युक्तः शचीपतिविवस्वतोः, वि.

हरेणु. हरेणु र्ना सतीने स्त्री रेणुकाकुलयोषितोः, मे. हरेणुस्तु सतीने स्याद् रेणुकाकुलयोषितोः, वि. हरेणुः कुलयोषायां रेणुकायां सतीनके, हे.

हर्मुट. हर्मुटः कच्छपे सूर्येऽपि, वि. v. हङ्गट.

हर्षण. हर्षणोऽक्षिरुगन्तरे। हर्षके योगभेदे च श्राद्धदेवेऽपि च क्वचित्, मे. त्रि. हर्षणस्तु श्राद्धदेवे हर्षके योगरुग्भिदोः, हे.

हर्षयित्नु. हर्षयित्नुः पुमान् पुत्रे काञ्चने तु नपुंसकम्, मे. हर्षयित्नुः सुते हेम्नि, वि. हर्षयित्नुः सुते स्वर्णे, हे.

है(हा)लाहल. हलाहलो ब्रह्मसर्पञ्जनायां ना विषेऽस्त्रियाम्, मे. हलाहलो विषे जेरठ्यां ज्यलालाङ्क्योरगे, वि. हलाहलस्तु ज्यलालोरगे विषे। जेठ्यां च, हे.

हलिन्. हली रामे च कर्षके, मे. हली बले कर्षके स्यात्, वि. हली कृषकसीरिणोः, हे.

हव. हव आह्वाध्वराह्वाने, मे. हवो यज्ञे तथाह्वाने निदेशेऽपि हवो मतः, वि. हवस्तु सप्ततन्तौ स्यात् निदेशाह्वानयोरपि, हे. आज्ञाह्वानाध्वरा हवाः, अ

हविस्. हवि र्होतव्यमात्रे च सर्पिष्यपि नपुंसकम्, मे. हवि र्होतव्यसर्पिषोः, वि. हविः सर्पिषि होतव्ये, हे. हविः सर्पिषि हव्ये च, त्रि.

हसन. हसनं न द्वयो र्हासेऽङ्गारधान्यां तु योषिति, मे. हसनं च स्यात् हासेऽङ्गारधान्यां हसन्यपि, वि.

हसन्ती. हसन्त्यङ्गारधान्यां च मल्लिकाशाकिनीभिदोः, मे, वि. हसन्ती शाकिनीभिदि। मल्लिकाङ्गारधान्योश्च, हे.

हस्त. हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च। ऋक्षे केशात् परो व्राते, मे. हस्तो मघवभेदे स्यात् करेभकरयोरपि। कचात् परः कलापार्थे सप्रकोष्ठे तथाङ्गुलौ, वि. हस्तः करे मानोडुभेदयोः। केशात् कलापे शुण्डायाम्, हे. हस्तौ तु पाणिनक्षत्रे, अ.

हस्तिकर्ण. हस्तिकर्णश्चोरुबूके पलाशगणभेदयोः, मे. हस्तिकर्णो रुबूके स्यात् पलाशगणभेदयोः, वि. हस्तिकर्णः स्यादेरण्डे पलाशगणभेदयो, हे.

हस्तिनी. हस्तिनी गजयोषायां जातिभेदे च योषितः, मे. हस्तिनी गजयोषायां नारीभेदे च हस्तिनी, वि.

हस्तिमल्ल. हस्तिमल्लोऽभ्रमातङ्गे शङ्खनागे विनायके, मे. हस्ति

मल्लोऽभ्रमातङ्गे हस्तिमल्लो विनायके, वि. हस्तिमल्लः सुरद्विपे। विघ्नेशे, हे. हस्तिमल्लो गजाधेत्र च, त्रि.

हा. हा विषादे च शोके च कुत्सादुःखार्थयोरपि, मे. हा विषादे च शोके च दुःखार्थेऽपि च कथ्यते, वि. हा सुखदुःखविषादेषु, हे. हा विस्मये प्रमोदे च, त्रि. हा विषादशुगर्त्तिषु, अ.

हायन. हायनो न स्त्रियां वर्षे पुंसयर्चिर्व्रीहिभेदयोः, मे. हायनोऽर्चिषि वर्षे च व्रीहिभेदे च हायनः, वि. हायनोऽर्चि र्व्रीहि र्वर्षम्, हे. अथ हायनाः। वर्षार्चिर्व्रीहिभेदाश्च, अ. हायनं वर्षमोजश्च, अने.

हार. हारो मुक्तावली युधि, मे. हारो मुक्तावली युद्धे, वि. हारस्तु मुक्तादामनि संयुगे, हे. दृष्टकादिचयो हारो हारो मुक्तागुणः स्मृतः। हारो मणिविशेषश्च हारो रजतमुच्यते, अने.

हारक. हारकः कितवे चौरे गद्यविज्ञानभेदयोः, मे, वि. हारको गद्यविज्ञानभिदोः कितवचौरयोः, हे. गद्येऽपि हारकः, त्रि.

हारि. हारिः पथिकसन्तानद्यूतादिभङ्गयोः स्त्रियाम्, मे.

हारिकण्ठ. हारिकण्ठः पिके पुंसि हारान्वितगले त्रिषु, मे. हारिकण्ठः परभृते हारान्वितगलेऽपि च, वि. हारिकण्ठो हारयुक्तकण्ठे परभृतेऽपि च, हे.

हारिद्र. हारिद्रं हरिद्रारञ्जिते त्रिषु। ना नीपवृक्षे, मे.

हारीत. हारीतो विहगान्तरे। मुनौ छद्मनि, हे. हारीतः पक्षि-भेदे सग्रान् मुनिभेदे च कैतवे, मे. हारीतः पक्षिभेदे सग्रान् मुनिभेदे-ऽपि कैतवे, वि.

हार्य. हार्यो विभीतकतरौ हर्तव्ये पुनरन्यवत्, मे, वि. हार्यः कलिद्रौ हर्तव्ये, हे.

हाल. हालो हले पुमान् हाला मदिरायां च योषिति, मे. हाला सुरायां नृपतौ च हालः, वि. हालः सातवाहनपार्थिवे। हाला सुरा-याम्, हे.

हाव. हावौ क्रन्दनविभ्रमौ, अने.

हाहा. हाहा तु खे कुङ्क दर्पे गन्धर्वेऽम्‌लनव्यये, वि.

हि. हि पादपूरणे हेतौ विशेषे त्ववधारणे। प्रश्नहेत्वपदेशे च सम्भ्रमासूययोरपि, मे. हि पादपूरणे हेतौ विशेषेऽप्यवधारणे, वि. हि हेतावधारणे। विशेषे पादपूर्तौ च, हे. हि स्याद् विशेषणे हेतौ, ह. हि हेतावधारणे, अ.

हिंसा. हिंसा चौर्यादिघातयोः, मे. हिंसा चौर्यादिवधयोः, वि. हिंसा चौर्यादिके वधे, हे. चौर्यादावपि हिंसा, ह.

